Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

*Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,*

चौखम्बा-संस्कृत-ग्रन्थमाला

ग्रन्थ-संख्या ५२

अं० १९६, २११, २३१, २३४, २८३, ३०४, ३०५, ३०७, ३११, ३२०, ३२५, ३२७, ३३१, ३३४, ३४०, ३४५, ३४८, ३६०, ३७०, ३८१, ३९६, ४०१.

कमलाकरभट्टविरचितो

निर्णयसिन्धुः

कृष्णंभट्टकृतव्याख्यासहितः।

काशीस्थराजकीयसंस्कृतपाठशालायां व्याकरणधर्मशास्त्राध्यापकेन मैथे-इत्युपाख्येन पं० गोपालशास्त्रिणा संशोधितः टिप्पण्या परिष्कृतश्च।



प्रकाशक—

जयकृष्णदास-हरिदासगुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक,

बनारस सिटी।

१९८३

श्रीगुरु शरणम् ।

प्रास्ताविकम् ।

उपक्रमः—

विदितमेवेदं सर्वेषां जनानां यच्चतुर्विधपुरुषार्थेषु धर्मोऽपर. प्रथमः पुरुषार्थः, अस्मिन् च धर्मे पुरुषार्थे सति सुलभा इतरे काम-अर्थ-मोक्षा पुरुषार्था इति । स च धर्मः कथं ज्ञातव्य इत्यत्र शास्त्रं एव प्रमाणम् । प्रत्यक्षादीनां लौकिकानामनवकाशात् धर्मस्य अलौकिकत्वात् । तदाह मीमांसासूत्रकारश्च महान् भगवान् जैमिनिः—"चोदनालक्षणोऽर्थो धर्मः" १–१–२ इति । विधिवाक्यैकगम्य इष्टार्थसाधको धर्म इति तदर्थः । विधयश्च श्रौताः स्मार्ताः पौराणाश्च । तत्र श्रौता विधयो 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादयः । स्मार्तास्तावत्—

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

इत्यादयः । पौराणाश्च—

प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि ।
दशम्यामुपवासस्य, प्रकुर्याद्वैष्णवव्रतम् ॥

इत्यादय । ते च धर्माः केन कदा कस्मै कुत्रानुष्ठेया इति निर्णयस्य श्रुतिस्मृतिपुराणेषु एकत्रानुपलब्धेरस्मादृशां मन्दधीनां कृतेऽस्य हेमाद्रिमाधवादिमतमीमांसापूर्वकं सकलसंशयोच्छेदकस्य निबन्धस्यान्वर्थनामधेयस्य निर्णयसिन्धोः किमानुपयोग इति धार्मिकाणां न तिरोहितम् ।

ग्रन्थावश्यकता ।

हेमाद्रिमाधवादिकृतेष्वन्येषु सत्स्वपि ग्रन्थेषु यथाऽनेन निबन्धेन विर-संदेहजनकप्रामाण्यसन्देहानां विचारविषया निवृत्त्या निर्णयो, तथा

न दैर्श्यते इत्यनन्यथासिद्धोऽयं नियम इति । ग्रन्थकृताऽपि प्रतिज्ञातम्—

सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥ इति ।

विषयाः ।

अयं निबन्धः स्तु परिच्छेदत्रये विभक्तः । तत्र प्रथमे परिच्छेदे [illegible]संक्रान्तीनां सामान्यतो विशेषतश्च लक्षणनिरूपणमुखेन तत्र कर्तव्याकर्तव्यनिरूपणं, तदस्तिथिनद्वैधतत्कर्तव्याकर्तव्यनिरूपणमुखेन मलमासक्षयमासाधिमासानां लक्षण-तदधिकारि-तदारम्भ-[illegible]-तदुद्यापननिरूपणं तदङ्गं प्रायश्चित्तनिरूपणं च, तत आशौ-[illegible] अनेकव्रतानां युगपत्सन्निपाते वा व्रतानुष्ठानविधिनिरूपण[illegible] इत्यादिनिर्णयविशेषनिरूपणमिष्टिदर्शपिण्डपितृयज्ञ-[illegible]निरूपणमुखेन दर्शे वार्षिकादिश्राद्धे तदनुष्ठाननिरूपणं ततो ग्रह-[illegible]कर्तव्याकर्तव्यनिरूपणमन्ते समुद्रस्नाननिरूपणमिति सामा-[illegible] कालनिर्णयः ।

द्वितीये चैत्रादिफाल्गुनान्तद्वादशमासेषु यस्मिन् पक्षे यस्यां तिथौ [illegible] वा तस्य सर्वस्यापि निरूपणं तिथिद्वैधे तद्व्यव-[illegible] विशेषः कालनिर्णयः ।

[illegible] तृतीयः परिच्छेदः । स च द्वेधा विभक्तः पूर्वार्धं [illegible] । तत्र पूर्वार्धे प्रथमं गर्भाधानादिविवाहान्ताः संस्काराः सवि-[illegible] । [illegible] गर्भिणीनरानियमाः, [illegible], [illegible] (जननाशौचे) सूतकाभावः, दत्तकपुत्रविमर्शः, [illegible], संस्कारलोपे प्रायश्चित्तं, [illegible], [illegible] पुनःसंस्कारः, अनध्यायाः, महाना-[illegible], [illegible], [illegible] [illegible], गोत्राणि, प्रवराश्च, [illegible], [illegible], [illegible], कुम्भ-[illegible], [illegible], [illegible] विवाहादिकर्तव्याकर्तव्यता,

युगपदनेकेषां समानसंस्कारः, कन्याया रजोदोषे वृषलीत्वादि, तत्र प्राय-
श्चित्तं, विवाहादौ सद्यः शौचं, पुंसः पुनर्विवाहो युगपद्दारद्वयपाणिग्रह-
णेऽग्निद्वयसंसर्गः, आधानमग्निहोत्रं परिवेदनादि प्रासङ्गिकं कर्मजातं
निरूपितम्। ततश्च जलाशयोत्सर्गं, प्रतिष्ठा, देवताप्रतिमा सरू-
जनं, पार्थिवपूजा, पञ्चायतनसन्निवेशः, केशवादिचतुर्विंशतिमूर्ति-
लक्षणानि, पुनःप्रतिष्ठा जीर्णोद्धारः, तुलसीग्रहणं, पुष्पादेः पर्यु
षितत्वं, शिवनिर्माल्यं तद्ग्राह्याग्राह्यते, कृच्छ्रादिव्रतानि कूष्माण्ड्यादि च
यथाविधि निरूपितमन्ते च कलिवर्ज्यानि सप्रमाणं निरूपितानि। उत्त
रार्धे च प्रकरणद्वयं निरूपितम्। तत्राद्यं श्राद्धप्रकरणम्। तत्रैव प्रस
ङ्गतो द्रव्यशुद्धिः, द्वादशविधाः पुत्राः, श्राद्धे वर्ज्यानि, श्राद्धकर्तृभोक्तृ-
नियमाः, श्राद्धे विप्रवमने प्रायश्चित्तम्, अशक्तादेः श्राद्धानुकल्पः,
श्राद्धभोजने प्रायश्चित्तं, श्राद्धविधौ निर्णयश्च, श्राद्धाङ्गं तर्पणं, जीवत्पि-
तृकस्याधिकारः, विभक्ताविभक्तत्वादीनि निरूपितानि। द्वितीयं त्वाशौ
चप्रकरणम्। अस्मिन् हि सर्वविधमाशौचं सापवादं निरूप्य दुर्मरणादि-
प्रायश्चित्तं दशदानानि च मदर्यान्त्येष्टिसंस्कारनिरूपणपूर्वकं भेद-अधि-
कार-पद्धति-यतिधर्मसहितः संन्यासः, आतुरसंन्यासो यतिसंस्कारश्च निरू-
पितः। एवं परिच्छेदत्रयात्मकोऽयं निबन्धः प्रायः सकलस्मार्तपौराण-
धर्मविषये श्रौतधर्मविषये च याथातथ्येन साकल्येन च निर्णायक इति।

टीका।

अस्योपरि अद्य यावदेकैव टीका रत्नमालाभिधा आडोपाह्वकृष्णभ-
ट्टविरचिता समुपलब्धाऽस्माभिरस्मिन् संस्करणे निवेशिता ग्रन्थरहस्य-
जिज्ञासूनां ज्ञानसौलभ्याय। महतीयं टीका ग्रन्थस्य सर्वतोभावेन व्या
ख्यानरूपा ग्रन्थकाठिन्यहारिणी वर्तते। अस्यामपि ग्रन्थव्याख्यानप्र-
सङ्गेन प्रासङ्गिकाः पदार्था निरूपिता वर्तन्ते। यथा नवरात्रे घटस्था-
पनविधिप्रसङ्गे सर्वतोभद्रमण्डलं, पूजनप्रसङ्गे स्नानपुण्ड्रभस्मधारणविधिः,
आचमनविधिः, पूजनेऽपराधास्तत्प्रायश्चित्तं कलिधर्माश्चेत्यादयः।

(ग्रन्थटीकाकर्त्रोः परिचयः)

अस्य महानिबन्धस्य रचयिता तत्र भवाननेकग्रन्थनिर्माता सुगृहीतनामधेयो विश्वामित्रसगोत्रो भट्टकमलाकराख्यः प्रसिद्ध एव। न खल्वेतदन्ववायोऽविदितस्तत्र लोकेऽल्पसंस्कृतज्ञानामपि, यतो भारतवर्षे चतसृष्वपि दिक्षु नैतादृशी विद्वत्परम्परा संजाता कस्मिंश्चिदप्येकस्मिन्नेव कुलेऽविच्छेदेन, यादृश्यनवच्छिन्नविद्वत्परम्परा पुत्रपौत्रादिक्रमेणैतस्मिन् भट्टकुले दृश्यते। अनेन कमलाकरभट्टेन धर्मशास्त्रेऽन्येऽपि आचारदीपः आह्निकप्रयोगो गयाकृत्यं दानकमलाकरः गोत्रप्रवरदर्पणं पूर्तकमलाकरः व्रतकमलाकर शान्तिकमलाकरः समयकमलाकरः संस्कारकमलाकरः मन्त्रकमलाकरः नीतिकमलाकर प्रायश्चित्तरत्नं शूद्रधर्मतत्त्वं कर्मविपाकरत्न विवादताण्डवश्चेत्यादयो ग्रन्था आरचिता.; पूर्वमीमांसायां मीमांसासूत्राणां व्याख्याने धर्मतत्त्वं शास्त्रमाला वा, तन्त्रवार्तिकटीका, शास्त्रदीपिकाटीका शास्त्रदीपिकालोकश्च; काव्यसाहित्ये काव्यप्रकाशव्याख्या, गीतगोविन्दभाष्यं रत्नमालाभिधं, रामकौतुकमहाकाव्यं चेत्यादयो बहवः प्रसिद्धा ग्रन्था रचिता वर्तन्ते।

अनेन ग्रन्थकृताऽयं ग्रन्थः १६६८ तमे वैक्रमे रौद्रे संवत्सरे माघमासे कृष्णपक्षे शिवरात्र्यां चतुर्दशीतिथौ पूर्णतां गमित इति तदन्त्यश्लोकेन निश्चीयते। यथा—

वसुऋतुऋतुभूमिते गतेऽब्दे
नरपतिविक्रमतोऽथ याति रौद्रे।
तपसि शिवतिथौ समापितोऽयं
रघुपतिपादसरोरुहेऽर्पितश्च ॥ इति।

अस्य खलु माता उमा, पिता भट्टश्रीरामकृष्णः, ज्येष्ठो भ्राता च दिनकरभट्ट आसन्। रामकृष्णभट्टस्य पिता नारायणभट्टः तत्पिता रामेश्वरभट्टः तत्पिता गोविन्दभट्टः तत्पिता अनन्तदेवभट्टः तत्पिता च नागनाथभट्ट इति पितृपरम्परा तद्वंश्यपदटीकाकृतो निर्णीता। तथा

प्रकृतग्रन्थमङ्गलाचरणे—

"वेदार्थधर्मरक्षार्थं मायामानुषरूपिणम् ।
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥
यत्पादसंस्मृतिः सर्वमङ्गलानिभूर्मना ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान्नुमः ॥
सर्वकल्याणसंदोहनिदानं यत्पदद्वयम् ।
श्रुनदीमोदरीमम्बामुमाख्यां नौमि मातरम् ॥
पिन्दुमाधवपादाब्जरोलम्बीकृतविग्रहम् ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥

श्रीमित्रार यणभट्टकृतवृत्तरत्नाकरटीकायां —

भट्टश्रीनागनाथात्समजनि विबुधश्चाङ्गदेव स्तभट्टः
मासोष्टासौ तनूज रघुपतिनिरतं भट्टगोविन्दमस्तात् ॥
विश्वामित्रान्ववायाम्बुधिविधुरभिकं यस्य तत्तनूजो
विद्याब्धी रत्नपारः माधितभुवना भट्टरामेश्वराख्यः ॥
नारायणेन सुधिया काश्यां निवसता सता ।
वृत्तरत्नाकरे टीका तद्भुवा रचिताऽस्थिता ॥ इति ।

टीकानिर्माता च आर्द्रे इत्युपनामा कृष्णशर्मा वर्तते इत्यवोचम् । नेनापि बहवः प्रसिद्धा महान्तो ग्रन्था न्यायशास्त्रे रचिता वर्तन्ते । धर्मशास्त्रे एतादृश उपलभ्यते । न्यायशास्त्रे च इ. सप्तविधा ग्रन्था उपलभ्यन्ते प्रकृतग्रन्थकर्तृरचिताः । अस्य माता मला, पिता रामनाथो, ज्येष्ठो भ्राता नारायणः गुरुश्च हरिरासीत् इति तदीयमङ्गलाचरणेन ज्ञायते । अयं खलु प्रथमपरिच्छेदान्तिमश्लोकेन एकोनविंशतिशतकस्य तृतीये भागे संजात इति ज्ञायते । यथा—

गुणरसेभमनाथमिताकरकाधिकनभस्य सितेऽष्टमिकर्मणि ।
गुरुगुरावखिलस्वपुमूलजित् प्रथमनिर्णयसिन्धुरहिष्पदम् ॥
तदेवं बहुशः संशितप्रमाणन्यायेन निर्णयसिन्धो टीकस्य कृ

वंशवृत्तः

भट्ट श्रीनागनाथ
|
अङ्गदेव भट्ट
|
भट्ट गोविन्द
|
दिवाकर भट्ट — रामेश्वर भट्ट
|
अनन्त भट्ट (दिवाकर भट्ट के पुत्र) — भट्ट नारायण (१६०२ वै०) (रामेश्वर भट्ट के पुत्र)
|
भट्ट रामकृष्ण (धर्मपत्नी उमा)
|
भट्ट कमलाकर (१६१६) — दिवाकरःज्येष्ठः

सटीकनिर्णयसिन्धुविषयसूची ।

(१) 'कन्दे' (२)' कोद' इति महाराष्ट्र प्रसिद्धम्

विषयानुक्रमः ।

इति प्रथम परिच्छेदः ।

श्रीः ।

द्वितीयपरिच्छेदः ।

विषयानुक्रमः ।

इति द्वितीयपरिच्छेदानुक्रमणिका ।

सटीकनिर्णयसिन्धुतृतीयपरिच्छेदः

विषयानुक्रमणिका ।

विषयानुक्रमः ।

इति तत्र वेदि ।

अथाशौचप्रकरणम् ।

[illegible]	[illegible]		[illegible]	[illegible]	
[illegible]	१०१२	[illegible]	[illegible]	१०११	[illegible]
[illegible]			[illegible]	१०११	[illegible]
[illegible]	१०१२	[illegible]	[illegible]	१०११	[illegible]
[illegible]	१०१२	१०	[illegible]	१०१०	[illegible]
[illegible]	१०१२	११	[illegible]		
[illegible]	१०१२	[illegible]	[illegible]	१०१०	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]		
[illegible]			[illegible]		
[illegible]	[illegible]	[illegible]	[illegible]	१०११	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	१०११	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	१०११	[illegible]
[illegible]			[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]			[illegible]		
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]			[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]		
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]			[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]			[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]			[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]			[illegible]		
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

विषयानुक्रमः ।

इति सपिण्डीकरणम्।

प्रथमाब्दकर्तव्यादीनि।

इति श्रीसटीकनिर्णयसिन्धुविषयानुक्रमणिका समाप्ता ।

ॐनमः सद्गुरवे माधवाय ।

सव्याख्ये निर्णयसिन्धौ

प्रथमःपरिच्छेदः

मङ्गलाचरणम् ।

*कारुण्यैकनिकेतं रामं सीतालक्ष्मणयुतम् ॥
विश्वामित्राव्ययाध्वरनिस्तमोऽस्म्यपरागिरं वन्दे ॥१॥
*लक्ष्मीसदनं कल्पद्रुमतलं रञ्जितगोकुलम् ॥

श्रीगणेशाय नमः ॥

लक्ष्मीनारायणं नत्वा पितरौ च गुरूनपि ॥
कृष्णशर्मा वितनुते सारार्थां सिन्धुदीपिकाम् ॥ १ ॥
कमलाभू राङ्गनाथिः कृष्णो नारायणानुजः ॥
अपि निर्णयसिन्धावह संशयध्वान्तनाशिनीम् ॥ २ ॥

विघ्नध्वंसार्थं कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति–कारुण्ये ति । अन्वयार्थो स्पष्टः । प्रणतिर्लक्षिता, प्रतानत्वात् । उभयतोऽलमा- द्यपुत्रताग्निरूपकं चेद् समस्तदेशविवर्धि । पद्यस्यात्र सीताल- क्ष्मणयुतो रामशास्त्री स्वकुललतासमालम्ब इति न लभ्यते इत्य- भवन्मतयोगः, तथाऽपि नमस्कार्यतामयोजकरूपानन्तःपातिनस्ताह- शममालम्बस्य चन्द्रमोपपादकतया ऽभिधानात्तद्विधेयतायापतादप- योग दोषः ॥ १ ॥

विघ्नबाहुल्यादिसम्भावनाया अवर्जनीयतया तद्विधूननाय मङ्गलान्तरमाह–लक्ष्मीति । सदनम्—स्वरूपम् । 'अथ:स्वरूप-

इति श्रीसटीकनिर्णयसिन्धुविषयानुक्रमणिका समाप्ता ।

ॐनमः सद्गुरवे माधवाय ।

सव्याख्येनिर्णयसिन्धौ

प्रथमःपरिच्छेदः

मङ्गलाचरणम् ।

*कारुण्यैकनिकेतनं रामं सीतालतायुतम् ॥
विश्वामित्रान्ववायप्रततिसमालम्बशाखिनं वन्दे ॥१॥
*लक्ष्मीसहायं कल्पद्रु*मलं रञ्जितगोकुलम् ॥

श्रीगणेशाय नमः ॥

लक्ष्मीनारायणं नत्वा पितरौ च गुरूनपि ॥
कृष्णशर्मा वितनुते सारार्थां सिन्धुदीपिकाम् ॥ १ ॥
कमलाभू रामनाथिः कृष्णो नारायणानुजः ॥
अधिनिर्णयसिन्ध्वाह सेतौ ध्वान्तनाशिनीम् ॥ २ ॥

विघ्नध्वंसार्थं कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—कारुण्येति । अन्ववायो वंशः । प्रततिर्लता, प्रतानवत्त्वात् । उभयतोलनाद्व्यपुक्तशास्त्ररूपकं चेदं समस्तदेशविवर्ति । यद्यप्यत्र सीतालतायुक्तो राघवशाखी स्वकुललतासमालम्ब इति न लभ्यते इत्यभवन्मतयोगः, तथाऽपि नवरक्तार्यतामयोमफरूपानन्तःपातिनरसादसमालम्बस्य धन्यतोपपादकतया ऽभिधानाद्विधेयतायामतात्पर्यीय दोषः ॥ १ ॥

विघ्नबाहुल्यादिसम्भावनाया अवर्जनीयतया तद्विधूननाय मङ्गलान्तरमाह—लक्ष्मीति । तलम्—स्वरूपम् । 'अपःस्वरूप-

बर्हापीडं घनश्यामं महः किञ्चिदुपास्महे ॥ २ ॥
*वेदार्थधर्मरक्षार्थं मायामानुषरूपिणम् ॥
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥ ३ ॥
यत्पादसंस्मृतिः सर्व*मङ्गलप्रतिभूर्मता ॥
तान् भट्टरामकृष्णाख्यान् *श्रीतातचरणान्नुमः ॥ ४ ॥
सर्वकल्याणसन्दोहनिदानं यत्पदद्वयम् ॥
द्युनदीसोदरीमम्बामुमाख्यां नौमि सादरम् ॥ ५ ॥

योऽस्तलम्' इति कोशात् । कल्पद्रुत्वाभिधानं चाचिन्त्यमहिमव्यञ्जकम् । कल्पद्रुस्तलमधो यस्येति वा । मुक्तेरपि दातृत्वात् । रञ्जितं गोकुलमिति सुगमम् । 'तलरञ्जितगोकुलम्' इति पाठे कल्पवृक्षै रञ्जितं गोकुलं येनेति । तत्र कल्पवृक्षा गोकुले वर्त्तन्ते । श्रीभगवानेव कल्पवृक्ष इति तु वस्तुगतिः । 'कल्पद्रुतरलं जितगोकुलम्' इति पाठे कल्पद्रुस्तरलो येनेति उक्तहेतोर्जितमायत्तं गोकुलं यस्येति बोध्यम् ।

स्वस्य धर्मज्ञत्वमवगमयितुं धार्मिकपरम्परितत्वमाह—वेदार्थेति । मायामानुषरूपिणं हरिमिति न्यूनाभेदरूपकम् ।

मङ्गलेति । यद्यपि नमस्क्रियाया एव मङ्गलत्वं न तु स्तुतेः, विघ्नध्वंसार्थविहितसुवर्णदानादिवत्, तथाऽपि तत्तुल्यत्वमस्तीत्येवमर्थं प्रतिभूपदम् । पितृपादस्तुतिश्च तदन्तर्गतनतिरूपेति मङ्गलरूपत्वम् । सर्वोत्कृष्टत्वज्ञापको व्यापारः स्तुतिः, स्वोत्कर्षज्ञापकः ॥ नतिरिति भेदः । श्रीतातेति । यद्यपि चरणशब्दस्य राजपुङ्गवादिशब्दवन्न पूर्वपदार्थगतश्रैष्ठ्यमर्थः ।

'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥'

इत्यनुशासने तदनुक्तेः, साजात्यासम्भवात्, तथा समासाननुशासनाच्च । नापि 'गुरुचरणा आहुः' इतिवत्क्रियाकारकत्वारोपः । तन्न क्रियान्वयाभावात् । तथाऽपीह चरण-

विन्दुमाधवपादाब्जरोलम्बीकृतविग्रहम् ॥
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥ ६ ॥
०हेमाद्रिमाधवमते प्रविचार्य सम्य-
गालोच्य तत्त्वमथ *तीर्थकृतां परेषाम् ॥
श्रीरामकृष्णतनयः कमलाकराख्यः
काले* यथामति विनिर्णयमातनोति ॥ ७ ॥
सन्ति यद्यपि विद्वांसस्तदीयग्रन्थाश्च कोटिशः ॥

नात्वपेता बोध्यः । अथैवं कर्मधारये तातबहुत्वलाभाद्विरुद्धमति-कत्वं दुर्वारम् । नैवम् । काण्डमीमांसामांसलमनसामेव तथा मतिः, न तु वेदमीमांसामांसलमनीनाम् । तेषां पुनर्गौरवस्यैव चरणशब्दस्व-रूपेण लाभात् । यद्वा 'नागाद्याः' इत्याद्यपदेन 'पादपद्मनन्ताद्याः' इति क्षीरस्वामिवचनात्पादचरणादिशब्दानामपि श्रेष्ठार्थकत्वम् । तदु-क्तनाविशेषस्फोरकं च बहुवचनम् । केचित्तु चरणयोरेव तदा-ख्यामारोप्य द्वित्वे इति बहुभिर्विकल्पाविवक्षया बहुवचनम्, यत्पादेति कर्मधारय इत्याहुः । 'तं भट्टरामकृष्णाख्यं श्रीतातं सादरं नुमः' इति तु रमणीयम् ।

स्वमतमल्पोपितत्वशङ्कां निरस्यन्नेव प्राचीनग्रन्थैरन्यथाभि-हितशङ्कां परिहरति—हेमाद्रीति । तीर्थम्-शास्त्रम् । तथा च हे-माद्र्यादिमतस्यैव प्रामाणिकत्वं परिहृत्यैतावतानामन्यथासिद्धिरिति भावः । कालानङ्गीकर्तृमाद्दवनिरासार्थं काले इति । वैधविक आधारः । ज्योतिःशास्त्रादौ स्वरूपतो निर्णीतस्यापि 'सायं जुहो-ति' इतिवत् 'चतुर्थ्यां पूजयेद्देवम्' इत्यादिनाऽधिकरणसप्तमीवशाद्द्रव्य-स्य विनायकपूजाद्यङ्गत्वस्य चतुर्थ्यां दिनद्वयसत्त्वे संशयः स्यादिति तस्याः पूर्वत्वादिनाऽप्यङ्गत्वं निर्णीयत इत्यर्थः । तादृशनिर्णयस्य क्वचि-देकतरकोटेः साधकस्य, क्वचित्तु बाधकस्योपन्यासेन । तच्च साधकं बाधकं च द्विविधम्, न्यायवचनभेदादिति तत्सर्वं मद्दर्पणे इति भावः ।

तथाऽप्यमुष्य *वैदग्ध्यीं केचिद्विज्ञातुमीशते ॥ ८ ॥

तत्र *संक्षेपतः कालः पोढा–अब्दो, ऽयनम्, ऋतुः, मासः, पक्षो, दिवस इति।

तत्राब्दो *माधवमते पञ्चधा*– सावनः, सौरः, चान्द्रो, नाक्षत्रो, बार्हस्पत्य इति । गुरोर्मध्यमरा·

वैदग्ध्यीमिति । निर्णयकमलाकरतया निर्णया उन्मज्जन्त्येव । विषयसंशयजनकतद्प्रामाण्यसन्देहभञ्जकानि विशेपदर्शनानि तु संख्यावतामेव प्रतिभासन्ते इति व्यञ्जनाय । तत्र–न्यायवचनाभ्यो निश्चितव्येऽङ्गत्वे । संक्षेपत इति । यद्यपि साक्षाद्याप्येन विभागे सम्भवति परम्परासाधारण्येन सोऽमङ्गलः, कलाकाष्ठादिनाऽपि तत्प्राप्तेरिति प्रथमतो जन्यत्वनित्यत्वाभ्यामेव विभागो वाच्यः, तथाऽपि नित्यस्य तस्य कर्मानङ्गत्वात्त्यागः। कर्मादौ तत्स्मरणस्यै· वाङ्गत्वात् स्मृतिद्वाराऽपि तस्याङ्गत्वे मानाभावात् ।

माधवमते इति । एवमादिप्राचीनग्रन्थतत्कर्तृनामलेखनं च माधवः स्वोत्प्रेक्षामूलकत्वशङ्कानिराकरणाय । स्वानभिमते तु अरुचिं दर्शयामः । पञ्चधेति । तथा चोक्तं माधवेनैव–

'सौरबृहस्पतिसावनशशधरनाक्षत्रिकाः क्रमेण स्युः । मतल(३६५)–पतला(३६१)–ऽतल(३६०)–वमल(३५४)–वरगाश्च(३२४)वत्सराः पञ्च'इति । मतलधाऽवरगाः क्रमेण पञ्चपञ्चैकशून्यचतुर्द्विषष्ट्यर्थकाः। अङ्कानां च वामतो गतिः। अत्रारुचिं दर्शयन्नेवाऽऽह–हेमाद्रिस्त्विति*। अत्र सावनादीनामनियमेन ग्रहणं तु न शङ्क्यम् । यतो यत्र तिथिविशेषस्तं स्पष्टं लिङ्गम्, यथा–

'वसन्ते किंशुकाशोकशोभिते प्रतिपत्तिथिः ।
शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः' ॥

इत्यादौ शुक्लप्रतिपत् । तत्र–

'तत्पादपङ्के तिलकं कुर्याच्चन्दनपङ्कजम् ।

...सोऽयं चान्द्रमसः । स च ज्योतिःशास्त्रे प्रसि-
। तत्रैतादृशस्य चान्द्रस्य प्रयोगाभावात् स्मार्तानामुपयोगाभावात् एव

ततः प्रभृत्युदितं तिथ्यादिकं ध्रुवम् ॥
चान्द्रं संवत्सरं चान्द्रमासैरेव समाचरेत्' ।

इत्यादिनिबन्धवचनात् । यथा वा 'शुक्लपक्षे चतुर्दश्याम्'इत्या-
'न्व दद्यात् पक्ष च'इति संवत्सरव्रताभिप्रायेणोक्तमिदं शुक्ल-
दिकादि । तत्रोभयत्रापि चान्द्र एव संवत्सरः ।

यत्र वा वैशम्पायने 'गोपवासो वर्षमिष'इत्यादौ संक-
तं तत्र 'कृत्वा व्रतं वत्सरमेकमादौ सङ्क्रमेषु निषेध्य च
पि सम्य'इति संवत्सरप्रकरणे शुक्लपक्षाभिधाने, यत्र वा 'अयने वि-
। एव विशालोपयोगिनो नर'इत्यादि अयनादिरूपं तत्र 'एवं
त्सरे पूर्णे कुर्यादुद्यापनविधिम्'इति वाक्यशेषान्ययनादिरूपे,
संवत्सरः सौर एव ।

यत्र तु "सांवत्सरं वै संवत्सरो, य एवं विद्वांसः सं-
त्सरमुपयन्ति"इत्यादौ गवामयनस्य संवत्सरशब्देन व्यव-
सांवत्सरकालस्य तदङ्गत्वमर्गाणां अभिप्लवषडहचतुष्टयक-
उपषडहयोः सावनैकमाससमाप्ययोः सांवत्सरिकीणां द्वादशाहषो-
चान्द्रमासारम्भावनिर्वर्त्तनम्, तत्र पारिशेष्यात्सावन एवा-
। एवम्—

"षडहं मासमेकं त्र्यहमद्याद्याचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विजः" ॥

इति द्वादशाहोरात्रसाध्यानां प्राजापत्यानां षट्पञ्चाशत्रयरूपं
दशाब्दं तस्य चान्द्रमासारम्भाद्यनुष्ठानासम्भवात्सावन एवाब्दः ।
वं द्वादशाब्दादिस्थाने व्रताब्दादावपि । यथा पराकादिमि-
... पराकषडब्दं त्र्यब्दं प्राजापत्यं षडब्दं चेति,
द्वादशाब्दानपेक्षायामपि सावन एव व्रताब्दः । अत एव

विधा आह । तत्र वक्ष्यमाणैः *सावनादिद्वादशमासैः संवत्सरः । मलमासे तु सति षष्टिदिनात्मक एको मास इति द्वादशमासत्वमविरुद्धम् । तथाच व्यासः- 'षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः' इति ।

तत्र चान्द्रोऽब्दः षष्टिभेदः । तदाह गार्ग्यः—

'प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥

मलमासस्यैव दक्षिणा मुख्या, नान्यस्येति सिद्धान्तः । तथा अन्यत्रानुक्तत्वात् । एवं यत्र "सावनेनैव कर्तव्या सत्रूणां चाप्युपासना" इतिसत्रपाठकादौ विशेषवचनम्, तत्रापि सावन एव ।

एवं च यत्र विशेषतो न लिङ्गादि तत्रेच्छया विकल्पः । यथा 'एताः संहिता नानन्तेवासिने सम्वत्सरवासिने' इतिब्रह्मनिरुक्तमुपनिषद्गुरुकुलवासादौ । *धर्मेति । अथ मासवत्सरादौ प्रयोगात् माऽस्तु धर्मशास्त्रे तत्र पक्षः, 'गौणवत्सरे सिंहगे गुरौ' इत्यादौ अपेक्षणात्तु बार्हस्पत्य एवं कार्यमिति चेत् । तिलकव्रतादौ हि चान्द्रादेर्वत्सरस्य ग्रहणसमिष्टम्, न तु क्वापि कर्मणि बार्हस्पत्यस्य तत् । 'सिंहे गुरौ' इत्येव श्रवणात् । यदपि—

"गुर्वादित्यमण्डलमतिदीनो यथान्द्रस्मरः ।
सर्वेरेव्वपरस्पर्धिपत्काले सबर्षणम् ॥
वर्जनीयाः प्रयत्नेन यतिष्ठाः सर्वाणिनाम् ।
ग्रहणमतानिवर्हितलब्धेऽस्याद्गुणविवक्षया" ॥

इत्युक्तमतिवर्तं, तदपि बार्हस्पत्यस्य संवत्सरस्याग्रातेऽपि सत्यमाग तदा गुरुकेन्द्रस्थेऽपि चान्द्र एव बृहस्पतिमसादिकृतागतया मार्ग सदाऽस्मिन्तत्र कालादि च न कार्यमित्यर्थकवितिन कश्चिद्दोषः । *सावनादीति । विविधतद्रूपद्वादिमासैरब्दमपि द्रष्टव्यम् ।

ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवोऽव्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलम्बी विलम्बोऽथ विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥
प्लवङ्गः कीलकः सौम्यः साधारण(१)विरोधकृत् ।
परिधावी प्रमादी च आनन्दो राक्षसोऽनलः ॥
पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः' ॥ इति ।

तत्रापि उक्तमिदं गुरोर्मध्यमराशिभोगेन प्रभवादीनां चान्द्रादौ प्रवृत्तिकथनात्, तथाऽपि प्रभवादीनां चान्द्रत्वमस्त्येव । 'चान्द्राणां प्रभवादीनां पञ्चके पञ्च-

अन्यथा "मृगादौ तु वर्षं च मलिमासं तु वर्जयेत्" इतिवचनस्य ज्ञानमात्रेण आदिवकर्ष अतिवचनेन बाधापत्तेः । लिङ्गाभावेन चान्द्रसौरयोरन्यतरत्वासम्भवादन्यतरपक्षस्वीकारेऽतिशयाभावतया तावत्त्व च निश्चयासम्भवात् । प्रभवादीनां चान्द्रत्वप्रामाणिकत्वं दर्शयितुं—चान्द्राणामिति । मध्यमगत्या गुरोः राशेः भुक्तिः । प्रत्यहं पञ्चकस्य गुरोर्गतिरित्यर्थः । भोगेनेति प्रभवादयः, न तु सर्वदा असम्भवात् । चान्द्रप्रभवादीनामित्यादिपदं विभवादेः फाल्गुनादिप्रवृत्तिसूचकं ।

"तपसि खलु यदाऽसावुद्गतं याति मासि
प्रथममुदयमानः सन् भागवे वासवेऽपः ॥
लिपिमुपगतः वर्षमिन्द्रे वरिष्ठः .

(१) इह दुर्लभपाठक्रम, साधारणमादिनो विरोधकृदिति ... पा ।

के युगे'* इति माधवोक्तेः । तेन चान्द्रः प्रभ-
चादिश्चैत्रसिते प्रवर्तते । बार्हस्पत्यस्तु माघादौ ।
तयोर्विनियोगो ज्योतिर्निबन्धे ब्रह्मसिद्धान्ते-

'व्यावहारिकसंज्ञोऽयं कालः स्मृत्यादिकर्मसु ।
योज्यः सर्वत्र तत्रापि जैवो वा नर्मदोत्तरे' ॥

आर्ष्टिषेणः—

*'स्मरेत्सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा ।
नान्यं *यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता' ॥ इति।

अयननिर्णयः । अयनं तु *सौरर्तुत्रयात्मकम्।
'सौरर्तुत्रितयं प्रदिष्टमयनम्' इति दीपिकोक्तेः । तद्द्विवि-
धम्-दक्षिणमुत्तरं चेति । कर्कसंक्रान्तिर्दक्षिणायनम्,
मकरेऽन्यम् ।

अनयोर्विनियोगमाह मदनरत्ने सत्यव्रतः-
'देवताऽऽरामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ ।

प्रभव इति स नाम्ना जायतेऽब्दस्तदानीम्" ॥
इत्युपक्रम्य
"इयं हि षष्टिः परिवत्सराणां बृहस्पतेर्मध्यमराशिभोगात् ।
उदाहृता पूर्वमुनिप्रवर्यैर्नियोजनीया गणना क्रमेण" ॥
इत्युपसंहारात् । *युग इति ।
संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इदा वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ॥
इद्वत्सरः पञ्चमस्तु तत्सङ्घो युगसंज्ञकः" ॥ इत्युक्तेः ।
'जैवो वा'इति वाकारोऽरुचिसूचनाय । को व्याव-
रिकसंज्ञकः काल इत्यत आह-*स्मरेदिति । *यस्मादिति चै-
त्रादिर्मुख्य इत्येतदर्थम्, न [illegible] कृष्णादेः कर्मानङ्गत्वार्थम्
अनेकवचनविरोधात् । *सौरेति मासातिदेशप्राप्तचान्द्र

दक्षिणाशामुखं कुर्वंस्तत्फलमवाप्नुयात्' ॥

वैखानसः—

*'मातृभैरववाराहनरसिंहत्रिविक्रमाः ॥
महिषासुरहन्त्र्यश्च स्थाप्या वै दक्षिणायने' ॥

वैखानसोऽप्ययं, न तु दक्षिणायन एवेति नियमः । पूर्ववचने दक्षिणायने निषिद्धाया देवप्रतिष्ठाया देवविशेषे प्रतिप्रसवमात्रात् ।

रत्नमालायाम्—

'*गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम् ।
सौम्यायने कर्म शुभं विधेयं
यद्गर्हितं तत्खलु दक्षिणे च' ॥ इति ।

अस्यापवादः काशीखण्डे—

*'सदा कृतयुगं चास्तु सदा चास्तूत्तरायणम् ।
सदा महोदयश्चास्तु काश्यां निवसतां सताम्'* ॥

इत्ययनम् ॥

ऋतुनिर्णयः । चातुर्मासद्वयात्मा । मलमासे तु मासद्वयात्मक एको मासः, तेन मासद्वयात्मकत्वमविरुद्धम् । स द्वेधा चान्द्रः सौरश्च । 'चैत्रारम्भो वसन्तादिश्चान्द्रः । मीनारम्भो, मेषारम्भो वा सौरः । *'मी-

---

स्यादित्युदासार्थम् । *मातृ इति उग्रकर्मोपलक्षणम् ।

"उग्रे कर्मणि सौम्ये च स्यातामयने दक्षिणोत्तरे"

इति माधवोक्तेः । तदेवाह—*गृहेति । *सदा कृतेत्यादि अपवादत्वाभ्युपगमवादः । अस्तित्वाशीर्लोटः कृतयुगादिकार्यप्रापकत्वात् । *सतामिति निगूढदुर्वृत्तानां भासमानसाधुभावानां व्यावृत्तिः ।

*मीनेति । एतदनुसारेणोत्तरे ग्रीष्मादयो विकल्प्यन्ते ।

नमेषयोर्मेषवृषयोर्वा वसन्तः' इति बौधायनोक्तेः।
अनयोर्विनियोगमाह त्रिकाण्डमण्डनः–

'श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रमसर्तुषु।
*तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्'॥

स द्विविधोऽपि षोढा। वसन्तो, ग्रीष्मो, वर्षाः,
शरद्, हेमन्तः, शिशिरः। इत्यृतुः॥

मासनिर्णयः। मासश्चतुर्धा। सावनः, सौरः, चा-

तदभावे तु इति सौरर्तुगौणत्वार्थम्। एवं कृष्णादिमासानां गौण-
त्वात्तद्घटितमासद्वयात्मकर्तूनामपि गौणत्वं द्रष्टव्यम्। एवं च "वसन्ते
ब्राह्मणोऽग्निमादधीत" इत्यादौ नानैव वाक्यार्थः। अन्यथा मुख्यर्तु-
गौणत्वविवेचनवैयर्थ्यात्। तत्र मुख्यवाक्यार्थे शुक्लादिचान्द्रमासद्वय-
घटितो मुख्य एव वसन्तः। कृष्णादिचान्द्रमासद्वयघटितस्य वसन्त-
पदार्थस्य गौणत्वात्. सौरमासद्वयघटितस्य तस्य गौणतरत्वात्।
मुख्यासम्भवे गौणवाक्यार्थो ऽवलम्बनीयः।

"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्"॥

इतिमनुवचनात्। एवं च 'श्रौतस्मार्तक्रियाः' इत्यत्र श्रौतस्य
सङ्गच्छते। "चान्द्रमासर्तुषु" इत्यत्र चान्द्रमुख्यगौणर्तुभ्यां गौ-
णमुख्यभावोऽपि विवक्षितः। अन्यथा सौरर्तुना गौणभाव-
प्रदर्शनासङ्गतेः। एवं शरदादिपदेऽपि। एवं च–

"मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति"।

"नवमिश्रं तु षड्ऋतून्" इत्यादौ ऋतुग्रहणत्वेन मुख्यचान्द्र-
मग्रहणे मृताहे श्राद्धं न स्यादिति मृततिथौ मृततिथि या
च्चान्द्रो मासः, तद्युग्मं च ऋतुरिति तत्र मासानां गौणत्वे
ऋतुपदं गौणमेव। अस्तु वा तत्र ऋतुपदं मुख्यचान्द्रमासद्वय-
परतया मुख्यमेव। मृताहकर्तव्यत्वं च–

[illegible] । अथ संस्कारैः सं-
[illegible] ।

[illegible]

[illegible] । एवं सं-
[illegible]
[illegible] । एवं [illegible] सं-
[illegible] ॥

[illegible] संस्कारनिर्णय उच्यते । तत्र—

[illegible] तु [illegible] तु [illegible]' ।

[illegible] । तथा च [illegible]
[illegible] । [illegible]
[illegible] ।

[illegible] । तत्र पूर्व[illegible]-
[illegible] । [illegible] इति
[illegible]
[illegible]: पूर्वोक्तः कालो ग्राह्यः । न च यावता का-
[illegible]पूर्वापरौ [illegible] । स एव च
। [illegible] विधिनिषेधयोरिति [illegible] । स च [illegible]-
[illegible]: [illegible] ।

'अर्धरात्रातीते भोगे नाड्यः पञ्चदश स्मृताः' ।

[illegible]स्मृतेः । एवं न—

'संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ।

'पूर्वतोऽपि परतोऽपि संक्रमात्
पुण्यकालघटिकास्तु षोडश'*–

इति सामान्यतः पुण्यकालः सर्वत्रोक्तः। विशेषस्तूच्यते। अत्र मामकाः संग्रहश्लोकाः–

'प्रागूर्ध्वा दश, पूर्वमः षडयनि, स्नस्तपराः, पूर्वतस्त्रिंशत्, षोडश पूर्वतो, ऽथ परतः, पूर्वाः पराः स्युर्दश।
पूर्वाः षोडश, चोत्तरा ऋतुभुवः, पश्चात् खवेदाः, पुनः पूर्वाः षोडश, चोत्तराः पुनरथो पुण्यास्तु मेषादितः' इति॥

अस्यार्थः—मेषे प्रागूर्ध्वं च दश घटिकाः पुण्यकालः। वृषे पूर्वाः षोडश। मिथुने पराः षोडश। कर्के पूर्वास्त्रिंशत्। सिंहे पूर्वाः षोडश। कन्यायां पराः षोडश। तुलायां प्रागूर्ध्वा दश। वृश्चिके पूर्वाः षोडश। धनुषि पराः षोडश। मकरे चत्वारिंशत्पराः। इदं च हेमाद्रिमतेनोक्तम्। माधवमते त्वत्र परा विंशतिः पुण्याः। कुम्भे पूर्वाः षोडश। मीने पराः षोडशेति।

'याऽप्युत्तरा पुण्यतमा मयोक्ता
*सायं भवेत्सा यदि साऽपि पूर्वा।
पूर्वा तु योक्ता यदि सा विभाते*
तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः' ॥

इतिवचनस्य पूर्वं त्रिंशत् परं च त्रिंशदिति व्याख्यानमनादेयम्। पूर्वापरं मिलित्वा त्रिंशदित्यस्यैव युक्तत्वात्। यदि कदाचित्कालिकरविमण्डलवशात् भवेत्र एकघट्याधिक्यमपेक्षते तदाभिप्रायेणाह–*षोडशेति। *सायं–सूर्यास्तात् प्राक्। वक्ष्यति माघे 'यदा तु सूर्यास्तात्प्राक्' इति। *विभाते–उदयोत्तरम्। वक्ष्यति च श्रावणे

मध्यरात्रात् रात्रिसंक्रमणः स्यात् ॥
अर्वाक् निशीथाद्यदि संक्रमः स्यात्
पूर्वेऽह्नि पुण्यं परतः परेऽह्नि ।
मध्यनिशायामथवैव पुण्यं
निशीथमध्ये तु दिनद्वयं स्यात् ॥
कर्कं प्रविष्टेंऽशुमालिनि सूर्ये
दिनान्त्यघटिकात्रयात्परार्कः ।
मृगः प्रदोषे यदि चार्धरात्रे
परेऽह्नि पुण्यं त्वथ कर्कटेऽमुम् ॥
प्रभातकाले यदि वा निशीथे
पूर्वेऽह्नि पुण्यं निगदन्ति माधवार्याः' ॥

अत्र मूलवचनानि माधवापरार्कहेमाद्र्यादिषु द्रष्टव्यानि ।

सर्वासु संक्रान्तिषु दानविशेषो हेमाद्रौ दानखण्डे उक्तः ।

विश्वामित्रः–

'मेषसंक्रमणे भानोर्मेषदानं महाफलम् ।
वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ॥
वस्त्रान्नपानदानानि मिथुने विहितानि तु ।
घृतधेनुप्रदानं च कर्कटेऽपि विशिष्यते ॥
ससुवर्णं छत्रदानं सिंहेऽपि विहितं सदा ।
कन्याप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥
तुलाप्रवेशे तिलानां(धान्यानां)गोरसानामपीष्टदम् ।
वृश्चिकस्थिते भानौ दीपदानं महाफलम् ॥
(अमरौ पूर्विकः) ।
धनुःप्रवेशे वस्त्राणां यानानां च महाफलम् ।

झषप्रवेशे दारूणां दानमग्नेस्तथैव च ॥
कुम्भप्रवेशे दानं तु गवामम्बुतृणस्य च।
मीनप्रवेशे स्थानानां मालानामपि चोत्तमम्' ॥इति
अत्रोपवासमाह हेमाद्रावापस्तम्बः-

'सूर्योदयोत्तरं संक्रमेत्तु'इति। मूलवचनानि—

'मध्ये तु विषुवे पुण्यं प्राग्विष्ण्वांदक्षिणायने।
षडशीतिमुखेऽतीते ह्यतीते चोत्तरायणे' ॥

इत्यादीनि, 'अह्नि संक्रमणे पुण्यम्'इत्याद्यग्रिमाणि च। अत्र उभयतः प्रत्येकस्य षोडशत्वादेः—

'वर्तमाने तुलामेषे नाड्यस्तूभयतो दश'।

इति विषुवयोरपवादः, विष्णुपदीषु पूर्वत एव, षडशीत्यास्येषु परत एवेति च नियम इति केचित्।

वस्तुतस्तु सर्वसंक्रान्तिषु भोगसाम्येन व्यवस्थायां मानाभावाद्विशेषतो दशत्वादीनि पुण्यतमत्वार्थानि।

'या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः'—

इत्युक्तेः। अत एव—

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि' ॥

इतिस्कान्दे तमनुपातः। उभयत्वपूर्वत्वादीनि चोभयभागिनीत्वपूर्वभागिनीत्वादिव्यवहारार्थानि। एतेन—

'पुण्यकालो विष्णुपद्याः प्राक् पश्चादपि षोडश'।

इति वचनादुभयतः षोडशत्वस्य विष्णुपद्यामुपसंहार इत्यपास्तम्। तत्र विष्णुपदीग्रहणस्योपलक्षणत्वात्। एवं च—

१'अयने विषुवे चैव त्रिरात्रोपोषितो नरः ।
स्नात्वा यस्त्वर्चयेद्भानुं सर्वकामफलं लभेत्' ॥
आद्यन्तौ तु वृद्धवसिष्ठः—
'अयने संक्रमे चैव ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते' ॥

अत्रोपवासः संक्रमदिने, दानादि तु पुण्यकालदिन इत्याचार्यचूडामणिः । विधिलाघवात्पुण्यकालदिन एवो-भयमिति वृद्धाः ।

'षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः' ।
इति कृत्स्नदिवसाभ्यनुज्ञानं प्रत्युक्तम् । षडशीत्या आरभ्य चतसृणां प्रत्येकं पञ्चदशोत्पर्यात् ।
'षडशीतिमुखेऽतीते नाड्यः पञ्चदश स्मृताः' ।
इत्युक्तेः ।
*अयने इति । अत्रायनविषुवपदम्–
'अयने कोटिपुण्यं च लक्षं विष्णुपदीफलम् ।
षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः ॥
शतमिन्दुक्षये दानमनन्तं तु दिनक्षये ।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम्' ॥
इतिवृद्धवसिष्ठोक्तायनतोपग्रहमुखेन तदुक्तसर्वसंक्रान्तिपरम् ।
'नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत्' ॥
इतिवत्प्राधान्याभिप्रायं वा । तेन सर्वसंक्रान्तिलाभोऽस्मात्र त-त्परतासङ्गतिः । एवं संक्रान्तिसामान्ये ह्युपवासप्राप्तेस्त्रिरात्रादिरूपा-विधेरेकोपवासोक्तेरपि । अहोरात्रोषित इतिकृत्प्रत्ययार्थो (भूतकालः)

इदं च पुत्रिगृहस्थातिरिक्तविषयम् ।
*'आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
उपवासो न कर्तव्यः पुत्रिणा गृहिणा तथा' ॥
इति जैमिनिवचनात् ।
अत्र श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे—
'श्राद्धं *संक्रमणे भानोः प्रशस्तं पृथिवीपते' ।
अपरार्केऽपि विष्णुः—

न विवक्षितः ।
'अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥
अत्र स्नानं जपो होमो देवतानां च पूजनम् ।
उपवासस्तथा दानमेकैकं पावनं स्मृतम्' ॥
इति सांवर्तैकवाक्यत्वात् । वस्तुतस्तु त्रिरात्रोपोषित इति पूर्वशब्दे मरणपर्यो विवक्षितः । 'अपुत्रिभिः पुत्रीतरैः सद्भि- माप्यदा त्रिनयेऽप्युपोषणं कार्यम्'इति दीपिकायां 'मासि' इति विवरणात् । तद्दर्शनात्रोपित इत्यत्रापि स विवक्षित एव । कौस्तुभे तु संक्रान्त्यधिकरणकोपवासविध्यन्तरमिति ।
*आदित्ये इति ।
'रविवारार्कसंक्रान्त्यावेकादश्यां दिनेतरे ।
पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही' ॥
इति पारणानिषेधदर्शिनः पूर्वस्य अपरस्य एकादश्य उपवासस्य निषेधोऽपि द्रष्टव्यः । इत्येव—
'मत्स्यपानानुरोधेन सप्तधा शीर्णेन्द्रियः ।
मद्भुक्त्वाहुतान्नान्नाप्रयादेव दीयते' ॥
इति रविसंक्रान्त्यादीनां साक्षात्, पारणानिषेधमुखेन वा 'आदित्येऽहनि'इति 'रविवार'इति च निषेधः । परं तु संक्रान्त्यादि

आदित्यसंक्रमश्चैव (१)विशेषेणायनद्वयम् ।
व्यतीपातो ऽथ जन्मर्क्षं चन्द्रसूर्यग्रहस्तथा ॥
(जन्मभमभ्युदयश्च) ।
एतांस्तु श्राद्धकालान्वै *काम्यानाह(२) प्रजापतिः ।
इति ।

द्वादशादिदिनैरयनांशप्रवृत्तावपि पुण्यं यत्क्रमयनग्रहणम् । अन्यथा संक्रमेण सिद्धेरयनग्रहणं व्यर्थं स्यादित्यपरार्कः ।

हेमाद्रावपि गालवः–

*अयनांशकतुल्येन कालेनैव स्फुटं भवेत् ।

तन्निमित्तकमर्थः, न तु तदधिकरणकेति । अयुक्तान्तरनिमित्तकोपवासपारणयोरावश्यकत्वात् । 'दत्तभुक्तोपवासस्य' इत्यादिन्यायसाम्यात् । एवं च–

मृगुभानुदिनोपेता सूर्यसंक्रान्तिसंयुता ।
एकादशी सदोपोष्या पुत्रपौत्रप्रवर्द्धिनी ॥

इति विष्णुधर्मादि संगच्छते । *संक्रमणे इति पुण्यकालीनत्वार्थम् । *विशेषेणेति मेषायनादौ श्राद्धपूर्वकम् । *नित्यानिति ।

रविसंक्रमणे प्राप्ते न स्नायाद्यस्तु मानवः ।
सप्तजन्मानि रोगी स्याद्दरिद्रश्चापि जायते ॥

इति स्नानवत् श्राद्धस्यापि नित्यत्वं नैमित्तिकत्वादित्यपि द्रष्टव्यम् । सर्वसंक्रान्त्ययनांशमध्ये किं मानमित्यत्राऽऽह–*अय-

---

(१) यद्यपि लिखितपुस्तकेषु "विषुवं चायनम्" इति पाठस्तथाऽपि टीकायां 'विशेषेण' इति प्रतीकसत्त्वादयमेव युक्त इति ।

(२) अत्र 'नित्यानाह' इति पाठः साधुः । नैमित्तिकत्वेन तेषां काम्यत्वाभावात् । टीकायां 'नित्यान्' इति प्रतीकाच्च ।

मृगकर्कादिगे सूर्ये याम्योदगयने सति ॥
तदा संक्रान्तिकाले स्युरुक्ता विष्णुपदादयः । इति ॥
अयनांशकच्युतिरूपे संक्रान्तिकालेऽपि विष्णुपदादयः प्रवर्तन्ते । तेन *तत्प्रयुक्तं पुण्यकालादि तत्रापि ज्ञेयमिति स एव व्याचख्यौ । तच्च मेषायनं वृषायनमित्यादि सर्वत्र ज्ञेयम् । माधवीयेऽपि जाबालिः–
*संक्रान्तिषु यथा कालस्तद्वीयेऽप्ययने तथा ।
अयने विंशतिः पूर्वा मकरे विंशतिः पराः ॥ इति ।
मकरायने पूर्वा विंशतिर्घटिकाः पुण्याः । मकरसंक्रान्तौ तु पश्चाद्विंशतिः । अन्यत्रायने तत्संक्रान्तिवदित्यर्थः ।
विष्णुपदादिस्वरूपं च दीपिकायामुक्तम्–
हृद्यहृन्निर्भुपसिंहवृश्चिकघटेष्वर्कस्य यः संक्रमः,
कन्यामीनधनुर्नृयुक्षु षडशीत्यास्य, तुलामेषयोः ।
प्रोक्तं तद्विषुवं,झषेऽयनमुदक्,कर्कटके दाक्षिणम् ।इति
हृद्यहृन्निः–विष्णुपदम् । नृयुक्–मिथुनम् । अत्र च
*पिण्डरहितं श्राद्धं कुर्यात् । तथा चापरार्के मात्स्ये–

नांशेति । मकरादिगे सूर्ये सति यदुदगयनादि, तत्र सति योऽयनांशकालस्तत्तुल्यकालेनैव कुम्भादौ सिंहादौ चायनं पुण्यकालः स्फुटं भवेत् । तत्र यः संक्रमकालः, सोऽपि च पुण्यकाल इत्यर्थः ॥
सर्वं विष्णुपदाद्युक्तं विद्यादिह यथाऽन्यथा ।
इतियथपश्लोकोत्तरार्द्धपक्षे अयनांश एव विष्णुपदादि । अन्यथा–तत्र तदकरणे इत्यर्थः । *तत्प्रयुक्तम्–अयनांशप्रयुक्तम् । विष्णुपदाद्ययनांते पूर्वादिभोगिनीरितं सापवादमाह–*संक्रान्तिष्विति । *पिण्डरहितमिति सशाद्यनरितधर्मोपलक्षणम् । 'पिण्डनिर्वापरहितम्' 'पिण्डो यत्र निवर्तेत' इत्यग्रे स्मरणात् ।

अयनद्वितये श्राद्धं विषुवद्वितये तथा।
संक्रान्तिषु च सर्वासु पिण्डनिर्वपणादृते ॥ इति।

श्राद्धशूलपाणिस्तस्य निर्मूलत्वात्, समूलत्वेऽपि—

ततःप्रभृति संक्रान्तावुपरागादिपर्वसु।
त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टं मृतेऽहनि ॥

इतिमात्स्ययोः(१) ग्रहणा*ग्रहणवद्विकल्प एवेत्याह। *नच। अस्य *पार्वणानुवादकत्वेन पिण्डविधायकत्वात्। पिण्डाः—तद्विधिः। *अन्यथैकपदे* पिण्डानुवादे त्रित्वविधौ च षषट्कर्तुः प्रथमभक्षवत् *वैरूप्यापत्तेः। तथा चोभयसमूलत्वे पिण्डरहितं पार्वणं कर्त्तव्यमित्युभयवचनयोरर्थः। त्रिपिण्डमित्येकोद्दिष्टव्यावर्त्तनमात्रम्।

मङ्गलकृत्येषु विशेषमाह ज्योतिर्निबन्धे नारदः—

त्याज्याः सूर्यस्य संक्रान्तेः पूर्वतः परतस्तथा।
विवाहादिषु कार्येषु नाड्यः प्राज्ञैः षोडश ॥ इति।

एतत्पुण्यकालोपलक्षणम्।

---

*ग्रहणेति। वैधी प्राप्तिमनूद्यैकार्थस्य निषेधस्य पाक्षिकत्वनिवृत्तौ पर्यवसानात्। येषां मृताहन्येकोद्दिष्टसमाचारस्तेषामपि संक्रान्त्यादौ त्रिपिण्डं—पार्वणं श्राद्धमित्येवार्थ इत्याशयेन दूषयति—*नचेति। *पार्वणानुवादकत्वेनेति अमावास्याविकृतित्वेन षड्दैवत्यत्वानम्। बाधकमप्याह—*अन्यथेति। *एकपदे—एकप्रसरे पदे। *वैरूप्यम्—उद्देश्यत्वविधेयत्वरूपम्। "षषट्कर्तुः प्रथमभक्षः" इत्यत्र प्रथमत्वमुद्दिश्य प्राथम्यविधिर्न युक्तः। विधिप्रतीतेरुद्देश्यप्रतीतिपूर्वकत्वेन क्रमभङ्गापत्तेः। न चैव "लोहितोष्णीषा ऋत्वि-

---

(१) ज्योतिष्टोमसंस्थाभूते ऽतिरात्रे 'अतिरात्रे षोडशिनं गृह्णाति' नातिरात्रे षोडशिनं गृह्णातीति विधिनिषेधाभ्यां षोडशिसंज्ञकग्रहस्य ग्रहणविकल्पवदित्यर्थः।

भानोः संक्रान्तिभोगश्च *कुलिकश्चार्धयामकः।
इति ज्योतिःशास्त्रे वर्ज्येषु परिगणनात्।

अयनव्यतिरिक्तासु दशसु संक्रान्तिषु रात्रौ (१)स्नानश्राद्धादि न कार्यम्।

अह्नि संक्रमणे कृत्स्नमहः पुण्यं प्रकीर्तितम्।
रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः॥
*अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया।
ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयम्॥
पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः।
प्राहुर्दिनद्वयं* पुण्यं मुक्त्वा मकरकर्कटौ॥
इतिवृद्धवसिष्ठादिवचनैरहःपुण्यत्वोक्त्या,

नः प्रचरन्ति" इत्यत्रोष्णीषमुद्दिश्य लौहित्यविधिर्न स्यादिति वाच्यम्। तत्रोद्देश्यस्यान्यतः सिद्धत्वात्। इह तु भक्षणस्य पिण्डस्य विधानादन्यतः सिद्धं पार्वणमनूद्यते इत्येव युक्तमित्यर्थः।
*कुलिक इति।

कुलिकः कालवेला च यमघण्टश्च कण्टकः।
वाराद्‌ द्विघ्ने क्रमान्मन्दे बुधे जीवे कुजे क्षणः॥ इति।
वाराद्‌ द्विघ्ने क्रमान्मन्दे षट्घ्नेनः कुलिको निशि। इति च।
भौमभार्गवभूपंक्तगौरीन्द्राद्रिरसक्रमात्।
वारेषु द्वितीयाद्या अर्द्धयामा बुधैः स्मृताः॥

इति यार्द्धयामः। किं तद्दिनार्धमित्यत आह *अर्धरात्रादिति। *दिनद्वयमिति अर्वाचीनं परम्। दि नार्धमित्युपलक्षणात्।

---

(१) मनुस्त्वाह—"रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा। सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते" इति। (अ०३श्लो०२८०)

रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियाम् ।
पूर्वस्मात्परतो वाऽपि प्रत्यासन्नस्य तत्फलम् ॥

सम्पूर्णे अर्द्धरात्रे तु उदये ऽस्तमये ऽपि वा ।
मानार्द्धे भास्करे पुण्यमपूर्णे शर्वरीदले ॥

इति देवीपुराणाच्च ।

सम्पूर्णे अर्द्धरात्रे–रात्रेरष्टममुहूर्ते । उदये–प्रातःसन्ध्यायाम् । अस्तमये–सायंसन्ध्यायाम् । अपूर्णे शर्वरीदले–निशीथपूर्वोत्तरभागयोश्च संक्रमे । भास्करे–भासं करोतीति व्युत्पत्त्या दिवसे यन्मानार्द्धं, तत्पुण्यमिति तदर्थः । 'अर्द्धमन्तर्वेदि'इतिन्यायेन कृत्स्नां रात्रिमनूद्य दिनमानार्द्धत्वाविधेः ।

आद्यौ पुण्यं विजानीयाद्यत्रमिश्रा तिथिर्भवेत् ।
अर्द्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनि ॥

इति देवीपुराणं च दिनद्वयपुण्यत्वे नैमित्तिकाद्वयविचारणार्थम् । निशीथे संक्रमे तिथेः पूर्वदिनतिथ्यभेदे पूर्वे दिनार्द्धे पुण्यम्, परदिनतिथ्यभेदे च परदिनार्द्धमिति चाऽऽर्थिकम् । इदं च तत्र दिनद्वयतिथिसत्त्वे पूर्वभोगिनीषु पूर्वम्, उत्तरभोगिनीषूत्तरम्, उभयभोगिनीषु तु इच्छया विकल्प इति मन्तव्यम् । "आहत्य पूर्वदिनतिथ्यभेदोक्त्या तद्विपरीतस्तत्तिथिभेद एवाऽऽर्थिकः,न तूत्तरतिथ्यभेदस्तादृशः । येन निमित्तद्वयसन्निपातेन व्यवस्थापेक्षायामुक्तव्यवस्था घटेत । तथा चोत्तरभोगिन्यादावपि पूर्वतिथ्यभेदे पूर्वमेव पुण्यम्" इति हेमाद्र्यादयः । व्यतीते त्रिशत्पद्ध द्वितीयपादानुषङ्गादर्द्धरात्राद् र्द्धे संक्रमे, पूर्वतिथ्यभेदेऽपि परेद्युरित्यर्थः । अर्द्धरात्रौ मध्यवर्तिदण्डद्वयम् । के चित्तु या या इत्यनेन दश पूर्वा दशापराः' इत्यादिविशेषशास्त्रयसिद्धसंख्या नानूद्यते । सकलशिष्टाचारविरोधात् । किं तु सामान्यतः मानुषेष्वपि तदत्संख्या । तदनुरोधेन च क्षण एवापरात्र इत्याहुः ।

इति वसिष्ठवचनाद्यार्थात्*रात्रौ स्नानादिनिषेध-प्रतीतेः । यानि तु—

विवाहव्रतसंक्रान्तिप्रतिष्ठा*ऋतु(१)जन्मसु ।
तथोपरागपातादौ स्नाने दानं निशा शुभा ॥ इति-
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च ॥

इत्यादीनि विष्णुगोभिलादिवचनानि, *तानि म-करकर्कसंक्रान्तिविषयाणि । 'मुक्त्वा मकरकर्कौ' इति तयोर्दिवानुष्ठानस्य पर्युदस्तत्वादिति हेमाद्रि

---

*अर्थादिति। अहःसंक्रमे तत्पुण्यत्वसिद्धेरहरेवेति नियमःयेन स्वैकान्वये इतरानन्वयेन समुच्चयासम्भवादितरव्युदासे शब्दतात्पर्य-कल्पनयैव नियमः—यथा 'याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत्' इत्यादौ, अर्थार्जने उपायत्रयान्वये कृष्यादेर्नान्वयः—प्रकृते च संक्रमे पूर्वोत्तरभागत्वेन रात्रिभागस्यापि समुच्चित्यान्वयः सम्भवतीति न नियम इति मतम्, तेषां मते परिसंख्यैव। एवं चैकतरभोगिनीनां संध्योपजातानामपि न पुण्यं, किंत्र कथा रात्रावुपजातानामिति स्थिते तत्र कथन्तायां रात्राविति त्याद्युक्तम् ।

*ऋत्विति । 'ऋतौ तु गर्भशङ्कित्वात्'इत्यादि ऋतुगमन-निमित्तं स्नानं वक्ष्यति। *तानीति । मुक्त्वैतस्यार्द्धरात्रमा-त्रनिर्णयेतरत्वं कृत्स्नरात्रिनिर्णयशेषत्वं वा उपेत्य कर्कमकरौ विवादेत्यादेर्विषयो वाच्यः । इत्थं च 'मिथुनात्कर्कसंक्रान्तिः 'कार्मुकं तु परित्यज्य'इत्येवमादीनां रात्रिपरिहारार्थत्वा-य किल उपपन्ने इति भावः । वक्ष्यमाणस्वरसादाह—

---

(१) 'सुतिजन्मसु'इति क्वचित्पुस्तके पाठः ।

गः । *यस्तुनस्तु प्रागुक्तवचनेन तयोर्दि-
रत्वादेरेव पर्युदासात्मकरकर्कटयोरपि *'स्ना-
ं परेऽहनि' इत्यादिनिरहःपुण्यत्वोक्तेरह पु-
त्ववस्था कल्पवराधिनिषेधस्य च प्रत्यक्षरा-
ना पाधात्सर्वसंक्रान्तिषु रात्रावनुष्ठानविक-
। च देशाचाराद्व्यवस्थितं इति युक्तः पन्थाः ।
स्तु पद्मस्यां विशेषः श्रावणे माघे च प-
ज्यो॑निर्णिन्धे गर्गः-

र जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् ।
मासाभ्यन्तरे तस्य वैरक्लेशधनक्षयाः ॥
रसरोरुहपत्रै रजनीसिद्धार्थलोध्रसंयुक्तैः ।
नं जन्मर्क्षगते रविसंक्रमणे नृणां शुभदम् ॥

ाड्गी-

ग्र चेद्घादियुग्मं स्याद्द्रात्री चेद्वासरत्रयम् ।
ान्तिः पक्षिणी ज्ञेया *दानाध्ययनकर्मसु ॥

ः गौडाः-

ान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
ायंसन्ध्यां न कुर्वीत कुर्वंश्च पितृहा भवेत् ॥
े कर्मोपदेशिन्यां व्यासोक्तेः सायं पुण्यकाले

यस्तुनस्त्विति । नन्वेतयोरर्थेन एव रात्रिपुण्यत्वं स्यादत
स्नानमिति । तथा चान्यथापि कथंसाक्रान्तेर्न रात्रिपुण्य-
रिति भावः । *दानं-वेदस्य । अध्ययनपदसन्निरूपात् । अं-
ति यावत् । एतच्चायनविषुवपात्रानध्यायविषयम् ।

ाद्वयं दिवा, रात्रौ संक्रमे वासरद्वयम् ।
ध्यायं प्रकुर्वीत अयने विषुवे तथा ॥

संध्यानिषेधमाहुस्तन्निर्मूलम् । अन्यच्च *बहु वक्तव्यं विस्तरभीतेर्नोच्यते ॥ इति संक्रान्तिनिर्णयः ॥

इति नव्यधृतवचनात् । *यद्विति ।
सूर्ये घोरा, विधौ ध्वांक्षी, पापवारे महोदरी ।
बुधे मन्दाकिनी नाम, मन्दा सुरपुरोहिते ॥
मिश्रिता शुक्रवारे स्याद्, राक्षसी च शनैश्चरे ।
मन्दा ध्रुवेषु विज्ञेया, मृदौ मन्दाकिनी तथा ॥
क्षिप्रे ध्वांक्षीं विजानीयाद्, उग्रे घोरा प्रकीर्तिता ।
चरैर्महोदरी ज्ञेया, क्रूरैर्ऋक्षैस्तु राक्षसी ॥
मिश्रिता चैव विज्ञेया मिश्रैर्ऋक्षैस्तु संक्रमे ।
द्विचतुःपञ्चसप्ताष्टनवद्वादश तासु तु ॥
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम् ।

पारमार्थिकं-सूक्ष्मतमे संक्रमकाले यत्पुण्यं धर्मानुष्ठानाद् तासु तत्तद्वारे तत्तन्नक्षत्रे तत्तत्फलं पूर्णम् । वारर्क्षयोर्विपर्यासे मिश्रमिति बोध्यम् ।

मन्दा विप्रजने शस्ता, मन्दाकिन्यस्तु राजनि ।
ध्वांक्षी वैश्येषु विज्ञेया, घोरा शूद्रे सुखप्रदा ॥
महोदरी तु चौरेषु, शौण्डिकेषु तु राक्षसी ।
चण्डालपुल्कसानां च ये चान्ये क्रूरकर्मिणः ॥
सर्वेषां दारुणानां च मिश्रिता वृद्धिकारिणी ।

एवं—

पूर्वाह्णकाले नृपतीन्, द्विजेन्द्रान्मध्यन्दिने, चाय विशो ऽपर
शूद्रान् रवावस्तमिते, प्रदोषे पिशाचकान्, रात्रिचरान्निशी
नटादिकांश्चापररात्रिकाले, प्रत्यूषकाले पशुपालकांश्च ।
संक्रान्तिरर्कस्य समस्तलिङ्गिव्रतं च सन्ध्यासमये निहन्ति
इति वेलाफलम् । अत्र यस्य या शुभा संक्रान्तिः, तेन

[illegible] मासः । स द्वेधा । शुक्लादि-मासः, कृष्णादिः पूर्णिमान्तश्चेति । तथा च त्रि-[illegible]

[illegible] कृष्णादिश्चेति च द्विधा ।
[illegible]

[illegible] कार्यम् । तत्र चान्द्रमसा, येन [illegible] । तदेव च षोडशघटि-[illegible] । [illegible] [illegible]संक्रमे च पुण्यकालं स्यादिति षाड्गुण्यैर्विदितैः—

[illegible] रसेन्दुनाड्यः ।
[illegible] सुधीभिः सुधीरः ॥
[illegible] मनवः प्रमाणि ।
[illegible] गुणं च, पुण्यं [illegible] ॥
[illegible] सुपुण्याः ।
[illegible] मुनीन्द्रवाक्य ॥

इति । अर्थात् [illegible] । रसेन्दुः–षोडश । त्रिपक्ष–पञ्चदश । [illegible] । मनवः–चतुर्द-श । नागाः–अष्ट, द्विगुणिताः षोडश । एषु संक्रमेषु [illegible]-[illegible] सर्वत्र पुण्यम् ॥ इति संक्रमनिर्णयः ॥

कृष्णेकेति । [illegible] प्रति-[illegible] "अमा-वास्यया मासान् सम्पाद्याहरुत्सृजन्ति, अमावास्यया हि मासान् [illegible]ति" । "पौर्णमास्या मासान् सम्पाद्याहरुत्सृजन्ति, पौर्ण-मास्या मासान् सम्पश्यन्ति" इति श्रुतेः । यत्तु [illegible] [illegible] स न [illegible] । [illegible]-

कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति केचन।
येऽर्वाञ्चन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिणे॥

इति। विन्ध्यस्य दक्षिणे कृष्णादिनिषेधादुत्तरतो [illegible]रभ्यनुज्ञा गम्यते। तत्रापि शुक्लादिर्मुख्यः, कृष्णादिर्गौणः। *शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चान्द्रसंवत्सरारम्भोक्तेः। तदुक्तं दीपिकायाम्—

'चान्द्रोऽब्दो मधुशुक्लप्रतिपदारम्भः' इति। [illegible] [illegible] कृष्णादिं मन्यन्ते, तेषां वत्सरारम्भो भिन्नः [illegible] शुक्लादिर्मुख्यः। कृष्णादिना सकलमासारम्भवा[illegible] [illegible] सर्वत्रप्रयोगेन नाशयो मास[illegible]। [illegible] [illegible] हेमाद्रौ प्रपञ्चितमस्ते।

[illegible] चैत्रादिसंज्ञानां तत्राप्रयोगात्। न च [illegible] [illegible] [illegible] दिवस [illegible] [illegible] इति [illegible] [illegible]।

*शास्त्रेषु इति। [illegible] शेषः। [illegible] [illegible]। ननु [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] शुक्लादि[illegible], न तु गौणत्वात्। [illegible] [illegible]

अत एव माघस्नानादौ चातुर्मास्यादौ च कृष्णादेर्विनियोगः । अन्यथा गौणमुख्यन्यायेन तदसङ्गतेः । न चाननुगमः । स्वीयपञ्चदशकलावृद्धिक्षयपरिच्छेदकत्वरूपाश्रयत्वसम्बन्धेन चन्द्रवत्त्वं चान्द्रत्वं । एतच्च तिथिवच्चान्द्रेऽपि । आदौ कासां चित्कलानां वृद्धिः, ततः पञ्चदशानां तासां क्षयः, ततः पुनस्तासां कासाञ्चिद् वृद्धिः आदौ वा कासां चित्तासां क्षयः, ततः पञ्चदशानां तासां वृद्धिः, ततः पुनः कासां चित्तासां क्षय इति पौर्वापर्यभेदेऽपि न्यूनानधिकपञ्चदशकलावृद्ध्यादिसत्त्वात् । एकद्व्यादिकलावृद्ध्यादिमादाय तिथ्यादेर्वारणाय स्वीयत्वं यावत्कलालाभार्थम् । तथा च स्मरणम्—

वर्धन्ते परिपीयन्ते स्वकलावृद्धिहानितः ।
मासा एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः ॥ इति ।

तथा च तिथिवच्चान्द्रापरिगणने न्यूनता; इति चेन्न । एतद्धि तिथिवच्चान्द्ररूपद्वयमेव स्वीकार्यम् । अन्यथा एते इति चैत्रादिविशेषवाचिसर्वनामदर्शनाद्यस्य चैत्रत्वाद्यापत्तेः । एवं स्थिते 'अप्रधानैकार्थत्वम्' इति न्यायेन शुक्लकृष्णयोरेकतरस्य गौणत्वे आवश्यके कृष्णादेरेव तथात्वमुपपद्यते । स्वकलावृद्धिहानीत्यत्र वृद्धिहान्योः क्रमस्यापि विवक्षणात् ।

इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः ।
अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ ॥

इति लघुहारीतेनाऽऽदिमध्यसमाप्त्युपादानाच्छुक्लादित्वकालरि- [illegible] मासमान्यलक्षणस्य दर्शान्तचान्द्र एव सत्त्वात् । उक्तसाधारणलक्षणं तु स्वपर्यवेति न तिथिवच्चान्द्रो गणितः । एते चैत्रादयोऽपि दर्शान्तचान्द्रे एव मुख्याः । मुख्यमासलक्षणमभिधाय 'एते' इत्यभिधानात् । किञ्च इन्द्राग्नी यत्रेत्यादिशुक्लादिमाससामान्यलक्षणमभिधाय

चक्रवत् परिवर्त्तेत सूर्यः कालवशाद्यतः ।
अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम् ॥
मासचिह्नं तु कर्त्तव्यं पौषमाघाद्यमेव हि ।
यतस्तत्र विधानेन स मासः परिकीर्तितः ॥

इति लघुहारीतेन–सांवत्सरश्राद्धं पूर्वोक्तमासचिह्नितं कार्यं यच्च मासचिह्नं तत्पौषमाघाद्यमित्युक्तेः दर्शान्तप्रकरणाच्चाद्दर्शा पादिलाभाच्च सौरयोस्तयोः पुष्यमघायोगासम्भवात् । अथैत "तपस्तपस्यौ शैशिरावृतू" "मधुश्च माधवश्च वासन्तिकावृतू" "शुक्र शुचिश्च ग्रैष्मावृतू" अयनमुदगयनं देवानां दिनम् । "नभश्च नभस्य वार्षिकावृतू" "इषश्चोर्जश्च शारदावृतू" "सहश्च सहस्यश्च हैमन्तिका वृतू" अथैतद्दक्षिणायनं देवानां रात्रिः" इति श्रुतावयनयोः सौरत्वात्तद्घटकऋतुमध्यस्था मासास्तपआदयोऽपि सौरा एव वाच्याः तनश्च तत्पर्यायतया माघादीनामपि सौरत्वमुपेयम् । पर्यायत्वं च–

माघमासस्तपाः प्रोक्तः, तपस्यः फाल्गुनः स्मृतः ।
चैत्रो मासो मधुः प्रोक्तो, वैशाखो माधवो भवेत् ॥
ज्येष्ठमासस्तु शुक्रः स्याद्, आषाढः शुचिरुच्यते ।
नभो मासः श्रावणः स्याद्, नभस्यो भाद्र उच्यते ॥
इषश्चाश्वयुजो मासः, कार्त्तिकश्चोर्जसंज्ञकः ।
सहो मासो मार्गशिराः, सहस्यः पौषनामकः ॥

इति स्मरणादवगम्यते । तथा च श्रुतेर्बलीयस्त्वाच्चान्द्र गौणत्वं स्यादापेयम् । सन्ति हि 'या वैशाखस्यामावास्या रोहिण्या सम्पद्यते' इत्यादीनि वचनानि, तत्र वैशाखो न सौरः । मेषस्थसूर्येऽमा रोहिणीयुक्तस्य चन्द्रस्यासम्भवात् । तस्यां सूर्याचन्द्रमसोरेक नक्षत्रस्थितत्वात् । किं तु दर्शान्तचान्द्रः । तत्रामायां चन्द्रसूर्ययो रोहिणीस्थत्वसम्भवात् । उभयोः श्रौतत्वाविशेषेऽपि अनेकार्थ त्वेनैकस्य गौणत्वं आवश्यकं अर्थवादगतत्वेन तस्मादिदं

नक्षत्रयुक्तत्वश्यक्तिवचनाः । चैत्रादिशब्दास्तु चान्द्रे योगरूढाः। संज्ञायामिति पाणिन्युक्तेः । तत्र तेषु योगः चित्रास्वात्यादि द्व्यादिभयोगवचनतया ।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥

इति वचनात् । मासानां च पौर्णमासीद्वारकं द्विभत्वादि ।

द्वे द्वे चित्रादिताराणां परिपूर्णेन्दुसंगमे ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥

इति संकर्षणकाण्डवचनात् । ततश्चैत्रादिशब्दो न चित्रामात्रादियोगनिमित्तको, ऽपि तु चित्रास्वात्यन्यतरादियोगनिमित्तः। चैत्र्यादिप्रकृतिचित्रादिपदे च चित्रास्वात्यन्यतरत्वादिनाऽजहत्स्वार्थलक्षणा, मनोतास्थाग्निपदे इव सोमसहिताग्नेः। न च चित्राशब्दस्य चित्रायां शक्तिः, स्वात्यां लक्षणेति वाच्यम् । युगपद्वृत्तिद्वयायोगात् इदमेव घाचःशूलिको दाण्डाजिनिक इत्यादौ प्रकृतेरपि साहसदम्भयोर्लक्षणा । साहसिको दाम्भिक इत्येव प्रतीतेः । चैत्र्यादि इत्यादिपाठे तूत्पातः। 'प्रकृतेरन्यत्वमुत्पातः' इति लक्षणात् । एवं निषिद्धचान्द्रेऽपि सौरादितो मुख्य एव । चान्द्रत्वात् । दर्शान्तचान्द्रस्य सर्वतो मुख्यत्वेऽपि याविकाद्यावेतस्य विनियोगः परम्, वचनात् । यथा गौणस्यापि कृष्णादेर्नियतः पाक्षिको वा विनियोगः, सौरादेश्च गौणतरस्य वचनादेव । नन्वेवं मासचातुर्विध्यानुपपत्तिः । गौणमुख्ययोरसमत्वात् । न च त्रिंशद्गुणिनाहिनावच्छिन्नत्वमनुगतमासत्वमिति वाच्यम् । नाक्षत्रमासे ऽव्याप्तेः ।

मानं मासस्तु नाक्षत्रे सप्तविंशतिभिर्दिनैः ।
परिच्छेत्तु मानेषु मासस्त्रिंशद्दिनैः स्मृतः ॥

इति विष्णुधर्मोक्तेः । न च तावद्दिनेष्वेव मासशब्दस्य शक्तिरिति वाच्यम् ।

न द्वयं स्पृशते यत्र पक्षयोर्हि यदा भवेत् ।
तदा चान्द्रः सदैवाब्दे मलिम्लुच भवेत् ॥
चान्द्रेण मानेन हि ता द्वादशमासकाः ।
त्रिंशद्दिनस्तदा सावनेन इत्यभिधीयते ॥
आदित्यराशिसंक्रान्त्या तु मासद्वादशं तदा ।
चन्द्रमाः सप्तविंश राशिनक्षत्रमभिधीयते ॥
इति विष्णुधर्मे च पद्धये—
त्रिंशद्भिरेव दिवसैर्मासस्त्वायं प्रकीर्तितः ।
नाक्षत्रेण चैकेन मासेन दिवसः स्मृतः ॥
आदित्यराशिभोगेन सौरो दिवस उच्यते ।
चान्द्रमसप्रयोगेन मासको दिवसः स्मृतः ॥

इत्येवमादिवचनैर्विष्णुधर्मे मासचतुष्टयेष्वेव मासदिवसस्थिति-मुक्तम् । चान्द्रमासस्तु "दर्शावधी यत्र पूर्वेद्यु"रित्यादिना स्मृत्यन्तरोक्तद्वि-विधेन मानद्वयप्रकारेण च चान्द्रमासगुणवस्थायादेव तथा-त्वपुराणवाक्येषु मासेषु मानद्वयमेवोक्तं भविष्यति, अतीतेषु पुराणेषु । मासार्थं तन्मयमानवीनं तु चन्द्रपूर्वकमुद्गाप-राधोगात्पंचांगकाभेद चान्द्रइत्यभिधीयते । तथा च—

चन्द्रमाः पौर्णमास्यन्ते भास्कराद्विनिर्दिश्यते ।
राशिचक्रं तदा याव मासार्द्धेन न संशयः ॥
भागद्वादशकं पूर्वं तिथ्यां तिथ्यां क्रमेण तु ।
चन्द्रमाः कृष्णपक्षान्ते सूर्येण सह युज्यते ॥
प्रतिपदादिमारभ्य तथिदर्शसमापनम् ।
चान्द्रायणोऽपि पूर्णमासस्तथा चान्द्र इत्यभिधीयते ॥
सावने तु तथा मासे त्रिंशत्सूर्योदयाः स्मृताः ।
सूर्योदयाः—सूर्योदयप्रभृतिपूर्वोत्तरावधिकाः सावनाः ॥
आदित्यराशिभोगेन सौरो मासः प्रकीर्तितः ।

*अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु।
संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोः ॥

सर्वैरपरिवर्तैस्तु नाक्षत्रो मास उच्यते ॥

इति विष्णुधर्मवचनं वर्णचातुर्विध्ये विरुध्यते इति चेत् द्विजातेः । शूद्रादेरमावास्यादिसंबन्धानं भविष्यति । स्वरूपकथनं तु सत्स्वपि तु सावनादीनां तेषां स्वरूपाविज्ञानमात्रमुपपद्यते, इत्यनुवादिदमकथनम् । एतेन स्वरूपकथनं मासद्वयस्य ना नार्थत्वे नानार्थत्वापाकृतम् । उक्तरीत्यैवोपपत्तौ नानार्थत्वे माना भावादित्यलं पल्लवेन ।

*अमावास्येति । ननु मासशब्दस्य चैत्रादिशब्दस्य च शुक्लादौ प्रयोगः 'मासमग्निहोत्रं जुहोति" "मासं दर्शपूर्णमासाभ्यां यजेत" "मासं नाकपृष्ठैः" ।

"यथा कश्चित् पितॄणां निर्वापश्रीतैः समाहितः ।
मासेनाप्तेन हविष्येण चन्द्रस्यैति सलोकताम्" ॥

"नवमे मासि मासेन" ।

"संवत्सराहोरात्रौ मासं मासार्द्धमेव च" ॥

इत्यादिषु प्रयोगः, शुक्लादिमासपक्षनेकिर्णयो [illegible] [illegible] [illegible] [illegible] [illegible] मासविचारो [illegible] [illegible] "[illegible] मासाः" इति वचनं, "[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] १७, [illegible] सर्वेषामान्
[illegible] न स्यात् । [illegible]
[illegible]
[illegible] निर्णयः [illegible] ।

इत्येव (१) [illegible] निर्णये [illegible]
[illegible]
[illegible] विविधिवचविशेषे-
[illegible] ।

यत्तु "[illegible]" इत्यादिवचनात् [illegible]
[illegible] निर्णय [illegible] ।
[illegible] एव [illegible]
[illegible]
[illegible] विधि-
[illegible]
[illegible] । [illegible]
[illegible] निर्णय-
मे इति ।

एवमेव "निमन्त्रितश्च [illegible]" इत्यादिषु [illegible]
[illegible] नविषय-
विधिवाचीति दिक् ।

एवं च '[illegible]' इत्यादेः—एतेषु
[illegible] एव [illegible] । [illegible] प-
[illegible] । अन्यथा

---

१ मुख्यस्य [illegible]
[illegible] निर्णय [illegible]
[illegible] ।

यावद्व्यवस्थाप्यविषयानुपादानाचदसङ्गतेः। दर्शान्तचान्द्रवचनं केषां चित्कार्याणामुपादानं चोदाहरणमात्रम्। एवं कृष्णादिसौरादिमासानां गौणत्वेऽपि मासशब्दवत्सु शास्त्रेषु, सङ्कल्पाद्युल्लेखे वा क्वचित्तेषामपि ग्रहणं मासत्वाभिधानात्। 'नापुत्रस्य लोकोऽस्ति' 'पितुः पुत्रेण कर्त्तव्या' इत्यादौ क्षेत्रजादीनामिव पुत्रत्वाभिधानादिति।

...नानं विवाहो मासानिषद्धं देवमहोत्सवः ।

... न तु
...निकादशनिका माला दासीरथपदीगृहाः ।
...तथा च कपिला धेनुर्महादानानि वै दश ॥
...ति कौर्मोक्तानाम् । तत्र कृष्णपक्षपायसत्वेन महादानत्वस्य
...दिरयाहुः, तन्न। "काम्यं नैव कदाच न" इत्यनेन विरोधात् ।
...मौञ्जीति । बटोश्चव्यादेरपि । राजाभिषेक इति ।
...पट्टाभिषेकादि कर्तव्यमाधिके न तु ।
...ति कालपुष्पकेरपि —
...राज्ञो ऽभिषेकः प्रथमः शुद्धे काले प्रतीयते ।
...न्यान्द्विकस्य नित्यत्वात्कालमात्रेऽपि वा भवेत् ॥
...ति वाक्येन व्यवस्थापनात् । यत्तु पर्वहादिः—राजजन्मदिनो-
... अभिषेकनाहवर्षात् । तयोश्चाधिके निषेधः । अन्यवर्णजन्म-
...सवस्त्वधिके एव । यत्तु 'उपाकर्म तथोत्सर्गः प्रसवाह'
...वनं, तन्न "दशहरासु नोत्कर्षः" इति वाक्ये उपाकर्मोत्सर्ग-
... कर्मत्वस्यैव नियमितत्वात्तत्सहचरिते प्रसवाहेऽपि सौरे धु-

...) अयं निषेधो गयातिरिक्ते तीर्थे ।
...यायां सर्वकाले च पिण्डं दद्याद्विचक्षणः ।
...धिमासे जन्मदिने अस्ते च गुरुशुक्रयोः ॥
... त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ ।
...वायुपुराणात् । अत्र थावस्य यात्रापूर्वकत्वाद्यात्रायामपि
...ध इति पुरुषार्थचिन्तामणौ । दैवात्तत्तीर्थप्राप्तौ गयाश्राद्धं
...कर्तव्यमित्यपि मम भाति ।

*आब्दिकवृद्धयापर्नेऽपि ज्ञेयम्। यन्मलमासे वर्ज्यमु
क्तं, तच्छुक्रगुर्वोरस्तादिष्वपि ज्ञेयम्। तदाह-बृहस्पतिः

बाले वा यदि वा वृद्धे शुक्रे वाऽस्तंगते गुरौ। -

तत्र कार्त्तिकस्नानं कार्त्तिकस्य क्षयत्वे तत्र चातुर्मास्यव्रत
प्राप्तिः, पौषस्य क्षयत्वे तत्र माघस्नानं च न वारयितुं शक्यम्।
संसर्पे च नाधिकमासिकम्। कालस्यानाधिक्यात्। तथा च
यसंसर्पाधिमासानां त्रयाणां समानविषयकनिषेधसिद्धयर्थं वर्ज्य
वर्ज्यविधिरित्यस्य मातुलङ्घितसाधारणविधिनिषेधविषयकत्वेना
इति न कश्चिद्दोषः।

*आब्दिकवदिति। तिथ्यर्द्धवचनैर्मार्गशीर्षादिः कदाचित्
निपाते ऽष्टकाश्राद्धादिलोपप्रसङ्गः। एवं तन्मासीयतिथिपूर्वार्द्धस्य
स्य ऊनमासिकं तत्तिथिप्राकृतिष्पुत्तरार्द्धे प्राप्स्यति। द्वि
यमासिकं तु प्राणायमासिकात्तिथ्युत्तरार्द्धे एव प्राप्नुयात्
प्रकरणे तु स्वोत्तरस्य मलत्वात्तत्साहित्येन सप्तदशानामनुष्ठा
नापत्तिरित्यत आब्दिकवर्द्धापनयोरेवैतद्वचनं वाच्यम्। अन्यत्र तु

एकस्मिन् मासि मासौ द्वौ यदि स्यातां तयोर्द्वयोः।
त एव पक्षौ ता एव तिथयस्त्रिंशदेव हि॥

इति वाक्यात्सर्वतिथीनां मासद्वयात्मकत्वमिति मदनरत्ना
रोधिनः। संसर्पे उक्तरीत्या कालाधिक्याभावादष्टकादि
प्राप्तिः। तिथ्यर्द्धवाक्यं स्वेकमासलोपभ्रान्तस्य कस्य चिदापूर्ति
कस्यैव। परं [illegible] सप्तमासजातवर्द्धापने तन्मृतमासिकादौ
यौक्तिकतया तदुपयुज्यते। यत्तु-गतवर्षीयमार्गशीर्षपौषमध्यश्रा
मेकस्मिन् क्षये कार्यमुक्तवचनादिति, तदशुद्धम्। तयोस्त
पौर्वापर्यादनाक्षेपेण तद्द्वयोर्विरवात्। यत्तु-

मासः संक्रान्तिहीनोऽधिक इति कथितः क्षिप्तमन्दत्ववार्तैः
संसर्पोऽस्त्यत्र वाप्यमपविषमतया पावनं तत्ततस्य।
पूर्वैश्चन्द्रार्कयोगैर्विरहविहितसंक्रान्तिमयाप्सनं स्या-

मलमास इत्येतानि* वर्जयेद्देवदर्शनम् ॥ इति।

अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे ।
मलमासेऽप्यनावृत्ततीर्थयात्रां विवर्जयेत् ॥

आवृत्ततीर्थे दोषाभावमात्रं, न तु फलमिति वा· ... । तत्र । असति बाधके फलहेतुत्वाक्ष· ... । लल्लोऽपि–

*नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा
त्वस्पार्कस्य मासे यदि च न चलति वै मासयुग्मं विचिन्त्यम् ॥

इति बटेश्वरसिद्धान्ते मासयुग्मचिन्ताभिधानं, तत्त्वयुद्धमेवेति निष्कर्षानुसारिणः। *एतानि—अग्न्याधेयादीनि।

ननु सामान्यतः कथं देवदर्शननिषेधः।

अनादिदेवतार्चासु कालदोषो न विद्यते।
नित्यास्वभ्यासयोगेन सर्वथैकादशीव्रते ॥

इति ज्योतिःपराशरविरोधादित्यत आह–*अनादीनि। अत्र निन्दार्थेप्सितविधेराक्षेपमपेक्ष्य लाघवेन विवर्जयेदित्यनुवर्त्यम्। एवं च 'अरुणया एकहायन्या' इत्यादौ अरुणयेत्यस्य कारकपदत्वात्प्रथमं क्रीणातिनाऽन्वयः, पश्चादेकहायन्याऽन्वय इतिवत् अनावृत्तामित्यस्य ...भिधानत्वात्तदन्वितस्य वर्जनेऽन्वयादेवतादर्शनेऽप्यनावृत्तत्वं ...। यदि च दात्प्रदाग्न्यादिपदवदनावृत्तपदस्य यौगिकत्वा· त्प्रथमतो विशेष्यपदार्थान्वयात् पश्चाद्वर्जने ऽन्वयो वाच्यः। स च न सम्भवति। तदन्वययोग्यदर्शनपदाभावादित्युच्यते; तदा अपिना अनावृत्तदेवतादर्शनं समुच्चित्य निन्दोपपाद्या। अनावृत्तेति समस्त· पाठेऽपि तत्समुच्चय इति न ज्योतिःपराशरविरोधः। *नष्टभार्गवे इति। नष्टेति बालादेः, भार्गवे इति गुरोश्चोपलक्षणम्।

सर्वेषामेकधर्माणामेकस्यापि यदुच्यते।
सर्वेषां तद्भवेत् कार्यमेकरूपा हि ते स्मृताः ॥

इति न्यायात्। तदेतदाह–*नीचस्थे इति। नीचो–मकरः,

संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा
मौञ्जीबन्धोऽङ्गनानां प्रतिनयनविधिर्वास्तुदेवप्रति
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते
इति । दीक्षा—यागदीक्षा, *न त्वागमदीक्षा । तथा—

उद्यानचूडाव्रतबन्धदीक्षा-
विवाहयात्राश्च वधूप्रवेशम् ।
तडागकूपत्रिदशप्रतिष्ठा
बृहस्पतौ सिंहगते न कुर्यात् ॥

दिवोदासीये—
गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे ।
गृहकर्म व्रतं यात्रां मनसाऽपि न चिन्तयेत् ॥
अस्यापवादस्तत्रैव ब्राह्मे—
मुण्डनं चोपवासश्च गौतम्यां सिंहगे गुरौ ।
कन्यागते तु कृष्णायां न तु तत्तीरवासिनाम् ॥
तथा—
आद्या सा गौतमी गङ्गा, द्वितीया जाह्नवी स्मृ
सर्वतीर्थफलं स्नानात् गौतम्यां सिंहगे गुरौ ॥
संहिताप्रदीपे—

त्याज्यमस्ताद्यं गुरुशुक्रयोश्च
बाल्यत्वमग्रे दशाहं च वार्धम् ।
पूर्वां सितस्याप्यहनी शिशुत्वे
शस्तौ गमनायुर्वर्धापनानां ॥

वसिष्ठः—
अतिचारगते जीवे वर्जयेत्तदनन्तरम् ।
व्रतोद्वाहादिकार्येषु अष्टाविंशतिवासरान् ॥
वार्द्धक्यबाल्यस्वरूपमुक्तं ब्रह्मसिद्धान्ते—

* न त्वागमदीक्षा । यतः सिंहस्थार्कदीक्षा...

रविणाऽऽसत्तिरन्येषां ग्रहाणामस्त उच्यते।
ततोऽर्वाग्वार्धकं प्रोक्तमूर्ध्वं बाल्यं प्रकीर्तितम्॥

इति।

बाल्यादिपरिमाणं च वृत्तदाते—

बालः शुक्रो दिवसदशकं, पञ्चकं चैव वृद्धः,
पश्चाद् अह्नां त्रितयमुदितः, पक्षमैन्द्र्यां क्रमेण।
जीवो वृद्धः शिशुरपि तथा, पक्षमन्यैः शिशू तौ,
वृद्धौ प्रोक्तौ दिवसदशकं, चापरैः सप्तरात्रम्॥

पश्चिमत उदये दशदिनानि बालः, अस्ते पञ्चदिनानि वृद्धः, पूर्वतो दिनत्रयं बालः, पक्षं च वृद्ध इत्यर्थः। जीवो—गुरुः। अन्यत्र त्वन्यथोक्तम्—

प्राक्पश्चादुदितः शुक्रः पञ्चसप्तदिनं शिशुः।
विपरीते तु वृद्धत्वं, तद्वदेव गुरोरपि॥ इति।

एवं च पक्षाणां व्यवस्थामाह मिहिरः—

बहवो दर्शिताः काला ये बाल्ये वार्धकेऽपि वा।
प्राच्यास्तत्राधिकाः, ग्राह्या देशभेदादुतापदि॥ इति।

देशभेदश्च मदनरत्ने गार्ग्यः—

शुक्रो गुरुः प्राक् च पराक् च बालो
विन्ध्ये दशावन्तिषु सप्तरात्रम्।
वङ्गेषु हूणेषु च षट् च पञ्च

कालान्तरस्य वक्तव्यत्वात्। गुर्वादित्यादि विवाहे वक्ष्यामः। केचित्तु—

सिंहस्थौ गुरुशुक्रौ च सर्वारम्भेषु वर्जयेत्।

इति पठन्ति।

सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत्।
अन्यत्र सिंहभागे तु सिंहस्थोऽपि न दुष्यति॥

इति केचित्।

घोषे च देशो त्रिदिनं वदन्ति ॥ इति ।

अस्नादेरपवादः काशीखण्डे—

*न महास्नोदयकृतो दोषो विश्वेश्वरालये ।

त्रिस्थलीसेतौ वायवीये—

गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये ।
सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ॥

ग्रहणद्वये—तत्तिथिवारकुरुक्षेत्रयात्रा-स्नानादि- [illegible]
नः । तथाह त्रिस्थलीसेतौ लल्लः—

ग्रस्ते [illegible]नलभानुभास्वतो-
[illegible] वै कपिलागयाप्रयाग् ।
(१)सुरासुरेज्यास्तमयेऽपि तीर्थे
यात्राविधिः [illegible] न [illegible] ॥

इत्याद्यं बहुधा ।

मलमासे च [illegible] हेमाद्रौ [illegible]—

अधिमासे तु संप्राप्ते [illegible] च ।
[illegible] दानस्थानि दिने दिने ॥
[illegible] अधिमासे [illegible]
अधिमासे तु संप्राप्ते (२)[illegible] देवताः
[illegible] ।
[illegible] च ॥

---

* [illegible] ॥ इति [illegible]

[illegible]

१ [illegible]

२ [illegible]

सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् ।
विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः ॥
अपूपान्नप्रदानेन मम पापं व्यपोहतु ।
नारायण जगद्बीज भास्करप्रतिरूपक ॥
व्रतेनानेन पुत्रांश्च संपदं चाभिवर्धय ।
यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनम् ॥
शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु ।
कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥
यो वञ्चयति भूतानि, तस्मै कालात्मने नमः ।
कुरुक्षेत्रमयं देशः, कालः पर्व, द्विजो हरिः ॥
पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ।
मलानां च विशुद्ध्यर्थं पापप्रशमनाय च ॥
पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर ।
मन्त्रेणानेन यो दद्यात् त्रयस्त्रिंशदपूपकान् ॥
प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः ॥ इति ।
इति निर्णयसिन्धौ मलमासनिर्णयः ॥

पक्षनिर्णयस्तु—
दैवे शुक्लः शुभफलः, कृष्णः पित्र्ये विशिष्यते ।
इति माधवेनोक्तः ।

अथ तिथिनिर्णयः । तत्र तिथिर्द्वेधा । शुद्धा वि-
द्धा चेति ।
अमा षोडशभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥
अमादिपौर्णमास्यन्ता या एव शशिनः कलाः ।
तिथयस्ताः समाख्याताः षोडशैव वरानने ॥
इति प्रभासखण्डे । अमानाम्नी सर्वानुस्यूता नित्यकला । तदन्याः प्रतिपदादयः पञ्चदशकलाः । तस्यैव क्षयः कलायाः चन्द्रमण्डलस्य

द्धा च । *दिने तिथ्यन्तरसम्बन्धरहिता शुद्धा । तत्स-
हिता विद्धा ॥ तत्र शुद्धायामसन्देहात्*विद्धा निर्णीयते ।
सूर्यमण्डलेन सह परमसन्निकर्षानन्तरं विप्रकर्षः, परमविप्र-
कर्षानन्तरं सन्निकर्षो वा यावता कालेन भवति, तावान्समयो
लक्षणया शुक्लकृष्णपक्षयोः प्रतिपदादितिथिपदार्थः ।

तत्र पक्षावुभौ मासे शुक्लकृष्णौ सदैव हि ।
चन्द्रवृद्धिकरः शुक्लः, कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षस्याद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः ।
दर्शान्ताः कृष्णपक्षे ताः, पूर्णिमान्ताश्च शुक्लके ॥

इति षट्त्रिंशन्मतात् । *दिने—दिवसे, न त्वहोरात्रे ।
तेन यथा—

प्रतिपत्प्रभृतिः सर्वा उदयादोदयाद्रवेः ।
संपूर्णा इति विख्याता हरिवासरवर्जिता ॥

इत्युक्तसंपूर्णाया ग्रहः, तथा अहोरात्ररात्रिमात्रान्यतरसाध्या-
न्यकर्मसु उदयास्तमयव्यापिन्या अपि ।

अहःसु तिथयः पुण्याःकर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥

इति वाक्यात्—अहःसु यास्तिथयस्ताः पुण्याः । दिवैव
कर्मणामनुष्ठानमित्युत्सर्गात् । "पूर्वाह्णो वै देवानां, मध्यं दिनो
मनुष्याणाम्, अपराह्णः पितॄणाम्"इत्यहर्भागेष्वेव दैवादिकर्मवि-
धानात् सूर्योदयं विना नैव स्नानादिकक्रम इति ।

स्नानं दानं जपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र, तस्मात्तां परिवर्जयेत् ॥

इति सामान्यतो रात्रिनिषेधाच्च ।

प्रातः संध्यां बुधः कृत्वा संकल्पं तत आचरेत् ।

इति सामान्यतो दिनारम्भे एव संकल्पविधानाच्च । *असं-
देहादिति । अयं भावः—विधिष्वनुष्ठीयमानस्य विधेयस्याभ्युद-

तत्र सामान्यतो वेधमाह माधवीये पैठीनसिः—

पञ्चमुक्तं प्रमेयं तिथिद्वैधं क?, सकृत्करणेनैव शास्त्रार्थसिद्धेर्गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वादिति सन्देहः । न चैष पूर्णायां निर्णयो । तस्या एकत्वादिति । निषेधेषु तु कालविशेषे कर्मकरणस्यानर्थहेतुत्वं प्रमेयम् । यदा कदापि तत्काले कर्मकरणेऽनर्थप्रसङ्गात्तत्परिहाराय सर्वदैव तत्काले तद्वर्जस्यावश्यकत्वात्तिथिनिर्णयसिद्धेः । तदुक्तम्—

निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः ।
विधिः पूज्यतिथौ तत्र, निषेधः कालमात्रकः ॥
तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥ इति ।

नन्वेवमपि विधौ कथं सन्देहः ? । कालस्य निमित्ततया यत्नानुपयोगात् । यदा कदाचित्तत्काले निमित्ते कर्मणोऽनुष्ठातुं शक्यत्वात् । सत्यम् । तत्पूज्यतया तत्प्रतीत्या सन्देहः । तिथीनां विधिनिषेधाङ्गत्वं च तत्र तत्र शास्त्रेषु । न च सा निमित्तसप्तमी । उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् । "वसन्ते वसन्ते" इत्यादौ तु प्रतिनिमित्तं नैमित्तिकावृत्तिसिद्ध्यर्थं निमित्तसप्तमी । अन्यथा वसन्तादेः केवलाङ्गत्वे सकृदेव तत्कर्मकरणं स्यादिति वीप्सावैयर्थ्यात् । तत्र च न केवलनिमित्तत्वम् । तस्मिन्काले निमित्ते विहिते कालकाद्यर्था विशेषासम्भवादुपस्थितत्वात् तस्यैवाङ्गत्वस्यापि उपपन्नत्वात् । संक्रान्त्यादिकालस्य तु केवलनिमित्तत्वम् । तस्य सूक्ष्मत्वात् दीर्घकालव्यापिश्राद्धादिकर्माङ्गत्वासम्भवेन तत्पूर्वोत्तरकालस्यैवाङ्गत्वात् । एवं रविवारादिनिमित्तकस्नानादौ निमित्तभूतसूर्योदयपूर्वकालस्य, करणनिमित्तोपवासप्रतिनिष्पत्त्यर्थके निमित्तोत्तरकालस्य [illegible] वचनादङ्गत्वं बोध्यम् । नन्वेवं वचनान्न्यायतश्च सर्वनिषेधानां तात्कालिकत्वे

अभ्यङ्गे चोदिते स्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥

*पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां समाश्रिताम् ।
त्रिभिर्मुहूर्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः ॥

इति । दैवपित्र्यभेदस्त्वादौ तु द्विमुहूर्तोऽप्युक्तः—

*उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥

इत्यभ्यङ्गमैथुनदन्तधावननिषेधेषु तात्कालिकत्वं कथम् । न च साकल्यवचनात्तत्तिथिकृत्यास्तत्परवर्तिनीति तद्दिनतिथिप्रयोरतिथावपि तत्तिथिनिषिद्धानां तेषामननुष्ठानं स्यादिति तथैवमिति वाच्यम् । यतस्तत्तत्कर्मकालभूताहर्भागविशेषे तत्तिथ्यभावेऽपि तत्तत्कर्मानुष्ठानार्थं साकल्यवचनम् । न च तस्य निषेधेषु प्रवृत्तिरिति । तादृशेतरतिथौ निषेधाप्रसक्तेः । सत्यम् । साकल्यवचने हि "स्नानदानजपादिषु" इति आदिशब्देन "दानाध्ययनकर्मसु" इति पुलस्त्यवचनेन चानुष्ठेयानामेव कर्मणां ग्रहणम् । एवं च तदपवादे एतद्वचने अभ्यङ्गादित्रयस्योपादानं सकलनिषेध्यानामुपलक्षणम् । जननमरणयोस्तु तद् दृष्टान्तविधया । न ह्यननुष्ठेययोस्तयोः साकल्यवचनं प्रवर्तते । न च जननमरणाभ्यां तन्निमित्तकं कर्म गृह्यताम् । तथाविधे साकल्यस्येष्टत्वात् । जननादिग्रहणं च तत्तत्तिथिविशेषाधिकरणकोत्पादनादेरुपलक्षणम् । तन्निमित्तककर्मणः साकल्यस्येष्टत्वात् ।

*पक्षद्वयेऽपीति । अत्र पूर्वया तिथ्योदयादुत्तरम्, उत्तरया चोदयात्पूर्वं त्रिमुहूर्त्या वेध इति नार्थः । वेधस्य दिनमात्रसाध्यत्वभङ्गापत्तेः । तस्य तादृशसाध्यत्वे मानम्— "उदिते दैवतं भानौ" इत्येव ।

*उदिते इति । उदिते भानौ यद् द्विमुहूर्त्तं तद्दैवतं—देवकर्मार्हम् । अस्तमिते—अस्तं गन्तुमारब्धे यदह्नस्त्रिमुहूर्त्तं तद् पित्र्यं—पितृकर्मार्हमित्यर्थः । अह्न इत्यन्वयादस्तमिते इति आदि-

इति विष्णुधर्मोक्तेः । *द्विमुहूर्तत्वं चानुकल्पः* ।

*द्विमुहूर्ताऽपि कर्तव्या या तिथिर्वृद्धिगामिनी ।

कर्तव्येति शेषः । "पक्षद्वयेऽपि" इति वेधिकात्रिमुहूर्तसंबन्धेन वेधोक्तेस्तस्यास्त्रिमुहूर्तत्वं वाचनिकम् । वेध्यायास्तु तदार्थिकं न्यायसाम्यादिति । द्विमुहूर्तसत्त्वस्य कथं निवेश इत्यत्राह—*द्विमुहूर्तत्वं चेति । *अनुकल्पः—स्नानदानादिविषय इति तदर्थः । न च वेध्यायास्त्रिमुहूर्तत्वस्यार्थिकत्वे मानाभावाद् द्विमुहूर्तत्वं नानुकल्प इति वाच्यम् ।

पौर्वाह्णिकास्तु तिथयो दैवे कार्ये फलप्रदाः ।

इति वृद्धयाज्ञवल्क्येनाह्नः पञ्चभागत्वाद्यभागरूपपूर्वाह्णव्याप्त्युक्तेः । "प्रातः संकल्पयेद्विद्वान्" इति त्रिमुहूर्तात्मकप्रातःकालावच्छिन्नायास्तिथेरेव "यो यस्य विहितः कालः" इत्यनेनाङ्गत्वोक्तेश्च । माधवाचार्या अपि पञ्चधा विभागो बहुस्मृत्युक्तत्वात्सर्वत्र ग्राह्य इति बहुमतपञ्चधाविभक्तपूर्वाह्णदानादौ त्रिमुहूर्ता तदनुपालनतया पौर्वाह्णिकत्वमित्यवसीयते इत्याहुः त्रिमुहूर्तत्वं मुख्यं वदन्ति ।

वस्तुतस्तु पक्षद्वयेऽपीति यदि पूर्वां तिथिमुत्तरातिथयः त्रिभिर्मुहूर्तैर्युक्ता एव स्पृष्टाः (१)स्पृष्टाश्चेद्विद्धा इति व्यवहार्याः, तदोत्तरां तिथिं पूर्वा अपि मुहूर्तत्रयावच्छिन्ना एव स्पृशन्तीत्यर्थः । तथा सत्येव युग्मवाक्यनापत्यादिनास्य युग्मप्रयोगितया त्रिमुहूर्तत्वविशिष्टतिथिद्वयसम्बन्धस्य वेधत्वनिर्देशः त्रिमुहूर्तोनवेधिकासम्बन्धस्य त्रिमुहूर्तोनवेध्यासम्बन्धस्य च किंचिन्न्यूनतिथिद्वयसम्बन्धतया प्रकृतानुपयोगात् ।

*द्विमुहूर्ताऽपीति ।

---

(१) स्पृष्टा इत्यस्य विध्यन्ति इत्यनेनान्वयः । स्पृष्टाः सत्यः पूर्वां तिथिं विध्यन्ति चेद् विद्धाः । मुहूर्तत्रयादि मुहूर्तत्रयावच्छिन्ना एव स्पृष्टाः सत्य उत्तरां तिथिं विध्यन्ति चेद् विद्धा इति सर्व [illegible] ।

इति दक्षेणापि*शब्दोक्तेः । अयं वेधः प्रातरेव । सायं तु त्रिमुहूर्तो वेध एव

*यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः ।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत् ॥

इति स्कान्दोक्तेः । दीपिकापि—'त्रिमुहूर्तगा तु सकला सायम्" इति । यानि तु—

व्रतोपवासस्नानादौ घटिकैकापि या भवेत् ।
उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके ॥

इत्यादीनि स्कान्दादिवचनानि *तानि वैश्वानरावि·

त्रिमुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी ।

इति पूर्वार्धेन । *अपिशब्देति । तथा च पूर्वार्धेऽपीति शब्दान्वयात् त्रिमुहूर्तत्यागे द्विमुहूर्तग्रहणे च तात्पर्यं, किन्तु द्विमुहूर्तत्वस्यानुकल्पत्वे इति । अयं निषेधो न त्रिमुहूर्तव्याप्तिबाधनाय, किन्तु चतुर्थमुहूर्तस्पर्शित्वविधिरसपेति त्रिमुहूर्तव्याप्तेर्मुख्यत्वमित्यन्ये । सावित्र्यां त्रिमुहूर्तप्राप्ततानिषेधस्तदन्यस्यां तद्व्याप्तताबाधकः, निषेधस्य प्राप्तिपूर्वकत्वादिति तस्याप्रमुख्यत्वमिति मन्यन्ते ।

ननूदितवाक्ये यथासंख्यान्वयस्यानियामकत्वात् सायमपि द्विमुहूर्तत्वमनुकल्पोऽस्तु इत्यत आह—*यामिति । त्रिमुहूर्तत्वं चकारात्,

यां प्राप्यास्तमुदेत्यर्कः सा चेत् स्यात्त्रिमुहूर्तगा ।
धर्मकृत्येषु सर्वेषु सम्पूर्णां तां विदुर्बुधाः ॥

इति विष्णुरहस्ये उद्देश्यविधेयभावेन त्रिमुहूर्तत्वस्यैव पूर्णत्वोक्तेर्द्विमुहूर्तत्वनिषेधात्मकत्वाच्च ।

*वैश्वानरेति । "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इत्यारभ्य "यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालो भवति त्रिवृतैवास्मिंस्तेजो दधाति" इत्यादि

कारणान्यायेनावयव*स्तुल्या त्रिमुहूर्तत्र्यंशमात्रगाणि ।
तिथिविशेषे वेधविशेषः स्कान्दे—

नागो द्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा ।
*भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ॥ इति ।

अयं चो*पवासाद्यनिर्णयोपयुक्त इति वक्ष्यते ॥ इति वेधः ॥

तत्र सर्वा तिथिर्दृष्टः*कर्मकाल*व्यापिनी, सैव ग्राह्या ।
कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
*तया कर्माणि कुर्वीत, ह्रासवृद्धी न कारणम् ॥

फलवद्दृष्टकर्मानुक्तम् । तत्रान्यनिशेषाऽदृष्टफलान्यदृष्टे इत्यष-ष्ठिशानामदृष्टफलान्यादीनां निषेधं वाक्यभेदः स्वारस्ये उदयवद्व्यापि-ऽदृष्टविमूलदाददृष्टफलान्नुनिराश्रीयते मदुदितस्तदः । *नागतन्त्रः-पदपदिका । *नागाः-पञ्चमी । *दिक्-दशमी । *भूतः-चतुर्दशी । *उपवासादिनिर्णयोपेति । "सर्वेषामेवोपवासः"इति वाक्यात् ।

*कर्मकालेति । कर्म चतुर्विधम् । दैवात-पत्रदान, अन-गता-पिन-मन-दानभेदात् । अर्थाप्यवात अहोरात्रमन्यतः । तन्वादि-रात्रांतानतकृत्स्नकरणात् । तदहोरात्रविभागे तद्दर्शनीयमेतन्तः-पादविशिष्टं प्रत्याह्वयोतनवैधम्यात् । नादो तदन्यांनतं तत् । अथाविनन्दयत नात्ती तत्कलोमनवगाविन् । तेषां विश्वदानं प्रत्यादाद्दिः, विशेषणांशा पाहेत्य एव वा न । एवं दानततद-रेषि प्रातराह्निः । तत्प्रवर्तने तत्त्वाविशिष्टम् ।

*तया कर्माणीति । तत्र वाक्यायामृगाहेत्वादि यथा तत्-तिथिवर्त्तपरोक्त वर्षे कुर्वते, तथा तदहर्दर्शनदर्शनाविता-पि । अन्यथा "नास्तीत्यस्यविहारिणे कुर्यात"इति वाक्यविरुद्ध-त्वात् प्रातरादिमात्रे विहारादि अविरोधे कुर्वन्ति भाव । तदेवंतत-स्याभिरैवा । तावर्त्तन एव देवेन वा । नापि तुल्यदेवा । कुर्वन्ति, पोतृदेवेति । एषु यतेषु तेन ग्राह्या । दिवसे कालान्तरे, तत्र

इति दक्षेणापि*शब्दोक्तेः । अयं वेधः प्रातरेव । सायं तु त्रिमुहूर्तो वेध एव

*यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः ।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत् ॥

इति स्कान्दोक्तेः । दीपिकापि—"त्रिमुहूर्तगा तु सकला सायम्" इति । यानि तु—

व्रतोपवासस्नानादौ घटिकैकापि या भवेत् ।
उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके ॥

इत्यादीनि स्कान्दादिवचनानि <u>*तानि वैश्वानरादि-</u>

त्रिमुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी ।

इति पूर्वार्धम् । *अपिशब्देति । तथा च पूर्वार्धेऽप्यपिशब्दान्वयात्र त्रिमुहूर्तत्यागे द्विमुहूर्तग्रहणे च तात्पर्यं, किन्तु द्विमुहूर्तत्वस्यानुकल्पत्वे इति । अयं निषेधो न त्रिमुहूर्तव्याप्तिबाधनाय, किन्तु चतुर्थमुहूर्तस्पर्शित्वविधित्सयेति त्रिमुहूर्तव्याप्तेर्मुख्यत्वमित्यन्ये । क्षयिण्यां त्रिमुहूर्तप्राप्तता निषेधस्तदन्यस्यां तद्व्याप्ततासाधकः, निषेधस्य प्राप्तिपूर्वकत्वादिति तस्या मुख्यत्वमितीतरे ।

ननु दिनद्वये यथासंख्यान्वयस्यानिर्णीतत्वात् सायमपि द्विमुहूर्तत्वमनुकल्पोऽस्तु इत्यत आह—*यामिति । त्रिमुहूर्तैवेवकारात्,

यां प्राप्यास्तमुदेत्यर्कः सा चेत् स्यात्त्रिमुहूर्तगा ।
धर्मकृत्येषु सर्वेषु सम्पूर्णां तां विदुर्बुधाः ॥

इति विष्णुरहस्ये उद्देश्यविधेयभावेन त्रिमुहूर्तत्वस्यैव पूर्णत्वोक्तेर्द्विमुहूर्तत्वानिवेशासम्भवात् ।

*वैश्वानरेति । "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इत्याम्नाय "यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालो भवति त्रिवृतैवास्मिन्तेजो दधाति" इत्यादिना

रणःपायेनावयवःस्तुत्या त्रिमुहूर्तप्रशंसापराणि ।
तिथिविशेषे वेधविशेषः स्कान्दे—

नागो द्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा ।
*भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ॥ इति ।

अयं च *उपवासातिरिक्तविषय इति वक्ष्यते ॥ इति वेधः ॥

तत्र सर्वा तिथिर्यद्दहः कर्मकाल*व्यापिनी, सैव ग्राह्या ।
कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
*तया कर्माणि कुर्वीत, ह्रासवृद्धी न कारणम् ॥

फलवदष्टाकपालाद्युक्तम् । तत्रोत्पत्तिविशिष्टद्वादशकपालावरुद्धे उत्पन्नशिष्टानामष्टाकपालादीनां निवेशे वाक्यभेदः स्यात्ततोऽवयवद्वाराऽवयविभूतद्वादशकपालस्तुतिराश्रीयते तद्वदित्यर्थः । *अवयवः-एकघटिका । *नागः-पञ्चमी । *दिक्-दशमी । *भूतः-चतुर्दशी ।
*उपवासातिरिक्तेति । "सर्वप्रकारवेधोऽयम्" इति वाक्यात् ।
*कर्मकालेति । कर्म षड्विधम् । उपवास-एकभक्त-नक्त-अयाचित-व्रत-दानभेदात् । अत्रोपवासे अहोरात्रस्तत्कालः । तस्याहोरात्राभोजनसङ्कल्परूपत्वात् । तदहोरात्रावच्छिन्नाद्वितीयभोजनाभावविशिष्टं मध्याह्नभोजनमेकभक्तम् । तादृशं प्रदोषभोजनं नक्तम् । अयाचितलब्धस्य तादृशं सकृद्भोजनमयाचितम् । तेष्वपि विशेष्यांशे मध्याह्नादिः, विशेषणांशे चाहोरात्र एव कालः । एवं दानव्रतयोरपि प्रातरादिः । तत्तत्कर्मणि तत्तद्व्यापिनीत्यर्थः ।
*तया कर्माणीति । तत्र कालस्यानुपादेयत्वाद् यथा तत्तिथिपरित्यागेन कर्म दुष्करं, तथा तत्तदहर्भागपरित्यागेनापि । अन्यथा "यावज्जीवमग्निहोत्रं जुहोति" इति यावज्जीवकालात् प्रातरादिभागं विहायापि अग्निहोत्रं हूयेतेति भावः । कर्मकालव्याप्तिर्द्वेधा । साकल्येन एकदेशेन वा । सापि पुनर्द्वेधा । पूर्वेद्युरेव, परेद्युरेवेति । एषु पक्षेषु सैव ग्राह्या । दिनद्वये तद्व्याप्त्यादौ त्वाह-

इति विष्णुधर्मोक्तेः । *दिनद्वये तद्व्याप्तावव्याप्तावेकदेशव्याप्तौ वा *युग्मवाक्यान्निर्णयः । *तस्य पूर्वोऽबाधनोपपत्तेः । कर्मकालस्य प्रधानाङ्गत्वाच्च । युग्मवाक्यं तु निगमः ।

---

*दिनद्वये इति । *युग्मवाक्यात्, खर्वादिवाक्यात्, शुक्लादिवाक्याच्च । नन्वस्तु कर्मकालशास्त्राद् ह्रासवृद्धिशास्त्रं(१) दुर्बलम् । एकदिन एव तत्सत्त्वेनासन्देहात्, 'ह्रासवृद्धी न कारणम्'इत्युक्तेः । न तु युग्मशास्त्रम् । तथा च तेन कर्मकालशास्त्रबाधो दुर्वार इत्यत आह— *तस्येति । अयं भावः—तत्तत्कर्मसु विहितायां तत्तत्तिथौ तद्वायां संदेहे सति निर्णयार्थं युग्मवाक्यादिप्रवृत्तिः । तिथ्यादिविधिप्रवृत्तिसमकालमेव च मातरादिभागविधिप्रवृत्तिः । प्रयोगविधिना कालस्योपादेयत्वात् । एवं च तेषां प्रयमाङ्गगतत्वात् तत्तत्कालीनतिथिलाभे तस्यां तत्तत्कर्मणि न संदेहः । एतदेव कर्मकालशास्त्रेण वाचो भङ्गया बोध्यते । ततश्च कर्मकाल एव प्रवर्त्तको, न तु ह्रासवृद्ध्यादि । दानव्रतयोरपि "पौर्वाह्णिकास्तु तिथयः" इति कालविशेषपरत्वेन स एव कर्मकालः प्रवर्तकः । 'ह्रासवृद्धी न कारणम्'इत्यत्र ह्रासवृद्धिपदस्य युग्माद्युपलक्षणतया युग्मादिशास्त्रं खर्वादिशास्त्रं च न कुत्रापि पुरस्कारप्रवृत्तिप्रयोजकम् असंदेहादिति । यत्र कर्मकालानुरोधेन निर्णयो दुष्करः दिनद्वये कर्मकालव्याप्तौ, साम्येनैकदेशव्याप्तौ च प्रदर्शितेऽपि कर्मकालशास्त्रे सन्देहानपायात्, दिनद्वये तदव्याप्तौ कर्मकालशास्त्रौदासीन्येन संदेहतादवस्थ्यात्; तत्रैव विषये इतरशास्त्राणि निर्णायकानीति युग्मशास्त्रादेरुपस्थितादेव प्रवृत्तिः । वैषम्येणैकदेशव्याप्तौ तु आधिक्यानुगृहीतकर्मकालशास्त्रादेव संशयनिराम इति । एवं च

---

(१) "खर्वो दर्पः" इति मूले वक्ष्यमाणं शास्त्रम् ।

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः।
रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा॥
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम्*।
एतद्व्यस्तं* महादोषं, हन्ति पुण्यं पुराकृतम्॥ इति।

अत्र रन्ध्रान्ताः शब्दाः द्वितीयादिनवम्यन्ततिथिपराः। रुद्रः—एकादशी। द्वितीया तृतीयायुता, सा च द्वितीयायुतेति *समयुग्मानामित्यर्थः। इदं च शुक्लपक्षे *अमाप्रतिपद्युग्मस्य पूर्णिमायाश्च तत्रैव सत्त्वादिति के-

---

दिवारात्रिप्रमं यत्र एकस्यैव तिथौ गतम्।
तस्यामुभययोगिन्यामारभेत व्रतं व्रती॥ इति।
त्रिसन्ध्यव्यापिनी या स्यात्सैव पूज्या सदा तिथिः।

इत्यादिकं कर्मकालशास्त्रसिद्धार्थकमेव। यदा तिथिरेकत्र दिने अहोरात्रयोगिनी, अन्यस्मिन्नस्तमात्रयोगिनी, रात्रिमात्रयोगिनी वा; तदा ऽहोरात्रसाध्ये उपवासादौ अन्यतरमात्रयोगिनी स्वल्पोभययोगिन्या एव(१) न्यायतः कर्मकालशास्त्राच्च प्राप्तेः। *महाफलं—यथाविधिकृततत्कर्मफलदम्। *व्यस्तम्—अन्यथा कृतम्। महादोषम्—कर्मवैगुण्यकारि।

*सप्तेति। युग्मगता पूर्वा तिथिरुत्तराविद्धा उदयव्यापिनी, उत्तरा च पूर्वविद्धा अस्तमयव्यापिनी ग्राह्येत्यत्र तात्पर्यम्। *अन्येति। द्वितीयादिकयुग्मस्य पक्षद्वयवर्तित्वात् त्यागः। अत्र साहचर्यस्य नियामकत्वमयुक्तम्। तस्य सन्निधिरूपतया स्थानावान्तरभेदत्वान्मुख्यप्रवृत्त्या पक्षद्वयवर्तितिथिवाचिद्वितीयादिपदश्रुत्या बाधात्। तदुक्तं—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यम्" इति। (अ० ३ पा० ३ सू. १४ जै०) अत एव छान्दोग्यानां "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यने-

(१) अदनम् इति शेषः।

चित्। *नत्वं त्वमा*प्रतिपद्युग्मात् कृष्णपक्षलिङ्गात् पञ्च- मपरमिदं *तत्तद्विशेषवाक्यैः *कृष्णे तिथिविशेषेऽभि- धत्ते इति। दशमी तूक्ता पुराणसमुच्चये—

*संपूर्णे दशमी कार्या मिश्रिता, पूर्वयाऽपरा। इति।

संपूर्णे—शुक्लपक्षे। त्रयोदशी तु सुमन्तुनोक्ता—

कन्याशोकगुणरुद्रीयारूपमवस्तुपासनं, सामान्यविशेषात्... त्रोद्वीयस्य वेति पूर्वपक्षो मुख्यवृत्त्या सामान्यवाचकोऽवीप्सा- र्था तत्सामान्योपदिष्टेत्याशिवशार्दूलादिसर्वशाखोक्तिभिवासनत्वां- निरस्तो यद्यपीदोषायामित्यभिप्रायवानाह—*नत्वं त्विमि। *प्रथेति। पूर्णिमामात्रं च शुक्लपक्षलिङ्गं द्रष्टव्यम्। *तत्तद्विशेषेति। "यदि त्वन्यद्वितीया स्यात्" इत्यादिभिरित्यर्थः। यदि च तेनापि सामान्यवाक्यमुच्यते, तदा तत्तत्कर्मकालवाक्ये नरमन्नतिकेनैवा- र्थेन संकष्टचतुर्थ्यादिर्दिनद्वयसत्त्वे मासं परविद्धत्वं "चतुर्थी गणनाथ- स्य" इत्यादिनाऽयोग्यत्वं इत्यर्थः। *कृष्णे इति शुक्लेतरस्य।

*संपूर्णे इति। अत्र हेमाद्रिः संपूर्णेति पाठः। संपूर्णे इ- संपूर्णे शुक्लपक्षे इति च व्याख्यात्। अन्यथा कृष्णपक्षे विशेष- वचनाभावेः। न च शुक्लपक्षे इत्युक्तवचनान्यम्।

पूर्णा न दूषिता यस्मादिति सा मनैतो मुनी।

इतिवचनात्। यतः सा सर्वतोमुखी अतोऽविशेषेण पूर्णा, या वेत्यर्थादिति वाक्यम्। "श्रौतेन जुहोति, तेन सर्वं [illegible] इत्यत्र [illegible] [illegible] श्रौतेन होतव्यमिति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। तस्मात्संपूर्णेति पाठः। [illegible] इति। [illegible]

त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने। इति।

कृष्णपक्षे त्वापस्तम्बः—

*प्रतिपत्सद्वितीया स्यात्, द्वितीया प्रतिपद्युता।
चतुर्थीसंयुता या च सा तृतीया फलप्रदा॥
पञ्चमी च प्रकर्तव्या षष्ठ्या युक्ता तु नारद।
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी॥
शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः॥

इतिशुक्लकृष्णवाक्यमेव तत्र व्यवस्थापकं न तु तुल्यवद्विकल्पः।

उदाधीने तु शास्त्रार्थे पुरुषेच्छा नियामिका।

इति पुरुषेच्छाश्रयणानौचित्यात्। एवं च संपूर्णे इति पाठोऽपि सुयोज्यः। शुक्लपक्षे दशमी परविद्धा, अथ वा-पक्षान्तरे कृष्णपक्षे सा पूर्वविद्धेत्यर्थात् इति।

*प्रतिपदिति। इदं च सामान्यवचनं तद्विशेषपरत्वेयम्। एवं च यत्र परस्परविरुद्धं युग्मवाक्यद्वयं प्राप्नोति, यथा तृतीयायाम्। तत्र "रम्भाख्यां वर्जयित्वा तु" इत्यादिकं वचनं व्यवस्थापकम्। यत्र च तादृशं न व्यवस्थापकं किञ्चिदस्ति, तत्र पूर्वोक्तं शुक्लकृष्णवाक्यं व्यवस्थापकम्। विरुद्धयुग्मवाक्यद्वयाविषय इव तद्विषयेऽपि तस्य निष्प्रत्यूहं प्रवृत्तेः। न च शुक्लकृष्णवाक्यं युग्मवाक्यप्रवृत्तिसमये तद्विशेषवाक्यप्रवृत्तिसमये वा इतो न प्रवर्तेत। (१)युग्माग्नियुगादौ पूर्वस्या उत्तराविद्धाप्राशस्त्येन (२)परस्य, उत्तरस्याः पूर्वविद्धाप्राशस्त्येन पूर्वस्य च विरोधात्। एवं "प्रतिपत्सद्वितीया" इत्येतत्प्रवृत्तिसमयेऽपि। अत एव

---

(१) 'युग्माग्नियुगभूतानाम्' इत्यस्येत्यर्थः।

(२) 'कृष्णपक्षे तिथिर्ग्राह्या' इत्यस्येत्यर्थः। एवं पूर्वस्येत्यस्य 'शुक्लपक्षे तिथिर्ग्राह्या' इत्यस्येत्यर्थो बोध्यः।

पूर्वविद्धा प्रकर्तव्या, परविद्धा न कुत्रचित् ।
दशमी च प्रकर्तव्या सदुर्गा द्विजसत्तम ॥
षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः, पराः पूर्वेण संयुताः ॥ इति ।

*यत्तु व्याघ्रः—

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ पूज्यौ, हिंसा स्यात् पूर्वकालिकी ॥

इति । खर्वः–साम्यं, दर्पो–वृद्धिः, तयोः परा । हिंसा—क्षयस्तत्र पूर्वेत्यर्थः । एतच्छ्राद्धादि*विषयम् ।

दैवपित्र्यसाधारण्येन प्राप्तमौदयिकत्वं

दैवे कर्मणि संप्राप्ते यस्यामभ्युदितो रविः ।
सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी ॥

इतिपरिसंख्यातमिति कथं दैवेऽस्तमयातिथिग्रह इत्यपाकृतम् । उ... स्वीकारीत्या दैवेऽप्यस्तमयतिथिग्रहौत्वे शुक्लकृष्णसामान्येन पित्र्ये आपराह्णिकत्वं तेन विधीयते, तत्स्तुत्यर्थं च दैवौदयिकत्वोक्तिरिति... पगमात् । त्रिदोषपरिसंख्याऽनुपगमात् । "उत्तरेऽहन्द्विरात्रस्य गृह्णते" इत्यौत्तराहिकस्य षोडशिग्रहस्य अङ्गिरसां द्विरात्रे "वैखानसं पूर्वेऽहन्... साम भवति, षोडश्युत्तरे" इति परिसंख्यानाम सर्वद्विरात्रे षोडशि... ग्रह इति प्राप्तस्य त्रैदोष्यादेव वैखानसस्य विध्यर्थवादत्वमुपेत्य निरासात् । न च 'कृष्णपक्षे तु' इत्युक्तं युग्मादिवाक्यवत् 'प्रति... रसद्वितीया' इत्यादेरपि शुक्लकृष्णपक्षसाधारण्यादिति वाच्यम् । पा... रिशेष्याचस्य कृष्णपक्षाविषयत्वात् । एतच्चाग्रे वक्ष्यते ।

*परिचेति । यदा युग्मवाक्यं प्रवर्तते, तदैवास्य ... सन्देहो दुर्वार इत्याशयः । *श्राद्धादीति । कर्म द्विविधं—दैवं पित्र्यं च । तत्र खर्वादिवाक्यं पितृविषयमित्यर्थः । एते...

*द्वितीयादिकयुग्मानां पूज्यता *नियमादिषु ।
एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदना ॥

इति व्यासोक्तेः । नियमादिषु—व्रतदानादिदैव*कर्मसु । *एकोद्दिष्टादिनिषिद्धवृद्ध्यादावित्यर्थः ।

युग्मादिवाक्यस्य दैवविषयकत्वं ध्वनितम् । तदाह—*द्वितीयादिकेति । नियमो—व्रतम् । आदिपदं मादृश्यात्सर्वदैवकर्मपर- .. ,—*दैवेति । ह्रासवृद्ध्यादिचोदना—खर्वादिवाक्यम् । ननु वृद्ध्यादाविति वृद्धिपदमयुक्तं वृद्धिश्राद्धस्य तिथ्यप्रयुक्तत्वादत आह—*एकोद्दिष्टादीति । अथ ह्रासवृद्धी चन्द्रह्रासवृद्ध्युपलक्षितकृष्णशुक्लपक्षौ तच्चोदना—शुक्लकृष्णवाक्याधीनः—शुक्लपक्षतिथिः (१)उत्तरा, कृष्णपक्षतिथिः पूर्वेति निर्णयः तत्र एकोद्दिष्टादि—माध्याह्निकं पित्र्यं, वृद्ध्यादि—पौर्वाह्णिकं पित्र्यं विषय इत्यर्थो ऽस्तु; आपराह्णिकपित्र्ये तु पक्षद्वयेऽप्यस्तमयव्यापिनी तिथिर्ग्राह्या ।

यथाऽस्तं सविता याति पितरस्तामुपासते ।
तिथिं, तेभ्यो ऽपराह्णो हि स्वयं दत्तः स्वयंभुवा ।

इतिहेतुमन्निगदरूपवाक्यशेषादिति भेद । यतो दैवेषु युग्मवाक्यमेव निर्णायकमिति नार्थः । तदविषये शुक्लकृष्णवाक्यप्रवृत्तेः, ▪ युग्मवाक्यं दैवविषयमेवेति । अत एव यथा दैवेऽपि शुक्लकृष्णवाक्यमेव पित्र्ये एव निर्णायकमिति नार्थः, तस्य दैवेऽपि प- - ेति । ह्रासवृद्ध्यादिचोदनाशब्दे लक्षणापत्तेश्च ।

वस्तुतस्तु अव्यवस्थायामाशौ पूर्वोत्तरतिथिव्यवस्थापकं शुक्ल- ... । तच्च पित्र्ये न प्रवर्तते । पूर्वाह्णादिने वर्षकाल- . तथैव, दैवत्वेन तथाह्लावाविचयेन, साम्येन तथाहि— तथाहि—तद्रूपत्वे वा अस्तमयापराह्णव्याप्तिभ्यां खर्वादि-

---

(१) उत्तरतिथिविद्धेत्यर्थः । एवं पूर्वेत्यत्रापि बोध्यम् ।

*कर्मकालव्याप्त्यभावे तु कर्मोपक्रमकालगैव ग्राह्या,
कर्मोपक्रमकालगा तु कनिमित्र्योगा, न युग्मादरः।
इति दीपिकोक्तेः। यानि तु—

वाक्यवशेन व्यवस्थासत्त्वात्। नापि "यथाऽस्तं सविता याति" इत्यादेरापराह्णिकपिण्डपितृयज्ञविषयत्वात् माध्याह्निकादिपित्र्येऽव्याप्तिः। "उदिते दैवम्" इत्यादिसामान्यवाक्यवशादपराह्णोऽपरमाग इति कुतपपूर्वादौपक्रमिण एकोद्दिष्टस्यापि तादृशापराह्णसमाप्यत्वेन सङ्गतात्। अन्यथा शुक्लपक्षे कुतपपूर्वादौपक्रमिणः पार्वणस्याप्यसङ्गतात्।

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः।
कृष्णपक्षापराह्णे तु रौहिणं तु न लङ्घयेत्॥

इत्युक्तेः। उपक्रमे रौहिणलङ्घनं निषेधता चानेनोपक्रमकाल एवोच्यते, न तु रौहिणे समाप्यत्वम्। येन

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः।

इतिवदेकोद्दिष्टमात्रविषयकत्वं स्यात्। अत एव हृद्ध्यादौ—हृद्ध्यादिप्रयुक्ते संशये ह्रासवृद्ध्यादिचोदना—शुक्लकृष्णवाक्यमित्यपि नार्थः। तिथिखण्डत्वविभक्तस्य हृद्ध्यादेः सन्देहोत्थापकतया अनैकान्तिकत्वाच्च। हृद्ध्यादीत्यादिना क्षयसाम्यग्रहः। एतच्च कर्मकालशास्त्रबाधेन खर्वादिशास्त्रप्रवृत्तिः युग्मादिशास्त्रवदिति बोधनाय। एकोद्दिष्टादीत्यादिना पार्वणस्य यज्ञोपवीतित्वादिदैवधर्मकस्य दैवश्राद्धादेश्च पित्र्यस्य ग्रह ... मिश्रकश्राद्धं तदादिः ... वश्राद्धग्रह इत्यपाकृतं, लक्षणापत्तेः। *कर्मकालेति। एवकारेण कर्मकालेनानिर्णये युग्मशास्त्रस्य निर्णायकत्वमुक्तं, तत् तदुपक्रमस्य निर्णायकत्वासंभवे एव, नान्यथा। तस्य कर्मकालसमत्वात्।

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ॥

इत्यादीनि*,तानि *त्रिमुहूर्तादिस्तुतिरिति निर्णयशैली॥

यो यस्य विहितः कालः कर्मणस्तदुपक्रमे ।
विद्यमानो भवेदङ्गं नोदितोपक्रमेण तु ॥

इति बौधायनवाक्याद्येति सूचितम् । यथा साम्येन एकदेशव्या-
प्तौ यत्कर्म मध्याह्नादावेवोपक्रम्य समाप्यते, तत्रैव कर्मोपक्रमयोगि-
नी युग्मशास्त्रबाधश्चेत्यर्थः । दिनद्वये कर्मकालव्याप्तौ तदस्प-
र्शे वा पूर्वमेवोपक्रम्य मध्याह्नादावनुष्ठीयमाने कर्मणि साम्येन त-
देकदेशस्पर्शेऽपि युग्मवाक्यात् खर्वादिवाक्याद्वा निर्णयः। तत्र कर्म-
कालशास्त्रेण निर्णेतुमशक्यत्वात्,यो यस्येत्युपक्रम्य तदुपक्रमे इत्युक्ते-
राद्यस्या तस्मिन्काले, तस्य कर्मण उपक्रमे—तत्कालीनतत्संकल्पे
इत्यर्थोऽयमवसेयः । उपक्रमः—सङ्कल्पः। "सङ्कल्पो प्रथमयोः"
इत्युक्तेः । *इत्यादीनीति । आदिना

यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

इत्यादिसङ्ग्रहः । *त्रिमुहूर्तादीति । आदिना केवलोदयि-
... ग्रहः। वस्तुतस्तु त्रिमुहूर्तादिस्तुतिरित्यस-
। एतद्वचनयोरुदयास्तमयगततिथेः साकल्यप्रतिपादकत्वात् ।
प्रतिपादनं च प्रमाणान्तरेण त्रिमुहूर्तायास्ततो न्यूनाया
पूर्वस्या उत्तरस्या वा तिथेर्ग्राह्यत्वे सिद्धे तद्दर्शभागे
तत्रैव कर्मानुष्ठानार्थम्, न तु युग्मादिवाक्यविष-
अपि तिथेरेतद्वाक्यवशाद्ग्रहः। त्रिमुहूर्तादिरेषर्व पर्यवसाद् ।
घ यत्राङ्गभूतायास्तिथेः कर्मसङ्कल्पकालेऽभावस्तत्रापि क-
तिथिमर्थयोल्लेखः सङ्कल्पनिषेधस्तदधिकरणत्वस्य तत्तिथियो-
। नैमित्तिके तु कर्मणि न निमित्ततिथेरुल्लेखः । तस्या

*दिनार्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि ॥

सायाह्नस्त्रिमुहूर्तः स्यात्सर्वधर्मबहिष्कृतः ।
इति व्यासेन
लेखाप्रभृत्यथादित्ये त्रिमुहूर्तगते रवौ ।
प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पञ्चमः ॥
सङ्गवस्त्रिमुहूर्तस्तु मध्याह्नस्तत्समः स्मृतः ।
ततस्त्रयो मुहूर्तास्तु अपराह्णो विधीयते ॥
पञ्चमो दिनभागो यः स सायाह्न इति स्मृतः ।
इति पराशरेण चोक्तेः । *दिनार्द्धेति । भुज्यते-भावे लकाराः भोजनं तदर्थः । यदिति क्रियाविशेषणं, न तु कर्म । तथा च प... भोजनं तदेकभक्तमित्यर्थः । एकं द्वितीयभोजनाभावविशिष्टं भोज... व्रतस्वरूपं भक्तपदे तद्भोजने लक्षणोपगमात् । द्वितीयभोजनाभा... न नियमपदार्थः । तस्यैककेवलाद्यर्थत्वात् । नापि ब्रह्मचर्यादि... साधारणविधिनैव तल्लाभात् । किं तु ग्रासत्रयन्यूनत्वम् । नैतके भोज...
अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ।
कुक्कुटाण्डप्रमाणपिण्डांस्तु ग्रसेदेककशः पुमान् ॥
इत्याद्युक्तप्रमाणसंख्यायां
दिनार्द्धसमये ऽतीते भुज्यते नियमेन यत् ।
एकभुक्तं तु तत्प्रोक्तं न्यूनं ग्रासत्रयेण तु ।
इति देवलेन तदुक्तेः । एकभक्तपर्याय एकभुक्तम् । एकं ... भोजनमिति व्युत्पत्तेः । तत्र नियमो ब्रह्मचर्यादिः सामान्यवि... विधिलभ्यः । वस्तुतस्तु अयाचितवत् पातिकोपवासासम्भावन... भोजनोपवासान्यतरस्यैतद्व्रतस्वरूपता स्याद्तो नियमपदम् । ... वासादिनिवर्तकं तदर्थः । तादृशभोजनस्याद्यादिपक्षादिवि...

इति स्कान्दोक्तेः *षोडशसप्तदशादिदण्डा मुख्यः कालः। दीपिकायां तु—*'मध्याह्नान्त्यदले त्रिभागदिवसे स्यादेकभक्तम्'इति। ततः सूर्यास्तपर्यन्तं गौणः। 'दिवैव हि' इत्यस्य *वैयर्थ्यापत्त्यैतत्परत्वात्। अत्र पूर्वेद्युर्व्याप्तिः*, परेद्युः, उभयेद्युर्व्याप्तिः, *तदभावः, अंशाव्याप्तिः। तत्रापि साम्यं वैषम्यं चेति षट् पक्षाः। तत्राद्ययोरसंदेह एव, तृतीये तु पूर्वेऽह्नि गौणमुख्यव्याप्तेः सत्त्वात् पूर्वा इति माधवः। *युग्मवाक्यान्निर्णय इति हेमाद्रिः।

सम्भवेन न प्रतिग्रहानुज्ञाप्रसङ्गः। ब्रह्मचर्यवत्तस्यादिष्टत्वेऽपि सामान्यविधित एव सिद्धेः। *षोडशसप्तदशादिदण्डा इति। सप्तदशाष्टादशदण्डाविति स्वपाठः। सन्ध्याभोजननिषेधस्य रागप्राप्तभोजनपरतयेहाप्रवृत्तेः। *मध्याह्नेति। "पूर्वाह्णो वै देवानां, मध्यन्दिनो मनुष्याणाम्, अपराह्णः पितॄणाम्"इत्युक्तरीत्या विभागो ग्राह्यो न तु पञ्चधा। नापि

पूर्वाह्णः प्रहरं सार्धं मध्याह्नः प्रहरं तथा ।
आतृतीयादपराह्णः सायाह्नश्च ततः परम् ।

इति गोभिलोक्तचतुर्धा। अह्नो मध्यं मध्याह्न इति व्युत्पत्तिविरोधात्। तुना च एवं सति पञ्चधा पक्षस्य वैयर्थ्यं स्यादतोऽप्येष षण्मुहूर्तत्वेनेहापि स एव ग्राह्यो नान्य इत्यपदाचेः।

*वैयर्थ्येति। न ह्यनेन नक्तं व्यावर्त्यम्। तस्य व्यपदेशान्तरेणैव व्यावर्तितत्वात्, अत एव च दिवाभोजनसिद्धेः। कथं चिन्मुख्यकालासंभवे प्रधानस्य लोपवारणाय गौणकालो विधीयते "अङ्गगुणविरोधे च तादर्थ्यात्"इति सूत्रात् प्रधानानुसारेण गुणस्य नेतव्यत्वादिति तदर्थः। *व्याप्तिः—मध्याह्नोत्तरदलव्याप्तिः, न तु मध्याह्नव्याप्तिः। तत्पूर्वदलस्य एकभक्तकालत्वाभावात्। *तदभावः—उभयेद्युस्तदस्पर्शः। *युग्मेति। अत्र

चतुर्थपक्षे पूर्ववत् । गौणका
[illegible] वाऽधिका, सा ग्रा
च श्रवणद्वैकभक्तनिर्णयः ।

स्वकालादुत्तरः कालो गौणः

इति वचनाद्दिवसकाले प्राप्ते "
[illegible] संग्राहकतया [illegible]
चि.। अपूर्वेति । मुख्यकाले [illegible]

[illegible]

इति [illegible]

[illegible]

तिथौ च *तदनुसारेण निर्णयः ॥

अथ नक्तम् । *तच्च दिनानशनपूर्वं रात्रिभोजनम् । तत्र प्रदोषव्यापिनी ग्राह्या ।

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।

इति वत्सोक्तेः । प्रदोषस्तु-

त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तं गते सति ।
नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चयः ॥

इति मदनरत्ने व्यासोक्तेः । तत्रापि त्रिदण्डोत्तरं कार्यम् ।

इत्यादिनोक्तम् । *तदनुसारेणेति ।

तिथिर्यथोपवासे स्यादेकभक्तेऽपि सा तथा ।

इति सुमन्तुवचनमपि उपवासप्रतिनिध्येकभक्तपरम् । तेनाष्टौ तानीति गुर्वाद्या कृतैकभक्तमुपोष्यादिन एव ।

"नक्तं निशायां कुर्वीत"इत्यादौ नक्तपदं न कालार्थकं, विधातुमशक्यत्वापत्तेरित्यत्राह—*तच्चेति । न च नक्तं नक्तसाध्यमित्येवार्थः, तावता कथं भोजनलाभ इति वाच्यम् । प्राजापत्यादिषु भूयस एकभक्तायाचितोपवासादिभिः साहचर्यात् प्रायिकप्रतीतिकस्य भोजनस्य सिद्धेः । अत एव"नक्ताशी"इत्यादौ भोजनार्थकपदप्रयोगो न व्यर्थः । तावतैवार्थतो दिनाभोजनं विशेषणं लभ्यते । एवं च

मार्गशीर्षे सिते पक्षे प्रतिपद् या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत् ॥

इत्यादौ पृथक् क्रियानिर्देशादेव प्रायिकप्रतीतिकं भोजनं रात्रौ लभ्यते । तदनुरोधेन चाङ्गभूतपूजादेर्दिवानुष्ठानमेव । अत एव नवरात्रस्य नक्तव्रतत्वं माधवाचार्यैरुक्तं संगच्छते । भोजनस्य प्रायिकप्रतीतिकतया तद्व्यत्ययेऽप्यक्षतेः ।

सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ।
इति स्कान्दोक्तेर्दण्डत्रयस्य सन्ध्यात्वात् । तत्र
चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् ।
आहारं, मैथुनं, निद्रां, स्वाध्यायं च चतुर्थकम् ॥
इति मार्कण्डेयेन भोजननिषेधात् ।
*मुहूर्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः ।
*नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ॥
इति माधवीये भविष्योक्तेश्च । गौडास्तु-
प्रदोषो *ऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते ॥
इति वत्सोक्तः प्रदोषः । सन्ध्या च दिनरात्र्योः सन्धौ
मुहूर्तः ।
इति स्कान्दाच्च । यत्यादीनामपि सायाह्ने-

ननु निषेधो वास्तविकसन्ध्यापर एवास्त्वित्यत आह *मुहूर्तो
नमिति । नक्षत्रदर्शनादिति पूर्वत्रापयन्त्विति, काकाक्षिन्यायात्
नक्षत्रदर्शनावधिकं मुहूर्तोनं वास्तविकसन्ध्यारूप नक्तं
तीत्यभिप्रायेनेन तस्य नक्तत्वव्युदासः नक्षत्रदर्शनमादायाहं
इत्यभिमानेन तस्य पारिभाषिकसन्ध्यारूपस्य तद्व्युदासः ।
स्तुतस्तु ननूक्तप्रदोषः कुतो मुख्यः कालः "न नक्तं निशि
नम्"इतिनिषेधोपबृंहितस्यात्मनो द्विगुणच्छायेत्युक्तदिनस्य
कालत्वेन तस्य "स्वकालादुत्तरः कालो गौण"इति वाक्येन
णत्वस्यैव सम्भवादित्यत्राह-*मुहूर्तोनमिति । शिवेनाहं
इति स्वाभिमतेनाभिधानात् । भवदन्तीसन्ननान्वेयानिषेधस्
क्तस्यायोगाच्च । प्रदोषमुपजीव्य तत्प्रवृत्तेरन्तस्य मुख्यत्वमिति
*नक्षत्रेति । ल्यब्लोपपञ्चमी । नक्षत्रदर्शनं प्राप्येत्यर्थः । *
मयादिति । तारकोदयादिति यावत् । सन्ध्याप्रदोषयो

अर्धास्तमयात्सन्ध्या व्यक्तीभूता न तारका यावत् ।
तेजःपरि(१)हानिवशाद्भानोरर्धोदयं यावत् ॥

इति वराहोक्तेरित्याहुः, तन्न । *अस्य सन्ध्यावन्दनानध्यायादिपरत्वात् । अत एव तत्र खण्डमण्डलस्य सन्ध्यात्वमुक्तं विज्ञानेश्वरेण । यच्च मदनरत्ने नक्तस्य विधत्वाद् रागप्राप्तभोजनगोचरो निषेध इत्युक्तम् । तन्न । *विधेर्निषेधाविरोधात् । अन्यथा *कपिञ्जलानित्यत्र

स्यार्धास्तमयादित्यर्थमभिप्रेत्याह—*अस्येति । *विधेरिति । निषेधविषयपरिहारेणापि विधिचारितार्थ्यादिति भावः(२) । *कपिञ्जलौ—गौरतित्तिरिः । अत्र यद्यपि नक्तभोजनस्य त्रिदण्डोत्तरत्वमुक्तम् ।

निशानक्तं तु विज्ञेयं यामार्धे प्रथमे सदा ।

इति मुख्यतरकालस्य नैरर्थक्यात् । किं च दण्डत्रयं मुख्यकालः ।

---

(१) तेजःपरहानिवशादिति पाठः साधुः । तेजसः परस्य—अन्यस्य हानिवशात् । तमोहानिमारभ्येत्यर्थः ।

(२) अत एव 'मा हिंस्यात्' इतिनिषेधविषयचतुर्थादिकपिञ्जलपरिहारेण कपिञ्जलानिति बहुवचनस्य साधारण्येऽपि त्रित्वसंख्यायामेव पर्यवसानात् कपिञ्जलत्रिकमेव आलब्धव्यं, न तु ततोऽधिकमिति सिद्धान्तितमधिकरणमालायां कपिञ्जलाधिकरणे (अ० ११ पा० १ अधि० ८) तथा हि

कपिञ्जलेषु त्रित्वाद्याः पाक्षिकास्त्रित्वमेव वा ।
आद्यो बहुत्वसाम्याय त्रित्वेनैव कृतार्थतः ॥

अश्वमेधे "वसन्ताय कपिञ्जलानालभेत" इति त्रित्वचतुष्ट्वादिसंख्यानां बहुत्वसाम्यादिच्छया या काचिद्बहुत्वसंख्या स्वीकार्या इति चेत् । न, त्रित्वेनैव शास्त्रस्य कृतार्थत्वात् । यो हि चतुष्ट्वादिसंख्यामुपादत्ते, तेन न तदन्तर्भूतं त्रित्वं वर्जयितुं शक्यम् । त्रित्वमुपाददानेन त्वनन्तर्भूतं चतुष्ट्वादिकं वर्जयितुं शक्यते । अतोऽवश्यंभावित्वेन प्रथमभावित्वेन लाघवेन च त्रित्वे उपात्ते शास्त्रार्थसिद्धौ ततोऽधिकपक्षिहिंसायां प्रत्यवायात् । तस्मात् त्रित्वमेवोपादेयमिति ।

प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमुच्यते ।

इत्युक्तेः । त्रिमुहूर्त मध्यमः । "त्रिमुहूर्तं प्रदोषः स्याद्" इत्युक्तेः । निशीथान्तमधमः । "नक्तं निशायां कुर्वीत" इत्युक्तेः । एवं "चत्वारीमानि" इति वाक्ये सन्ध्या न पारिभाषिकी । मानाभावात् । परिभाषाया अनध्यायप्रयोजकत्वम् वर्जितादौ चारितार्थ्यात् । प्रदनरत्नोऽपि सम्यगेव । तथा हि-मैथुनादिसमभिव्याहारान्निषेधो रागप्राप्तभोजनपर एव न तु वैधपरः । विधितो यदर्थतया यत्प्राप्तं तदर्थतयैव तन्निषेधे विकल्पापत्तेः । न च निषेधो विशेषविषयत्वेन बलीयान् । तस्य सामान्यविषयत्वादिना दुर्बलेनापि विधिनोपजीवितत्वादेव तुल्यबलत्वात् ।

यदपि कपिञ्जलन्यायेन विधिचारितार्थ्योक्त चतुर्थादीनां निषेधविषयत्वादालम्भनं, तदपि न । यतोऽग्नीषोमीयवद् फलार्थतया विहितायां हिंसायां एव न निषेधस्पर्शः इतीहापि न तत्स्पर्शः, परं द्व्यत्वाद्यनियत्वाद्यन्यतरद् बहुवचनार्थः । तत्र लाघवेन त्रित्वमेव विधिविषयो न चतुष्टादि । द्रव्यगतसंख्याया अपि विधेयतायाः सिद्धान्तितत्वादिति नातिप्रसङ्गः । अत एव पर्वरविवारादौ प्रातः नक्तभोजनं रात्रौ भवत्येवेति वक्ष्यति । न च

ये त्वादित्यदिने प्राप्ते नक्तं कुर्वन्ति मानवाः ।
दिनान्ते तेऽपि भुञ्जीरन्निषेधाद्रात्रिभोजने ॥

इति वचनाद्गौणकाल एव तत्कर्तव्यमिति वाच्यम् । निषेधादिति हेतूपन्यासवशान्निषेधस्य वैधेऽप्रवृत्तेः । वैधेऽपि तत्प्रवृत्तावन्याङ्गनकेऽपि प्रवर्तेत । तत्र प्रवर्तयितुमशक्यत्वात् । अन्यथा तद्द्वारा तद्गत... ग्रत्वसिद्धौ मातुलसुताद्युपादिविहितनक्तादौ प्रवृत्तेः पुरुषार्थत्वप्रदर्श... निषेधस्यापि क्रत्वर्थत्वपुरुषार्थत्ववैरूप्यं स्यात् । तस्मादेतद्वाक्य... मातुलसुताद्युपादिविहितनक्तव्रतपरमेवेति ।

ननु प्रदोषव्याप्तस्य कर्मकालत्वमसंगतम् ।

प्रदोषव्यापिनी यत्र त्रिमुहूर्ता यदा दिवा ।

त्रिभ्योऽधिकानां हिंसनं स्यात् । *सायंकाले नक्तं तु दिनद्वये प्रदोषास्पर्शे ज्ञेयम् ।

अतथात्वे परश्च स्यादस्तादर्वाग्यतो हि सा ।

इति जाबालिवचनात् ।

*प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।
आत्मनो द्विगुणा छाया मन्दीभवति भास्करे ॥
तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम् ।

इति स्कान्दाच्च । *यत्यादीनामपि सायाह्ने नक्तम् ।

नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम्* ॥

इति तत्रैव स्मृत्यन्तरात् । इदमपुत्रविधुरोपलक्षणम् । पुत्रवतस्तु रात्रावेव ।

अनाश्रमोऽप्याश्रमी स्यादपत्नीकोऽपि पुत्रवान् ।

इति संग्रहोक्तेः । सौरनक्तं तु दिवैव ।

*त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः ।
तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनम् ॥

अथ नक्तव्रतं कुर्यात्स्वाध्यायस्य निषेधवत् ॥

इति वाक्येन सायमोऽपि लाभादित्यत्राह—*सायमिति "यतो हि" इति सायमो गौणत्वार्थम् । अन्यथा पौनरुक्त्यात् । सायंकाल एव नक्तानुष्ठानविधानपूर्वककालवचनमप्याह-*प्रदोषेति । *यत्यादीनामिति । यद्यपि सायंकालो गौणः "नक्तादिव्रतयोगेषु" इति वाक्यात्, तथापि यत्यादिषु स मुख्यः । *सदिवाकरमिति ।

सदिवाकरं तु तत्प्रोक्तमन्तिमं घटिकाद्वयम् ।

इति वचनं तु तस्य मुख्यतरत्वबोधकम् । पुत्रादिकं तु यथाना-विरोधेन तत्रैव मार्गेण वा कार्यम् । *त्रिमुहूर्तेति । सायंप्रदोषव्या-प्त्योःप्राप्तयोरभिव्यक्त्या सायंव्याप्तेर्मुख्यत्वबोधनेन दिवैवेति सा-

इति सुमन्तूक्तेः । हरिनक्ते *विशेषः कालादर्शे स्कान्दे—

उदयस्था सदा पूज्या हरिनक्तव्रते तिथिः ।

इति । अन्यनक्तं तु संक्रान्त्यादावपि रात्रावेव । *निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधाबाधकत्वात्। *दिनद्वयव्याप्तौ परा* ।

उभयोर्यदि वा तिथ्योः प्रदोषव्यापिनी तिथिः ।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यतः ॥

इति कालादर्शे जाबालिवचनात् । अन्यपक्षेषु *एकभक्तवन्निर्णयः । अत्र विशेषो मदनरत्ने गारुडे—

भः । एतेन सायाह्नमुख्यकालिकनक्ते एकैकदिन एव कार्त्स्न्येन एकदेशेन वा व्याप्तौ सैव ग्राह्या । दिनद्वयव्याप्तौ पूर्वा । गौणमुख्यव्याप्त्योः सत्त्वात् । दिनद्वयास्पर्शे साम्येन वैषम्येण वा दिनद्वयस्पर्शे च पूर्वैव गौणव्याप्तेः सत्त्वादित्युक्तं भवति । *विशेषः—सायाह्नप्रदोषव्याप्त्योरपवादः । *निषेधस्य—

अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा ।
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥

इत्यादिरूपस्य । प्रदोषमुख्यकालिकनक्ते स्वाह—*दिनद्वयेति । *परेति । तिथ्यादिषु भवेद्यावान्" इति वाक्यैः कर्मतिथेः पूर्वदिने कर्मकालाभावद्योतनादेरपि द्रष्टव्यम्, *एकभक्तवदिति । यथा एकभक्ते गौणमुख्यव्याप्तौ निर्णायिके, तथा नक्तेऽपीत्यर्थः । तेन एकैकदिने एव व्याप्तौ मुख्यकालव्याप्तिरेव । दिनद्वयास्पर्शे गौणकालव्याप्तिरेव । तदुक्तवान् सायंकाले नक्तं स्थित्यादि । साम्येन वैषम्येण वांशतो व्याप्तौ पूर्वैव । गौणकालव्याप्तेराधिक्यात् । यत्र वैषम्येणांशतो व्याप्तौ पूर्वव्यापिका तत्र पूर्वैव, आधिक्यात् । आधिक्यस्यापि निर्णायकत्वात् आधिक्यं च देवपूजा-भोजनपर्याप्तं विवक्षितमिति संप्रदायः । *

च निर्णयो भोजनरूपे नक्त इव पूजादिरूपे नक्तेऽपीति मत्वा त्रयोदशीप्रदोषगोवत्सद्वादश्यादौ न पृथक् निर्णयमभिदधति माधवादयः। "प्रदोषे शिवमर्चयेत्"इत्यादिना प्रदोषस्य मुख्यकालत्वावगमे सायाह्नस्य तत्र गौणकालत्वं लभ्यते। अन्यथा 'प्रदोषव्यापिनी न स्यात्'इत्यादिना तत्र नक्तविधानानुपपत्तेरिति तदभिप्रायः। उच्छृङ्खलास्तु त्रयोदशीप्रदोषे शिवपूजाया एव प्राधान्यान्न त्रिमुहूर्त्तः प्रदोषः। 'त्रिमुहूर्त्त प्रदोष' इत्यस्य भोजनरूपनक्तपरत्वात्। 'नक्तं निशायां कुर्वीत'इत्युक्तेः।

अपरास्तु तत्र सार्द्धसप्तनाडीरूपः प्रदोषः।
अस्तमानं समारभ्य सार्द्धाः सप्त च नाडिकाः।
प्रदोष इति विख्यातस्तदर्द्धे पापमतः शृणु॥

इति वचनादिति, तन्न। एतस्य प्रकरणेन नैमित्तिकपूजाविषयत्वादत्र प्रवृत्त्यसम्भवात्। किं तु नाडीचतुष्टयमेव।

यजनं प्रति मानं तु उत्तमं परिकीर्त्तितम्।
उदये चैव मध्याह्ने प्रदोषे चार्द्धयामिकम्॥

इत्यनारभ्याधीतवचनात्। यत्तु

प्रदोषो ऽस्तमयादूर्ध्वं घटिकाद्वयमुच्यते।

इति माधवः, तत्र प्रशस्तमित्यध्याहार्यमेव। यच्च

प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमुच्यते॥

इति तिथितत्त्वं, तत्र प्रशस्ततरमित्यध्याहार्यम्। यत्र एकत्र दिने साकल्येन एकदेशेन वा प्रदोषव्याप्तौ न सन्देहः। दिनद्वये प्रदोषव्याप्तौ प्रदोषद्वयास्पर्शे साम्येनैकदेशव्याप्तौ च परा। संकल्पकालेऽपि भावात्। यत्र पूर्वप्रदोषेऽधिका उत्तरप्रदोषे स्वल्पा तदाप्युत्तरैव 'दिवारात्रिव्रतं च'इति स्कान्दात्। पठन्ति च

अस्तात्परं यत्र मुहूर्त्तयुग्मं त्रयोदशी चेत् खलु स प्रदोषः।
दिनद्वयेऽप्यस्ति न वा तथैकदेशो ऽथवा तत्र परैव कार्या॥
व्याप्तिर्यदा स्याद्विषमाधिका तु तदा बहुत्वेन विनिर्णयः स्यात्।

द्वयोरभावेऽप्यथ गौणकालव्याप्त्या तु पूर्वापि कार्येत्यु
[illegible]ति। पूजा च त्रयोदश्युपलक्षितप्रदोषे कार्या।

ये नार्चयन्ति गिरिशं समये प्रदोषे
येऽप्यर्चितं शिवपदं प्रणमन्ति नान्ये।
ये तत्कथां श्रुतिपुटैर्न पिबन्ति मूढा-
स्ते जन्मजन्मसु भवन्ति नरा दरिद्राः॥

इत्यनिष्टस्मरणात्। आरम्भश्च शनिप्रदोषे कार्यः।

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता।
आरभेत्तद्व्रतं तत्र सन्तानफलसिद्धये॥

इति तत्रैवोक्तेरित्याहुः। तन्न। माधवादिभिरनुक्तत्वात्
प्रदोषस्य धार्मिकैरनादरणात्। एवमन्यत्रापि उपवासप्रतिनिधौ
नक्तं नारदीयनक्तन्याय एवैकभक्तयोरित्यनेन लभ्यते।
इदं तु बोध्यम्। यत्रैकभक्तं कुर्वीतेत्यादौ एकभक्तं न रात्रौ
भोजननिवृत्तिमात्रं निवृत्तेरवगमात्।

नियमो व्रतमत्री तथोपवासादि पुण्यकम्।

इति कोशात्। पुण्यं सुकृतं पुरुषार्थसाधनादृष्टहेतुः क्रिया, [illegible]
एवं द्रव्यं चेति तत्पर्यायप्रयत्नस्यानर्थकत्वात्। न [illegible]
धर्मार्थरूपार्थवादिनोऽदृष्टफलमुत्पादयन्ति। तस्य इति चे[illegible]
[illegible]नापि कार्यतावच्छेदकधर्मवादिनः। [illegible]
[illegible]वध्यानुरोधाभावात्। कर्म च [illegible]
[illegible]ऽपि तत्र पुरुषार्थानामनवगमात्। नित्यं [illegible]
[illegible]यत्"इत्यादौ प्रत्यवायविधिविशेषात्। नित्य [illegible]
[illegible] विधिवाक्येन क्वाचित्कत्वात्। तस्य [illegible]
[illegible] लक्षणा वा स्यात्।
यदि [illegible]पूर्वकालिकत्वानुष्ठाने [illegible]
[illegible]। [illegible] [illegible]
[illegible] [illegible]
[illegible]। [illegible]

'हविष्यभोजनं *स्नानं सत्यमाहार*लाघवम् ।

नैकपदेऽप्यवधारणगर्भार्थवशेन ह्यादिकालगतभोजननिवृत्तेश्चतुर्थकालगतनियमस्य च प्रतीतिः । मैवम् । चतुर्थकालाहारादिपदानां तादृशनिवृत्तावेव तात्पर्यात्, न तु नियमेऽपि । तत्पदस्य कालांशे परिसंख्यात्वेन भोजनांशे नियमत्वे भिन्नपरतापातात् । व्रतस्य निर्वाहश्च 'चतुर्थकालाहारी ब्राह्मणान् भोजयेत्'इत्यादिविध्युपभूतब्राह्मणभोजनादिनैव । चान्द्रायणादौ च चन्द्रगत्यनुसरणेनान्यथानुपपत्त्या इतरकालभोजननिवृत्तिविशिष्टचन्द्रोदयकालभोजनस्य व्रतत्वम् । तथा 'नक्तं कुर्वीत'इत्यादौ न दिनभोजननिवृत्तिमात्रमित्यभिप्रेत्यैकभक्तवदिति, पूर्वं रात्रिभोजनमिति चोक्तम् । अत एव 'एकभक्तं कुर्वीत''नक्तं कुर्वीत'इत्यादौ 'चान्द्रायणं कुर्वीत' इत्यादौ च न उपवासेन तत्सिद्धिः, नापि सङ्कल्पलक्षणापत्तिः । *कलानामिति । पूर्वादेः प्राक् कर्माङ्गं प्रधानकालम् । *आहारेति । यद्यपि 'न्यूने ग्रासत्रयेण तु' इत्येकभक्तवद्विशेषवचनं दृश्यते, तथापि इह सामान्यवचनेनापि नक्तभोजनविषया ग्राससंख्या ग्राह्या । साम्यात् । एवंच

अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ।

इत्यादौ मितभुक्त्वमपि तद्वदेव अयाचितभोजनविषयग्राससंख्ययोपपाद्यम् । सा चापस्तम्बेन

सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनात्मयः ॥

इति नक्ते द्वाविंशतिरुक्ता । तद्विरुद्धा च नक्ते पराशरेण

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परं निरशनात्मयः ॥ इति ।

तद्विरुद्धा च नक्तायाचितयोश्चतुर्विंशतिर्मते

मासस्तु द्वादश ग्रासा नक्तं पञ्चदशैव तु ।

*अग्निकार्यमधःशय्यां नक्तभोजी षडाचरेत् ॥
अग्निकार्यं व्याहृतिहोमः* । इति नक्तम् ॥

अयाचिते तु *विशेषवचनाभावात्पक्षे० उपवासे प्राग् उपवासवन्निर्णयः ॥

अथ नक्षत्रव्रतकालः । विष्णुधर्मे-
उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः ।

अयाचिते तु द्वौ ग्राह्यौ भाजनस्यो विधिः स्मृतः ॥ इति ।

अत्र शक्ताशक्तभेदेन व्यवस्था ।

*अग्निकार्यमिति । यदुक्तं विशेषतस्तन्नोक्तं, तत्राह-*व्याहृतिहोम इति । विशेषतो यदुक्तं तस्योपसंहारो ऽयमिति पक्षे । व्यस्तसमस्तव्याहृतिः । समस्तव्याहृतिरेवेति केचित् ।

*अयाचिते त्विति । अयाचितान्नभोजनं यदैव लाभस्तदा दिने वा रात्रौ वा निषिद्धकालं विहाय इति तद् अहोरात्रसाध्यमेव, न तु कालविशेषापेक्षमपि । पराधीनत्वात् । तत्र च 'दिवारात्रिव्रत एव' इति सामान्यमेव प्रवर्तते । यदा तु तद्विधिरेकस्मिन् दिने एव, परदिने रात्रावेव, तदाऽहर्व्यापिनी ग्राह्या । 'अन्य विषयः' इति सामान्यवचनात् । तदुक्तं *विशेषवचनाभावादिति । वस्तुतस्तु

एकभक्तायाचितयोर्या विशद्धटिका तिथिः ।
सा तिथिः सर्वदा ग्राह्या नक्ते सायाह्नसंगता ॥

इति शार्ङ्गधरीये नारदोक्तेर्निर्णयः । तत्स्वाभिमतपक्षान्तरेणाह-
०पक्ष इति ।

अयाचितव्रतम् । अयाचितं स्वयं न कं च न याचितेऽन्यदा । अत्र नक्तो याचितपदनीयं न योज्यते इति तद्भुवं स्मरणा । भाद्रेव मेव 'नैवेद्यान्नम्' इतिवद्विधिवाक्यान्तराभावात् । तदोपवासेन सिद्ध-श्चेति 'व्यवस्थाद्याचितम्' 'अयाचिताशी मितभुक्'इत्यादौ स्मरण

गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु तपश्चरेत् ।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥

इत्यादौ प्राणाग्निहोत्रलोप एव दोषोक्तेरिति, तन्न । तावता "अश्नन्त एव सिध्यन्ति" इति(१) तदसाधारणकार्यासिद्धेः, अनश्नद्दृष्टान्तेन तथैव प्रतीतेः । किं च यदि 'यद्भक्तं प्रथममागच्छेत् तद्धोमीयम्' इत्युपासनाविशेषरूपे परिषेचनादिपूर्वक'प्राणाय स्वाहा' इत्यादिभोजनाङ्गपञ्चाहुतिरूपे वा प्राणाग्निहोत्रविधौ भोजनं विधीयेत, तदा तल्लोपे स्यादप्यवकीर्णित्वम् । रागप्राप्तभोजनमाश्रित्य गुणविशेषविधाने चोपवासविधिवशान्निषेधवशाद्वा भोजनरूपाश्रयाभावेन तदननुष्ठाने को दोषः । यदि तु प्राणाग्निहोत्रपदेन तदाश्रयीभूतं भोजनमेवोच्यते । तच्च नियमितमेव "सायं प्रातर्द्विजातीनाम्" इत्यनेन । तत्रोत्तराश्रमिणोऽष्टमकालिकैकभक्तादिविधानेन पूर्वाश्रमिपरमिति तल्लोपे दोषोक्तिसङ्गतिरिति, तदाऽपि सामान्यरूपस्य तस्य विधिनिषेधाभ्यां काम्यविधिना वा बाध एव । इत्थं च "प्राणाग्निहोत्रलोपेन" इति "येन यत् क्रियते"(२) इतिवद्धेत्वर्थवादः । "अनश्नन्" इति तु अविहितप्राणाग्निहोत्रपानप्रासोपवासादिपरम् । "कोटिमाह्यं तु कुर्वाणान्" इतिवद् वर्तमानकालप्रत्ययेनाभ्यासप्रतीतेः । अयमपि निषेधः

(१) यद्यप्याहुतिमात्रभक्षणेऽपि प्राणनिष्पादकप्राणाग्निहोत्रहोमादिकारणत्वमदृष्टसिद्धेरित्यर्थः ।

(२) "येन यत् क्रियते" इत्यादौ हिरण्यकेश्या हेतुवाचकपञ्चम्याः [illegible] 'येन येनाङ्गं क्रियते, तेन तेन होतव्यम्' इति वाक्ययोरेकवाक्यतया सर्वोपकरणविशिष्टकार्येण प्रयोजनपरत्वाद् हेतुपरत्वम् । तथा च सूर्येण दर्विपिठरादिनामप्रकरणाम्नातत्वाविशेषादिच्छया सूर्येण सह दर्व्यादीनां विकल्प इति चेत् । न, 'स्रुवेण जुहोति' इत्यत्राम्नानवैशिष्ट्यानुरोधात् स्रुवस्य होमकरणत्वं, दर्विपिठरादिकानां तु [illegible] प्रसज्यते । सर्वत्रैव सर्वेषु प्रवेशाद् विकल्पानुपपत्तेर्हेतुत्वपरत्वाभावादर्थवादत्वम् । तदुक्तम् अनुभूतेऽपि, इति भावः ।

एकादश्यादौ तु *वचनाद्भवतीति वक्ष्यामः । शूद्र-
स्याप्यधिकारः ।

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ।
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥

श्रौताधिकारिण एव । मासोपवासादिविधेर्निरवकाशतापत्त्या सर्व
प्रवृत्त्यसम्भवात् ।

मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः ।
आत्मतन्त्रोपघातस्तु न तपस्तत्सतां मतम् ॥

इति वाक्याच्च । प्रधानकर्मार्थकतन्त्रपदेन बलवत्तरश्रौतग्रहणात्
मासपक्षेत्युपलक्षणम् । संलग्नोपवासत्रये तात्पर्यम् । तेन ब्रह्मचारि
श्रौताधिकारिणोः प्राजापत्यादावपि दण्डकलिततपस एव, न
तु स्वस्थानवृद्धिमत्पक्षः; संलग्नोपवासत्रयापातादिति बोध्यम् । के
चित्तु प्राणलोपेनाग्निहोत्रलोपेन चेत्यर्थः । अयं च पूर्वाश्रमिणोरे
मरणान्तिकानशनरूपतपसि दोषो नोत्तराश्रमिणोः कर्माशक्ति
विरत्यादिना तदनुत्थानादिति व्याचख्युः ।

*वचनादिति । नित्यस्य काम्यस्य वा स्मार्तस्य
राणिकान्यतरस्योपवासस्यानुष्ठाने ब्रह्मचार्याहिताग्न्योरशक्त्या
ऽध्ययनाग्निहोत्रादिस्वकर्मलोपहतस्य प्रतिनिषिद्धाकरत्वं वा स्या
दतोऽयं तन्निषेधो देवलेनोक्तः । स च न सर्वथा नि
त्यस्य (१)गौणपक्षसम्भवात्, किं तु काम्यस्यैव तदभावात्
न च काम्यस्य प्राबल्यम् । विरोधाभावेन श्रौताद् दुर्बलत्वात्
निषेधपालनं तु तत्र द्वयोरपि ' गृहस्थो ब्रह्मचारी च आहिताग्नि

(१) नित्योपवासस्य—
उपवासनिषेधे तु भक्ष्यं किञ्चित् प्रकल्पयेत् ।
न दुष्यत्युपवासेन उपवासफलं लभेत् ॥
इतिवाक्यवचनेन विहितानुकल्पफलादिभिरपि सिद्धबोधने
षेधाविरोधादिति भावः ।

इति व्यासोक्तेः । याज्ञवल्क्यस्तु वैश्यशूद्रयोः *त्रिरात्राधिकोपवासनिषेधः ।

वैश्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते ।
त्रिरात्रं *पञ्चरात्रं वा तेषां *व्युष्टिर्न विद्यते ॥
चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते ।
त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः ॥

इति हेमाद्रौ। मदनादिस्त्वाहुः। *यावदुक्तनिषेध इत्येके। प्रकरणात् *महातपोविषय इति युक्तम् ।
एवं स्त्रीणामपि* । यत्तु—स्कान्दे

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि ॥
सर्वेभ्यो यच्च विप्रादिकेभ्यः
कुर्याद्भर्तोऽप्यर्चनं सत्क्रियां च ।
तस्यार्धं वै सा फलं नान्यचित्ता
नारी भुङ्क्ते भर्तृशुश्रूषयैव ॥

आदित्यपुराणे—

इत्यग्रिमवचनादित्यर्थः । *त्रिरात्रेति । त्रिरात्राधिककालव्यापिन उपवासस्य निषेध इत्यर्थः । *पञ्चरात्रमिति तु कैमुतिकन्यायेन त्रिरात्रनिषेधस्तुतिः । *व्युष्टिः—फलम् । *यावदुक्तेति । यावदंशे निषेधश्रवणं, तावदंशे निषेध इत्यर्थः । एतन्मते

चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते ।
त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः ।

इत्येतन्नास्ति । नन्वेवं पञ्चरात्रनिषेधो व्यर्थः कैमुतिकन्यायालम्बनस्यागतिकगतित्वादत आह—*महातप इति । त्रिरात्राद्यनिषेधोऽह्निनिषेधार्थ इत्याशयः । *स्त्रीणामपीति । अधिकार इति वर्तते ।'निजवर्णाश्रमाचारनिरत' इत्यादौ पुंस्त्ववचनमतन्त्रमिति भावः ।

एकादश्यादौ तु *वचनाद्भवतीति वक्ष्यामः । शूद्र-
स्याप्यधिकारः ।

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ।
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥

श्रौताधिकारिण एव । मासोपवासादिविधेर्निरवकाशतापत्त्या सोऽ
प्यवसरसम्भवात् ।

मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः ।
आत्मतन्त्रोपघातस्तु न तपस्तत्सतां मतम् ॥

इति वाक्याच्च । प्रधानकर्मार्थकतन्त्रपदेन बलवत्तरश्रौतप्राणा
मासपक्षेत्युपलक्षणम् । संलग्नोपवासत्रये तात्पर्यम् । तेन ब्रह्मचारि-
श्रौताधिकारिणोः प्राजापत्यादावपि दण्डकलिलनवत्वस एव, न
तु स्वस्थानशुद्धिमत्पक्षः ; संलग्नोपवासत्रयापातादिति बोध्यम् । के
चित्तु प्राणलोपेनाग्निहोत्रलोपेन चेत्यर्थः । अयं च पूर्वाश्रमिणां
मरणान्तिकानशनरूपतपसि दोषो नोत्तराश्रमिणोः कर्मपरित्या-
गित्वादिना तदनुष्ठानादिति व्याचख्युः ।

*वचनादिति । नित्यस्य काम्यस्य वा स्मार्तौ-
पासनिकान्यतरस्योपवासस्यानुष्ठाने ब्रह्मचार्याहिताग्न्योराग्ना-
ऽध्ययनाग्निहोत्रादिस्वकर्मलोपहेतुस्य प्रतिनिषिद्धाकरणं वा स्मा-
र्तत्वोऽयं नाग्निवधो देवलेनोक्तः । स च न सर्वथा नि-
त्यस्य (१)गौणपक्षसम्भवात्, किं तु काम्यस्यैव तदभावात् ।
न च काम्यस्य प्राबल्यम् । विरोधाभावेन श्रौतात् दुर्बलत्वात्
निषेधपालनं तु मत्र द्वयोरपि 'गृहस्थो ब्रह्मचारी च आहिताग्नि

---

(१) नित्योपवासस्य—

उपवासनिषेधे तु भक्ष्यं किञ्चित् प्रकल्पयेत् ।
न दुष्यत्युपवासेन उपवासफलं लभेत् ॥
इत्यादिवचनेन किञ्चिदनुकल्पप्रत्यादिनापि निर्वाहं
कर्त्तव्यायादिति भावः ।

इति स्मृत्युक्तेः । प्रायश्चित्तम् कैश्चित्तु [illegible]त्रिरात्रा-
दिनैरन्तर्यनिषेधः ।

कैश्चित्तु [illegible] चतुर्थकालिकम् ।
त्रिरात्रं [illegible] न कर्तव्यं विरात्रि ॥
चतुर्थभक्तक्षपणं कैश्चित् षष्ठे विधीयते ।
त्रिरात्रं तु न कर्तव्यं [illegible]निर्दिष्टं मन्वादिभिः ॥

इति [illegible] [illegible] । [illegible] इत्यर्थः ।
[illegible] [illegible] इति पुराणम् ।
[illegible] । [illegible] — [illegible]

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि ॥

भर्तृदेवानां पत्नीनां [illegible]
कृत्वोपवासं [illegible] च ।
[illegible] [illegible]
[illegible] पुत्रवती भर्तृशुश्रूषयैव ॥

आदित्यपुराणे—

[illegible]पर्यन्तमित्यर्थः । ०त्रिरात्रेति । त्रिरात्राविच्छिन्नोपवासवि-
[illegible] निषेध इत्यर्थः । ०चतुरात्रमिति तु [illegible]
[illegible] । ०अनुस्मृतिः—[illegible] । ०[illegible] ।
[illegible] [illegible], [illegible] निषेध इत्यर्थः । एतन्मते

चतुर्थभक्तक्षपणं षष्ठे षष्ठे विधीयते ।
त्रिरात्रं तु न कर्तव्यं निर्दिष्टं मन्वादिभिः ।

इत्येतद्व्याहृतम् । तन्मते [illegible]निषेधो व्यर्थः [illegible]
[illegible] आह—०[illegible] इति । त्रिरात्राद्य-
[illegible]निषेधोऽद्विनिषेधार्थ इत्याशयः । ०स्त्रीणामधिकारेति । अधिकार इति
शेषे । 'निमवर्णाश्रमाचारनिरतः' इत्यादौ पुंस्त्वमपन्त्रमिति भावः ।

नारी खल्वननुज्ञाता भर्त्रा वापि सुतेन वा ।
विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकम् ॥
इति । और्ध्वदेहिकं—पारलौकिकम् । तद् भर्त्रननुज्ञा-
विषयम् ।
*भार्या पत्युर्मतेनैव *व्रतादीनाचरेत्सदा ।
इति कात्यायनोक्तेः । अत्र विशेषो हरिवंशे—

---

*भार्येति । "नास्ति स्त्रीणाम्"इति निषिद्धोऽधिकारो अनेन प्रति प्रसूयत इति भावः ।

नन्वेवं विधवायाः कुतोऽधिकारः ?। भर्तुरभावेन तदनुज्ञा-अप्यभावात् । न च 'सुतेन वा'इति सुतानुज्ञयाऽधिकारः। 'यत्करोत्यौर्ध्वदेहिकम्'इत्यस्य लेहरूपत्वकल्पने मानाभावादिति चेत् 'नास्ति स्त्रीणाम्'इत्यादेर्न व्रतादिनिषेधे तात्पर्यं, किन्त्वनुज्ञामात्रे यत्नः। स्त्री व्रतादिकमनुज्ञया कुर्यादिति कात्यायनवाक्यार्थः । *पत्युरिति पितृपुत्रादेरुपलक्षणं,'न स्वातन्त्र्यं क्वचित्स्त्रियः'इत्युक्तेः । कचित्तु व्रतस्य ब्राह्मणादिसङ्ग्रहार्थम् । अत एव सम्प्रति विधवा ब्राह्मणाभावे दासीदासादि अनुज्ञाप्य व्रतमारभन्ते । 'सुतेन वा'इति तु परमापित्सदीयधनाद्यभिप्रायकं, पित्रादेरुपलक्षणं च । अननुज्ञायां तु याज्ञवल्क्यः

प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुद्ध्यति । इति ।

स्मृत्यन्तरे च

भय वा यद्गुरुर्नृपात्कार्यमविज्ञया ।
निग्रहेऽनुग्रहे वापि गुरुः सर्वत्र कारणम् ॥ इति ।

अस्यापि न्याय्यम् । 'भर्तृव्यतिक्रमे कृच्छ्रम्' इत्यापस्तम्बोक्तेः ।
*व्रतादीनिति । आदिना पुण्याम्बुपारणादिरुपवासादिः।
अनुज्ञायामपि स्त्रीणां नाधिकारः । वेदाध्ययनाद्यभावात्

*स्नानं चेति

*स्नानं च कार्यं शिरसस्ततः *फलमवाप्नुयात् ।
*स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत्ततः ॥

*तथा—

गृहीत्वौदुम्बरं पात्रं सकुशं साक्षतं तथा ।
गोशृङ्गं दक्षिणं निरूप्य(१) प्रगृह्णीयात् तज्जलम् ॥

औदुम्बरे—ताम्रमयम्* ।

ततो भर्तुः स्वयं दद्यात्स्नानस्य प्रयतस्य च ।
आरभ्यन्वाभिषेचनं ततः शिरसि तज्जलम् ॥

अधिकारकं भवेत्स्नानं स्नानादन्यत्तु वर्णिनाम् ।

इत्यादिस्नानान्तरवारणाय । किं च

नित्यमभ्युदयात्पूर्वं स्नानमर्थं शुद्धिचिन्तया ॥
एष साधारणो धर्मश्चतुर्वर्णस्य नियमः ।
योषितः शूद्रस्य कर्तव्यं मन्त्रवर्जं विधानतः ॥

इति स्नाने प्राप्ते पुनर्विधाने ज्ञापयति—पूर्वाणि नित्यान्यपि रत्नेव प्रातः स्नानमिति । तत्र प्रत्यासन्नस्नानाविधानार्थमिदम् । *पात्रं—सम्पेत्युम्बरादिकम् । तेन नियमनमुद्दः । नियमान्तरमाह—स्नानादेवेति । *तथेति ।

उपवासोऽथवा व्रतार्थं पूजया ।
स्पृष्ट्वा करावपि चरणौ सततं सततमेव च ॥

इत्युत्तरश्लोकः । सततम्—अनुरतम् । पत्यादि विज्ञापना व्रतवैगुण्यपरिहारार्थम् [illegible](२) । तदन्यथाप्याह—

(१) निरूप्य इति पाठः सर्वाध्ययनकर्ता ।

(२) [illegible] स्नात्वा पूजयता [illegible]—[illegible] [illegible]— [illegible] स्पृष्ट्वा उपवासार्थं व्रतार्थं विज्ञापयेत्, [illegible]— [illegible] [illegible] [illegible] [illegible] ।

उपवासेषु कर्तव्यमेतद्धि व्रतकेषु च । इति ।
मदनरत्ने संकल्पविधिश्च भारते—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः ॥

इत्येवैतेष्वर्थः(१) ।

अथ व्रतारम्भकालः । मदनरत्ने गार्ग्यः—

अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ॥

रत्नमालायाम्—

[illegible]गुरुशुक्र[illegible]
सर्वकर्मसु भवन्ति सिद्धयः ।
भानुभौमशनिवासरेषु च
[illegible] ॥

तथा

[illegible]
[illegible] ।

[illegible]

[illegible]

[illegible]

वैधृतिस्तु व्यतिपातनामा
सर्वोऽप्यनिष्टः, परिघस्य चार्धम् ॥
*तिस्रस्तु योगे *प्रथमे, सवज्रे,
व्याघातसंज्ञे नव, पञ्च शूले ।
गण्डेऽतिगण्डे च षडेव नाड्यः
शुभेषु कार्येषु विवर्जनीयाः ॥

संग्रहे—
कृष्णेऽग्निदिशयोरूर्ध्वं सप्तमीभूतयोरधः* ।
शुक्ले वेदेशयोरूर्ध्वं भद्रा प्राग्वसुपूर्णयोः ॥

गण्ड–व्याघात–वज्राः । पक्षान्तरमाह–*तिस्रस्त्विति । *प्रथमे–विष्कम्भे । अयं च निषेधो योगोपवासे न प्रवर्तते । तथा सति तद्विधेरानर्थक्यापातात् । उपवासस्याहोरात्रसाध्यत्वेन तद्वितकालवर्जनासम्भवाच्च । तत्र पूर्वविद्धतिथिवत्पूर्वविद्ध एव योगो ग्राह्यो, न तु नक्षत्रवदस्तमयव्याप्तो निशीथव्याप्तो वा । रात्रौ पारणानिषेधे परेऽह्नि तदप्राप्तेश्च ।

दानव्रतयोरौदयिकः, श्राद्धे त्वापराह्णिकः ।
नक्षत्रं स्वीकृतं येन व्याप्तः कालस्तु कर्मणः ।
नक्षत्रकार्येष्वेवं तिथिकर्म तथैव तु ॥

इति न्यायात् । करणेषु भद्रापरिमाणमाह–*कृष्णे इति । करणान्तरं तु भद्रावत्तिथ्यर्द्धपरिमितम् । भद्रायां भविष्योत्तरे स्मर्यते ।

यस्मिन्दिने भवेद्भद्रा तस्मिन्नहनि भारत ।
उपवासस्य नियमं कुर्यान्नारी नरोऽपि वा ॥
यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वये ।
कार्यं तेनोपवासः स्यादिति पौराणिको विधिः ॥
प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयम् ।
उपवासस्तदा कार्य एकभक्तं ततो ऽन्यथा ॥ इति ।

श्रीपतिः-

न सिद्धिमायाति कृतं च विष्ट्यां
विषारिघातादिकमत्र सिद्धम् ॥

व्यवहारसमुच्चये-

*दशम्यामष्टम्यां प्रथमघटिका पञ्चमपरं
*हरितो सप्तम्यां त्रिदशघटिकान्ते त्रिघटिकम् ।
तृतीयाराकायां खयम(२०)घटिकाभ्यः परमतं
शुभं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमे ॥

तत्रैव-

सर्पिणी तु सिते पक्षे कृष्णे चैव तु वृश्चिकी ।
सर्पिण्यास्तु मुखं त्याज्यं वृश्चिकयाः पुच्छमेव च ॥

माधवीये-

विष्टिर्यदाऽहनि तिथेरपरार्धजाता
पूर्वार्धजा निशि तदा शुभदा च पुच्छे ।

ब्रह्मयामले-

*दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा ।
न त्याज्या शुभकार्येषु प्राहुरेवं पुरातनाः ॥

महरस्येत्युदाहरणम् । उदयोत्तरं किञ्चित्काले गते विष्टिभद्र तात्पर्यम् । अत्र दिनरात्र्योः सत्त्वेनोपवासैकभक्तयोरेकतरस्य निगन्तुमशक्यत्वात्तदर्थमुक्तम् । ईदृशस्थले च भद्रापूजा तत्तं धारमायेव । तद्रहिते काले भोक्तुं शक्यत्वात् ।

मा[illegible] संपूज्य तामेव ब्राह्मणं च स्वशक्तितः ।
ततो भुञ्जीत राजेन्द्र यावद्भद्रा प्रवर्तते ॥

इति भविष्योत्तरात् । करणान्तरे च भद्रान्यायात्तस्य [illegible] मात्रव्याप्तित्वे दिनद्वये एकभक्तमित्यादि । *ऊर्ध्वम्-उत्तरार्द्धे । *अधः-पूर्वार्द्धे । अथ यत्कर्म सर्वथा विष्टिं परिसत्यज्य दुष्करं तत्राह- *दशम्यामिति । *हरितः-एकादशी । *दिनभद्रेति । दिन-

श्रीपतिः-

पट् पौष्णतो द्वादश चाद्रराद्य
पौरन्दराद्यानि नव क्रमेण ।
पूर्वार्धमध्यापरभागयुञ्जि
चिरंतनज्योतिषिकैः स्मृतानि ॥

व्रतारम्भे विशेषो मदनरत्ने सत्यव्रतेनोक्तः-

*उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक् ।
सा खण्डा न व्रतानां स्यादारम्भश्च समापनम् ॥

इति । देवलः—

भद्रा-तिथेः पूर्वार्द्धभद्रा । रात्रिभद्रा-उत्तरार्द्धभद्रा । अत्र केषां चित्पुस्तके श्रीपतिः—

पट् पौष्णतो द्वादश चाद्रराद्य पौरन्दराद्यानि नव क्रमेण ।
पूर्वार्द्धमध्यापरभागयुञ्जि चिरन्तनज्यौतिषिकैः स्मृतानि ॥

इति लिख्यते । तत्र

पूर्वभागयुजि भे पतिः प्रियो योषितामपरभागयोगिनि ।
स्त्री नृणां भवति, मध्ययोगिनि प्रेम नूनमुभयोः परस्परम् ॥

इत्युत्तरश्लोको रत्नमालायामेव दृश्यते । तदुत्तरं च

स्त्रीपूर्वैर्वल्लभा नारी, पुंपूर्वैर्वल्लभो वरः ।
समर्क्षभयोः प्रीतिरुभयोः स्यात्करग्रहे ॥

इति सेवकं च । टीका च—अन्तःपुरस्त्रीणां मारवधूनां राजसङ्गमे येषु नक्षत्रेषु यत्फलं तदाह—षडिति । रेवत्यादीनि षट् पूर्वभागयोगीनि । आर्द्रादीनि द्वादश मध्ययोगीनि । ज्येष्ठादीनि नवापरभागयोगीनि । फलमाह-पूर्वेति । वधूवरयोर्नवसङ्गमेऽपीदम् । शेषं स्पष्टम् । तत्र मङ्गलसङ्गत्यर्थं धार्मिकाः मङ्ख्याः ॥

*उदयस्थेति । यथा विद्धेकादशीं निषिध्य परेद्युर्व्रतस्य विधानेऽपि न तत्र तदुपक्रमः । एवंजातीयकेष्वन्येषु व्रतेष्वपि एवैव

*अमुकस्या प्रातराहारं स्नात्वाऽऽचम्य समा

रीतिः । *अमुकस्येति । पूर्वदिने प्रातराहारमभुक्त्वा प
व्रतं करिष्यत्यर्थः ।

सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद् भक्तचतुष्टयम् ॥

इत्यादौ तथा दर्शनात् । अत एव व्रतशब्दस्य श्राद्ध
लक्षणत्वात्परपूर्वदिने एकभक्तं वदन्ति । (१)आचम्येत्यादि तु प
दिनाभिप्रायमित्येके । पूर्वदिने एव सायंसन्ध्योत्तरं व्रतं प्र
वारव्रतवत् । प्रातरित्यस्य स्नात्वेत्यनेनान्वय इत्यपरे । व्रतदिने
प्रातराहारमभुक्त्वेत्यर्थः । न चैवम्—

स्नानसन्ध्यातर्पणादि जपहोमामरार्चनम् ।
उपवासवता कार्यं सायंसन्ध्याहुतीर्विना ॥

इत्यनेन पौनरुक्त्यमिति वाच्यम् । यथा "नानृतं वदेत्"इ
निषेधद्वयम् । तत्रैकस्य वैयर्थ्यवारणाय दुरदृष्टद्वयपरीहारस्य एकस्य
पुरुषार्थविरोधित्वमपरस्य क्रतुविरोधित्वमित्युक्तं,(२) तथा प्राता-

(१) अत्र स्नात्वेत्यादि तु इति पाठः सम्यक् ।

(२) "नानृतं वदेत्" इति श्रुतौ दर्शपूर्णमासप्रकरणेऽनृतप्रतिषे
पुरुषार्थः । वदनस्य तदर्थत्वात् । तथा हि—आख्यातात् कर्ता प्रतीयते
"लः कर्मणि च" (पा० सू० ३-४-६९) इति चकारात् कर्तरि तस्य
स्मरणात्, 'देवदत्तः पचति' इति सामानाधिकरण्याच्च । ततश्च तस्य
प्रत्ययार्थतया प्राधान्येन तद्विशेषणतया गम्यमानं वदनं तच्छ्रेयः-तद
भिलषितसाधनम् । प्रतिषेधोऽपि तद्विपरीतमर्थं बोधयंस्तस्यैव बलव
निष्टसाधनतां बोधयतीति तत्प्रतिषेधस्य पुरुषार्थत्वमाशङ्क्य आख्यातानां
भावनाभिधायकतया कर्तुराक्षेपादेवावगमोपपत्तौ न तत्र शक्तिकल्पन-
म् । "लः कर्मणि" (पा० सू० ३-४-६९) इति सूत्रं, "द्व्येकयोः" (पा०
सू० १-४-२२) इति सूत्रैकवाक्यतया कर्तुरेकत्वे लकारैकवचनाभि-
धानस्य कर्तृसंख्याभिधानपरं, सामानाधिकरण्यं च गौः शुक्ल
इतिवल्लाक्षणिककर्त्रभिप्रायमिति न कर्तुराख्यातवाच्यत्वं, येन वदनं ।

*देवपूजाग्निहवनं संतोषः स्तेयवर्जनम् ॥
सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः ॥

अग्निहोमस्तद्दैवत्यः, व्याहृतिहोमो वेति वर्धमानः।

यत्तु तेनोक्तम्-

'सर्वपदमेतत्पुराणोक्तमकृतव्रतपरम् । *व्रतान्ते तु [illegible] होमोऽन्यथा न । अत एवैक[illegible] दशम्यां [illegible] होमानाचरणम्' इति, तत्र । '[illegible] होमश्च' इति*[illegible] [illegible] । *एवं तु [illegible] प्रविष्टादिप्रकरणस्थेनैव [illegible] इति । विष्णुधर्मे-

[illegible]

[illegible]

न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥

पृथ्वीचन्द्रोदये अग्निपुराणे-

स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्तयः ।
पूज्याः सुवर्णमय्याद्याः शक्त्या वै भूमिशायिना ॥
जपो होमश्च सामान्यं व्रतान्ते दानमेव च ।
चतुर्विंशद् द्वादश वा पञ्च वा त्रय एव वा ॥
विप्राः पूज्याश्च यथाशक्ति तेभ्यो दद्याच्च दक्षिणाम्

अत्र विप्रा इति पुंलिङ्गनिर्देशात् पुमांस एव भोज्याः, न तु स्त्रियः । एवं ब्राह्मणभोजनादावपि [illegible] प्रमाणान्तरं विनाऽयुक्तत्वात् अत एव 'यजमानयोः [illegible] कुर्यात्, चतुर्णां [illegible]' इत्यादौ [illegible] [illegible] वा न संभवति इत्युक्तमाचार्यैः, पार्थ[illegible]

[illegible] ।
[illegible] ॥

[illegible] विष्णुपुराणे—

[illegible] ।

[illegible]—

[illegible] ।
[illegible] ॥

[illegible]

परास्तम् । बहुत्वस्यै*कपदश्रुत्या [illegible] भोजनान्वयाभावादित्यन्यत्र विस्तरः ।*'शूद्रस्य तु प्रतिष्ठादिवद्विप्रद्वारा व्याहृतिहोमः' इति वर्धमानः । व्रतमूर्तयो—व्रतदेवताप्रतिमाः । प्रतिमास्वरूपं च मदनरत्ने भविष्ये—

अनुक्तद्रव्यतत्संख्या* देवताप्रतिमा नृप ।
सौवर्णी राजती ताम्री वृक्षजा मार्त्तिकी तथा ॥
चित्रजा पिष्टलेख्योत्था निजवित्तानुरूपतः ।

भोजनेन सहस्रभोजनं सम्पाद्यमिति चेत् । नैवम् । ईदृशरीत्या "सार्वं ब्राह्मणं भोजयेत्" इत्यत्रापि तत्सिद्धिः स्यादिति ब्राह्मणपदोत्तरबहुवचनवैयर्थ्यापत्तेः । तत्र बहुवचनार्थबहुत्वस्य क्रियान्वयप्रसङ्गे निराकरणे [illegible] *बहुत्वस्येति । *एकेति । सुप्विभक्तीनां प्रकृत्यर्थगतसंख्याबोधकत्वव्युत्पत्तेः । यद्वा पदं—विभक्त्यन्तं, ततः प्रकृत्यर्थगतत्वेनैव [illegible], विभक्त्यर्थोपस्थितिश्च ; तावतैव तत्संभवस्तामग्रीकं न [illegible] बोधस्थितिनिवेशनं इत्यर्थः ।

*शूद्रस्येति । अत्रेदमवधेयम् । सर्वत्र व्याहृतिहोमे मातृदिगुक्तमेव । किं च तत्रदोषोऽपि न सर्वत्र । [illegible] [illegible]ऽनावश्यकत्वात् । नापि प्रतिनिधित्वेन [illegible] [illegible] [illegible] शूद्रप्रतिनिधित्वाभावस्य [illegible]मादिति । *[illegible]

[illegible] [illegible] च [illegible] च [illegible] [illegible]" इति "[illegible] [illegible]" (पा० सू० १-२-३२) इति [illegible] [illegible] [illegible] । एवं च [illegible] [illegible] [illegible] [illegible] । "[illegible] [illegible] [illegible]" (३-४-३) इति [illegible] [illegible] [illegible] [illegible] [illegible], "[illegible]" [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] इति [illegible] ॥

*आमायारपत्रपर्यन्तं कर्तव्या शाठ्यवर्जितैः ॥
तत्रैव प्रासे-
आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
*मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥
मन्त्रानुक्तौ समस्तव्याहृतिरूपो मन्त्रः, प्रजापतिश्च देवतेति कल्पतरुः । वर्धमानधृतदेवीपुराणे-
होमो यत्रादिपूजायां शतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥
मदनरत्ने-
*अनुक्तसंख्या यत्र स्याच्छतमष्टोत्तरं स्मृतम्।
वर्धमानधृतवृद्धशातातपः-
उपवासं द्विजः कृत्वा ततो ब्राह्मणभोजनम् ।
कुर्यात्तेनास्य सगुण उपवासोऽभिजायते ॥
व्रतोद्यापनानुक्तौ तु पृथ्वीचन्द्रोदये नन्दिपुराणे-
*कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितम् ।
उद्यापनं विना यत्तु तद् व्रतं निष्फलं भवेत् ॥
*यदि चोद्यापनं नोक्तं *व्रतानुगुणतश्चरेत् ।

गुरुत्वम्।*आमायादिति।"अकृष्टपर्वादारभ्य"इति तु प्रतिष्ठापरम्। *मन्त्रेति। मन्त्रस्यानादेशे(१)प्रजापतिः-मामापरयो मन्त्र इत्याद्यपः। *अनुक्तेति। पत्रेत्यस्य यत्रे होमे चेत्यर्थः। *कुर्यादिति
आदौ मध्येऽप वाऽप्यन्ते व्रतस्योद्यापनं भवेत् ॥
त्यनेन विकल्पते । यद्वा---व्रतोद्यापनानुक्तावित्यतारिका-दर्शनात्तस्य व्रतस्य समाप्तौ उद्यापनं कुर्यात् । कीदृशम् ?, कार्य-तयोदीरितमिति । अनुक्तोद्यापने कालमभिधायेतिकर्तव्यतामाह-यदि चेतीति व्याख्येयम् ।
*व्रतेति। एतदुक्तं भवति-यत्र व्रते या देवता, तां-सर्वतो

(१) अनुक्ताविरर्थः।

वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते ॥
गाश्चैव काञ्चनं दद्याद्व्रतस्य परिपूर्तये ॥

*अशक्तौ तु नारदीये-

*सर्वेषामप्यलाभे तु यथोक्तकरणं विना ।
विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्तये ॥
वृथा विप्रवचो यस्तु गृह्णाति मनुजः शुभम् ।
अदत्त्वा दक्षिणां पापः स याति नरकं ध्रुवम् ॥

भारते—

वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा ।
*सर्वत्र तु मयोद्दिष्टा भूमिर्गावोऽथ काञ्चनम् ॥

पैठीनसिः—

*शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभम् ।
अमङ्गलं तद्यत्नेन देवकार्येषु वर्जयेत् ॥

दोडरानन्दे देवीपुराणे

यज्ञे च तीर्थेऽध्ययने श्राद्धेऽपि च विशेषतः ।

मद्मपङ्कजे(१)संवत्सराद्यापन कृत्वा कुम्भे [illegible] अभि[illegible] नरेश्वराक्षां होमः कार्यः । दक्षिणं तु मिष्टान्नोपद्मपङ्कजे इति [illegible] । नवाग्रं नवरात्रं । द्वितीयं शिवरात्री । तदन्ते [illegible] दक्षिणादिकं विस्तरः । *अशक्तौ—उद्यापनाकरणे । *सर्वेषाम्-उक्तद्रव्याणाम् । [illegible] यदि [illegible] । *सर्वत्र-वेदोपनिषदे इत्यादिः । वेदान्तश्रवणेऽपि [illegible] मनेन दक्षिणादानोक्तिः । *शिवेति ।

सर्वेषामेव दानानां सुवर्णं दक्षिणोच्यते ।
सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते ॥

इति [illegible] । [illegible] तु न दक्षिणा । [illegible]

(१) [illegible] पूजनं च [illegible] ।
(२) [illegible]

*परान्नभोजनादेषि यस्यान्नं तस्य तत्फलम् ॥
पृथ्वीचन्द्रोदयेऽग्निपुराणे—
नित्यस्नायी मिताहारो गुरुदेवद्विजार्चकः ।
क्षारं *क्षौद्रं च लवणं मधु* मांसानि वर्जयेत् ॥
*क्षारास्तु तत्रैवोक्ताः—
तिलमुद्गादृते शिम्ब्यं सस्ये गोधूमकोद्रवौ ।
धान्यकं देवधान्यं च शमीधान्यं तथैक्षवम् ॥
सिद्धधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः ॥
गोधूमानां तु तत्रैव प्रतिप्रसवः—

*परान्नेति ।
श्वशुरान्नं गुरोरन्नं मातुलान्नं तथैव च ।
पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृत् ॥

इति तु निर्मूलम् । *क्षौद्रं—मधु । *मध्विति दोषाधिक्यार्थम् । मद्यादिनिषेधस्य सर्वदा सिद्धत्वात् । उन्मादकसामान्यं वा तदर्थः । अनुज्ञातमद्यानामपि व्रतादौ निषेध इति वा । ननु 'क्षारं क्षौद्रं च लवणम्'इत्यत्र क्षारं लवणमिति नार्थः क्षौद्रं चेत्यनेन व्यवधानादतः क्षारानाह—*क्षारास्त्विति । धान्यावरणं सूक्ष्मं, शमीस्थूलं शिम्बा । धान्यकं—कुस्तुम्बुरु । देवधान्यं—देवशालितण्डुलम् । ऐक्षवं—गुडफाणितादि, न तु सितादि । 'अगुडमैक्षवम्'इत्युक्तेः । सिद्धं जलाग्न्यादिना धान्यं पृथुकादि । पण्यं—तद्दिनक्रीतम् । सम्भवे तु दिनान्तरक्रीतमपि । मूलं—मूलकं प्रसिद्धम् । 'मूलकं केमुकेतरत्'इति तु केमुकस्य सर्वथैवाग्राह्यत्वार्थम् । यद्वा मूले कन्दफलशाकादेरुपलक्षणम् । अग्नियगौतमवचने फलादिसमभिव्याहारात् । तत्र पण्येतिविशेषणम् । 'मूलकं केमुकेतरत्'इत्यत्र च स्वा-

---

तत्रापि दक्षिणादानप्रसक्तेरनवस्था अपि दानरूपत्वेन दक्षिणान्तरप्रसक्तिरिति दित्यानवस्थापत्तिरित्यर्थः ।

दधि घृतं च गव्यम्' इति। अन्ये च विशेषा एकादशी-
*चातुर्मास्यादिप्रकरणे वक्ष्यन्ते।

गृहीतव्रतत्यागे तु मदनरत्ने छागलेयः-

पूर्वं व्रतं गृहीत्वा यो नाचरेत् *काममोहितः।
जीवन् भवति चण्डालो, मृतः श्वा चाभिजायते ॥

*अत्र प्रायश्चित्तमुक्तं पृथ्वीचन्द्रोदये अग्नि-गरुड-
पुराणयोः-

क्रोधात्प्रमादाल्लोभाद्वा व्रतभङ्गो भवेद्यदि।
दिनत्रयं न भुञ्जीत *मुण्डनं शिरसोऽथवा ॥

तदपि। *चातुर्मास्यादीति। आदिना व्रताङ्गतया विहितना-
न्दीमुखस्य सङ्ग्रहः।

नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किञ्चित्समारभेत्।

इति शातातपोक्तेः श्राद्धे वक्ष्यमाणत्वात्। *कामेति।
व्याध्यादिनाऽनाचरणे तु न दोषः। "सर्वभूतभयं व्याधिः"इत्येका-
दश्यां स्कान्दात्। अशक्त्यागे त्वाह-*अत्र प्रायश्चित्तमित्या-
दि। *मुण्डनमिति। प्रायश्चित्ताङ्गं मुण्डनं रात्रावपि कार्यम्।

क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम्।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके ॥

इत्यग्निवचनात्। गयादिदेशे रात्र्यपराह्णादिकाले च
निषेधः। इतिनिमित्तं [illegible] दिने एव। "रवसनी वपनक्रिया"इति
विशेषात्। दिनत्रयोपवासश्राद्धेनाप्यपररूपः। एवं च मुण्डनपक्षे
दक्षिणा नास्ति।

कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशादि वापयेत् ॥

इति वासिष्ठे कृच्छ्रपदार्थकृच्छ्रादौ न वपनमिति मुक्तावली-
लिखनेन वपनेऽर्द्धकृच्छ्रव्यतिरेकलाभात्। सधवानां तु न मुण्ड-
नम्। तत्राकुलत्वयादिकेशकर्तनपक्षसम्भवात्।

इति *प्रायश्चित्ताम्नानादतिक्रान्तव्रतानुष्ठानं नास्ती
गम्यते । यत्तु-

प्रायश्चित्तं ततः कृत्वा पुनरेव व्रती भवेत् ।

इति वचनादतिक्रान्तमपि* व्रतं कार्यमेवेति शूल
णिः, तत् मध्ये व्रतलोपे व्रतशेषसत्त्वे ज्ञेयम् ।
शक्तविषयम् ॥

अशक्तौ तु कालहेमाद्रौ पुराणान्तरे-

उपवासासमर्थश्चेदेकं* विप्रं तु भोजयेत् ।
तावद्धनानि वा दद्याद् भुक्ताद्द्विगुणं तथा ॥

भुक्तः कृतभोजनः । ब्राह्मणभोजनं विनेति शेषः ।

सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान् ।
कुर्याद्द्वादशसंख्याकान् *यथाशक्त्यातुरो नरः ॥ इ

शुद्धितत्त्वे मात्स्ये-

पितृद्विजगुरुस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥

इति [illegible] । *प्रायश्चित्ताम्नानादित्यादि [illegible]
[illegible] प्रायश्चित्तस्य [illegible] ।

प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।

इति [illegible] । तत्र-*अतिक्रान्तमपीति । [illegible]
[illegible] च । *एकमिति । [illegible]
[illegible] । [illegible] ।
[illegible] । 'भुक्ताद् द्विगुणम्' इति [illegible]
[illegible] । द्विगुण-[illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible]

उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।

मदनरत्ने वायवीये—

द्रव्यदानोपवासस्य फलं प्राप्नोत्यसंशयम् ।

तथाऽपरार्के देवलः—

ब्रह्मचर्यं तथा शौचं *सत्यमामिषवर्जनम् ।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥

मात्स्ये—

तस्मात्कृतोपवासेन स्नानमभ्यङ्गपूर्वकम् ।
वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप ॥

*अन्ये च नियमास्तत्र तत्रान्वेषणीयाः ।

अथ स्त्रीव्रतेषु विशेष उच्यते । तत्र हेमाद्रौ व्रतकाण्डे गारुडे—

गन्धालंकारताम्बूलपुष्पमालानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥ इति ।

इदं च सभर्तृकोपवासविषयम् ।

अथ वा विप्रमुख्येभ्यो दद्याद्दानं च शक्तितः ।

इति स्मृतेरुपवासाशक्तौ दानपक्षोऽपि द्रष्टव्यः ।

ब्रह्मचर्यं व्याख्यास्यते । शौचमतिविस्तृतत्वान्नेह प्रस्तूयते । *अनृतं—

प्राणात्यये, दारपरिग्रहे च पञ्चानृतान्याहुरपातकानि ।

इति वचनोक्तानि पञ्चानृतानि,

(स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ।
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥

इत्युक्तानि च तानि)

वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ॥

इत्यादि चानृतं, तदन्यानृताभावः । *आमिषं—चाग्रे चातुर्मास्ये वक्ष्यमाणं, पारिभाषिकमामिषं च । *अन्ये चेति । अथ

शरीरतापनापेक्षं नियमकर्म, तद् यथा ।

अञ्जनं च सुताम्बूलं कुङ्कुमं रक्तवाससी* ।
धारयेत्सोपवासाऽपि अवैधव्यकरं यतः ॥
विधवा *यतिमार्गेण, कुमारी वा यदृच्छया ॥

इति तत्रैव भविष्योक्तेः । तथा विष्णुधर्मे-

सर्वेषु तूपवासेषु पुमान्वाऽथ सुवासिनी ।
धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च ॥
विधवा शुक्लवसनमेकमेव हि धारयेत् ॥

मनुरपि-

पुष्पालङ्कारवस्त्राणि गन्धधूपानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥

मदनरत्ने व्यासः—

दन्तधावनपुष्पादि व्रतेऽप्यवस्था न दुष्यति । इति ।

यद्यपीदं* सर्वोपवासविषयं प्रतीयते, तथापि शिष्टाचारात्सौभाग्याद्यर्थं क्रियमाणनवरात्रत्रिरात्राद्युपवासविषयमेव, न त्वेकादश्यादिविषयम् ।

नियमस्तु स, यत्कर्म नित्यमागन्तुसाधनम् ॥

इतियमनियमयोर्भेदादिह तादृशा वस्त्रग्रहणादयो नियमा ग्राह्याः। तेन स्थलत्रयमालम्ब्य व्रताङ्गानां नियमानां लिखनादन्ये तादृशाः क सन्ति?,इति परास्तम् । *रक्तवाससी—रञ्जितवाससी । द्विवचनं कञ्चुकाभिप्रायम् । दक्षः—

श्रुतिस्मृतिप्रमाणेन वस्त्रं ग्राह्यं च धारयेत् । इति ।

"अश्रीरा तनूर्भवति रुशती पापयाऽमुया । पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सते" इति दाशतयीश्रुतिः । स्मृतयश्च तत्र तत्र प्रसिद्धाः । एवं यज्ञोपवीतोपवस्त्रादि बोध्यम् । *यतिमार्गेणेत्युपमानोपादानात्फलाद्यनुकल्पानां निवृत्तिः । एवं यतिचान्द्रायण एव विधवानामधिकारो न तु यवमध्यादौ इत्यादि बोध्यम् । *इदं-

असकृज्जलपानाच सकृत्ताम्बूलचर्वणात् ।
उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात् ॥
इत्यपरार्के देवलेन तन्निषेधात् । न चास्य पुंविषय-
त्वेन सावकाशत्वात् स्त्रीणां ताम्बूलादि प्राप्नोतीति
वाच्यम् । ताम्बूलादिप्रापकस्यैवैकादशीतरविषयत्वेन
वैपरीत्यस्यापि सुवचत्वात् । यत्तु हरिवंशे-
अञ्जनं रोचनं चैव गन्धान्सुमनसस्तथा ।
व्रते चैवोपवासे च नित्यमेव विवर्जयेत् ॥
शिरसोऽभ्यञ्जनं *सौम्ये मैथमेतत्प्रशस्यते ।
न पादयोर्न गात्रस्य स्नेहेनेति स्थितिः स्मृता ॥ इति,
तत्सौभाग्यपुण्यकव्रतविषयं न तु सर्वत्र, पूर्वोक्तविरोधा-
दिति मदनरत्ने उक्तम् । तत्रैव-
अश्रुपातो रोषश्च कलहस्य कृतिस्तथा ।
उपवासाहतान्यपि सद्यो भ्रंशयति क्रियम् ॥
क्रियमित्युपलक्षणम् । मदनरत्ने शिवधर्मे-
दानं व्रतानि नियमा ज्ञानं ध्यानं हुतं जपः ।
यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत् ॥
अथ सूतकादौ निर्णयः-'तत्र चावसूत्याशौचयोः
वैस्मार्तकर्मनिवृत्तिर्निबन्धेषु *स्पष्टैव । गौडास्तु क्षता-
शौचादावपि तामाहुः-
जानूर्ध्वं क्षतजे जाते नित्यकर्म न चाचरेत् ।
नैमित्तिकं च सद्यः स्नात्वा न चाचरेत् ॥

तथा चनताम्बूलचर्वणादिकं तत्परताबाधकम् । *वैपरीत्यस्यापी-
ति । सुमङ्गलचिह्नानां सौभाग्यार्थमत्र सर्वोचितत्वादेरपि द्रष्टव्यम् ।
सौम्ये इति सम्बुद्धिः । *स्पष्टैवेति ।
स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ।

*लूतके च समुत्पन्ने ज्वरकर्मणि मैथुने ।
धूमोद्गारे तथा वान्तौ नित्यकर्माणि संत्यजेत् ॥
द्रव्ये भुक्ते त्वजीर्णे च नैव भुक्त्वापि किञ्चन ।
कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा ॥

इति कालिकापुराणात् । वस्तुतस्तु पूर्वं देवीपूजोपक्रमात्तन्मात्रविषयत्वमस्येति युक्तं प्रतीमः । तथा हेमाद्रौ पाद्मे—

गर्भिणी *सूतिकादिश्च कुमारी वाऽथ रोगिणी ।
यदाऽशुद्धा तदाऽन्येन कारयेत्, *प्रयता स्वयम् ॥ इति ।

पुंसोऽप्येष विधिः । लिङ्गस्याविवक्षितत्वात् । तेन 'यदि न्यते यत्पूजाद्युक्तं तदन्येन कारयेत्, शारीरनियमान् स्वयं कुर्यात्' इति हेमाद्रिर्व्याचख्यौ । 'न व्रतिनां व्रतं' इति विष्णूक्तेश्च । *आरम्भस्तु न भवत्येव ।
तदाह—शुद्धितत्त्वे विष्णुः—

बहुकालिकसङ्कल्पो गृहीतश्च पुरा यदि ।
सूतके मृतके चैव व्रतं तन्नैव दुष्यति ॥

एतत्काम्यव्रतपरम् । नित्यं त्वनारब्धमपि कार्यमिति गौडाः । मदनरत्ने—

स्पृष्टः । *लूतके—(१)लूतासंपर्कजः स्फोटभेदः । *सूतिकादिरिति । आदिना रजस्वलाग्रहः । सूतिकापदं विवाहादिदिनवर्जनपरम् । *प्रयतेति । (२)प्रयता तु स्वयं कुर्यादित्यर्थः । *आरम्भस्त्विति । स्वस्याशुद्धेः, तत्र शक्तिनिश्चयाभावात् । अत्राधिकः पाठः "तदाह—शुद्धितत्त्वे विष्णुः । 'बहुकालिकसङ्कल्पो गृहीतश्च पुरा

---

(१) लूता—मर्कटको जन्तुविशेषस्तन्मूत्रसंपर्कजन्यः स्फोटभेद इत्यर्थः ।
(२) शुद्धेत्यर्थः ।

पूर्वसङ्कल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं *दानार्चनविवर्जितम् ॥

माधवीये कौर्मे—

काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥ इति ।

एतेन साङ्गेऽधिकारात् व्रताङ्गदेवपूजादि कार्यमिति वर्धमानोक्तिः परास्ता। *प्रारब्धं पूजादि कार्यमेव । नवरात्रे तु तत्रैव विशेषं वक्ष्यामः । *एवं रजस्वलाऽपि ।

यत्तु सत्यव्रतः—

यदि । सूतके मृतके चैव व्रतं तन्नैव दुष्यति' । एतत्काम्यव्रतपरम् । नित्यं त्वनारब्धमपि कार्यमिति गौडाः" इति । अथ व्याख्या गौडमतमाह—एतदिति । अत्र नित्ये शौचरूपाङ्गबाधापरिस्पष्टिः । दानेति । अनन्यसाध्यजपहोमाद्युपलक्षणम् । *प्रारब्धं पूजादीति । 'न प्राशितो व्रते'इति विष्णूक्तेः 'पूजामन्येन कारयेत्' इति निषेधस्य प्रारब्धपूजाक्षेपपरत्वासम्भवात् । तत्र दानं सूतकान्ते कार्यमिति वक्ष्यति । अर्चनं त्वन्येनैव कारणीयम् ।

सूतके तु नरः स्नात्वा प्रणम्य शिरसा हरिम् ।

इति तु स्वयं पूजां विनाऽर्चनाकरणव्रतपरम् । "प्रणम्य मनसा हरिम्"इति पाठे कायिकयाः पूजाया अन्येनैव कर्तव्यत्वार्थम्(१) । पठन्ति च

सूतकात्प्राक् समारब्धमनेकाहं तु यद् व्रतम् ।
कायिकं तत्तु कुर्वीत, न तु दानार्चनं जपम् ॥
सूतकादौ तु यत्किञ्चिद्दानाद्यन्तरितं भवेत् ।
सूतकानन्तरं त्वह्नि तत्कर्तव्यममन्त्रिभिः ॥ इति ।

न हीदं प्रारब्धपूजाद्यर्थत्यागं बोधयति, किं तु दानादेरप्रारब्धम् । 'दानाद्यन्तरितम्'इत्येवोक्तेः । यत्र पूजायामन्यः कर्ता न लभ्य-

(१) मनःपदमिति शेषः ।

प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ॥ इति,

तत् *प्रतिनिधिना कारयेदित्येतत्परम्।

मदनरत्ने मात्स्ये–

अन्तरा तु रजोयोगे पूजामन्येन कारयेत्। इति।

प्रतिनिधयश्च निर्णयामृते पैठीनसिः—

भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतम्।
असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते ॥

स्कान्देऽपि—

पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा।
एषामभाव एवान्यं ब्राह्मणं वा नियोजयेत् ॥

कात्यायनः–

पितृमातृभ्रातृपतिगुर्वर्थे च विशेषतः।
उपवासं प्रकुर्वाणः *पुण्यं शतगुणं लभेत् ॥
मातामहादीनुद्दिश्य एकादश्यामुपोषणे।

ते, कर्मान्तरेण दुष्करस्य पूजाविशेषस्तस्य सूतकान्ते इत्यर्थः। *प
मिति। दानादिकमन्ते कुर्यात्, इतरत्स्वयं कारयेदित्यर्थः। *
तिनिधिनेति। यद्यपीदं दीर्घकालव्यापिमासोपवासादावेव
विधिविषये प्रवर्तते इति प्रतीयते, तथापि यथादिपर्वोन्तमरुपा
फलमाधनेष्वपि योजयितुं शक्यत्वात्तत्रापि प्रवर्तते इति भाव
*पुण्यमिति। अगृहीतव्रतः प्रतिनिधिरित्यादिः।

कर्ता शतगुणं पुण्यं प्राप्नोत्यत्र न संशयः।
यमुद्दिश्य कृतं सोऽपि सम्पूर्णं फलमाप्नुयात् ॥

इत्युक्तेः। गृहीतव्रतस्य तु तस्य स्वोपवासफलमपि।

दशवर्षफलं भार्या समग्रं समवाप्नुते।

इत्युक्तेः। अनयोश्च दक्षिणा न देया पुण्यप्राप्तेः सत्त्वात्।
इदं दूषणं ग्रन्थानुपपत्त्य—

कृते ते तु फलं विप्राः समग्रं समवाप्नुयुः ॥

मदनरत्ने प्रभासखण्डे–

भर्ता पुत्रः पुरोधाश्च भ्राता पत्नी सखाऽपि च ।
यात्रायां धर्मकार्येषु जायन्ते प्रतिहस्तकाः ॥
एभिः कृतं महादेवि स्वयमेव कृतं भवेत् ।

तत्रैव वायवीये–

स्वयं कर्तुमशक्तश्चेत्कारयीत पुरोधसा ।

इदं च सर्ववर्णसाधारणम् । अविशेषात् । यत्तु कश्चिन्म-हेश आह–'शूद्रस्य ब्राह्मणादिरिव प्रतिनिधिर्युक्तो न शूद्रः ।

जपस्तपस्तीर्थसेवा प्रव्रज्या मन्त्रसाधनम् ।
विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलम् ॥

इति मरीचिवचनात्' इति, तत्तुच्छम् । प्रव्रज्यादीनां शूद्रेऽसंभवात्, 'विषये प्रायदर्शनात्' इति न्यायेनास्य ब्राह्मणादिगोचरत्वात् । यदपि–

दक्षिणा नात्र दातव्या शुश्रूषा विहिता हि सा ।

इति वचनात् । अत्र कनिष्ठस्वस्रादेः कन्यादेः पुत्रादेश्च ज्येष्ठ-भ्रात्रादिः प्रतिनिधिर्भवत्येव भार्यायाः पतिरिव । तत्र क्वापि न दक्षिणा । 'शुश्रूषा विहिता हि सा' इति हेतुनिगदात् । यत्तु 'स्वयं कर्तुमशक्तश्चेद्' इत्युपक्रम्य

हिरण्यं दक्षिणां दद्यात्स्वशक्त्या चानुरूपतः ।

इति पुरोधसे दक्षिणादानमुक्तं, तद् तदर्थिने द्रष्टव्यम् । क्वचिदाये इति । विजये संशये· यापः पदान्तरसमभिव्याहारस्तस्य दर्शना-भिप्रायकत्वोपगमादित्यर्थः(१) । तथा च प्रव्रज्यासाहचर्येण ब्राह्म-

---

(१) अग्निहोत्रहोमाधिकारे "वासमात्सेन" इति श्रुतम् । तत्र किं येन वाक्येनाग्निहोत्राद्यनया यजुषा विधीयते उत यजु-स्पर्शमात्रमिति संशयः । अत्रोच्यते–वासात्क्रमो याज्ञिकर्म प्राग्द्रव्य-

उपवासो व्रतं होमस्तीर्थस्नानजपादिकम् ।

नाधिकारिकमात्रनिष्ठमेव तद्विषय इति भावः । *होम इति।

स्त्रीणां होमो न दातव्यः पञ्चगव्यं तथैव च ।

इति (१)ब्रह्मकूर्चहोमनिषेधोऽपि साक्षादेव। विप्रद्वारा स्त्रीशूद्रयो...

कालम्भत्वाद् वायव्यवदित्यनुमानेन यागत्वाध्यवसाये याग लम्भ इति । यदि च यागस्य द्रव्यदेवतास्वरूपत्वेन ... देवतासंयोगाभावात् यागत्वाध्यवसायः । न च "आज्यं द्रव्यमनो ... दौ देवता मान्त्रवर्णिकौ" इति "पूषासीति वत्समुपसृजति" इति स्वालम्भे 'पूषासि' इति-मन्त्रविधानात्तत्रत्यपूषदेवतायाः गोऽस्त्येवेति वाच्यम् । उपसृजतेः समीपधारणार्थकतयाऽऽलम्भाय कत्वाभावेन तेन वाक्येनोक्तमन्त्रस्य वत्सालम्भे विधातुमशक्यत्वात् । असिशब्दसामानाधिकरण्येन च पूषशब्दस्य वत्सपरतया देवतापरत्वाभावाच्च इत्युच्यते, "वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्रालम्भे ... मात्रापि प्राणिकर्मतया प्रयुज्यमानत्वाविशेषात्पूर्वं यागार्थे तस्यावग ... रिते चोदकेनाग्नीषोमीयस्य विध्यन्तातिदेशाद्दवनालाभात्सिद्धेऽपीत्य ... ध्यवसाय इति पूर्वपक्षे सिद्धान्तसूत्रम् "विशये प्रायदर्शनात्" (जै० सू० २-३-६-१६)। विशये-संशये, यागविधिः संस्कारविधिर्वेति सं ... शये प्राये-दोहनादिसंस्कारप्रकरणे दर्शनात्-पाठात् संस्कारविधिरवे ... वेत्यर्थः । अयं भावः "वायव्यमालभेत" इत्यत्र यागार्थतया "अश्वपुरु ... लभेत" इत्यत्र स्पर्शार्थतया च दृष्टस्य आलभतेः प्रकरणात् स्पर्शार्थ ... त्वमेव । न चोक्तानुमानेन यागार्थत्वाध्यवसायः । सामान्य ... दृष्टानुमानस्य वैदिकार्थे प्रवृत्त्यसम्भवात्, "अश्वपुरुमालभेत" ... व्यभिचाराच्च । न च स्पर्शो दोहनवत्सालम्भ "वत्समुपावसृजति" इत्युप ... सर्जनवत्तान्नित्य एवेति तद्विध्यानर्थक्यमिति वाच्यम् । उक्त ... रूपेण चाटुकरणात्मकस्पर्शविशेषलक्षणसंस्कारविधानात्तस्य चाक्ष ... मेरिति वत्सालम्भमन्त्रसंस्कार एवेति सिद्धान्तः ।

(१) ब्रह्मकूर्चहोमः—पञ्चगव्यहोमः । स च "सतायदा तु ये ... मद्धिरापाः गुरुतल्पिनः । पतनक्ष्य दोनह्यं पञ्चगव्यं यथाविधि" (... इत्यादिनैमित्तिकत्वेनाभिहितः पराशरस्मृत्यधिकारदर्शनाय स्नात ... सदाचरणीय । पञ्चगव्यद्रव्याण्यपि "गोमूत्रं गोमयं क्षीरं दधि सर्पि ... कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं पापशोधनम्" इति सर्वत्र स्पष्टा ...

इति पूर्वोक्तवचनादित्य तत्र दोषः ।

"अर्वाक्संवत्सरादिति षट्"इति(१) माधवीये आप-स्तम्बवचनात् ।

अतएव शुद्धितत्त्वे कौर्म्मे । ब्राह्मणस्य प्रमादादिविषयकः ।

कौटुम्बिकं तु कर्त्तव्यं प्राजापत्यं समाचरेत् ।

ब्राह्मणं च कुर्वीत स्नात्वा पीत्वा घृतमथम् ॥

इति षट्त्रिंशन्मते । प्रमादाद्वि च संवत्सरेण न शुद्धयेत(२) ।

चान्द्रायणं चरेद् शूद्रो ब्राह्मणस्तु शुचा पिबेत् ।

सर्वे ते पापकर्माणो यान्ति नरकं ध्रुवम् ॥

इति विष्णुः ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।

पञ्चगव्यं पिबेद्देवं स्वयाकृत्येव शोधयत् ॥

इति तु भाष्य वचनस्वेदोषदायः मन्वं, न स्वपूर्वोक्तं द्योपयति । 'स्ववाकम्'(१)पर्वादात्(३) । अर्वाक्वसेति ।

अयनान्तिकं त्रयामा मन्त्रवा यज्ञमयनम् ।

देवकाशनेयं चेति संवत्सरवनामि षट् ॥ इति ।

---

(१) अत्र यद्यपि तिलिकमपुत्रयेषु अमल अर्वाक्तोऽस्यनुगमनवने, तथापि देवादौ मध्यावहारस्यांगमुक्त उपस्थितः ।

(२) मातृपरदृ प्रमादे शुद्धयन्त्वश्वमां अध्यर्धय, नरय प्रा-यश्चित्तार्थिभुतपमादेकसंधकाजेनेन्नपालेन मतदृशुद्धेय पञ्चगव्य-स्य शोधनात् । अत एव "शुद्धानां संचयनाः स्यात् शूद्रो हान्त शूद्रान । प्रमगुक्तदोषाय स्वयाकृत्येव शोधयेत्" ॥ इति पराशर-स्मृतौ—"शूद्रपञ्चनखान् कुमारस्मनां प्रमृतकं पीत्वा प्रायश्चित्त-मनुष्यसंद, एवं वाक्य, यजादे दिवसः, शूद्रो नवे, सर्वे जाति पञ्चगव्यं पिबेत्"इति विष्णुस्मृतौ च शूद्रस्य पञ्चगव्यपानं प्रतिषेधितं । अनुलोमजास्यपानं तु स्वमन्वयमनुपश्यपानयोगय निषेधकं स्वस्य पुरा-णाश्रविरिति न तद्विरोध इति बोध्यम् ।

(३) एतत्पञ्चगव्यपानं स्ववाकृत्यपि शोधयेत् किं पुनरन्यपापमि-त्यर्थात् ।

ब्राह्मणो हीनवर्णस्य यः कुर्यात् कर्म किं च न।
स तां जातिमवाप्नोति इह लोके परत्र च॥

इति कालहेमाद्रौ मरीचिनिषेधाच्च।

यद्यपि स्त्रियाः शूद्रस्य च तीर्थयात्रा वर्त्तते, भारते पुष्करं प्र

जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषस्य वा।
पुष्करे गतमात्रस्य सर्वमेव प्रणश्यति॥ इति।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम।
न वियोनिं व्रजन्त्येते स्नात्वा तीर्थे महात्मनः॥

इति च लिङ्गात्, तथापि सधवायाः स्त्रियः

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।
पतिं संसेवते या तु तेन स्वर्गे महीयते॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।
भर्तृशुश्रूषणेनैता लोकानिष्टान् व्रजन्ति हि॥

इत्यादौ यज्ञादीनामुपलक्षणत्वात्तीर्थयात्रादावपि भर्त्रा विना, प-
तिशुश्रूषात्यागे च नाधिकारः। विधवायास्तु

बाल्ययौवनवत्या वा वृद्धया वाऽपि योषिता।
न स्वातन्त्र्येण कर्त्तव्यं किञ्चित्कार्यं गृहेष्वपि॥

इति मनूक्तेः,

रक्षेत्कन्यां पिता, (१)विन्नां पतिः, पुत्रास्तु वार्द्धके।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः॥(या० १-८५)

इति याज्ञवल्क्योक्तेश्च पुत्रज्ञात्याद्यनुमतिं विना नाधिकारः। एवं

शूद्रस्तु द्विजशुश्रूषाविरुद्धं धर्ममाचरन्।
नरके पच्यते तद्वद्वेदश्रवणकीर्त्तनात्॥

इति भारतोक्तेः,

निरन्तरं तीर्थसेवा संन्यासो मन्त्रसाधनम्।
देवताराधनं ध्यानं तेषां पापावहं परम्॥

---

(१) पाणिगृहीताम्।

*यस्तुमस्तु सम्पूर्णतासम्पादनमात्रमत्रोच्यत इति प्रतिनिधेः का *पार्थ्यत्वम्।

अत्र विशेषमाह त्रिकाण्डमण्डनः—

*काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः।
*काम्येऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः॥
न स्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु।
स देशकालयोर्नास्ति नारणेरग्निरेव सा(१)॥
नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥

हिरण्यकेशिसूत्रेऽपि—'न स्वामित्वस्य भार्यायाः पुत्र' इति शालान्तरोक्तेश्च विप्रमेवाविरोधेन निरन्तरं च तीर्थयात्रादौ शूद्रस्य नाधिकारः। एवं सति अनधिकारिस्त्रीशूद्रकृततीर्थसेवायां पातित्यं मनुना बोध्यते। शालामामपदावत्ते च "तेषाम्" इतिशब्देन शूद्राः प्रतिलोमजाश्च परामृश्यन्ते। तेन प्रतिलोमा यथा धर्महीनास्तथा निरन्तरं तीर्थयात्रापराः शूद्रा इत्यर्थः।

ब्राह्मणो हीनवर्णस्य यः कुर्यात्कर्म किं च न।
स तां जातिमवाप्नोति इह लोके परत्र च॥

इति वाचस्पत्य विप्रश्चेत् क्षत्रियादेः प्रतिनिधिस्तदा तस्य(२) सम्पूर्णफलावाप्तिरस्त्येव, विप्रस्य तु दोष इत्यर्थः। एतेन 'शूद्रधर्मे शूद्रस्य ब्राह्मणादेश्च नाधिकारः। होमानधिकारात् शूद्रस्य। दर्शके च नाधिकारः। दर्शकत्वप्रयोजकहोमानधिकारात्' इति मन्यूक्तम्। स्पष्टं चैतदग्रे। यत्र शूद्रप्रतिनिधिस्तत्र विप्रेण कथं सम्पादनमित्यत आह—*यस्तुमहिम्नेति। *यार्थेति। तादृशसम्पादनरूपप्रत्याहुण्यमत्रानेन बोध्यते न तु प्रतिनिधिरित्यर्थः। *इत्यर्थ इति। सामर्थ्ये परीहीत्यैव काम्यस्यारम्भादिति भावः। अ-

(१) सा—अरणिः अग्नेरेव, तत्सम्पादकत्वात्। अग्नेश्च प्रतिनिधिनिषेधादित्यर्थः।
(२) हीनजातीयस्येत्यर्थः।

स्य देशस्य कालस्याग्नेर्द्रव्यतायाः कर्मणः *शब्दस्य च प्रतिनिधिर्विधीयते' इति(१) ॥

अथ व्रतादिसन्निपाते निर्णयः । तत्र निषिद्धयसन्निपाते तत्रोक्तं दानहोमादि *क्रमेणानुष्ठेयम्, अविरोधात् । इदं पूर्वारब्धेष्वेव । एकमध्येऽन्यकाम्यकर्मारम्भस्तु न भवत्येव गुणफलादृते । "यस्य यज्ञे प्रततेऽन्तरा यज्ञस्तायते तं यज्ञं निर्वर्तनिर्गृह्णाति" इतिराणकश्रुतेः । यज्ञः-व्रतादिकर्ममात्रम् । अनन्तेन व्यवधानदोषस्य सर्वत्र साम्यात् । शिष्टास्तु माघकार्त्तिकस्नानादिमध्ये लक्षहोम-तुला-भारतश्रवणाद्याचरन्ति, तन्नित्यमध्येऽस्तु. काम्यमध्ये तु चिन्त्यम् । यत्र तु नक्तैकभक्तादौ विरोधस्तत्र साधम्यादेकभक्तं कार्यम् । नक्तं तु परेतुस्तरा साधर्म्याभावं त्वाह-*काम्येऽपीति । *शब्दस्य-मन्त्रस्य *क्रमेणेति । यत्रोपवासद्वयमेकभक्तादिद्वयं वा तत्राङ्गिनस्तन्त्रम् । भिन्नदैवत्यन्त्वादिना विरुद्धं पूजाहोमाद्यङ्गं सदैव कार्यम् ।

पाकयज्ञान् समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते ॥

इति न्यायात् । इदं पूर्वारब्धेष्वेव । पूर्वारब्धकर्ममध्ये च कर्मारम्भो न भवति । "यस्य यज्ञे प्रततेऽन्तरा यज्ञस्तायते तं यज्ञं निर्ऋतिर्गृह्णाति" इति श्रुतेः । यज्ञ इति व्रतादिकर्मोपलक्षणम् । अनयोव्यवधानरूपदोषस्य तुल्यत्वात् । तत्रापि गुणफलकमनइति

---

(१) यत्तुनन्तु पिण्डोदककाङ्क्षयादौ पुत्रस्य प्रतिनिधिर्नवेति । "अवश्यार्हान् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥" इत्यादिवचनात् । हिरण्यकेशिसूत्रीयनिर्णयात् "नक्तन्दिवं ज्योतिष्मती नामासिद्यमानानाकेन" इत्यादावादाने, पितृ पुत्रीये मार्जने "अमुकस्य पिता यजते" इतिवाचने च पुत्रप्रतिनिधिरत्र बोध्यः ।

भवत्येव । यत्र "गोदोहनेन पशुकामस्य प्रणयेत्" इत्यादौ पुरुषा-र्थस्यैव क्रत्वर्थत्वात्(१) ।

यत्तु नित्यानां माघकार्त्तिकस्नानादिप्रयोगे ऽर्कसहोम-तुलादान-भारतश्रवणाद्याचरणं, तन्नित्यप्रयोगे, न तु काम्यप्रयोगे । वस्तुतस्तु ययोः पुरुषार्थयोर्नित्यकाम्ययोर्न विरोधस्तयोरेकप्रयोगेऽपरानुष्ठानं युगपदारम्भो वा भवत्येव । यथा काम्यकार्त्तिकादिस्नान-काम्यतद्-व्रतयोः । तत्र सर्वाङ्गोपसंहारेण स्वयं साधनद्वयस्य सुकरत्वात् । अन्यत्र च प्रयोगप्राप्त्यैव कार्यं साधकत्वाद् —अनुपसञ्जातविरो-धित्वात्(२) ।

---

(१) दर्शपूर्णमासयोः श्रूयते "चमसेनापः प्रणयेत्, गोदोहनेन पशु-कामस्य" इति । गावो दुह्यन्ते यस्मिन्नद् गोदोहनं-दोहनपात्रं तेन-त्यर्थः । तत्र गोदोहनस्य क्रतुपुरुषोभयार्थत्वमुत पुरुषार्थत्वमेवेति संशयः । प्रयोजनं चमसमभिव्याहृत्य पठ्यमानः गोदोहस्यार्थकतया स-म्बन्धात् पुरुषार्थप्रयोजनैः क्रतूपकारकतया क्रत्वर्थतायामपि उभयार्थ-त्वमिति । न चाप्रकरणपठितस्य तृतीये निराकृतत्वात् श्रुति-तस्य क्रत्वर्थत्वावगतेः कथं तदुभयार्थमिति वाच्यम् । उपकारकत्वे सति सर्वपदार्थग्राहिणा प्रयोगविधिना गोदोहनस्य क्रतूपकारकता-प्रयोगविधेयतया क्रत्वर्थत्वोपपत्तेः, इति पूर्वपक्षे सिद्धान्तसूत्रम्-"यस्मिन् प्रीतिः पुरुषस्य, तस्य लिप्सार्थलक्षणाऽविभक्तत्वात्" इति (जै० सू० ४-१-२) । यस्मिन्-स्वर्गादावनुभूयमाने पुरुषस्य तृप्तिर्भ-वति तस्य स्वर्गादिफलस्य लिप्सा अर्थलक्षणा-स्वाभाविकी, फ-लस्य प्रीत्याऽविभक्तत्वादित्यर्थः । अयं भावः-यस्मिन् वाक्ये फलश्रु-तिस्तस्य पुरुषार्थप्रयोजकत्वमर्थादिति श्रुत्या पुरुषार्थत्वमेव । न चोप-कारकत्वेन प्रयोगविधिना क्रत्वर्थतयाऽन्यस्य विधानात् क्रत्वर्थत्व-मपीति । क्रत्वर्थप्रयोगविधिना गोदोहनस्य क्रत्वर्थत्वाविधानात् । पुरुषार्थेनैव गोदोहनेन प्रसङ्गात् क्रतूपकारसिद्धेः । तस्माद् गो-दोहनस्य पुरुषार्थत्वमेवेति । एवं च तस्य क्रत्वङ्गत्वे फलमयुक्त्यैव प्रयोगेऽनुष्ठानम् ।

(२) अयं च न्यायो लघुपूर्वमीमांसाधिकरणकौमुदीपरिशिष्टाधि-करणेषु विस्तरेण प्रतिपादितो मयेति तत्र द्रष्टव्यः ।

स्तिथौ *गौणकाले कार्यम् । *असमकालीनति[illegible]
तु 'एकं स्वयं कृत्वाऽन्यद्भार्यादिना कारयेत्' इति
यः । यत्र तु शिवरात्र्यादौ निषिद्धं पारणादि
जनं प्राप्तम्,

भूताष्टम्योर्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥

इति निषेधश्च, तत्र पारणायां पयस्यादिनैव भो-
जनम् । निषेधस्तु रागप्राप्तभोजनविषयः । एवमष्टम्या-
दिनकव्रते संक्रान्त्यादौ रवौ संकष्टचतुर्थ्यां च रात्रि-
भोजनम् । यत्र स्वष्टम्यादौ दिवा भुजिनिषेधः, संक-
च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः ।
यापि पुत्रिण उपवासोऽपि निषिद्धस्तथापि-

उपवासनिषेधे तु भक्ष्यं किंचित्प्रकल्पयेत् ।

इति वचनात्किंचिद्भक्षयित्वोपवासः कार्यः ।
न्द्रायणमध्ये एकादश्यादौ तु ग्राससंख्यानियमेन भो-
जनं कार्यमेव । चान्द्रायणस्य काम्यत्वेन नित्यबा-
धकत्वात् । *अपाधेन गत्यसंभवाच्च । एकादश्यामेका-
रोपवासादिपारणायां जलपारणां कृत्वोपवसेत् । "

---

*गौणकाले—गौणकालसंभवे । कालस्यात्यन्तबाधाभा-
दिति शेषः । तदसम्भवे त्वाह—*असमेति । एतेन

तिथिद्वयोदितं कर्म तद् व्रतं पृथगारभेत् ।
तिथ्योर्वेधे तु स्नानादि सकृदाह्निकमाचरेत् ॥

इति मरीचिवाक्यं व्याख्यातम् । पृथगाचरेदिति पाठे एकं स्वय-
अन्यद्भार्यादिनेत्यर्थः । नैमित्तिकं चान्द्रायणादि संगृह्याऽऽह—*
पाधेनेति । चान्द्रायणादिवाक्येषु चन्द्रोदयकाले ग्राससङ्ख्या

दो वा अशितमनशितं च" इति श्रुतेः । एवं ॰द्वा-
दश्यां मासोपवासश्राद्धप्रदोषादिषु ज्ञेयम् । एवं ॰काम्य-
नैमित्तिकनित्यस्याद्युक्तं तत्रापत्तं स्वयमूह्यमिति दि-
क् ॥ इति कमलाकरभट्टकृते निर्णयसिन्धौ व्रतप-
रिभाषा समाप्ता ॥

अथ प्रतिपदादिनिर्णयः । शुक्ला प्रतिपद् अपराह्ण-
व्यापिन्ये पूर्वा ग्राह्या । ॰युग्मवाक्यात् ।

॰प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी ।

शातवच्छुक्लकृष्णपक्षोऽपरकालविशिष्टभोजनविधेरुपगमात् । ॰द्वा-
दश्यामिति । द्वादश्यां प्रातः पारणा, मासोपवासे उपवासः,
श्राद्धादौ सायाह्नभोजनादि, तत्र पारणालोपः कार्यः । ॰काम्ये-
ति । यत्र काम्ये कृते नित्यनैमित्तिकयोर्लोपः सिद्धिस्तत्र काम्यं
कुर्वीत इत्यर्थः ।

॰युग्मेति । 'प्रतिपद्यप्यमावास्या' इत्यादि । नन्वेवं सायाह्नव्या-
प्त्यभावेऽपि पूर्वविद्धा भवतीति किमपराह्णव्याप्त्येत्यत आह—॰प्रति-
पदिति । विद्धत्वं च संमुखीत्वं

संमुखी नाम सायाह्नव्यापिनी दृश्यते यदा ।

इति पूर्वोक्तेन । इदं च प्रतिपदः प्राप्ते पूर्वविद्धत्वरूपे सांमुख्ये
आपराह्णिकत्वरूपं तद्विशेषं विधत्ते, प्रातःकालिके प्रधानाहुतिविधौ
प्रातःकालसामान्ये प्राप्ते "पुरा प्रातः प्रवदितोर्निर्वपेत्" इति तद्वि-
शेषविधिवत्, न त्वापराह्णिकयोः सांमुख्यं गौरवात् । यत्त्विदमा-
पराह्णिकापित्र्यविषयमिति, तन्न ।

प्रतिपत्सैव विज्ञेया या भवेदापराह्णिकी ।
दैवकर्म तथा ह्यस्य पित्र्यं च मनुरब्रवीत् ॥

इति माधवीयवचने दैवकर्मपदस्य एकभक्त-नक्त प्रतिपदिष्टीनां
पृथङ्निर्णयस्वेन उपवासपरत्वात् । पित्र्यं—मृताहश्राद्धम् । एको-

इति स्कान्दोक्तेः । *शुक्ला स्यात्प्रतिपत्तिथिः प्रथ-
मतश्चेत्साऽपराह्णे भवेत्' इति दीपिकोक्तेश्च । अपराह्ण-
श्च पञ्चधा भक्ते दिने चतुर्थो भागः । *तदभावे सा-
याह्नव्यापिनी ग्राह्या ।

तदभावे तु सायाह्नव्यापिनी परिगृह्यताम् ।

इति माधवोक्तेः । कृष्णा तु परा* । कृष्णा तूत्त-
तोऽखिला' इति दीपिकोक्तेः । *कृष्णाऽपि पूर्वेत्यनन्त-
भट्टाः । सर्वतिथिषु वर्ज्यान्युक्तानि मुहूर्तदीपिकायाम्-
द्रष्टव्यानि । "आमश्राद्धं तु" इत्यादिना विशिष्यकालोक्ते । *शुक्लेति ।
दिनान्तरवदेवापराह्णकृत्ये मासे पुनर्वचनं प्रतिपदोक्तापराह्ण-
स्पर्शेऽपि पूर्वदिनग्राह्यत्वार्थमित्यभिमानः । अत्रापराह्णव्याप्तेरनिर्णा-
यकत्वापत्तिररुचिः । *तदभावे इति । कथंचित्पूर्वदिनान्तरागे
परेऽह्नि भवत्येव शेषिलोपस्यान्याय्यत्वात् । *परेति । "प्रति-
पत्सद्वितीया स्यात्" इत्यस्य कृष्णपक्षे प्रवृत्तेः । *कृष्णाऽपीति ।

प्रतिपत् पञ्चमी चैव उपोष्या पूर्वसंयुता ।

इति जाबाल्युक्तेः,

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिः ॥

इति पैठीनस्युक्तेश्च,

प्रतिपत्पञ्चमी चैव सावित्री भूतपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥

इति ब्रह्मवैवर्ते उपवासे परविद्धानिषेधाच्च । 'उदये शुक्ला
सस्य' इति सामान्यवचनं तु बाध्यते । 'प्रतिपत्सद्वितीया स्यात्'
इत्यापस्तम्बवाक्यं तु उपवासेतरदैवकर्मविषयं सामान्यवाक्यः
इत्येवमाविषयैः पूर्ववाक्यैः संकोचात्, उपवासेऽप्यनागताद्विष-
प्रतिपद्विषयं च । उपवासेतरदैवकर्मसु शुक्ला पूर्वविद्धा ग्राह्या । 'प्रति-
पत्प्रमावास्या' इति पुनर्वाक्यात् । सा तु पूर्ववदपराह्णिकी । तदभावे

सुरीय । 'प्रतिपत्सद्वितीया स्यात्' इत्युक्तेः । इदं च वचनं सामान्यविषयत्वात् विशेषविषयेण युग्मवाक्येनापराह्निकपूर्वविद्धशुक्लप्रतिपद्विषये बाधितमपि युग्मवाक्यानिर्णयपक्षेषु प्रवर्तते । "बाधकाभावे बाध्यस्य निरवकाशत्वात्" इति न्यायात् । अत एव तादृशदैवकर्मसु कृष्णोत्तरविद्धा ग्राह्या पूर्वोक्तसामान्यवचनादिति परिस्फुरन्ति । अत्रेदमवधेयम्—अस्तु उपवासेतरदैवकर्मणि भवदुक्तमेव, उपवासे तु कथं पूर्वा ?, तद्विधायकानां शुक्लपक्षपरतया संकोचसम्भवात्, 'प्रतिपत्सद्वितीया'इत्यस्य सामान्यतः कृष्णपक्षपरत्वादिति । उपवासश्च सर्वतिथिषु नारदेनोक्तः ।

> शुक्लान् वा यदि वा कृष्णान् प्रतिपत्प्रभृतींस्तिथीन् ।
> उपोष्यैव बलिं दत्त्वा विधिना ह्यपरे दिने ॥
> ब्राह्मणान्भोजयित्वा तु सर्वपापैः प्रमुच्यते । इति ।

उपवासोत्तरदिने च पारणं कार्यं, तच्च भोजनम् ।

> उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ।
> अन्यथा तु फलस्यार्द्धं धर्ममेवोपसर्पति ॥

इति देवलोक्तेः । धर्मो—यमः । पारणं—कर्मसमाप्तिः, अभोजनात्मकोपवाससमाप्तिश्च भोजनमेव । न च रागप्राप्तं भोजनमनूद्य पूर्वाह्णमात्रं विधीयताम् । शास्त्रीयकर्मसमाप्तिरूपत्वापनादिवच्छःलीयत्वावश्यंभावात् । "भोक्ष्येऽहं पुण्डरीकाक्ष"इति सङ्कल्पविषयत्वात्प्राशनरूपप्रतिनिधिविधानाच्च । तच्च पारणं तद्दिने उपोष्य तिथ्यनुवृत्तौ दिवा तिथ्यन्तप्रतीक्षया भोजनकालोऽपि लभ्यते तदा तिथ्यन्ते कार्यम् ।

> पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना ।
> उपोष्य विधिवत्कुर्यात्तत्तदन्ते च पारणम् ॥

इति निगमवचनात् । यदा दिवा तादृशः पारणकालो न लभ्यते, तदा तिथ्यन्तो न प्रतीक्ष्यः, किं तु दिवैव पारणं कार्यम् ।

> सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
> अन्यथा पुण्यहानिः स्याद्रते धारणपारणम् ॥

कूष्माण्डं (१)बृहतीफलानि लवणं यज्ञ्वं तिलास्तैं तथा
तैलं चामलकं *दिवं प्रवसता शीर्षं कपालान्त्रकम्।
निष्पावांश्च मसूरिकान् फलमथो वृन्ताकसंज्ञं मधु
द्यूतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेषमा षोडश ॥
शीर्ष-नारिकेलम् । कपालम्-अलाबु। अन्त्रं-पटोलम्।
नृपालः-
कूष्माण्डं बृहतीं क्षारं *मूलकं पनसं फलम्।
धात्री शिरः कपालान्त्रं नखचर्मतिलानि* च ॥
क्षुरकर्माङ्गनासेवां प्रतिपत्प्रभृति त्यजेत् ॥
नखं-*शिम्बी । चर्म-मसूरिका ॥
'द्वितीया तु *कृष्णा पूर्वा, शुक्लोत्तरा' इति हेमाद्रिः।

इति ब्रह्मवैवर्तात् । पारणमाहारं विना शरीरस्य, तदुत्तरादिने च पारणं-तत् चतुर्थकालभोजनविधिना विहित, तद्विहायेत्यर्थः।
न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्।
तत्र निश्यपि कुर्वीत वर्जयित्वा महानिशाम् ॥
इति भविष्योत्तरे रात्रिपारणनिषेधाच्च ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम् ।
इति वाक्यं तु निर्मूलमिति विवेचनकृतः । *दिवं प्रवसता-स्वर्गेच्छुना । *मूलकं-मूलकमिति पाठे शाकभेदः । *तिलानि-जतिलाः, प्रसिद्धतिला वा । *शिम्बी-तदुद्भवा निष्पावादयः। *कृष्णेति । "द्वितीया प्रतिपद्युता" इत्यापस्तम्बवाक्यं "युग्माग्नि" इति युग्मवाक्यं चानयोः शुक्लकृष्णवाक्यं च व्यवस्थापरम् । नन्वेवं सर्वकर्मसु व्यवस्थासिद्धौ
तृतीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः ।
पूर्वापरस्तादृग्युक्ता उपवासे नियोगिन्विमाः ॥

---

(१) 'रिङ्गणी' इति महाराष्ट्रभाषायां ख्यातानीत्यर्थः ।

'कृष्णा द्वितीयाऽऽदिमा। पूर्वाह्ने यदि सा सिता तु परतः सर्वा' इति दीपिकोक्तेः। माधवानन्तभट्टमते तु सर्वापि द्वितीया परा। तथा च माधवः-

पूर्वेद्युरस्तमी प्रातः परेद्युस्त्रिमुहूर्तगा।
सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा॥ इति।

इति उपवास एव तृतीयाविद्धद्वितीयानिषेधः,

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी।
त्रयोदशी अमावास्या उपोष्याः स्युः परान्विताः॥

इति तत्रैव तद्विधिश्च श्रवणात्, तयोरपि शुक्लकृष्णसाधारण्यादिति चेन्न। सामान्यतः सर्वकर्मसु व्यवस्थाया उपवासे निषेधेन बाधो मा प्रसाङ्क्षीदिति रीत्याऽर्थवत्त्वात्। एतेन प्रतिपद्विद्धत्वं यमद्वितीयादिव्रतविषयमित्यपास्तं, मानाभावात्। अनन्ते त्विदमस्ति। तुलाऽरुचिः। सा च—

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।
पौर्वाह्णिकी च कर्तव्या द्वितीया तादृशी विभो॥

इति स्कान्दे तादृशीति दृष्टान्तेन यथा प्रतिपत् शुक्ला पूर्वा, तथा द्वितीया शुक्लोत्तरेत्यस्य, यथा कृष्णा प्रतिपदुत्तरा तथा कृष्णा द्वितीया पूर्वेत्यस्यार्थस्य लाभात्, न तु प्रतिपत् शुक्लकृष्णभेदेन द्वितीया तु वेधभेदेनेति। वैरूप्यात्। विशेषवचनाभावात्तु या कृष्णद्वितीयोपवासेऽन्यत्र वा पूर्वविद्धोक्ता, सा-पूर्वदिने चेत्पूर्वाह्णव्यापिनी भवति, तदैव। नो चेत्परैव।

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।
पौर्वाह्णिकी च कर्तव्या द्वितीयापि च तादृशी॥

इति स्कान्दात्। तादृशी—संमुखी पूर्वविद्धेत्यर्थः। पूर्वाह्णस्तु अह्नः पूर्वो भाग इति योगेऽपि न द्वेधाभक्तादिनाद्यभागः। तथा सति पूर्वत्रापरोऽह्न इति योगेनापराह्णो द्वेधाभक्तदिनान्त्यभाग एव स्यात्।

तृतीया तु सर्वमते रम्भाव्यतिरिक्ता परैव । तेन युग्मवाक्यं रम्भाव्रतविषयम् ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ।
अन्येषु *सर्वकार्येषु गणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्तात् । *गौरीव्रते तु विशेषमाह माधवः-

*मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे ।

न चेष्टापत्तिः । सायाह्नपात्रव्याप्त्यभावेनापराह्णिकत्वानापत्तेः । अतएव पञ्चधा विभागेनापराह्णवत् पूर्वाह्णः पञ्चधा विभागेन प्रातरारभ्य । तत्र प्रविष्टा पूर्वा । इदं च वचनं कृष्णद्वितीयाविषयमेव । तत्र मासे पूर्वविद्धत्वे पौर्वाह्णिकत्वरूपविशेषमात्रविधाने लाघवात् । तेन या पूर्वेद्युः सर्वं प्रातःकालं परित्यज्य प्रवृत्ताऽपरेद्युस्त्रिमुहूर्ता तदधिका वा, सा कृष्णाऽपि परैव । पूर्वेद्युः पौर्वाह्णिकत्वाभावात्, त्रिमुहूर्तत्वेन च परविधायकवचनानां प्रवृत्तेः । या तु पूर्वेद्युः सर्वं प्रातःकालं परित्यज्य प्रवृत्ताऽपि परदिने नास्त्येव, त्रिमुहूर्तन्यूना वा, सा पूर्वैव । एवं या शुक्ला द्वितीया परदिने नास्त्येव त्रिमुहूर्तन्यूना वा, साऽपि पूर्वैव, परेद्युस्त्रिमुहूर्तासत्त्वादिति हेमाद्रिमाधवयोर्मतनिष्कर्षः ।

*सर्वकार्येष्विति ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इति धौम्यवाक्ये(१)ऽप्युक्त्यानुवादः । गणो-गणेशः, तद्युक्ता चतुर्थीत्यर्थः । रम्भाख्यां वर्जयित्वेति पर्युदासात् रम्भाव्रते तृतीया पूर्वा गृह्यते । तस्मादेवं च त्रिमुहूर्तत्वेनेति गौरीव्रतस्याहतिः । तत्र कल्पादित्वस्यापि परविद्धग्रहणमस्तावदिषपभिनायेणा-गौरीव्रते निवर्तते । *मुहूर्तेऽपि कल्पाकाष्ठादिपरं त्रिमुहूर्त

---

(१) धम्मप्य—गणयुक्ता, एकादश्यादिश्रवणं । एकादेशानुवाद इति पाठः

मुहूर्ताधिकायामप्येवं गणयोगप्रशंसनात् ॥ इति ।
चतुर्थ्यपि सर्वमते ॰गणेशव्रतातिरिक्ता परैव । ॰युग्म-वाक्यात् ।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति माधवीये वृद्धवसिष्ठोक्तेश्च । 'नागचतुर्थी तु म-ध्याह्नव्यापिनी पञ्चमीयुता च ग्राह्या' इति निर्णयामृते माधवीये चोक्तम् ।

युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्याय्य पञ्चम्यां पूजयेत्प्रयतो नरः ॥
विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः ।

सद्भावानावश्यकत्वाभिप्रायम् ।

चतुर्थीसहिता या च सा तृतीया फलप्रदा ।
अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी ॥

इति विधेः अवैधव्यार्थं गौरीव्रते एव शेषरूपसाहित्यप्रतीतेः ।

द्वितीयाशेषसंयुक्तां या करोति विमोहिता ।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ॥

इति शेषनिषेधवत् । यदि किंचिदपि परेद्युर्न लभ्यते, तदा पूर्वैव ग्राह्या ।

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धापि कर्तव्या यदि न स्यात्परेऽहनि ॥

इति वृद्धवसिष्ठात् । मतान्तरे च मुहूर्तायाश्चतुर्थीयुताया ग्रहणं, त्रिमुहूर्तद्वितीयाविद्धाया एव वर्जनम् । यदि परेद्युस्त्रिमुहूर्ता न लभ्यते तदा विद्धापि पूर्वैव कालानुरोधेन मतान्तरपाणापोगाद् । ॰गणेशव्रतेति—गौरीव्रतोपलक्षणं तदन्यदैवत्यके उपवासे मतान्तरे वेत्यर्थः । ॰युग्मेति । "युगभूतानाम्" इत्यादि । गणेशव्रते

सर्वत्र गणेशव्रते *पूर्वैवेति सिद्धम् । संकष्टचतुर्थी चन्द्रोदयव्यापिनी ग्राह्या । दिनद्वये तत्त्वे *मातृयोगस्य सत्त्वात्पूर्वेति केचित् । *अन्ये तु दिने मुहूर्तत्रयादिरूपस्य तृतीयायोगस्याभावात् परदिने माधवोक्तमध्याह्नव्यापिसत्त्वात्संपूर्णत्वाच्च परेत्याचक्षते । दिनद्वये तदभावे तु परैव । *गौरीव्रते तु पूर्वैव*

गणेशगौरीबहुलाव्यतिरिक्ताः प्रकीर्तिताः ।
चतुर्थ्यः पञ्चमीविद्धा देवमान्तरयोगतः ॥

इति वाक्याच्च । अत्रामान्तो मासः । "व्रते शुक्लादिमेव च" इति वचनात् । *मातृयोगस्येति । न च "मातृविद्धा प्रशस्यते" इत्यस्य कथमिह प्रवृत्तिः ?, दिवा त्रिमुहूर्तवेधे हि तत्प्रवर्तते, न तु रात्राविति वाच्यम् ।

अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते ॥

इति वाक्याद्रात्रिवेधस्यापि रात्रिसाध्यकर्मसु हेमाद्रिमाधवादिभिरुक्तत्वात् । दिनद्वये तदभावे पूर्वैव मातृयुक्तत्वात् । "गणेशगौरीबहुला व्यतिरिक्ताः" इत्यग्रिमवचनोपलक्षणमेतत् । *अन्ये त्विति । अत्रारुचिः । तथा हि—वेधवचांसि दिवावेधे एव प्रवर्तन्ते इत्यत्र मानाभावः । जन्माष्टम्यादौ रात्रिवेधस्यापि माधवादिभिरुक्तेः । महालक्ष्मीव्रतसमाप्तौ दिनद्वये चन्द्रोदयकालेऽष्टमीसत्त्वे "कृष्णपक्षेऽष्टमी चैव" इति पूर्वविद्धवाक्यस्य रात्रिवेधेऽपि प्रवृत्तेर्हेमाद्र्यादिभिरुक्तेरिति । *गौरीव्रते इति । तच्च—

माघशुक्लचतुर्थ्यां तु गौरीमाराधयेद्बुध ।

इत्यादिनोक्तम् । *पूर्वैवेति ।

जया च यदि सम्पूर्णा चतुर्थी ह्रसते पुनः ।
जया सैव हि कर्तव्या नागविद्धां न कारयेत् ॥

इति वाक्यस्य कैमुत्यन्यायेन तृतीयायुक्ताया ग्राह्यत्वार्थत्वात् ।

इति मदनरत्ने ब्रह्मवैवर्तात् ॥(१)

पञ्चमी तु मासमाने सर्वाऽपि पूर्वा ।

चतुर्थीसंयुता कार्या पञ्चमी परया न तु ।
*दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते(२) ॥

इति हारीतोक्तेः । हेमाद्रिमते तु *कृष्णा पूर्वा, सिता परा । 'कृष्णा पूर्वयुता, सिता परयुता स्यात्पञ्चमी' इति दीपिकोक्तेः । *वस्तुतस्तु हारीतोक्तिरुपवासविषया ।

प्रतिपत्पञ्चमी चैव *अमाविश्वाभूतपूर्णिमाः ।

---

*दैवे इति—"पूर्वाह्णो वै देवानाम्" इत्यादेरपवादार्थम्, पित्र्ये इति-ह्यानः । *कृष्णेति । "एकादशी तथा षष्ठी" इति पूर्वविद्धत्वं "पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता" इत्युत्तरविद्धत्वं च शुक्लकृष्ण-भेदेन(३) व्यवस्थाप्यम् । अत्र "शुक्लपक्षे तथाऽसिते" इत्यनेन विरोध इत्यत आह—*वस्तुतस्त्विति । *उपवासेति । न च—

मासः पक्षोपवासा हि तिथिर्दैवफलेप्सुभिः ॥

इत्यनेन विरोधः, तेनोपवासे उत्तराविद्धाविधानादिति वाच्यम् । मासपक्षोक्त्या तस्य विधायकत्वाभावात् । *अमाविश्वो—वदामा ।

---

(१) सङ्कष्टचतुर्थी उभयेद्युश्चन्द्रोदयकाले सत्त्वेऽसत्त्वे वा परैव । मातृयोगस्य प्राशस्त्याच्चतुर्थीपरत्वात् । तद्विधेयस्य कृष्णाष्टमी-चतुर्दश्योर्विधानात्सैव पूर्वविद्धायां न चन्द्रोदयः पूर्वकाले तृतीया-योगेन तद्विद्धायां चतुर्थ्यां ऽप्यस्तकाले प्रमाणाभावात् । अपि तु दिने त्रिमुहूर्तासत्त्वे तृतीयाविधे सत्त्येव तृतीयाविद्धत्वम् । तस्मात्परैव चतुर्थी युक्तेति पुरुषार्थचिन्तामणिः ।

(२) असिते—कृष्णे इत्यर्थः ।

(३) शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥
इत्यनेनेत्यर्थः ।

नवमी दशमी चैव नोपोष्याः परसंयुताः ॥
इति ब्रह्मवैवर्तात्। यत्तु-

पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद।
इत्यापस्तम्बीयं, तत्स्कन्दव्रतपरम्।

स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता।
इति वाक्यशेषादिति माधवः। नागपूजाविषयमित्यनन्तभट्टनिर्णयामृतादयः। चमत्कारचिन्तामणौ-

पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥ इति।

*तेन नागपूजादौ परैव। यत्तु-मदनरत्नदिवोदासीययोः श्रावणपञ्चम्यतिरिक्ता पूर्वेत्युक्तम्।

श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः॥
इति संग्रहोक्तेः,—

गणेशस्कन्दयोगाभ्यां क्रमान्नागः शुभाशुभः।
अरिमित्रे तयोः पत्रे नागानामाखुबर्हिणौ(१) ॥
इति षट्त्रिंशन्मताच्च श्रावणपञ्चम्यतिरिक्ताया नागपञ्चम्याश्चतुर्थीयुतत्वमुक्तं, तद् *उपवासादिविषयम्। पत्रे—वाहने ॥

भूनं-चतुर्दशी। पूर्णिमा-वटपूर्णिमा। उपवासातिरिक्तत्वे परेति लभ्यते; तदाह-*तेनेति। *उपवासादीनि। आदिपदं साम्प्रतायातम्, उपवासपूर्वकपूजाग्रहणार्थं वा। उपवासे प्रधाने निर्णीतायास्तिथेस्तत्सहचरपूजायां ग्राह्यत्वात्। अत्र स्कन्दोपवासे परा कार्या।

(१) चतुर्थीयुक्ता पञ्चमी शुभफलप्रदा, षष्ठीयुक्ता चाशुभफलप्रदा। तयोश्चतुर्थीयुक्तपञ्चम्या नागस्य मित्रमाखुर्वाहनं, षष्ठीयुक्तपञ्चम्याः शत्रुर्मयूरश्च वाहनमित्यर्थः।

षष्ठी सप्तमी ०स्कन्दषष्ठीनिर्णयः परैव । ०युग्म-
वाक्यात्,

०नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचन ।
इति स्कान्दाच्च ।

स्कन्दोपवासे श्रीकार्या पञ्चमी परसंयुता ।
इति विधिवचनात् । श्रावणकृष्णेऽपि उपवासे परा "श्राव-
णे पञ्चमी शुक्ला सम्प्रोक्ता नागपञ्चमी । तां परित्यज्य"इति वच-
नात् । तथा च षोडशभिर्मुहूर्त्तैः नागपञ्चम्यादिः पराऽन्यथा पूर्वेति ।
यत्तु या पञ्चमी परा श्रीकार्या सा स्कन्दोपवासे नागपूजायां
चेति (१)व्यवस्थयाऽन्या सर्वापि सर्वत्र पूर्वैव, 'इतरा चतुर्थियुता'
इति स्मरणात् । विधिवाक्येषु उपोष्यादिपदान्युपलक्षणम् । "दैवे
कर्मणि"इतिवचनाद्धिति चाहुः । तदुक्तं विधिवचने पैतृकवचनेन स्पष्टे ।
तन्मते श्रीपवासादिपदानामुपलक्षणत्वं न मन्यते इति वी-
क्ष्यम् । ०स्कन्देति ।

षष्ठी तिथिर्महाराज सर्वदा सर्वकामदा ।
उपोष्या सा प्रयत्नेन कार्त्तिकेयप्रिया सदा ॥
इति सर्वमासीयशुक्लषष्ठ्याम्,
आषाढशुक्लषष्ठ्यां तु तिथिः कौमारिकी स्मृता ।
इति आषाढशुक्लषष्ठ्यां च, स्कन्दोपवासे
कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।
एताः पूर्वयुता कार्यास्तिथ्यन्ते पारणं भवेत् ॥
इति स्कान्देन पूर्वविद्धत्वोक्तेः । कृष्णाष्टमी—कृष्णपक्षाष्टमी कृ-
ष्णदेवस्य जन्मकाण्डोक्ता कृष्णाष्टमीसमाख्यानप्रशस्तान्विनी वा ।
कृष्णजन्माष्टमीति केचित् । ०युग्मेति । "षण्मुन्योः"इत्यादिः ।
०नागेति ।

(१) व्यवस्थया—नियमेनेत्यर्थः ।

नवमी दशमी चैव नोपोष्याः परसंयुताः ॥
इति ब्रह्मवैवर्तात् । यत्तु-
पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद ।
इत्यापस्तम्बीयं, तत्स्कन्दव्रतपरम् ।
स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता ।
इति वाक्यशेषादिति माधवः । नागपूजाविषयमित्यनन्तभट्टनिर्णयामृतादयः । चमत्कारचिन्तामणौ-
पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥ इति ।
*नेन नागपूजादौ परैव । यत्तु-मदनरत्नदिवोदासीययोः श्रावणपञ्चम्यतिरिक्ता पूर्वेत्युक्तम् ।
श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ॥
इति संग्रहोक्तेः,—
गणेशस्कन्दयोगाभ्यां क्रमाल्लाभः शुभाशुभः ।
अरिमित्रे तयोः पत्रे नागानामाखुबर्हिणौ(१) ॥
इति पद्धिशन्मताच्च श्रावणपञ्चम्यतिरिक्ताया नागपञ्चम्याश्चतुर्थीयुतत्वमुक्तं, तद् *उपवासादिविषयम्। पत्रे—वाहने ॥

मूलं-चतुर्दशी । पूर्णिमा-वटपूर्णिमा । उपवासातिरिक्तव्रते परेति लभ्यते; तदाह-*नेनेति । *उपवासादीति । आदिपदं सम्पातायातम्, उपवासपूर्वकपूजाग्रहणार्थं वा । उपवासे प्रधाने निर्णीतायास्तिथेस्तत्सहचरपूजायां ग्राह्यत्वात् । अत्र स्कन्दोपवासे परा कार्या ।

(१) चतुर्थीयुक्ता पञ्चमी शुभफलप्रदा, षष्ठीयुक्ता चाशुभफलप्रदा । तयोश्चतुर्थीयुक्तपञ्चम्या नागस्य मित्रमाखुर्वाहनं, षष्ठीयुक्तपञ्चम्याः शत्रुर्मयूरश्च वाहनमित्यर्थः ।

षष्ठी सर्वमते *स्कन्दव्रताभिरिक्ता परैव । *युग्म
वाक्यात्,

*नागाविद्धा न कर्तव्या षष्ठी चैव कदाचन ।
इति स्कान्दाच्च ।

स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता ।
इति विशेषवचनात् । श्रावणाद्यन्यत्रापि उपवासे परा "श्रा
णे पञ्चमी शुक्ला सम्प्रोक्ता नागपञ्चमी । तां परित्यज्य"इति व
नात् । तथा च परेद्युस्त्रिमुहूर्ता नागपञ्चम्यादिः पराऽन्यथा पूर्वे
परं तु या पञ्चमी परा स्वीकार्या सा स्कन्दोपवासे नागपूजा
चेति (१)व्यवस्थयाऽन्या सर्वापि सर्वमते पूर्वैव, 'इतरा सचतुर्थिक
इति स्मरणात् । विशेषवाक्येषु उपोष्यादिपदान्युपलक्षणम् । "
कर्माणि"इतिवचनादिति प्राहुः । मयूखे विवेचने चैतन्मतमेव इदयत
ग्रन्थकृता चोपवासादिपदानामुपलक्षणत्वं न मन्यते इति
ध्यम् । *स्कन्देति ।

षष्ठी तिथिर्महाराज सर्वदा सर्वकामदा ।
उपोष्या सा प्रयत्नेन कार्तिकेयप्रिया सदा ॥

इति सर्वमासीयशुक्लषष्ठ्याम्,

आषाढशुक्लषष्ठ्यां तु तिथिः कौमारिकी स्मृता ।

इति आषाढशुक्लषष्ठ्यां च, स्कन्दोपवासे

कृष्णाऽष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।
एताः पूर्वयुता कार्यास्तिथ्यन्ते पारणं भवेत् ॥

इति स्कान्देन पूर्वविद्धत्वोक्तेः । कृष्णाष्टमी—कृष्णपक्षाष्टमी
द्देवरया मतकाण्टोक्ता कृष्णाष्टमीसपाख्यानत्र मन्वन्धिनी वा
कृष्णजन्माष्टमीति केचित् । *युग्मेति । "षष्ठ्यन्योः"इत्यादि
*नागेति ।

---

(१) व्यवस्थया—नियमेनेत्यर्थः ।

सप्तमी पूर्वैव *युग्मवाक्यात्,

*षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा ।

इति स्कान्दाच्च ॥ निर्णयामृते–

षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः ।
योगोऽयं पद्मको नाम सूर्यकोटिग्रहैः समः ॥

(१)नागविद्धा न षष्ठी स्यात्पक्षयोरुभयोरपि ।
दैवे कर्मणि तां कुर्यात् पित्र्ये पूर्वेण संयुताम् ॥

इति स्पष्टमपि सौमन्तवं स्मर्यते ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इत्यादावुपोष्यग्रहणं व्रतसामान्योपलक्षणम् । "नागो द्वादशनाडीभिः"इति नागवेधः । तेन षण्मुहूर्तन्यूनपञ्चमीयोगे पूर्वैव । तिथिक्षये तु–

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्तव्या यदि न स्यात्परेऽहनि ॥

इति वासिष्ठं स्मर्तव्यम् । *युग्मेति"षण्मुन्योः"इत्यादि । *षष्ठ्या युतेति । या पूर्वेद्यू रात्रिमारभ्य प्रवृत्ता तिथिक्षयादष्टमीविद्धा सा,सैव ग्राह्या । गुणानुरोधेन प्रधानलोपस्यान्याय्यत्वात् । अतश्च

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।
कामविद्धो भवेद्विष्णुर्न ग्राह्यास्ते तु वासराः ॥

इति निषेधोऽपि तत्र न प्रवर्तते । नागः—पञ्चमी । रुद्रः–अष्टमी । दिवाकरः–सप्तमी । कामः–त्रयोदशी । विष्णुः–द्वादशी ।

ननु—

षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा ।
षष्ठी च सप्तमी यत्र तत्र सन्निहितो रविः ॥

इति स्कान्दात्,

---

(१) नागः–पञ्चमी ।

अष्टमी तु *सर्वमते कृष्णा पूर्वा, सिता परा ।

व्रतमात्रेऽष्टमी कृष्णा पूर्वा, शुक्लाऽष्टमी परा ।

इति माधवोक्तेः, 'परयुक् शुक्लाऽष्टमी, पूर्वयुक् कृष्णा' इति

षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ॥

इति भविष्योक्तेः सौरोपवास एव पूर्वा युज्यते न सर्वत्र, इति चेन्न । "सप्तमी नाष्टमीयुक्ता न सप्तम्या युताऽष्टमी । सर्वेषु व्रतकल्पेषु" इति ब्रह्मवैवर्त्तात् । एवं च

षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाऽष्टमी ।
सप्तमी परविद्धा च नोपोष्यं तिथिपञ्चकम् ॥

इति वाक्ये उपोष्यशब्दस्य सर्वव्रतोपलक्षणत्वं द्रष्टव्यम् । केचित्तु यत्र यत्र प्रधानलोपापत्तिभयेन विद्धा गृह्यते तत्र स्वरूपोपवाससन्निपातात् पुत्रादिप्रतिनिधिना ब्राह्मणभोजनादिप्रतिनिधिना वोपवास इत्याहुः । *सर्वेति ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्त्तव्या परविद्धा न कर्हिचित् ॥
उपवासादिकार्येषु एष धर्मः सनातनः ।
शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ।
उपवासादिकार्येषु एष धर्मः सनातनः ॥

इति निगमोक्तेः । यत्तु "षण्मुन्योः" इति युग्मवाक्यं, यच्च—

नागविद्धा तु या षष्ठी भानुविद्धो(१)महेश्वरः ।
चतुर्दशी कामविद्धा तिस्रस्ता मलिनाः स्मृताः ॥

इत्यादि तत्सर्वं कृष्णपक्षमात्रपरम् । यत्तु—

---

(१) भानुः-सप्तमी । महेश्वरः-अष्टमी ।

दीपिकोक्तेश्च। *शिवशक्त्युत्सवे च कृष्णाऽप्युत्तरा।

पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे।

इति माधवोक्तेः। दिवोदासीये भविष्ये-

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।

कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः॥

इति, तत्तु नेह प्रवर्तते। सामान्यतः प्रसक्तयोरर्थयोर्बाधकं हि तत्, न चेह तथा प्रसक्तिरस्तीति। नन्वस्तु उपवासे कृष्णाऽप्युत्तरा।

एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका।

उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः॥

इति स्मरणादिति चेन्न। कृष्णाष्टम्याः पूर्वविद्धत्वबोधकोक्तनिगमवाक्यान्ते

उपवासादिकार्येषु एष धर्मः सनातनः।

इत्याद्युपवासोक्तेः। न चेदं रुद्रोपवासपरम्।

रुद्रव्रतेषु सर्वेषु कर्त्तव्या संमुखी तिथिः।

अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपावसेत्॥

इति स्मरणादिति शङ्क्यम्। 'एष धर्मः सनातनः' इत्यनेन सर्वविषयकत्वस्य स्पष्टं प्रतीतेः। रुद्रव्रतेष्विति च व्रतमात्रपरं, न तूपवासमात्रपरमिति समानविषयत्वाभावान्न तेनोपसंहारसंभव इति भावः। *शिवशक्तीति मिलितशिवशक्तिदेवत्यः पूजोपवासादिः, उत्सवः-व्रतम्।

अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता।

अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः॥

अष्टमीनवमीयुग्मे महोत्साहे महोत्सवः।

शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपि॥

इति पाद्मे विहितः। अत्र शिवस्य शक्तेश्च य उत्सवः पक्षद्वय- ... नवम्यां वा विहितः, स नवमीयुताष्टम्यां अष्टमीयुतनवम्यां च कार्य इत्येतावद्विवक्षितं, शिवक्षेत्रे इत्यनुवादः। शिवो-

*यदा यदा सिताष्टम्यां बुधवारो भवेत्क्वचित् ।
तदा तदा हि सा ग्राह्या एकभक्ताशने नृप ॥
*संध्याकाले तथा चैव प्रसुप्ते च जनार्दने ।
बुधाष्टमी न कर्तव्या हन्ति पुण्यं पुराकृतम् ॥

आन्ध्यं पद्यं हेमाद्रौ न दृष्टम् ।
नवमी तु सर्वमते पूर्वा युग्मवाक्यात्,
न कुर्यान्नवमीं तात दशम्या तु कदाचन ।
इति स्कान्दाच्च ।
दशमी तु पूर्वा परा चेति हेमाद्रिः ।
पूर्णा पूर्वोत्तरा शुद्धा दशम्येवं व्यवस्थिता ।
इति माधवः । *स्वल्पत्वात्तु पूर्वा नवमीयुतैव ग्राह्या ।
दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्तम ।
इत्यापस्तम्बोक्तेः । यत्तु–

१सपदस्य तथैव करणात् । दीपोत्सवादौ । एवं च
उपवासे सप्तमी तु वेधादस्पृष्टं दिनम् ।
पारणादिनमपि च उपवासादिविधिः स्मृतः ॥

इति वाक्यं शिवरात्र्युपवासविषयम्, आर्द्रेचित्ताभिप्रायकत्वासम्भवादिति द्रष्टव्यम् ।

*यदा यदेति । बुधयुक्तायां शुक्लाष्टम्यां बुधाष्टमीव्रतं विधीयते, तत्र तद्व्रतारम्भस्य च विधानं प्रमाणं द्रष्टव्यं । *संध्याकाले इति-चातुर्मास्येतरपरं ज्ञेयं । तत्र यदि परदिने बुधवारो नास्ति पूर्वदिने च सायंकाले नास्ति किं तु मध्याह्नादौ वर्तते, तत्र मध्याह्ने कार्यमिति भावः । अयं निषेधः बुधवारस्य सायंकाले सत्त्वे बुधाष्टमी कार्या तत्परत्वेनान्वयः ।

मदनरत्नमाह—*परायुक्ताश्रितेत्युक्ते । कर्तव्या विनिर्दिशेत्—
पूर्वा च दूषिता यस्मात्तस्मात्सा सर्वतोऽदुष्टा ।

*गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ इति ।

*न चात्र *पर्युदासेन व्रतविधिः । *तत्र तु व्रतादिशब्दाभावात् । व्रतरूपत्वन्तु-ब्रह्मवैवर्ते–

मासि हरिदिने सम्यग्विधाय नियमं निशि ।
*दशम्यामुपवासस्य प्रकुर्याद्वैष्णवव्रतम् ॥ इति ।

*इदं च शिवभक्तादिभिरपि कार्यम् ।

वैष्णवो वाऽथ शैवो वा कुर्यादेकादशीव्रतम् ।

इति शिवधर्मोक्तेः ।

वैष्णवो वाऽथ शैवो वा सौरोऽप्येतत्समाचरेत् ।

इति निन्दादौ "न पचेदन्नमात्मनः" इत्यादिवदन्नशब्दोऽदनीयपर इति । निषेधपालने सर्वेषामधिकारमाह—*गृहस्थ इति । *न चात्रेति । एकमूलकल्पनालाघवादिति शेषः । *पर्युदासः—

विधेर्यत्र प्रधानत्वं प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥

इति रीत्या नञः संकल्पलक्षणया । उत्तरपदेन—स्वोत्तरभुजि-धात्वर्थनिवृत्तार्थकतया । *तत्र त्विति । यथा "नेक्षेतोद्यन्तमादित्यम्" इत्यादौ "तस्य व्रतम्" इत्युपक्रमे व्रतशब्दोऽस्तीति संकल्पे लक्षणा, न चेह तथाऽस्तीत्यर्थः । ननु व्रतविध्यपेक्षया निषेधो नोपगम्यते, तद्गतनयोरेकवाक्यतामात्रं लाघवादिति चेन्न । तथा सति संकल्पनिरतिचारादित्रयुपवासनिषेधे भोजनस्यैव सम्भवात् किञ्चिद्भक्षणविधानवैयर्थ्यात् । सति तु पृथङ्निषेधे तत्पालनाय प्रवृत्तस्य निवृत्तेः संकल्पाविनाभावात् । संकल्पे चोपवासनिषेधातिक्रमदर्शनान्निवृत्तये किञ्चिद्भक्षणविधेरर्थवत्त्वात् ।

*दशम्यां निशि उपवासस्य नियमपरत्वेनान्वयः । अत्र सर्वेषामधिकारमाह—*इदं चेति । निषेधपालनस्य केवलनित्यत्वा-

इति सौरपुराणाच्च । *सोऽपि द्वेधा-*नित्यः काम्यश्च ।

उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि ।

इति गारुडोक्तेः,

पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणम् ।

इति नारदोक्तेश्च नित्यता ।

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥

इति कौर्मादिषु फलश्रुतेश्च काम्यता । उभयैकादशीव्रतं गृहस्थातिरिक्तानामेव नित्यम् । गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं, न कृष्णायाम् ।

दी०-*सोऽपीति । व्रतरूपोऽपीत्यर्थः । *नित्य इति । नित्यत्वसाधकानि सङ्ग्रहे—

नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।
इत्युक्त्वाऽकरणे(१)दोषश्रुतेस्त्यागचोदनात् ॥
फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम् । इति ।

तत्राद्यन्तद्वयं ग्रन्थकारेणोक्तम्(२)। सदाशब्द उक्तः सनत्कुमारसंहितायाम्—

एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः ।

यावदायुःशब्दो विष्णुपुराणे—

द्वादशी न प्रमोक्तव्या यावदायुः सुवृत्तिभिः ।

अतिक्रमनिषेधः कण्वेनोक्तः—

एकादश्यामुपवसेन्न कदाचिदतिक्रमेत् ।

विष्णुरपि-

---

(१) अत्र केषुचित्पुस्तकेषु 'इत्युक्त्वाऽतिक्रमे' इति पाठः ।

(२) नित्यत्वाभिप्रायेण प्रथमं 'उपोष्यैकादशी नित्यम्' 'पक्षे पक्षे च कर्त्तव्यम्' इति वचनद्वयमुपन्यस्तम्; सदेत्यादेव फलाभिधानार्थं तदेव स्पष्टीकृतमिति भावः ।

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
*वनस्थयतिधर्मोऽयं, शुक्लामेव सदा गृही ॥

इति देवलोक्तेः । न चानेन निषेधपालनमेव वनस्थयतिविषये उपसंहियते, न तु व्रतमिति वाच्यम् । अस्य *पर्युदासेन व्रतविधिपरत्वात् । *अन्यथा पूर्वोक्ताग्निपुराणवचने निषेधपालने गृहस्थस्याधिकारोऽप्यस्य निरोधः स्यात् । *निषेधस्य निवृत्तिमात्रफलत्वेन *विशेषपर-

---

एकादश्यां न भुञ्जीत कदाचिदपि मानवः । इति ।
अकरणे दोषः सनत्कुमारेणोक्तः—
न करोति यदा मूढ एकादश्यामुपोषणम् ।
स नरो नरकं याति रौरवं तमसावृतम् ॥
अत्यागचोदना विष्णुरहस्ये—
परमापदमापन्नो हर्षे वा समुपस्थिते ।
सूतके मृतके चैव न त्यजेद्द्वादशीव्रतम् ॥
फलश्रुतिः कात्यायनादिवाक्ये—
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । इति ।
*वनस्थयति ब्रह्मचारिविधवयोरुपलक्षणमित्यपि स्फुटम् ।
*पर्युदासः—न भुञ्जीतेत्यत्र भोजनाभावसंकल्पार्थकत्वम्(१)।
*अन्यथा—पर्युदासाऽनुपगमे । नन्वाग्निपुराणे एकादशीसामान्ये गृहस्थस्याधिकारः प्रतीयते, स च शुक्लायामुपसंहियते ।
सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।
इत्युक्तेः । तथा च वर्णिगृहिवनियतीनां स्वदायाश्च निषेधपालने शुद्धा, गृहिभिन्नानां तु तत्र कृष्णेत्याशयेदेवलवाक्ययोर्निःशङ्कतार्थ इत्यत्राह—*निषेधस्येति । *विशेषः—अधिकारिविशेषो वनित्वादिः । नन्वेवमपि नञः प्रधानीभूताख्यातान्वये त्वपरामिषेध

---

(१) तत्रेति शेषः ।

नपेक्षणादुपसंहारायोगात् । *अभावस्य धर्मत्वाभावाच्च । *तस्मादनेन सर्वेषामेकादशीव्रतविधायिनां सामान्यवाक्यानां वनस्थयतिविषये *उपसंहारान्न गृहस्थस्य कृष्णायां नित्यव्रतप्राप्तिः । कथं तर्हि-

संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही ॥

इति नारदादिवचनेषु कृष्णानिषेधः ?, *प्राप्त्यभावादिति चेच्छृणुतम् ।

शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥

एवार्थो न पर्युदासः । वनस्थत्वादिकं तूदाहरणमात्रमित्यत्राह-*अभावस्येति । तथा च यथा "नेक्षेतोद्यन्तमादित्यम्" इत्यादौ प्रसक्तोऽपि नञः प्रधानान्वयो व्रतान्वयार्थं त्यज्यते, तथा प्रकृते धर्मत्वान्वयार्थं स त्याज्य इति भावः । नन्वेवं-

यथा शुक्ला तथा कृष्णा विशेषो नास्ति कश्चन ।

इत्यादिसामान्यवाक्यानां का गतिरित्यत आह-*तस्मादिति । *उपसंहारादिति । ननु "उभयैकादशीविषयविधानां देवलादिवाक्यैर्वनस्थादिविषयत्वेनोपसंहारे गृहिणः सामान्यवाक्यैः शुक्लायामप्राप्तेः "शुक्लामेव सदा गृही" इत्यस्य पूर्वविधायकत्वापत्तिः । इष्टापत्तौ चैवकारवैयर्थ्यं, वाक्यभेदश्च । अनुपसंहारे तु सामान्यवचनैरेव गृहिणः शुक्लाप्राप्तेः 'शुक्लामेव' इत्येवकारस्य परिसंख्यार्थत्वापत्तिः । परिसंख्यायां त्रयो दोषाः ।

स्वार्थस्य त्यागः, परार्थस्य कल्पनम्, प्राप्तस्य बाधनम् ।

इति वाक्यादिति चेन्न । विधिशक्तिकुण्ठकैवकारदर्शनात्तद्घटितवाक्यस्यानुवादत्वार्थं पदद्वयोपादानरसाच्छुक्ला सर्वैरुपोष्या कृष्णा गृहिभिन्नैरुपोष्येत्युपसंहारोपगमात् । *प्राप्त्यभावादिति । वस्तु-

इति पाद्मे गृहस्थस्य आषाढीकार्तिकीमध्यस्था या कृष्णा विहिता, सा पुत्रवतो निषिध्यते । अन्यकृष्णायां तु न विधिः । सर्वविधीनां यत्नस्थगितपूपसंहारात् । न निषेधः, प्राप्त्यभावात् । शयन्यादिवाक्यं त्वपुत्रगृहिगोचरमित्यनन्तभट्टहेमाद्र्यादिग्रन्थाः । दीपिकाऽपि–'असिता तु शयनीबोधान्तरगाऽप्यर्थो न स्यात्सा*ऽऽत्मवतोऽपि' इति । मदनरत्ने भविष्ये—

यथा शुक्ला तथा कृष्णा द्वादशी मे सदा प्रिया ।
शुक्ला गृहस्थैः *कर्त्तव्या भोगसन्तानवर्द्धिनी ।
*मुमुक्षुभिस्तथा कृष्णा न *मे भेदोपदर्शिता ॥(१)

इति ।

निषेधपालनं काम्यव्रतं च सर्वकृष्णायां सर्वगृहिणां भवत्येव ।

वस्तुतस्तु नैते शास्त्रप्राप्तार्थनिषेधा विकल्पप्रसङ्गात् । सामान्यशास्त्रप्राप्ति हि विधिविशेषकस्यापि विधिनोपजीव्यत्वे तुल्यबलत्वं दुर्वारं किं तु पर्युदासः । नञः पुत्रवद्गृहिपदान्वयादपुत्रवद्गृहिभिः संक्रान्त्यादावुपवसेदित्यर्थात् । 'शुक्लामेव सदा गृही' इत्यत्र च गृहिपदं पुत्रवद्गृहिपरम् । एवं च पुत्रवद्गृहिणः कृष्णायामुपवासाभावो तद्विशेषे शयन्यादिवाक्येन विधीयते इति सारम् । वस्तुतस्तु संक्रान्त्यादौ पुत्रवद्गृहिण उपवासनिषेधोऽनर्थः । गृहिणस्तन्निषेधादेव सिद्धेः । अतो गृहिपदस्यातन्त्रत्वात्पुत्रवतां (२)विधुरविधवादीनां तन्निषेधः । एवमेवानुपदमग्रे 'पुत्रवांश्च सभार्यश्च' इति पृथग्द्वयोपादानं सङ्गच्छते इति । *आत्मवतः–पुत्रवतः(३) *कर्त्तव्येति मतादेशः । *मुमुक्षुभिरिति । गृहस्थानां मुमुक्षापवादार्थम् । गृहिभिस्तैः

(१) कृष्णेति सम्बध्यते । (२) विधुरो मृतपत्नीकः ।
(३) "आत्मा वै पुत्रनामासि" इति निरुक्तात् ।

पुत्रवांश्च सभार्यश्च बन्धुयुक्तस्तथैव च ।
उभयोः पक्षयोः काम्यव्रतं कुर्यात्तु वैष्णवम् ॥

इति नारदोक्तेः । एतत् सर्वं कालादर्शे उक्तम्-

विधवाया वनस्थस्य यतेश्चैकादशीद्वये ।
उपवासो, गृहस्थस्य शुक्लायामेव पुत्रिणः ॥
भुजेर्निषेधः कृष्णायां, सिद्धिस्तस्य ततो व्रते ॥ इति ।

*माध्वास्तु वैष्णवगृहस्थानां कृष्णाऽपि नित्या ।

नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
*पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम् ॥
सपुत्रश्च सभार्यश्च स्वजनो भक्तिसंयुतः ।
एकादश्यामुपवसेत् *पक्षयोरुभयोरपि ॥

कृष्णोपोष्येति पूर्वोक्तार्थस्यापवादत्वं सूचितम् । निषेधपालने गृहिणामधिकारो 'गृहस्थो ब्रह्मचारी च' इत्यनेन दर्शितः । *नै— तेव । पूर्वमतेऽरुचिं व्यञ्जयन् स्वसिद्धान्तमाह—*माध्वास्त्विति । *पक्षे पक्षे चेति व्रतस्य नित्यत्वार्थम् । सपुत्रश्चेत्यादि पुत्रादेरुपवासाधिकारार्थम् । बहुव्रीहिणा च पुत्रवदपुत्रगृहस्थयोर्निषेधोऽपि बाध्यते । अवैष्णवगृहस्थेषु पुत्रवद्गृहस्थनिषेधो दोषाधिक्यार्थः । *पक्षयोरुभयोरपीति कृष्णाभ्यासः ।

यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा ।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥

इति वैष्णवलक्षणं । भगवदेकत्वमेवेत्याविष्कर्तुं विष्णुपरायणैरिति ।

रविवारेऽर्कसंक्रान्त्यामेकादश्यां सितेतरे ।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही ॥

इति रविवारादौ पुत्रवद्गृहिण उपवासनिषेधस्तु नेह प्रवर्तते । तन्निमित्तोपवासस्यैवोक्तेः । व्यतीपातादावुपवासनिषेधस्तु काम्यो-

इति नारदोक्तेरित्याहुः । *पुत्रशब्दश्चापत्यमात्रवचनः । नारायणवृत्तौ—'पुमांस एव मे पुत्रा जायेरन्' इत्यत्रापत्यमात्रवाचित्वोक्तेः(१)। 'जनयेद्बहुपुत्राणि' इति लिङ्गात् । 'पौत्री मातामहस्तेन' इति मनूक्तेः । पुत्र्या अपत्यमित्यर्थे तु "स्त्रीभ्यो ढक्"(पा०सू० ४-१-१२) इति पौत्रेय इत्यापत्तेः । 'पुमान् पुत्रो जायते' इति च ॥

उपवासनिषेधे विशेषो वायवीये उक्तः—

पक्षासपर इति । *पुत्रशब्दश्चेति । इदमापाततः । नारायणइत्यादौ विशिष्टवाचिशब्दानां पृथग्विशेषणसमभिव्याहारे विशेष्यमात्रपरत्वमिति न्यायादेव तदुक्तेः । इतरथा 'न कुर्वीत पुत्रवान् गृही' इत्यादौ पुत्रशब्दः कथमपत्यमात्रवचनः ? 'पौत्री मातामहः' इत्यत्र च पौत्रो दौहित्रः । पुत्रपदस्य स्त्रीलिङ्गस्य दुहित्रर्थत्वात् । तथा चामरः—

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ।
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ॥ इति ।

अत्रात्मजादिशब्दानां पुत्रदुहित्रादिः पृथगर्थो, ऽपत्यादेस्तूभयसाधारणोऽर्थ इति स्पष्टम् । "जनयेद्बहुपुत्राणि" इत्यनेकान्यपत्यानीत्यर्थः । तत्र पुत्रत्वस्यानपेक्ष पुत्रपदार्थत्वे अजातपुत्रापत्यकजातकन्यकयनादेर्दुहितृदौहित्रादिगामित्वानुशासनबाधापत्तेः । अत्र चानेकापत्यानि न विधीयन्ते । एकपुत्रस्य दत्तकादिसंपादनापत्तेः । किं तु सकृत् कृते कृतः शास्त्रार्थ इति न्यायो निवर्त्यते । एवं च एकौरसस्यौरसान्तरवद्दत्तकादेरेकदत्तकस्य वा दत्तकान्तरसत्त्वे न शास्त्रविरोधः ।

अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ।

---

(१) स्वपत्न्यपत्यावृत्त्यर्थतया 'पुमांस' इति विशेषणोपादानेन पुत्रशब्दस्यापत्यमात्रवाचित्वोक्तेरित्यर्थः ।

*उपवासनिषेधे तु भक्ष्यं किंचित् प्रकल्पयेत्।
न दुष्यत्युपवासेन उपवासफलं लभेत् ॥

भक्ष्यं च तत्रैवोक्तम्-

नक्तं हविष्यान्नमनोदनं वा
फलं तिलाः क्षीरमथाम्बु चाज्यम्।
यत्पञ्चगव्यं यदि वाऽपि वायुः
*प्रशस्तमत्रोत्तरमुत्तरं च ॥ इत्यलम्।

तत्र दशमीवेधो द्वेधा-अरुणोदयवेधः सूर्योदयवेधश्चेति। आद्यो गारुडे-

इत्यत्रापुत्रग्रहणादाने मासिकत्वार्थम्। 'एकादश्यां गृहस्थः पुत्री' इत्यत्राप्येवमेवेति। *उपवासनिषेधे इत्यादि। ननु सनाथ(गृ)विधवा(?) नित्यकाम्यमिव(१) किंचिद्भक्षणेऽपि व्रतस्योपवासफलं चान्द्रायणादिकं प्राप्नोतीत्यर्थः स्यात्। एवं च सर्वथा व्रतस्योपवासनिवृत्तिर्दुर्लभेति चेन्न। कृष्णैकादश्यां पुत्रवतो गृहस्थस्योपवासनिषेधात्, सधवी वा न दुष्यतीत्यनेन निरोधः, निषिद्धत्वे तदतिक्रमे दोषः स्यात्। किं तु सर्वपुरुषसाधारणः सकलैकादशीनामारणो यो व्रतविधि-विहितो नित्यरूपः [illegible] 'इति विज्ञायते श्रुतिः' इत्या-दिवचनात् [illegible] [illegible] किंचिद्भक्षणादि-नादिभिः। तथा [illegible] [illegible]

(१) "यः [illegible] न [illegible]" इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] "[illegible] [illegible]" इति [illegible] [illegible]। [illegible] [illegible] [illegible]।

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिने वैकादशीव्रतम् ॥ इति ।

अरुणोदयस्वरूपं च माधवीये स्कान्दे—
*उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयः । इति ।

यदपि—
उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता ।
संपूर्णैकादशी नाम तत्रैवोपवसेद् गृही ॥

इत्यादि हरिदासादिवचनम्, यच्च भविष्ये—
आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता ।
एकादशी तु संपूर्णा विद्धान्या परिकीर्तिता ॥

इति, तदप्युपवासहान्यादौ दण्डद्वयपरत्वेन । हेमाद्रावुक्तम् । यत्तु [illegible]—
चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ।
चतुष्टयविभागोऽत्र वेधादीनां किलोदितः ॥
अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते ।

[illegible]

तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः ॥

इति, तदपि *अरुणवेधाभावेऽरुणोदयवेधपरमिति वेधपरमेवेति माधवीये मदनरत्ने च । अन्यमप्युक्तमन्यत्र ।

*तथान्येऽपि वेधा हेमाद्रौ माधवीये च गारुडे–

उदयात्प्राग् द्विघटिकात्मकावच्छिन्नरसकालवेधपरत्वम् । उदयात्प्राक्सप्तनाडीपूर्वकालत्वं पलात्मकत्वम् । उदयात्प्राक्त्वं योगभाविति भेदः । *अरुणोदयेति । यदि वेधाद्यरुणोदयवेधपर्याप्तत्वादरुणोदयवेधपरत्वमित्यर्थः । *उदयवेधेन इति ।

अतिवेधादयः सर्वे ये वेधास्त्रिविधाः स्मृताः ।
सर्वेऽप्येवं यथा विद्धा वेधः सूर्योदये यतः ॥

इति वचनादुदयात्प्राक् चतुर्दण्डव्यमरुणोदयशब्दप्रतिपादितम् । अत एव काम्योपवासवर्ज्यवेधवाक्यं परिहारशब्दोपादानमित्युपोद्बलकं दर्शयति–*तथेति । एकादशी त्रेधा–पूर्णा खण्डा विद्धा चेति भेदात् । तत्र या द्वात्रिंशन्मुहूर्तव्यापिनी, सा पूर्णा ।

प्रतिपत्प्रभृतिः सर्वा उदयादोदयाद्रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिता ॥

इति स्कान्दे हरिवासरपर्युदासात् तत्र—

उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता ।
संपूर्णैकादशी नाम तत्रैवोपवसेद् गृही ॥

इति गारुडात् । अत्र विशेषापेक्षायाम्—

आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ।
सम्पूर्णैकादशी नाम कार्या धर्मफलेप्सुभिः ॥

इति गारुडं द्रष्टव्यम् । अरुणोदयव्यापिन्याः परदिने न्यूनत्वे खण्डा । अरुणोदयव्यापिनी तु विद्धा ।

आदित्योदयवेलायाः प्राक् मुहूर्तद्वयान्विता ।
एकादशी तु सम्पूर्णा विद्धाऽन्या परिकीर्तिता ॥

भविष्यात् । विद्धाऽपि द्वेधा–सन्दिग्धा संयुक्ता च । तत्र—

*उदयात् प्राक् त्रिघटिका व्यापिन्येकादशी यदा ।
संदिग्धैकादशी नाम वर्ज्येयं धर्मकाङ्क्षिभिः ॥
*उदयात् प्राङ् मुहूर्तेन व्यापिन्येकादशी यदा ।
संयुक्तैकादशी नाम वर्ज्येयं धर्मवृद्धये ॥
*हेमाद्रौ रात्रेरन्त्योऽष्टमो भागोऽप्यरुणोदय उक्तः—
निशः प्रान्ते तु यामार्धे देवतादिप्रबोधने ।
सारस्वतानध्ययने चारुणोदय उच्यते ॥
इति स्मृतेः । *अथैके—'एषां सर्वपक्षाणां मुहूर्तद्वयेन चोदीकारात्, 'निशः प्रान्ते' इति वचनाच्च रात्रिमानव्यवस्थार्थं त्रिदण्डादयोऽनेकेऽरुणोदयाः । तदाह हेमाद्रिः— सार्धघटिकाद्वयोक्तिरष्टाविंशतिघटीमितरात्रिविषया । महत्तरास्तु रात्रीरपेक्ष्य चतस्रो घटिका इत्युक्तामिति'

पुत्रराज्यप्रसिद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ।
इति विहितं काम्योपवासं सन्दिग्धां लक्षयित्वा तत्र निषेधति—*उदयादिति ।
पुत्रपौत्रप्रसिद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥
इति काम्योपवासं संयुक्तां लक्षयित्वा तत्र निषेधति-*उदयादिति । एतच्च वाक्यद्वयं वैष्णवेतरविषयम् । वैष्णवान् प्रति तन्निषेधवैयर्थ्यात् । "नैवोपोष्यं वैष्णवेन" इति सामान्यत एव नित्यसाधारण्येन निषेधसत्त्वात् । इदं च द्वादश्यां काम्योपवासविधानप्रकरणसंवत्सरव्यापिकाम्यप्रयोगविषयं, न तूपक्रमविषयम् । स्वस्य विचन्त्वरकाम्यव्रतवत् संपूर्णतायामेवौचित्यात् । प्रक्रान्तविषयत्वेनाप्येतादृशोपपत्तेः । रात्रेरष्टमभागत्वं वरमहर्षिविनिर्दिष्टमिति हेमाद्रिमतमाह—*हेमाद्राविति । एतन्मतं दूषयितुमुक्तोपपत्ति—

इत्याहुः। तन्न। अरुणोदयशब्दस्यानेकार्थत्वापत्तेः। ०न च मुहूर्तद्वयमर्थः। दण्डद्वयैकमुहूर्तादिवेधानां तथाऽप्यनुपपत्तेः। न हि तेषां यामार्धत्वमरुणोदयत्वं चास्ति। मुहूर्तद्वयस्य यामार्धत्वे च 'चतस्रो घटिकाः' इत्यनेनोपसंहाराच्च न तदर्थः०। न च 'सार्धं तु घटिकाद्वयम्' इत्यनेनापि तदापत्तिः० शङ्क्या। तेन चतुर्दण्डवेधस्यैवोक्तेः। चतुर्दण्डेऽर्धयामाद्दशमीमध्ये हि वेधस्तदर्थः। द्विघटिकादौ ०तदयोगात्। यत्तु मतम्-किंचिदरुणोदयवेध इत्यपेक्षायां सार्धघटिकाद्वयनियमादरुणोदयेऽर्धघटिकान्यूनत्वादर्धाभावे न दोषः' इति। तदुच्छम्। ०त्रिदण्डादावपि तदापत्तेः०।

०उदयाद्दोषसंयुक्ता यदि स्यादरुणोदयः।
वैष्णवोपोष्यं वैष्णवेन नाह्नि नैकादशीव्रतम्॥

इति नारदे कथितत्वे च गौणमात्रनिषेधात्। नारदीयेऽपि-

लवार्धेऽपि विप्रेन्द्र दशम्येकादशीं त्यजेत्।
सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम्॥

स्कान्देऽपि-

कलाकाष्ठादिमात्रेण दृश्यते दशमी विभो।

०अर्थैकैः इति। अत्र केचित् मर्यादाविधिवेधपाठ [illegible] गिरि वाचः। ०तदर्थो-मुहूर्तद्वयार्थः। ०तदापत्तिः-मुहूर्तद्वयार्थत्वम्। [illegible] मुहूर्तद्वयं सार्धघटीद्वयं तत्र दशमी-वेधेऽप्येवं विरुद्धत्वात्। ०तदयोगात्-मुहूर्तद्वयाभावात्। इत्या-[illegible]। [illegible] अरुणोदयात्। [illegible]-०त्रिदण्डादावपीति ०तदापत्तेः-निर्दु-ष्टत्वार्थः। [illegible]

'वेधतारतम्यं च दोषतारतम्यादुपपद्यते'इति । दोषता-रतम्यं च प्रायश्चित्ततारतम्यादवगम्यते । तथोक्तं हेमाद्रौ स्मृत्यन्तरे-

अज्ञानाद्यदि वा मोहात्कुर्वीतैकादशीं नरः ।
दशम्येकादशीसंयुक्तां प्रायश्चित्तमिदं चरेत् ॥
कृच्छ्रार्धं चरत्वेनां च दद्याद्वसनादिकम् ।
सुवर्णमाषकं देयं तिलद्रोणसमन्वितम् ॥

विद्धामात्रे तथैव—

[illegible] कदाचि[illegible] [illegible] वेधः । अतएव [illegible] [illegible] । [illegible]

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

[illegible] । तत्र

[illegible] ।
[illegible] ॥
[illegible] ।

[illegible] ।

[illegible] ।
[illegible] ॥

[illegible]

ब्राह्मणान्भोजयेच्छक्त्या च दद्यात्स्वर्णस्य रक्तिकाम् ।
धरणस्यार्धकं देयं तिलद्रोणमथापि वा ॥ इति ।

करणे चतुर्गुणहोरात्रीर्णेन तु न हि निन्दान्वयेन व्रतं स्तोतुमेव । तत्र व्रतवैगुण्यं तद्रूपाजिरपकाल्पान्यनरकफलस्य पापक्षेमसंसर्ग-विष्णुप्रीत्यादेरसिद्धिः ।

प्रायश्चित्तं तु कर्तव्यं शुद्ध्यर्थं तु धनस्य वै ।
निश्छिद्रं जायते येन धर्मः संतानमेव च ॥

इत्यर्थवादेन स्पष्टं तथा प्रतीतेः । प्रायश्चित्तमपि श्रुतिक्रमप्रमाण-निमित्तमूलनिषेधोपस्थापितप्रत्यवायानां संसमाधानार्थम् । तदाचरणे फलश्रुतिवाक्ये फलश्रुतिस्त्वात् प्रधानस्य फलपर्यन्त । एवं च वैगुण्यरूप कर्मदोष एव वेधातिवेधाख्यः तत्तारतम्याच्च तदतिक्रमनिमित्तक-स्य तारतम्यमिति । धरणं—सुवर्णं हेमचत्वारिंशन्माषाः ।

तुल्या यवाभ्यां कथिताऽत्र गुञ्जा
वल्लस्त्रिगुञ्जो धरणं च तेऽष्टौ ।
गद्याणकस्तद्द्वयमिन्द्रतुल्यै—
र्वल्लैस्तथैको घटकः प्रदिष्टः ॥

इति ज्योतिषं तु नेह प्रवर्तते प्रायश्चित्तसंप्रदायभङ्गापत्तेः । कृच्छ्रपादसवत्सगोदानोभयं, केवलमेकाग्निब्राह्मणभोजनेन, वैक-ल्पिकतिलद्रोणसुवर्णाद्यन्यतरं वा समुच्चितद्वयेन पादाधिकेन युक्त-मिति चत्वारः पक्षा वेधातिवेधमहावेधयोगेषु क्रमेण योज्याः । ननु

पातुधानमतं योगे महावेधे तु बाष्कलो ।
जम्भासुरस्यातिवेधे मोहिनी वेधलेशिनी ॥

इति जम्भासुरवेधत्वेनोक्तेऽतिवेध एवैतत्प्रायश्चित्तं स्यात् ।

दशम्याः प्रान्तमादाय यदोदेति दिवाकरः ।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तु ॥

*अत्र वेधतारतम्याद्व्यवस्थेति हेमाद्रिः । *'निश
प्रान्ते' इत्यपि दोषाधिक्यार्थमेव । *तस्माच्चतुर्दशिका
त्मक एवारुणोदय इति सिद्धम् । तेन पञ्चपञ्चाशद्घट
नन्तरं दशमीप्रवेशोऽरुणोदयवेध उक्तो भवति । अ
न्त्योऽपि तत्रैव कण्वेनोक्तः—

उदयोपरिविद्धा तु दशम्यैकादशी यदि ।
दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः ॥ इति

स्मृत्यन्तरेऽपि—

*दशम्याः प्रान्तमादाय यदोदेति दिवाकरः ।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तत् ॥ इति
तत्रारुणोदयवेधो वैष्णवविषयः । तद्वाक्येषु वैष्ण
वग्रहणात् । तत्स्वरूपं तु माधवीये स्कान्दे—

परमापदमापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षाऽस्ति वैष्णवी ।
विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते ॥ इति

*यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्य वैष्णवत्व

इत्यग्रिमवचनादित्यत आह—*अत्रेति उच्चावचानां पक्षाणां व्य
वस्थयैव निवेशाद्वाक्यशेषस्य निन्दामात्रमिति भावः । ननु दोषता
रतम्येन वेधतारतम्यमयुक्तम्, अरुणोदयवेधे दोषतारतम्याभावा
दित्यत आह—*निश इति । *तस्मादिति । एतच्च सर्वं जल्प
कथायां ग्रन्थकृताऽभिहितम् । वस्तुतस्तु महत्तरद्ध्वतररात्रिचरणो
दयसाम्यस्यायुक्तत्वान्मुहूर्तद्वयमरुणोदय इति सिद्धान्तः । घटिका
दिपदानि च मुहूर्तार्द्धपराणि । वेधतारतम्यं च मुहूर्तमुपजीव्यैवेति
शिष्टानां हेमाद्रिमतमेव सम्यगिति । *दशम्या इति । जम्भपदं ते
त्यधानकयातुधानपरम् । उदेतीति दर्शनात्तद्वाक्येषु दशमीशेषेत्यादि
वाक्येषु विष्णुपत्न्यदीक्षितानां वैष्णवत्वमाशङ्क्य शङ्कते:*यद्यपीति

न तु पुत्रादेः, तथापि स्वपारम्पर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यन्ते वृद्धाः । तत्त्वसागरे भविष्ये—

यथा शुक्ला तथा कृष्णा, यथा कृष्णा तथेतरा ।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥

केचित्तु दशम्यां नवमीवेधमपि त्यजन्ति । तत्र मूलं मृग्यम् । उदयवेधस्तु *परिशेषात् स्मार्तगोचरः । तदाह माधवः—

अरुणोदयवेधोऽत्र वेधः सूर्योदये तथा ।
उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः क्रमात् ॥

हेमाद्रिस्तु केषांचिदर्धरात्रेऽपि दशमीवेधमाह—

अर्धरात्रे तु केषांचिद्दशम्या वेध इष्यते ।
कपालवेध इत्याहुराचार्या ये *हरिप्रियाः ॥
न *तन्मम मतं यस्मात्त्रियामा *रात्रिरिष्यते ॥

इति ब्रह्मवैवर्तात् ।

---

*परिशेषादिति ।

अतिवेधादयः सर्वे ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये स्मृतः ॥

इत्युक्तेर्वैष्णवान् प्रति अतिवेधादीनां वेधत्वनिराकरणपरत्वादित्यर्थः ।
*हरिप्रिया इति ।
अयमर्थः—अतीतरात्रेः पश्चार्द्धेनागामिरात्रेः पूर्वार्द्धेन सह दिवसोऽद्यतनः, स एकादश्यामुपोष्यः । तत्र दशमीयुक्ते विद्धा सा त्याज्येति । एतन्निराकरोति—*न तन्मम मतमिति । *त्रियामेति । प्रथमप्रहरार्द्धस्य चतुर्थप्रहरार्द्धस्य च दिनकर्मसंबन्धितया तदन्या सार्धत्रियामा रात्रिः रात्रिकर्मणि ग्राह्येत्यर्थः । एवं चोत्तरार्धे दिनकर्मणि अरुणोदयमारभ्य ग्राह्या । तत्र

अस्यार्थः-'अनद्यतने लङ्'(पा०सू०३-२-१११)इत्यत्र 'अतीतायां रात्रेः पश्चिमयामद्वयमागामिन्या रात्रेः पूर्वं याम‌द्वयं दिवसश्च सकल एषोऽद्यतनः कालः'इत्युक्तं महाभाष्ये। स एव वर्तमानः काल एकादश्यहोरात्र उपोष्यः। तन्मध्ये दशमीप्रवेशो विद्धा। सा त्याज्या। अत एव हेमाद्रौ-

दशम्याः सङ्गदोषेण अर्धरात्रात्परेण तु।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा॥

इति दोष उक्तः। चतुरो यामान् दिवसस्येत्यर्थः। स्वमते तु रात्रेस्त्रियामत्वात् प्रहरत्रयं पूर्वशेषः। तेन चतुर्थप्रहर एव वेधो युक्तः। सोऽप्यरुणोदय एव।

सूर्योदयं विना नैव स्नानदानादिकः क्रमः।

इति मार्कण्डेयपुराणात्। 'प्रत्यूषोऽहर्मुखं कल्यम्' इति कोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेस्तत्रैव निषेधः। तेन मतभेदाद्व्यवस्थेति केचित्। कैमुतिकन्यायेनारुणोदयवेधस्यैवेयं स्तुतिरिति तु माधवः। य-

---

विद्धा हेया। यस्तु कपालवेधो नामार्द्धरात्रवेधः, स परेऽहनि उपवासे न त्याज्यः, किं तु दिवा संकल्पे एव।

दशम्याः सङ्गदोषेण अर्द्धरात्रात्परेण तु।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा॥

इति हेमाद्रौ वचनादिति। ये तु-रात्रेस्त्रियामत्वात्प्रहरत्रयं पूर्वशेषः। तेन चतुर्थप्रहर एव वेधो युक्त इति वदन्ति, तदाशयं त एव जानन्ति। अन्ये तु-

सूर्योदयं विना नैव स्नानदानादिकः क्रमः।

इति वचनात् 'प्रत्यूषोऽहर्मुखं कल्यम्'इति कोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेः तत्रैव निषेध इति। न तन्मम मतमित्यस्यार्थमाहुः।

स्तु 'दिवसक्षयदशाभिन्नया' इति वेधः, स उपवासातिरिक्तविषयः इति माधवः ।

सर्वप्रकारवेधोऽयमुपवासस्य दूषकः ।
सार्धसप्तमुहूर्तैस्तु योगोऽयं बाधते व्रतम् ॥

इति निगमादिस्थलम् । तत्र माधवमते *वैष्णवैररुणोदयविद्धा त्याज्या । यदा त्वेकादश्येव शुद्धा सती वर्धते, द्वादशी वा, उभयं वा, तदा परोपोष्या ।

*एकादशी द्वादशी वाऽधिका चेत्पञ्चमी दिनम् ।
पूर्वं, त्याज्यं तूत्तरं स्यादिति वैष्णवनिर्णयः ॥

इति माधवोक्तेः । स्मार्तैस्तु सूर्योदयविद्धा त्याज्या । यदा त्वेकादशी शुद्धा सती वर्धते, द्वादशी च समा

---

*वैष्णवैरिति ।

दशमीवेधसंयुक्तो यदि स्यादरुणोदयः
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम् ।

इति वचनात् । इदमुपलक्षणं वैष्णवेतरैरपि काम्यव्रते अरुणोदयविद्धायास्त्याज्यत्वात् । माधवमते इत्यभिधानं च केषांचिन्मते वैष्णवमधिकृत्योपवासो न लिखितस्तद्व्यावर्तनाय । *एकादशीति । नारदः—

संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ॥

संपूर्णा च—"उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता । संपूर्णैकादशी नाम" इत्युक्ता । भागवततन्त्रे—

संपूर्णैकादशी स्यात्तथा परतो द्वादशी यदि ।
उपोष्या द्वादशी तदा त्रयोदश्यां च पारणम् ॥

यत्तु—व्यासः ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।

अत्रायमर्थः—'अरुणोदये त्वङ्'(मा०पु०३-७-११२)इत्यत्र 'अभिनिशा रात्रेः पश्चिमयामस्थप्रथमघटिका [illegible] रात्रेः पूर्वं यामद्वयं दिवसश्च सकलः [illegible] कालोऽनुषङ्गे महाभारते । स एव [illegible] कालः [illegible] उपोष्यः । तत्पक्षे दशम्यन्तवेधो निषिद्धः । [illegible] । अत एव हेमाद्रौ—

दशम्याः सङ्गदोषेण अर्धरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा ॥

इति दोष उक्तः । चतुरो यामान् दिवसस्यैव(?) । दिवसमाने तु रात्रेस्त्रियामत्वात् प्रहरत्रय पूर्वशेषः । तेन चतुर्थप्रहर एव वेधो युक्तः । सोऽप्यरुणोदय एव ।

सूर्योदयं विना नैव स्नानदानादिकः क्रमः ।

इति मार्कण्डेयपुराणात् । 'प्रत्यूषोऽहर्मुखं कल्यम्' इति कोशादरुणोदयमारभ्य सूर्यांशुप्रसृतेरर्वागेव निषेधः । तेन मतभेदाद्व्यवस्थेति केचित् । केचित्तु कन्यायेनारुणोदयवेधस्यैवेदं स्तुतिरिति तु माधवः । प-

---

विद्धा हेया । यत्तु कपालवेधो नामार्द्धरात्रवेधः, स परेऽहनि उपवासे न त्याज्यः, किं तु दिवा संकल्पे एव ।
दशम्याः सङ्गदोषेण अर्द्धरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा ॥
इति हेमाद्रौ वचनादिति । ये तु—रात्रेस्त्रियामत्वात्प्रहरत्रयं पूर्वशेषं । तेन चतुर्थप्रहर एव वेधो युक्त इति वदन्ति, तदाशयं त एव जानन्ति । अन्ये तु—
सूर्योदयं विना नैव स्नानदानादिकः क्रमः ।
इति वचनात् 'प्रत्यूषोऽहर्मुखं कल्यम्' इति कोशादरुणोदयमारभ्य सूर्यांशुप्रसृतेः तत्रैव निषेध इति । न तन्मम मतमित्यस्यार्थमाहुः ।

स्तु 'दिग्धपदवाभिरतया' इति केचन, स उपवासातिरिक्तविषय इति माधवः।

सर्वप्रकारवेधोऽयमुपवासस्य दूषकः।
सार्धसप्तमुहूर्तैस्तु योगोऽयं बाधते व्रतम्॥

इति निगमादिस्थलम्। तत्र माधवमते *वैष्णवैररुणोदयविद्धा त्याज्या। यदा त्वेकादश्येव शुद्धा सती वर्धते, द्वादशी वा, उभयं वा, तदा परोपोष्या।

*एकादशी द्वादशी चाऽधिका चेत्स्यात्परं दिनम्।
पूर्वं, परं तु स्मार्ते स्यादिति वैष्णवनिर्णयः॥

इति माधवोक्तेः। स्मार्तैस्तु सूर्योदयविद्धा त्याज्या। यदा त्वेकादशी शुद्धा सती वर्धते, द्वादशी च समा

---

*वैष्णवैरिति।
दशमीशेषसंयुक्तो यदि स्यादरुणोदयः।
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम्।

इति वचनात्। इदमुपलक्षणं वैष्णवैरपि कापालमते अरुणोदयविद्धायास्त्याज्यत्वात्। माधवमते स्मार्तविचारे च वेधाविद्धत्वे वैष्णवमविद्धयोरुपवासो न किंचित्तत्रावर्णनात्।

*एकादशीति। नारदः—
संपूर्णैकादशी यत्र द्वादशी वृद्धिगामिनी।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम्॥

संपूर्णा च—"उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता। संपूर्णैकादशी नाम" इत्युक्ता। भागवततन्त्रे—
संपूर्णैकादशी त्याज्या परतो द्वादशी यदि।
उपोष्या द्वादशी यत्र त्रयोदश्यां च पारणम्॥

यत्तु—व्यासः।
एकादशी यदा शुद्धा परतो द्वादशी भवेत्।

न्यूना वा, तदा गृहस्थैः पूर्वा, यतिभिरुत्तरा कार्या ।

प्रथमेऽहनि संपूर्णा व्याप्याहोरात्रसंयुता ।
द्वादश्यां च तथा तात दृश्यते पुनरेव च ॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ॥

इति स्कान्दोक्तेः । वर्धमानोऽप्येवमाह । उभयवृद्धौ तु शुद्धा विद्धा वा सर्वेषां परैव ।

उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिम् ॥

इति, तत्तु न शुद्धाधिकद्वादश्यां प्रवर्तते । लोपो हि सूर्योदयास्पर्शित्वं तस्याश्चाहन्येव सत्त्वेन विद्धाया एव लाभात् । न च लोपो द्वितीयसूर्योदयास्पर्शित्वम् । "लुप्तायां दशमीमिश्रितत्वात्" इति विद्धाव्रतस्य...विरोधादिति । हेमाद्रौ—

संपूर्णैकादशी यत्र द्वादशी च परेऽहनि ।
त्रयोदश्यां द्वादशी स्याद्द्वादश्यामेव पारणम् ॥ इति ॥

गृहस्थैरिति । यत्तु—

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तु परां वसेत् ॥

इति । तत्र कामी=गृहस्थः, निष्कामो=यतिविधवादि, तत्र ।

निष्कामस्तु परां कुर्यात्पूर्णैकादशी यदा ।
मासर्क्षेत्तु वा या वा द्वादशी न द्विजोत्तम ॥

इति ... निष्कामगृहिणोऽपि परेति गृहिणामपि पूर्वोत्तरायामाह । एतद्वाक्यविरोध ... कामिनः पूर्वां निष्कामस्योत्तरेति सामान्यं वक्ष्यति । अत एव—

पुनः प्रभातसमये घटिकैका यदा भवेत् ।
अत्रोपवासो विहितो वनस्थस्य यतेस्तथा ॥
विधवायाश्च तत्रैव परतो द्वादशी न चेत् ॥

इत्यादौ वनस्थादिग्रहणात् निष्कामोपलक्षणपरत्वाच्च ... भेदः । अत्र 'दशम्यन्त' इति

*संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि ॥

इति नारदोक्तेः । द्वादशीमात्रवृद्धौ तु शुक्लायां *पूर्वैव ।

स पूर्वैकादशी विष्णोः द्वादशी परतः स्थिता ।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदम् ॥

इति नारदोक्तेः ।

द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते ।
शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईरितः ॥

इति माधवोक्तेश्च । मदनरत्नेऽप्येवम् । यत्तु—

विद्धाऽप्यविद्धा विज्ञेया परतो द्वादशी न चेत् ।
अविद्धाऽपि च विद्धा स्यात्परतो द्वादशी यदि ॥

परिभाषिता न ग्राह्या । नाडीषष्ट्यात्मकतिथिवृद्ध्या विना परेद्युः षष्टिकालत्वासम्भवात् तावत्तिथिवृद्धौ व्याकरणदशसत्त्व इत्येतैः धारावितद्धत्वादिन्युदयद्वयमात्रव्याप्तिरेव वाच्या । प्रभातपदं तु द्वितीयदिनभागःपरमिति । 'प्रथमेऽहनि संपूर्णा' इत्युक्ते 'संपूर्णैकादशी' इत्यत्रापि च 'उदयात्प्राक्' इति परिभाषितैव । तात्पर्यसत्त्वात् । एवं वचनद्वयद्वयं स्मार्तपरमेव, न वैष्णवपरं तेषां विद्धत्वमात्रेण परत्वादिति । *संपूर्णेति । स्मार्तपरतावीजमुक्तम् । विद्धानिषेधात्परेति स्वरस्यम् । *पूर्वैवेति ।

संपूर्णैकादशी शुद्धा द्वादश्यां नैव किंचन ।
द्वादशी च त्रयोदश्यामपि तत्र कथं भवेत् ॥
पूर्वा गृहस्थैः कार्या स्यादुत्तरा यतिभिस्तथा ।

इति निर्मूलम् । 'विद्धाऽपि' इति स्मार्तपरम् । वैष्णवानां विद्धानिषेधात् । 'अविद्धाऽपि च' इति स्मार्तपरं, न वैष्णवपरं; तेषां द्वादश्यामेवोपवासविधानात् । किं तु स्मार्तपरं परं तु तेषामविद्धै-

इति हेमाद्रौ पाद्मवचनं, तदेकादश्याः शुद्धौ ज्ञेयम् ।
तदुक्तं माधवेन–

एकादशी द्वादशी चेत्युभयं वर्धते यदा ।
तदा पूर्वं दिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनम् ॥ इति ।
विद्धैकादश्यां द्वादश्यामशुद्धौ च सर्वेषां तत्रैव ।
अथ चैकादश्यामशुद्धौ गृहिणः पूर्वा, यतेरुत्तरा ।
[illegible] ।

एकादशी विशुद्धा [illegible] कृष्णे विशेषतः ।
उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही ॥

इति [illegible] माधवः ।

[illegible] ॥ इति ।
[illegible] इति ।

[illegible] ।
[illegible] ॥
[illegible]

[illegible]—

[illegible] ।
[illegible] दिनम् ।
[illegible]

इति [illegible]
[illegible]
[illegible]
[illegible] ।

[illegible] ।
[illegible] ॥

इति वचने सम्पूर्णोदयात्। विद्धा तु सर्वेषां यथैव।

द्वादशीमिश्रिता कार्या सर्वत्रैकादशी तिथिः॥
द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा।

इति पाद्मोक्तेः। ऊर्ध्वगामिन्या ... एकादश्या द्वादशीमि-श्रितया। यत्तु दशम्युदयेऽपि ... एकादश्यां न दोष इति। शिवम्। तथा स्मृतिः—

सम्पूर्णैकादशी यत्र द्वादश्यां द्विगुणापि वा।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम्॥

इत्यादिवचनबाधापत्त्यापि शुद्धाधिकारपरत्वात्। यदि च तस्य शुद्धाधिकारार्थं वैष्णवपरत्वं, विद्धाधिकारार्थं स्मार्तानां ... स्मार्तानां वैष्णवानामपि स्वीकृतमेवेति वैष्णवपरत्वं स्मार्ते ... विद्धाधिकारपरत्वेन ... अत्रैवमत्र शु-द्धिः कथं स्यात्?।

दिनक्षयेऽपि देवेशि नोपोष्या दशमीयुता।
सिनीवाल्या सदा पुण्या परमैकादशी॥

इत्यादिदिनक्षयातिरिक्तदशमीविद्धोपवासनिषेधात्। दिनक्षयं हि दशम्येकादश्योर्द्वादशीरूपं, न तु एकादशीद्वादशीत्रयो-दशीरूपम्।

यदि दैवात् संभिद्येदेकादशी तिथिक्षयम्।
तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे भवेत्॥

इत्येकवाक्यत्वात्। इदं च सर्वेषां तपस्विनां "या वैष्णवी" इत्यादौ सदाचिन्तया इव दिनक्षययुक्तदशमीविद्धाया एव प्राप्तौ, न दशमीप्राप्त्येकादश्याम् एव विधिः "एवं कर्तव्यम्" इतिवत्। 'नोपोष्या दशमीयुता' इति तु "न निशायाम्" इतिवदनुवादः। न च नोपोष्येति विधिरेव, सेवेति त्वनुवादः। एवकारस्य विधिशक्ति-कल्पकत्वादिति वाच्यम्। द्वादश्यक्षयार्थस्य परार्धेऽपि ...

त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन ।
उपोष्यैकादशी तत्र दशमीमिश्रिताऽपि च ॥

इति स्कान्दात् ।

अविद्धानि निषिद्धैश्च न लभ्यन्ते दिनानि तु ।
मुहूर्तैः पञ्चभिर्विद्धा ग्राह्यैवैकादशी तिथिः ॥

इत्यृष्यशृङ्गोक्तेश्च । मुहूर्तपञ्चकमरुणोदयमारभ्य ज्ञेयम् । अन्यथोत्तरेऽह्नि एकादश्यभावासम्भवात् । तथा च स एव ।

सर्वथैकादशी कार्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यस्मान्नित्यमुपोषणम् ॥ इति ।

यदपि हेमाद्रिणा–'शुद्धसमा शुद्धन्यूना वा अधिकद्वादशिका चेत्सर्वेषां परैव' इत्युक्तं, तदपि वैष्णवविषयम् । स्मार्तानां तु पूर्वैवेत्यविरोधः ॥

ितान्वयापत्तेः । नैवम् । कालादर्शादौ—

सर्वथैकादशी कार्या दशमीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम् ॥

इत्यृष्यशृङ्गवचने विद्धापि एकादशिकार्या विद्धोपवासनिषेधफलेनार्थवत्त्वात् । अन्यथा प्रातर्भवत्वित्यस्यानुपपत्तेः । न च त्रयोदश्यां द्वादशी प्रातर्भवत्विति तदर्थः । दशमीमिश्रितेत्युक्तेस्तदपवादित्वोपस्थानकल्पनात् । अत्र संकल्पकाले एकादश्यसत्त्वेऽपि संकल्पं वक्ष्यति । तथा च "दिनक्षयेऽपि देवि" "सर्वथैकादशी कार्या" इत्यादयोऽविरोधवशाय गृहिणां पूर्वा परेऽहनीति व्यवस्थया दशिकार्या । त्रयोदश्यामपि प्रातःपूर्वं विद्धत्यागः तस्या यतीनां परा भविष्योत्तरादिवाक्याद्वाराम्भार्थम् । अविरोध इति कौस्तुभनिर्णयात्

०हेमाद्रिमते तूच्यते । तत्र—

०शुद्धा विद्धा द्विधा नन्दा, प्रत्येकं न्यूनसमाधिकैः ।
षट्प्रकारा पुनस्त्वेषा द्वादशीन्यूनसमाधिकैः ॥

इत्यष्टादशैकादशीभेदाः। तत्र ०शुद्धाऽधिका न्यूनद्वादशिका, शुद्धाऽधिका समद्वादशिका च स्मार्तैः पूर्वा, निष्कामैरुत्तरा कार्या। ०'प्रथमेऽहनि सम्पूर्णा' इति पूर्वोक्त-

---

स्मार्तान् प्रति हेमाद्रिमतमाह —

०हेमाद्रीति । हेमाद्रिमाधवयोः स्मार्तान् प्रति न शास्त्रभेद इति ध्येयम् । ०शुद्धेति । शुद्धन्यूना न्यूनद्वादशिका १, शुद्धन्यूना समद्वादशिका २, शुद्धन्यूनाऽधिकद्वादशिका ३, शुद्धसमा न्यूनद्वादशिका ४, शुद्धसमा समद्वादशिका ५, शुद्धसमाऽधिकद्वादशिका ६, शुद्धाऽधिका न्यूनद्वादशिका ७, शुद्धाऽधिका समद्वादशिका ८, शुद्धाऽधिकाऽधिकद्वादशिका ९, एवं विद्धाऽपीत्यष्टादशभेदा इत्यर्थः । परदिनसूर्योदयात्प्राक् समाप्तिर्न्यूनत्वं, सूर्योदयात्किञ्चिदूनत्वं समत्वं, सूर्योदयोत्तरसत्त्वमाधिक्यम् । तत्र—

आद्याश्च षट् पूर्वैव व्यवस्थाऽनन्तरद्वये ।
गृहस्थविधवानां स्यादन्यथा स्यात्परेऽहनि ॥
शुद्धाधिका न्यूनसमोत्तरा चेत् पूर्वा गृहस्थैर्यतिभिः परैव ।
सा चेत्पराधिक्यवती परैव, शेषास्तु शुद्धाः प्रथमा उपोष्याः ॥
विद्धाद्वये तु पूर्वा स्यादवस्थाऽनन्तरद्वये ।
अपरेऽहनि शेषाः स्युः सप्तमी तु व्यवस्थया ॥
विद्धासमा न्यूनसमोत्तरा चेद्विद्धाधिका न्यूनपरा च तत्र ।
सैव व्यवस्था, यदि विद्धहीना आद्योत्तराप्ते प्रथमैव सर्वैः ॥
विद्धासमा यद्यधिकोत्तरा स्याद्विद्धाधिका विद्धसमोत्तरा स्यात् ।
तदा परैव मतिमुक्तशुद्धैरेकादशी सर्वजनैरुपोष्या ॥

इति कारिकाऽनुसारेणाह—०शुद्धेत्यादि । ०प्रथमे इति ।

स्कान्दात् ।

उत्तराद्विकायां तु निम्बुमीसितामेवनामयदी० कार्येम ।

नवमेऽहनि सम्पूर्णा वर्धमाना वाद्यता ।
द्वादश्यां च तथा नास्ति त्रयोदश्यां तु सा भवेत् ॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ।

इति स्कान्दादिस्थवैः । अत्र गृहस्थानामपि सदाप्युत्तरावासः ।

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तु परां वसेत् ॥

इति मार्कण्डेयवचनेन कामाकामव्यवस्थानात् । न च गृहस्थनिष्कामपरत्वं देव एकादशीपरत्वमस्तु, सामान्यतो गृहिणां सकाममात्रानां निष्कामत्वादिति वाच्यम् ।

निष्कामस्तु गृही कुर्यादुपरैकादशीं सदा ।
मातर्मयतु या सा या द्वादशी न द्विजात्मजा ॥

इति स्कान्दे गृहस्थस्यापि निष्कामस्योत्तरोपवासाभिधानात् । इद च हेमाद्रेरौलिमात्रमिति । शुद्धाऽनधिकाऽनधिकद्वादशिका, शुद्धानधिकाऽधिकद्वादशिका २, शुद्धाऽधिकानधिकद्वादशिका ३, शुद्धाधिकानधिकद्वादशिका ४ इति चत्वार एव भेदाः । तत्रायं चतुर्थो भेदः । द्वितीयचतुर्थौदयसमापा एव तिथेर्ग्रहणेति प्रसिद्धेर्द्विस्त्रिषष्ठ्यन्तरेण समा तदधिकान्तरेण न्यूना चेत्तुभयथा एवानधिकत्वेन सङ्गतत् ।

*उपवासद्वयमिति । न चैकाधिकारिकमुपवासद्वयं कथं विधीयते ?, एकनिमित्तकत्वास्थैर्ययुक्तत्वात् किन्त्वयं गृहियतिभेदेन विहितस्यानुवादोऽस्तु, तथा सति अधिकार्यन्तरस्यापि न कल्प्यमिति वाच्यम् । 'तिथी' इति द्वन्द्वसमासार्थकैकशेषेणेतरेतरयोगप्रतीतेस्तदनुरोधेनाधिकार्यन्तरादेरपि युक्तत्वात् । अत्र

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
लुप्यते द्वादशी, तस्मिन्नुपवासः कथं भवेत् ॥
उपोष्ये द्वे *तिथी तत्र विष्णुप्रीणनतत्परैः ॥

इति पूर्ववचनविरोधोक्तेः ।

शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्धसमा चाऽधिकद्वादशिका चेत्सर्वैवा परैवेति हेमाद्रिः । *तदनन्तरं तु *शुद्धाधिका परा । *'संपूर्णैकादशी यत्र' इति पूर्वोक्तेः । *अन्यथा पूर्वा ।

लुप्यते इत्यस्योत्तरार्धः ।

सम्पूर्णैकादशी यत्र परतः पुनरेव सा ।
त्रयोदशी उषःकाले त्रयोदश्यां तत्र का भवेत् ॥
उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः ।

इति स्कान्दे 'त्रयोदशी उषःकाले' इत्युक्तेस्तदेकवाक्यत्वादित्याशयेनोनद्वादशिकापरत्वमयुक्तम् । वस्तुतः समद्वादशिकायामपि विष्णुप्रीतिकामस्योपवासद्वयं युक्तम् । कोऽपि द्वितीयपूर्वोदयास्तित्वपप्रीति तत्त्वा अपि संग्राह्य । 'त्रयोदशी उषःकाले' इति स्वतन्त्रमिति नवीनाः ।

शुद्धन्यूनेत्यादिविषयेऽधिकद्वादशिकाऽन्वयः । एतच्च वैष्णवभिन्नविषयम् । स्मार्तान् प्रति त्वाह—*तदनन्तरेति । *शुद्धाधिकेति । अधिकद्वादशिकेति शेषः । अयं च शुद्धाधिकाऽधिकद्वादशिकारूपस्तृतीयो भेदः । *संपूर्णेति ।

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि ॥

इत्यर्थः ।

पूर्णाऽप्येकादशी त्याज्या वर्द्धते द्वितयं यदि ॥

इत्यपि द्रष्टव्यम् । *अन्यथेति । शुद्धन्यूना शुद्धसमा चाऽधिकद्वा-

*शुद्धा यदा समा हीना समा हीनाऽधिकोत्त
एकादशीमुपवसेन्न शुद्धां वैष्णवीमपि ॥
इति स्कान्दात्। शुद्धा=एकादशी। उत्तरा=द्वादश
'न चेदेकादशी विष्णौ' इति नारदोक्तेश्च। यत्तु-'अविद्ध
ऽपि च विद्धा स्यात्' इति पाद्मं तच्छुद्धाधिकापरम्। यत्तु
संपूर्णैकादशी त्याज्या परतो द्वादशी यदि।
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् ॥
इत्यादि, *तद्वैष्णवपरम्। स्मार्तानां तु* पूर्वेत्युक्तम्।

दशिकेत्यर्थः। अयं च शुद्धानधिकाधिकद्वादशिकेति द्वितीयो भेदः।
*शुद्धेति। एकादशी यदि शुद्धा सती समा द्वितीयसूर्योदयपर्यन्ता
ततो न्यूना वा, द्वादशी ततो न्यूना समाऽधिका वा तदा शुद्धामेवो-
पवसेत् न वैष्णवीं=द्वादशीमित्यर्थः। एतेन शुद्धानधिकानधिकद्वाद-
शिकेति प्रथमभेदोऽपि संगृहीतः। तत्राविवादात्स ग्रन्थे नोद्दङ्कितः।
*वैष्णवेति। वैष्णवग्रन्थान्तर्गतत्वात्। *पूर्वैवेति। यत्तु—
उदयात्प्राग्यदा विप्रा मुहूर्तद्वयसंयुता।
संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही॥
इति वचनाद् गृहिणां पूर्वा।
संपूर्णैकादशी यत्र द्वादशी चापरेऽहनि।
तत्रोपोष्या द्वादशी स्याद् द्वादश्यामेव पारणम् ॥
न गर्भे विद्यते जन्तुरित्याह भगवान् हरिः।
इति वाक्ययतीनां परेति; तन्न। प्रथमवाक्यस्य उक्तरीत्या
सकामोऽवैष्णवः। तस्यारुणोदयविद्धायां काम्योपवासनिवर्त-
त्। तत्रैवेत्येवकारबलात्तद्भिन्ने उपवासो नेत्यर्थात्, द्वितीय-
स्य च गृहिणामेवोभयाधिक्यविषयत्वात्। तत्र परायां एव
र्भे विद्यते जन्तुः" इत्यर्थवादप्रतिपादितगर्भवासदुःखविशेष-
कत्वात्।

विद्धापि एकादशी चतुर्धोक्ता । तद्यथा विद्धाऽनधिकाऽनधिकद्वादशिका १, विद्धाऽनधिकाऽधिकद्वादशीका २, विद्धाधिकाऽधिकद्वादशिका ३, विद्धाधिकाऽनधिकद्वादशिका चेति चत्वारो भेदाः । तत्र विद्धन्यूना विद्धसमा वाऽधिकद्वादशिका चेत्सर्वेषां परा ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिम् ॥

इत्युक्तेः । लुप्ता दिनद्वये सूर्योदयास्पर्शेन क्षयं गता । न चेदं मुमुक्षुपरं परमां गतिं=मुक्तिमपेक्षयार्थात्, अन्येषां तु पूर्वा "अविद्धानि निषिद्धैश्च"इत्युक्तेरिति वाच्यम् ।

एकादशी यदा विद्धा द्वादश्यां न भवीयते ।
द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत् ॥
उपोष्या द्वादशी शुद्धा सर्वैरेव न संशयः ।

इति नारदीये सर्वेषामेवोक्तेः । "न चेदेकादशी विष्णौ"इति तु शुद्धापरम् । 'अविद्धानि'इत्यादीनि विद्धाप्रवाक्यानि परत्र एकादश्यभावे द्वादश्यवृद्धावेव प्रवर्तन्ते ।

एकादशी दिवा युक्ता परतोऽपि न वर्तते ।
गृहिभिर्यतिभिश्चैव सैवोपोष्या क्षये तिथिः ॥

इति वाक्यवत् "त्रयोदश्यां न लभ्येत"इत्यादिवाक्यादिति । तदुक्तं–'विद्धन्यूना विद्धसमाऽधिकद्वादशिका सर्वेषां परा'इति । अयं विद्धानधिकाधिकद्वादशिकारूपो द्वितीयो भेदः । पारणपर्याप्तद्वादश्यलाभे तामुल्लङ्घ्य पारणं भवतीत्युक्तम् । यस्तु विद्धानधिकानधिकद्वादशिकारूपः प्रथमभेदः, स चतुर्धा । एकादशीन्यूनत्वे—द्वादशीसाम्ये १, तन्न्यूनत्वे वा २ । एकादशीसाम्ये—द्वादशीसाम्ये ३, तन्न्यूनत्वेन वा ४ । तत्राद्ये आह—अविद्धेति । मुमुक्षूणामिति ।

*विद्धन्यूना समाधिका तु *मुमुक्षूणां *पुत्रवतां च परा। *अन्येषां *पूर्वा। पुत्रवतोऽपि पूर्वेति मदनरत्ने। विद्धन्यूना न्यूनसमाधिका च सैव *सर्वैः कार्येति हेमाद्रिः। मुमुक्षूणां पराऽन्येषां पूर्वेति मदनरत्ने। वि-

---

दिनक्षये तु शुद्धैव द्वादशी मोक्षकाङ्क्षिभिः।
उपोष्या, दशमीविद्धा नोपोष्यैकादशी सदा॥

इति सौभरवचनात्। अत्र दिनक्षयो न तिथित्रयस्पृक्त्वं, किंतु दिवा एकादश्याः सूर्योदयास्पर्शमात्रम्। *पुत्रवतामिति।

एकादशी यदा यत्र दिनक्षयतिथिर्भवेत्।
तत्रोपोष्या द्वादशी स्यात्त्रयोदश्यां तु पारणम्॥

इति पितामहोक्तेः।

दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत्।
दशमीशल्यसंयुक्तां न कुर्वीत कदाचन॥

इति कौर्मवचनात्। पक्षद्वयेऽप्यत्र पुत्रवत्त्वं न दोषो यदपि-

एकादशीषु शुक्लासु रविसंक्रमणे तथा।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही॥

इति वाक्येन

एकादशीदिनक्षये उपवासं करोति यः।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा॥

इत्यादिवाक्येन च पूर्वोक्तवाक्यानां [illegible] इति [illegible] "आर्ता धार्ता" (पा० ६-३-४०) इत्यादिवत्। *अन्येषामिति पुत्रवद्भिन्नगृहिणाम्। *पूर्वेति। पूर्वस्याः [illegible]। पुत्र- [illegible]। द्वितीये विद्धन्यूनेति पूर्वोक्तमु- [illegible]। *सर्वैरिति।

त्वम्। सप्तम्यादशिफोनद्वादशिका च मुमुक्षुभिः परा-ऽन्यैः पूर्वा कार्या ।

दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते ।
शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकाङ्क्षिभिः ॥

इति व्यासोक्तेः । मोक्षकाङ्क्षिग्रहणादन्येषां पूर्वैव ।

सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम् ॥

इति पाद्मोक्तेः । विद्धाधिका सम्पूर्णैकादशिका सर्वे-षां पूर्वैव ।

एकादशी दशाविद्धा परतोऽपि न वर्धते ।
यतिभिर्गृहिभिश्चैव सैवोपोष्या सदा तिथिः ॥

इति पाद्मात् । 'अथ परतोऽपि न वर्धते' इत्यनेनैकादश्याः साम्यमपि गृह्यते । तथोऽपि तस्याः साम्येऽपि यद्यपि तत्सम्भवति एका-दश्याः पूर्वोदयास्पर्शात् तथापि पृथक् सम्यक्सम्बन्धानर्थक्यापत्तेः सद्यः सम्पूर्णत्वफलो ग्रहः । न च व्यर्थत्वम् । साम्ये मुमुक्षूणामुत्तरत्रोपवा-सविधानात् । तथा च साम्ये यतिभिर्गृहिभिश्च सैवोपोष्या, साम्ये तु गृहिभिः सैवोपोष्येत्यन्वयः ।

लुप्यते=वृद्धिं न प्राप्नोति । "पूर्णा च द्वादशी परा"-इति पाठान्तरात् । परा=परदिनगतैव न तु पूर्वोदयारम्भविशि-ष्टा एकादश्याः सूर्योदयपर्यन्तत्वलाभः । अन्यथा परपदवै-यर्थ्यात् । पूर्वपाठे यद्यपि द्वादश्या अनाधिक्यं न लभ्यते तथापि

दिनक्षयेऽपि ते देवि नोपोष्या दशमीयुता ।
सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी ॥

इति स्कान्दे,

यदि दैवात्तु संतिष्ठेदेकादश्यां तिथिक्षयः ।
तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेत् ॥



पक्षगविष्णुप्रीतिकामैः परा कार्या । गृहस्थेन तु *नक्तं कार्यम् ।

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः ॥

इति कौर्मे दिनक्षये उपवासनिषेधात् ।

दशम्येकादशी मिश्रा द्वादशी च क्षयं गता ।
क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणः स्मृतम् ॥

इति वृद्धशातातपोक्तेश्च *गृहिणः पूर्वत्रोपवासः । *एकादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्या न्यूनसमत्वयोरेकादश्यामुपवासः । यानि तु—

दशम्यनुगता हन्ति द्वादशं द्वादशीफलम् ।
धर्मापत्यधनायूंषि त्रयोदश्यां तु पारणम् ॥

इति कौर्मादीनि दशमीवेधत्रयोदशीपारणयोर्निषेधकानि तानि विद्धविषयाणि । अत्र मूलवचनानि तद्व्यवस्था चाऽऽकरे ज्ञेया ।

यत्तु कालहेमाद्रौ—

बहुवाक्यविरोधेन सन्देहो जायते यदा ।
द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणम् ॥

इति मार्कण्डेयोक्तेः,

सन्दिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत् ।

तथा—

विवादेषु च सर्वेषु द्वादश्यां समुपोषणम् ।
पारणं च त्रयोदश्यामाज्ञेयं मामकी मुने ॥

विकल्पचतुर्थभेदोऽयम् । *नक्तं=नक्तभोजनम् । *गृहिणः पूर्वत्रोपवास इति । नक्तकाले किञ्चिद्भक्षणेनेति शेषः, "उपवासनिषेधे तु" इति वचनात् । *एकादश्या इति । शुद्धत्वेनासंदेहात् ।

इति पाद्मोक्तेश्च वेधसन्देहे ज्योतिर्विदां विप्रतिपत्तौ वा परा कार्येत्युक्तम्, तद् *वैष्णवविषयमित्यलं बहुना।

अथात्रोपयुक्तं किञ्चिदुच्यते । तत्र दशम्यामेकादशीयोगे *दशमीमध्य एव भोजनं कार्यम् । 'एकादश्यां न भुञ्जीत' इति तस्या एव निमित्तत्वात् ।

निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥

इति देवलोक्तेश्च । केचित्तु एकादशीव्रताङ्गत्वेन पूर्वेद्युः *एकभक्तविधानाद्विधिस्पृष्टे च निषेधानवकाशात् काम्यव्रताङ्गं भोजननिषेधः प्रवर्तते । तेनैकादशीमध्येऽपि पूर्वदिने भोजनमित्याहुः* ।

अत्राधिकारी माधवीये कात्यायनेनोक्तः—

---

*वैष्णवेति । संदेहे स्मार्तोपलक्षणम् ।

*दशमीमध्य एवेति । एकभक्तविधौ प्राप्तनक्तादिनिवृत्तिवद्भुक्तताया द्वितीयभोजननिवृत्तिरेव विधीयते न्यायात्, न तु तद्दिनीयं भोजनमपि गौरवात् । तेन शुद्धाधिकद्वादश्यामुपवासादर्वाग् भवति । *एकभक्तेति ।

दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः ।
एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥
देवतास्मरणं तुल्यमिति कात्यायनः पारणं विधत्ते ।

इत्युक्तेः । काम्यत्वं चोक्तः काम्य इव नित्येऽप्येकभक्तं कार्यम् । "शक्तिमांस्तु पुनः कुर्यात्" इत्युक्तेः । *आहुरित्यरुचिः । तद्बीजं तु एकभक्ते विशेष्यं भोजनं नार्थः ।

माषमाषमसूराश्च मार्गनाशश्च मत्स्यके ।
शरपातफलं मेयं सुराद्वसतृतम् ॥

इति मद्यादिनिषेधविधानात् । त्रिवर्षस्य शौनः पालनस्यार्थेति । निराहारकरणे मिथ्यात्वश्रुत्वा मानवीयाद्विकारदर्शितेत्यभ्याय-

*अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ इति ।

भविष्ये—

ब्रह्मचारी च *नारी च शुक्लामेव सदा गृही । इति ।

यत्तु विष्णुः—

पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुष्यं हरते भर्तुर्नरकं चैव गच्छति ॥

इति, तद्भर्त्रननुज्ञाविषयमिति प्रागुक्तम् ।
उपवासासामर्थ्ये तु मार्कण्डेयकौर्मयोः—

इत्यर्थस्तत्राशीत्यने कथं भोजनमिति विभावनीयम् । *अष्टवर्षेति । उपनयनोपलक्षणम् । "अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन्" इति न्यायात् । न चैवमष्टवर्षग्रहणं व्यर्थं, किं च तदंशे स्याद्यथाप्राप्तानुवादित्वम्, अन्यांशे चाप्राप्तविधायकत्वमिति वैरूप्यमिति वाच्यम् । "जातपुत्रः कृष्णकेशः" इतिवदिहापि पदद्वयेनोपवासयोग्यावस्थाविशेषलक्षणयाऽशीतेरूर्ध्वमपि अष्टवर्षात्प्रागपि समर्थस्योपवासे यद्वचनवाप्युक्तवैरूप्यस्य दुर्वारत्वात् । तेनैव रूपेणाशक्तानुसाधारण्येनोपवासस्य विधानान्न वैरूप्यमिति चेत् तर्हि उपनीतत्वमात्रेणैव तद्विधाने वैरूप्यासम्भवात्, लाघवाच्च, तथापि च तादृशस्य समर्थस्याकृतोपनयनस्याप्यधिकारप्रसङ्गेन वस्तुतस्त्वोपनयघटितत्वावश्यकत्वाच्च । अत एवाष्टवर्षादूर्ध्वमनीतस्याशक्तस्यानुकल्पेनापि व्रतासिद्ध्याऽधिकारनिषेधात् । यद्रूपाणि प्राक्क्रियास्त्विति । *नारी चेति । नारी सधवा । तस्याः शुक्लायामेवोपवासः ।

एकादश्या विना रण्डा यतिश्च सुपहायते ।
पच्यते ह्यन्धतामिस्रे यावदाभूतसंप्लवम् ॥

इति नारदीये रण्डापदात् । नित्योपवासासामर्थ्येऽनुकल्पः । तत्र प्रथमं क्रियाऽनुकल्पः, पश्चात्कर्त्रनुकल्प इति क्रियानुकल्प-

*एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन *दानेन न निर्द्वादशिको भवेत् ॥

अत्र—

एकभक्तेन यो मर्त्य उपवासव्रतं चरेत् ।

इत्येकभक्तादिपूपवासशब्दस्तद्धर्मातिदेशार्थः । तेन तत्प्रयुक्ताः सर्वे धर्माः तत्स्थानापन्नेऽपि भवन्ति । संकल्पमन्त्रे चैकभक्तादिपदेनोहः कार्य इति मदनरत्ने ।

भा०—*एकभक्तेनेति । "नक्तं हविष्यान्नम्"इति नक्तमुक्तं, तदसंभवे अयाचितमेकभक्तं वा कार्यमित्यत्र तात्पर्यम् । अत्र च

एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।
पयोमूलफलैर्वापि न निर्द्वादशिको भवेत् ॥

इत्यादौ च कपोतन्यायेनैव एकभक्तादेरुक्तिः, न तु क्रमः । "भवत्यनश्नोत्तरमुत्तरं च"इत्येव तदुक्तेः । कपवाक्ये च फलग्रहणं मूलादेः,क्षीरग्रहणं च दध्यादेरुपलक्षणम् । उपवासेनेति च तत्स्वरूपार्थम् । *दानेनेति । "तावद्धनादि वा दद्यात्"इत्याद्युक्तम् । *तद्धर्मेति । यथा चैकभक्तनक्तायाचितदानानामुपवासप्रतिनिधितया तन्निधावनुष्ठानं निर्णीतम् । यानि त्विमानि स्वतन्त्राणि तत्र दशमीविद्धा त्याज्या । दशमीवेधश्च पञ्चदशनाडीकः "दिक्पञ्चदशविरमा"इति वचनात् ।

पूर्णाविद्धा दिनार्धेन नन्दा पूर्णामपि त्यजेत् ।
एकभक्तं च नक्तं च दानं चायाचितं च न ॥
नन्दायां पूर्णविद्धायां कुर्वीतेत्यर्थवादिनः ।

इत्यादिस्मृत्युक्तेश्च । तद्धर्मो दुष्ट्योपवासधर्मः । एवम् 'उपवासा-सम्भवे'इत्यादावुपवासशब्दः एकभक्तादिग्रहणार्थः । तेन यथा-'भवन्तिस्म पृथगायन्त्यादिर्नित्यवत्स्य दशकादेरभावे पुत्रानुकल्प-[illegible] नित्यानुकल्पस्य स्वयं [illegible] करणासम्भवे कर्तेनुकल्प

*तथाऽसामर्थ्ये प्रतिनिधिना कारयेदिति प्रागुक्तम् ।
व्रताकरणे प्रायश्चित्तमाह माधवीये कात्यायनः—

अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा ।
एकादश्यामहोरात्रं भुक्त्वा *चान्द्रायणं चरेत् ॥ इति ।

अथ काम्यव्रतविधिः लघुनारदीये—

*दशम्यादि महीपाल त्रिदिनं परिवर्जयेत् ।
गन्धताम्बूलपुष्पादि स्त्रीसंभोगं महायशाः ॥

तत्र दशम्यां विधिः कौर्मे—

*कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥

इत्याह—*तथेति । *चान्द्रायणमिति । एतच्च तत्त्यागनिकस्य वक्ष्यमाणद्वादशयुगव्रतस्याकरणे बोध्यम् । तत्र प्रमादादिनाऽकरणे यवमध्यं, नास्तिक्यादिना तु पिपीलिकामध्यं, प्रतिनिमित्तं नैमित्तिकावृत्तिश्च । अशक्तस्याकामतश्चार्द्धं कल्प्यम् । दक्षिणा तु शक्तस्य कामतो वा त्यागेऽनुभावः, अशक्तादेश्चमत्तः । न च रविवारादिसाद्यनिषेधातिक्रम एवेदम् । व्रतातिक्रमस्यापि 'भुक्त्वा' इत्यनेन वाच्यत्वात् । व्रतनिषेधयोर्द्वयोरपि पुरुषार्थतया नैमित्तिकस्यापि समत्वात् । *दशम्यादीति । सामान्यतः । *कांस्यमिति । मधु=क्षौद्रम् । येषां क्षौद्रादीनां पुरुषार्थो निषेधोऽस्ति तेषां क्रत्वर्थोऽयं बोध्यः ।

कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणम् ।
व्यायामं च प्रवासं च दिवास्वापं च मैथुनम् ॥

अभ्यञ्जनमिति वा पाठः ।

तिलपिष्टं मसूरं च दशम्यादि विवर्जयेत् ॥

इति मात्स्यं च द्रष्टव्यम् । *उपवसन्निति वर्तमानसामीप्ये । तेनानन्तरदिने उपोष्यन्नित्यर्थः । *अत्यम्बुपानादिति । अशनं

तथा—

शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने ।
द्यूत*मत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् ॥

मदनरत्ने नारदीये—

अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः ।
अवनीतल्पशयनाः प्रियासंगमवर्जिताः ॥

व्रतघ्नान्याह हेमाद्रौ देवलः—

असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् ।
उपवासः प्रणश्येत दिवास्वापाच्च *मैथुनात् ॥

च बोध्यम् । कैमुतिकन्यायात् ।

पुनर्भोजनमत्यार्श दशम्यां परिवर्जयेत् ।

इत्युक्तेश्च । अक्षारालवणा इति पाठेऽक्षाराश्चालवणाश्चेति विग्रहः । अक्षारलवणा इति पाठेऽपि क्षाराश्च लवणानि चेति समासान्तरं नञ्समासः । समान एवार्थः । क्षारलवणं खारीति प्रसिद्धम् । तन्निषेधोऽयमिति केचित् । तन्न, क्षारलवणपदयोः एकवैयर्थ्यात् । सकृत्पानं=पात्रं भूमावनापाय पानम् ।

पानीयादि पिबेद्येन तत्पात्रं द्विजसत्तम ।
अनुच्छिष्टं भवेत्तावद्यावद् भूमौ न निक्षिपेत् ।

इति शातातपवचनात् । यत्तु शातातपेन—

पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित् ।
त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः ।

इत्युक्तं, तत्मात्यहिकजलपानपरम् । तथा च तादृशं जलपानमुपवासदिने सकृद् अन्यदा त्वसकृदित्यर्थः । *मैथुनादिति ।

अयं पुंश्चलीषु

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥

अशक्तौ तु मदनरत्ने देवलः—

अत्यये चाम्बुपानेन नोपवासः प्रणश्यति ।

अत्यये=कष्टे ।

विष्णुरहस्ये—

गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं चानुलेपनम् ।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यच्च निराकृतम् ॥

एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे—

स्तेनाहिंसकयोः सङ्गं कृत्वा स्तैन्यं च हिंसनम् ।
प्रायश्चित्तं व्रती कुर्याज्जपेन्नामसहस्रकम् ॥

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।

इत्यष्टाङ्गस्यापि निषेधः, न तु सतीषु । "मैथुनाक्षमपने वैधुनवत्कृत्याम्" इति गौतमेन चाष्टोक्त्या तासु तदभावात् । स्वदारेषु तु क्रियानिर्वृत्तिमात्रस्य ।

स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि ।
विपद्यते ब्रह्मचर्यं स्वदारेषु तु संगमात् ॥

इति देवलोक्तेः । न दारैस्तु संगमादिति वा पाठः । असत्य-थेति । पुरुषार्थनिषिद्धस्य सर्वदाप्यसत्यस्य व्रतयोगे निषेधः । यथान्य-द्रव्यागमादिति वा पाठः । स्तैन्यं तृणादेरपि । हिंसनं कीटादेरपि । नाम्ना=विष्णुनाम्ना शतत्रयं न स्वेच्छयैव नाम जपमपारत् । संख्यायाः पूर्ववन्निर्देशात् ।

व्रतलोपे तु चेत्कुर्यात्कृष्णायत्तं भुक्तिवर्जनम् ।

इति । व्रतलोप इति पूर्वान्वयः । तत्र भुक्तिवर्जनम्=उपवासं न कुर्यात्, किं तु कृष्णायत्तम्=किंचिद्भक्षणमित्यर्थः । अत्र माधवीये—

व्रतलोपो भवेत्कुर्यादहोरात्रमभोजनम् ।

इति पाठे चोऽप्यम् । संयोगः स्वदारेषु, परदारेषु तु स्मार्तप्रायश्चित्तेन सहैव यः । एतत्प्रायश्चित्तं मत्स्यपुराणे । अभक्ष्यभक्षणे-

मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे ।
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः ॥
प्रणवं पूर्वमुच्चार्य नमो नारायणः पदम् ।
चतुर्थ्यन्तं वदेत्पश्चान्मनुरष्टाक्षरो मतः ॥

तत्रैव पैठीनसिः—

ताम्बूलचर्वणे स्त्रीसंभोगे मांसनिषेवणे ।
व्रतलोपो न चेत्कुर्यात्कृष्णाद्यङ्गजिवर्जनम् ॥ इति ।

कृष्णैकादशीवङ्गोजननिषेधमात्रपरिपालने तु ताम्बूलचर्वणादावपि न दोष इत्यर्थः । संभोगे ऋतुकालादन्यत्र

*रेतःसेकात्मसंभोगस्तेऽन्यत्र क्षयः स्मृतः ।

इति कात्यायनोक्तेः ।

हेमाद्रौ वसिष्ठः—

*उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनम् ।

ऽहिंस्यहिंसने च स्मार्तप्रायश्चित्तेन समुच्चयः । *रेत इति । रेतःसेकात्मसंभोग ऋतुकालः । क्षयो=व्रतभ्रंशः । 'रेतःसंक्रमणाद्योगाद्गे' इति पाठे रेतसः संक्रमणं=गर्भकोशे तयोर्यं गमनं ऋतुकालगमनमेव तदात्मकात् स्त्रीसम्भोगादन्यत्र स्त्रीसम्भोगे इति स एवार्थः । ऋतुगमनाभ्यनुज्ञाऽपि भागसन्निहितस्य षोडश्यामेव रात्रौ सन्निहितस्यानन्यगतिकत्वात् श्राद्धे तदनुज्ञावत् । अत्रानुक्तप्रायश्चित्तेषु कायिकेषु ऋतुसंभोगस्य न भवेयुः । तेन—

जपोऽष्टाक्षरमन्त्रस्य ग्रामत्रयस्य वा ।

इति उत्तरार्धोक्तं विकल्पितप्रायश्चित्तं कायिकसामान्ये सिध्यति । जपे संख्या त्वष्टशतमेव पूर्वोक्ता । *उपवासे इति । अत्र

दशम्यामेकभक्तं तु कुर्वीत नियतेन्द्रियः ।
आचम्य दन्तकाष्ठं तु खादेत तदनन्तरम् ॥
तत्स्नानान्तरं विप्रो ब्रह्मचारी जितेन्द्रियः ।

दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥

*काष्ठसद्भावेऽप्युक्तदोषाभावाय इति हेमाद्रिः ।

विष्णुरहस्ये—

श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्या शतसंपूतमम्बु प्राश्य विशुध्यति ॥

निर्णयामृते व्यासः—

*उपवासेऽप्यारणे मांसं मत्वादेऽप्यौषधं सदा । इति ॥

रात्रिं नयेत्ततः पश्चात् प्रातः स्नात्वा समाहितः ।
उपवासं तु संकल्प्य मन्त्रपूतं जलं पिबेत् ॥

इति वाक्येन पूर्वेद्युरेकभक्तानन्तरं काष्ठेन दन्तधावनमुक्तं स्मर्तव्यम् । *काष्ठेति । "अक्ताः शर्करा उपदधाति, तेजो वै घृतम्" इत्यादौ विधेरिव निषेधस्यापि विशेषपरत्वे वाक्यशेष एव बीजम् । तथा च "न कुर्यात्काष्ठेन दन्तधावनमित्यर्थः" इति विशेषनिषेधः शेषोऽप्यनुग्राहकः इति भावः । *लोष्ठादीति । आदिना

अलाभे वा निषेधे वा काष्ठानां दन्तधावने ।
पर्णादिना विशुध्येत जिह्वोल्लेखः सदैव हि ॥

इति पैठीनसिरुक्तम् । दन्तपदोपादानात्काष्ठेन जिह्वोल्लेखो दर्शितः ।

अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥

इति व्यासेन चोक्तं, तत् पदादिसहितमशक्तौ वा द्रष्टव्यम् । "तृणपर्णोदकेनाङ्गुल्या वा दन्तान् धावेत् प्रदेशिनीवर्जम्" इति पैठीनस्युक्तेः,

पश्चाद् द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ।
स्पर्शोऽङ्गुल्यास्तु मांसस्य निषिद्धाऽङ्गुल्या सदा ॥

इति शौनकोक्तेश्च । मांसनिषेधे इति । यदुक्तं, "यद्युपवासदिने प्रतिक्षणमसकृत्ताम्बूलपानमपि च वर्जयेदिति । पारणदिनमपि

*एकादश्यां श्राद्धप्राप्तौ मार्कण्डेये कात्यायन आह—

उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम्॥

व्रताहः। "पारणान्तं व्रतं ज्ञेयम" इत्युक्तेः। तथा च तत्र मांसभक्षणे व्रतलोप इति तदर्थः। औषधरूपं च "अष्टौ तान्यव्रतघ्नानि" इत्यत्रानुक्तमपि मांसं मुख्यव्रताहेऽपि वर्जयेदित्यर्थः। मांसतुल्यानां वसारुधिरादीनां तद्वदेव वर्जनं "बहूनामेकधर्माणाम्" इति न्यायात्। *एकादश्यामिति

श्राद्धं कृत्वा तु यो मर्त्यो न भुङ्क्ते पितृसेवितम्।
हविर्देवा न गृह्णन्ति कव्यानि पितरस्तथा॥

इति वाक्येन सामान्यतः

व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद् गृही॥

इत्यादिना विशेषतश्च श्राद्धशेषभोजनं विहितम्। तत्र पुरुषार्थस्योपवासस्य करणेन श्राद्धशेषभोजनेन वाध स्यादित्यर्थः। *नित्य इति नैमित्तिकोपलक्षणम्। काम्योपवासे तु शेषभोजनं, तस्यानापत्तौ तदाघ्राणं वा न कार्यम्। काम्यस्य निरपवादकत्वात्। तद्विधिः स्कान्दे—

यस्मिन् दिने पितुः श्राद्धं मातुर्वाऽपि भवेद् गुह।
तस्मिन्नेव दिने तात भवेदेकादशीव्रतम्॥
अन्यदाऽपि व्रतं स्कन्द तदा कार्यं तु तच्छृणु।
तदा कृत्वा तु वै श्राद्धं शुकयोगं तु यद्भवेत्॥
तस्मिन् दक्षिणे पाणौ गृहीत्वान्नं शिखिध्वज।
अवजिघ्रेदनेनाथ तेन श्राद्धं शिखिध्वज॥
पितॄणां तृप्तिदं तात भवतीह न संशयः। इति।

एतच्च मुख्योपवासपरम्। कन्दमूलाद्यनुकल्पे तु देवपितृशेषे तत्परिशेषमेव भोक्तव्यम्। सर्वं श्राद्धशेषभोजनं विनाऽपि

*मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि ।
अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितम् ॥ इति ।

हेमाद्र्यादिसर्वनिबन्धेष्वदर्शनात् । एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमिति वदन्तः परास्ताः । किंच महालये—

स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति ।

इति श्रवणात्(१) पौर्णमास्यां, पौषैकादश्यां च मन्वादिश्राद्धं, क्षयाहापरिज्ञाने च तत्पक्षैकादश्यां विहितं श्राद्धं बाधितमेव स्यात् । यदपि स्मृतिचन्द्रिकायां पठन्ति—

अन्नाश्रितानि पापानि तद्भोक्तुर्दातुरेव वा ।
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः ॥ इति ।

तस्यापि(२) रागप्राप्तभुजिनिषेधपरस्य वैधं श्राद्धं गोचरयतां महत्साहसमित्यलम्* । योऽपि—

अकृतश्राद्धनिचया जलपिण्डं विना कृताः ।

इति लघुनारदीये एकादश्यां श्राद्धादिनिषेधः स मातापितृभिन्नविषयः । पूर्ववाक्ये तद्ग्रहणात् । पक्षा-

---

श्राद्धवैगुण्यपरत्वे स्पष्टार्थः । *मातापित्रोरिति भावप्रदर्शनम् । मातापितृभिन्नेष्वपि भ्रातापितृव्याद्यादिविषयेऽपि । श्राद्धं नैमित्तिकमित्यस्याऽऽवश्यकमित्यर्थात् ।

सूतके मृतके श्राद्धं सूतकान्ते विधीयते ।
तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत् ॥

इति तु मलाय एवंदृशी—*अलमिति ।

---

(१) तस्मिन् पक्षे प्रतिपदादयः सकलास्तिथयः शस्तेति श्राद्धस्य विधानादिति भावः ।

(२) निषेधस्येत्यर्थः । रागप्राप्तत्वेन निषेधाऽर्थस्याहितविषयत्वमिति तात्पर्यम् ।

श्राद्धनिषेधः=श्राद्धे प्रतिग्रहः(१) ॥

अव्रतघ्नान्याह मदनरत्ने देवलः—

*सर्वभूतभयं व्याधिः प्रमादो गुरुशासनम् ।
अव्रतघ्नानि पठ्यन्ते *सकृदेतानि शास्त्रतः ॥

स्कान्देऽपि—

अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

*इदं चापि सङ्कटविषयम् । नारदीये—

अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनि ।
मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभे ॥

नक्तेच भोजनं केचिदेकादश्यां बुधैः स्मृतम् ॥ इ

अस्यापवादः—

शयने च मनुष्याणां मत्पार्श्वपरिवर्तने ।

---

*सर्वेति । सर्वेभ्यो भूतेभ्यः सकाशाद् व्रतकर्तुर्भयम् । मदन
लेँ तु भूतमयेभ्यः सर्पादिभ्यो भयम् । तेन सर्पादिभयाद् व्रता
फलयेऽपि न व्रतहानिरित्युक्तम् । *सकृदिति । असकृत्तु "काम
कोपात्" इत्यादिनोक्तं प्रायश्चित्तम् । *इदं चेति । यथा हेमा

व्रतस्थं व्याधितं दृष्ट्वा क्षुत्पुष्टं च तपोधनम् ।
दृष्ट्वा तु ब्राह्मणस्तस्य कुर्यात् सम्यगनुग्रहम् ॥
अमृतं पायसं क्षीरमिच्छमाने सकृन्नियि ।
यथेह न वियुज्येत प्राणैः क्षुत्पीडितो व्रती ॥
पाययित्वाऽमृतं क्षीरं रसेदत्वा फलानि च ।
एवं मासोपवासस्यमारुह्यमाणसंशयम् ॥

इति मासोपवासव्रतपरं संकटविषयं, तद्वत् 'अष्टौ तानि'इ

---

(१) तेन श्राद्धप्रतिग्रहीतुरयं तद्दिने निषेधो न तु श्राद्धकर्तुरिति माव

*नरो मूलफलाहारी हृदि ध्यायं समर्चयेत् ॥

इदं चाग्निहोत्रविषयम्(१) ।

इमे चाग्निहोत्रिभिन्ने निर्णयाः सर्वव्रतेषु ज्ञेयाः ।

तत्रैकादश्यां सङ्कल्पः—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासं च गृहीयाद्वा यद्वैव धारयेत् ॥

इति माधवीये वाराहोक्तेः ।

मन्त्रस्तु विष्णुः—

एकादश्यां *निराहारः स्थित्वाऽहमपरेऽहनि ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ इति ।

शैवादीनां च हेमाद्रौ सौरपुराणे—

शिवविष्ण्वाऽन्यथ वा नाम्ना सङ्कल्पं च समाचरेत् ।

*शिवादित्यायनो यजुर्वेदे प्रसिद्धाः । वाराहे-सर्वव्रतपरमपि सङ्कल्पविषयविपर्ययः । *नरो मूलेति । 'पयोमूल' इति पुस्तः पाठः । पयःपदं दध्यादेरुपलक्षणम् । *सङ्कल्प इति । प्रातः सङ्कल्पश्च प्रातः सन्ध्योत्तरं कार्यः ।

प्रातःसन्ध्यां ततः कृत्वा सङ्कल्पं तत आचरेत् ।

इति वचनात् । सायमादिसङ्कल्पा अपि सायमादिसन्ध्याऽनन्तरमेव ।

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।

इति वचनात् । *निराहार इति । फलाहार इत्यूहो बोध्यः । देशकालौ संकीर्त्य विष्णुप्रीत्या एकादशीव्रतमहं करिष्ये इति पठित्वेमं श्लोकं पठेत् । "भोक्ष्यामि" इत्यत्र चार्थपदमनुवर्तते अध्याहार्यं वा । सर्वथाऽर्थपदाभावे पाणिनिरुक्त्या कथंचित् प्रयोगसम्भवेऽपि क्रतुवैगुण्यात्(२) । *शिवादीति । "तत्पुरुषाय

(१) इयं पङ्क्तिर्मुद्रितपुस्तके नास्ति ।
(२) वस्तुतस्तु अर्थपदानुवृत्तेरध्याहारस्य वा नावश्यकता । "एका-

०हन्तुमार्ग मत्वा विद्वान् पुष्पाञ्जलिमथार्पयेत् ।
०[illegible] पिबेत् ।
[illegible] मन्त्रेण त्रिर्जप्तेनाभिमन्त्रितम् ।
०उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलम् ॥
इति [illegible] । [illegible] उदये वा दृश्य[illegible]
[illegible] इति [illegible] ।

[illegible] पीयते । नमो रुद्रः [illegible]" इति [illegible]
[illegible](?)। [illegible]
[illegible] । [illegible]
[illegible] इति । [illegible]
[illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible]

[illegible]

[illegible]

[illegible] पीयते । नमो [illegible]

[illegible] पीयते । नमो [illegible]

[illegible] पीयते । नमो [illegible]

[illegible] पीयते । [illegible]

[illegible]

द्वादश्यां [illegible] हरिसारूप्यमश्नुते ॥

एतेन द्वादश्यां [illegible] नेत्यपि परास्तम् । एकादशी [illegible] च भविष्ये—

पृथक् जये पृथक् पुण्ये मासे मासे पृथक् पृथक् ।
मार्गशीर्षे सिते पक्षे हरेरेकादशी प्रिया ॥
[illegible] सर्वपापप्रणाशिनी ।
[illegible] ॥
[illegible] मोक्षदा मताः ।
[illegible] मरीचये ॥

[illegible] एकादशी । [illegible] ।—

[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] जनार्दन ॥ इति ॥ १ ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ २ ॥
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।

म्प्रदायः ॥ ३ ॥

फल्पाथी कृष्णपक्षे तु न्यसेद्देवं हरिं शुभम् ।

षट्तिलेत्यन्यत्र ।

सहितं श्रीसुमित्रया फकारेण प्रपूजयेत् ।
ददेदर्घ्यं शुभां द्राक्षां नैवेद्यं घृतरं वर ॥

घृतरं घेवरमिति भाषा, घृतपूरमिति केचित् ।

दानानि दीयते दुग्धं द्विजेभ्यो नृपपुङ्गव ॥ ४ ॥
माघे कामप्रदा चैव शुक्ले माधवदेवता ।

जयाभिधेत्यन्यत्र ।

हविष्मत्या सहितो देवः पूजयेत्कुन्दकैः शुभैः ॥

कुन्दकैरित्यन्यत्र ।

बीजपूरं ददेदर्घ्यं नैवेद्यं मण्डकास्तथा ।
द्विजाय तिलधेनोश्च कथितं दानमुत्तमम् ॥

गुडतिलपिष्टयुता धेनुः, तदुदकान्वितको वा देय इति संप्रदायः ॥ ५ ॥

एकादशी जया कृष्णे अच्युतं पूजयेत् गुरम् ।
घात्या च सहितं देव्या पूजयेत् तुलसीदलैः ॥
सोभालिका च नैवेद्यं जम्बीरेणार्घ्यमुत्तमम् ।
उपानद्दीयते दानं द्विजाय विष्णुवत्सलैः ॥

विजया एकादशी, खर्जूरीफलं नैवेद्यं, पक्वान्नहोम इत्यन्यत्र ॥ ६ ॥

फाल्गुनैकादशी शुक्ला सा धात्री नाम भूपते ।
गोविन्दं पूजयेद्देवं चन्द्रकान्त्या समन्वितम् ॥
पूजयेच्चम्पकैः पुष्पैरक्षोटेनार्घ्यमुत्तमम् ।
कंसारकं च नैवेद्यं तिलपात्रं प्रदीयते ॥ ७ ॥
सौम्या चैकादशी कृष्णे अनिरुद्धं प्रपूजयेत् ।
सहितं मित्रविन्दाया कुसुमैर्मुचुकुन्दकैः ॥
अर्घ्यं चैवोभयी दद्यान्नैवेद्यं सेवकां शुभाम् ।

तिलधेनुः प्रदातव्या द्विजाय कृष्णरूपिणे ॥
खर्जूरी अर्घ्यं, वटकं नैवेद्यमन्यत्र ॥ ८ ॥

चैत्रे च दमना नाम विख्यातैकादशी शुभा ।
विष्णुं संपूजयेद्देवं विशालाख्या समन्वितम् ॥
पूजयेच्चूतपुष्पैश्च चिर्भिटेनार्घ्यमुत्तमम् ।
नैवेद्यं सक्तुकं चैव कर्पूरागुरुचन्दनम् ॥

कामदा एकादशी एलाऽर्घ्यं एक्षवो रसो दण्डो वा नैवेद्यम्॥९॥

बहुला कृष्णपक्षे च वासुदेवं सुरं नृप ।
शैब्यया सहितं देव्या मरुपुष्पैश्च पूजयेत् ॥
अर्घ्यं जातीफलं चैव नैवेद्यं वटकानि च ।
दीयते वस्त्रयुग्मं च द्विजाय विष्णुरूपिणे ॥

वरूथिनी एकादशी, सक्तु नैवेद्यम् ॥ १० ॥

एकादशी नरश्रेष्ठ वैशाखे मधुसूदन ।
मधुसूदनदेवं च माधव्या च समन्वितम् ॥
पूजयेद्दमनैः पुष्पैरर्घ्यं तु पनसं स्मृतम् ।
उपानयुगलं दानं पायसं शर्करान्वितम् ॥

मोहिनी एकादशी, राजनीकफलार्घ्यं, गुलाबशक्री नैवेद्यं दुग्धदानम् ॥ ११ ॥

सिद्धा चैकादशी कृष्णे प्रद्युम्नं देवमर्चयेत् ।
कालिन्द्या सहितं देव्या अर्घ्यं चूतफलं नृप ॥
नैवेद्यं कथितं दुग्धं गोदानं द्विजपुङ्गवे ।

अपारानमनाम एकादशी,वकुलं पुष्पं,कर्कटी अर्घ्यं छत्रोपानदानम्१२॥

ज्येष्ठे त्रिविक्रमा शुक्ले देवं चैव त्रिविक्रमम् ।
पूजयेद्यूथिकापुष्पैः पद्माख्या या तयाऽन्वितम् ॥
करणेन ददेदर्घ्यं नैवेद्यं घृतशालिजम् ।
दानं च दीयते छत्रं द्विजायानन्तरूपिणे ॥

निर्मला एकादशी, दध्योदनं नैवेद्यं, जलघटदानं परमान्न-

माउर्व च ॥ १३ ॥

एकादशी कृष्णपक्षे विख्याता पापनाशिनी ।
नृसिंहं स्थापयेद्देवं क्षेमकान्त्या समन्वितम् ॥
पूजयेद् भृङ्गराजेन अर्घ्यमाम्रफलं स्मृत ।
करम्भकैश्च नैवेद्यं जलधेनुर्द्विजाय च ॥

योगिनी एकादशी, क्षेमकरी देवी, पक्वान्नं नैवेद्यं, पट्टिकाय-न्दनदानम् ॥ १४ ॥

एकादशी शुक्लपक्षे आषाढे शुभतिप्रदा ।
पूजयेद्वामनं देवं देव्या कमलयाऽन्वितम् ॥
नारिकेलं ददेदर्घ्यमपामार्गेण पूजयेत् ।
खण्डपीकां च नैवेद्यं भूमिं छत्रं च दीयते ॥

पद्मा एकादशी, मधुमती देवी, पक्वान्नं नैवेद्यम्, इक्षुदानम् ॥१५॥

एकादशी च विख्याता ह्यसिते चारिनाशिनी ।
युक्तं विजयया देव्या पूजयेत्पुरुषोत्तमम् ॥
सुगन्धैर्बहुलैः पुष्पैरर्घ्यं बिल्वफलं स्मृतम् ।
नैवेद्यं पूपकाः कार्यं नवनीतं प्रदीयते ॥

कामिका एकादशी, मल्लिका पुष्पं, मालपुवा नैवेद्यं, कांस्यपात्र-दानं नवनीतदानं मिष्टान्नभोजनम् ॥ १६ ॥

श्रावणस्य सिते पक्षे ख्यातैकादशी नृप ।
श्रीधरं स्थापयेद्देवं कान्तिमत्या समन्वितम् ॥
पूजयेच्छतपत्रैश्च अर्घ्यं पनसकं वरम् ।
नैवेद्यं पोलिका श्रेष्ठा पुस्तकं दीयतेऽनघ ॥

पुत्रदा एकादशी, पक्वान्नं नैवेद्यं, छत्रताम्बूलदानम् ॥ १७ ॥

पर्वप्रदाभिधा कृष्णेऽश्वयुजे पूजयेत् गुरुम् ।
रुक्मिण्या सहितं नृप पुष्पैः पाटलसंभवैः ॥
अर्घ्यं पूगीफलं चैव नैवेद्यं पूरिका मता ।
दीयते घृतपात्रं तु विप्राय विष्णुरूपिणे ॥

प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥ इति ।

नारदीये—

*ब्राह्मणान् भोजयेच्छक्त्या दद्याद्वै दक्षिणां ततः ।

स्कान्दे—

कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥

द्वादश्यां च वर्ज्यान्याह बृहस्पतिः—

दिवा निद्रां परान्नं(१) च पुनर्भोजनमैथुने ।

प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।

इति पूर्वम् । *ब्राह्मणानिति ।

ततः स्वबन्धुभिः सार्द्धं नारायणपरायणः ।
कृतपञ्चमहायज्ञः स्वयं भुञ्जीत वाग्यतः ॥

इत्युत्तरार्द्धोक्तं पारणं कार्यम् । तत्र वर्ज्यानि ब्रह्माण्डे—

कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामं च प्रवासं च दिवास्वापमथाञ्जनम् ॥
तिलपिष्टं मसूरं च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते ॥

तथा—

कांस्यं मांसं सुरां द्यूतं व्यायामं क्रोधमैथुने ।
हिंसामसत्यन्तलौल्यं च तैलं निर्माल्यलङ्घनम् ॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् ।
द्वादश्यां पारणं कुर्याद्वर्जयित्वा क्षुपोदकीम् ॥

पयोदकी=पोई इति महाराष्ट्रप्रसिद्धा ।

कांस्यं मांसं मसूरं च चणकं कोरदूषकाः ॥

(१) अत्र-'श्वशुरान्नं गुरोरन्नं मातुलान्नं तथैव च । पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृत् ॥' इत्यपि नोपयुज्यते । तस्य मतादिभिन्नविषयत्वात्, [illegible]

धीरं मर्त्यगायत्रीं सैनं ब्राह्मणवचनात् सर्जनम् ॥

देवादि । ब्रह्माण्डपुराणे—

सुवर्णरजतपात्राणां चार आपात्रधेनुके ।

तपदानपत्ने हन्तुर्दिवा निशा च पञ्चमी ॥

स्कान्दे—

पराधं च(हि)रन्तनाद्वले लोभं विनयचान्तनाम् ।

सर्वेऽदिति दोषः । विष्णुधर्मे—

कश्चरस्मादन्यानि संभाव्य सुव्रतपातिकादलम् ।

क्षारं मधु घृतं च हन्तुगताविवे फलम् ।

कपर्दिकादानामिति । महाभारते—

हरिद्रादाऽन्यदान श्रुति पवित्रं च रसव्ययाम् ।

न स्पृशेत्पापिपापेन मैत्र दानवायमे ॥

इत्यादिवाक्यात् । हारीतोऽपि—“वनितापावित्र्यनाशेनकादित-

स्मरणानृतास्वरूपाणादि उपवासादिषु वर्जयेत्” इति । अत्यापवादः—

स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे ।

गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥

स्त्रीष्वनृतं नर्मव्यापारयतः । हिंसायां=गोब्राह्मणहिंसायां प्रसक्ता-

यां गोब्राह्मणजीवनार्थे, यद्वा गोब्राह्मणार्थे=तज्जीवनार्थे । हिंसायां=

हिंसाप्रसङ्गे वा ।

अथ वाऽन्यदेव प्रायश्चित्तं कार्यं शास्त्रान्तरात् । तथा हि—

सम्भाव्यैतान् शुचिपदं चिन्तयेदच्युतं बुधः ।

इदं चोदाहरेत्सम्यक् कृत्वा तावन्मनं मनः ॥

शारीरमन्तःकरणोपघातं

पापं च विष्णुर्भगवानशेषम् ॥

सर्वं नयत्वस्तु यथैव सर्वे

पापादनन्ते हृदि सन्निविष्टे ॥

अन्तःशुद्धिं बहिःशुद्धिं शुद्धो धर्ममयोऽच्युतः ।
स करोतु ममैतस्मिन् शुचिरेवास्मि सर्वदा ॥
पापोपघातानमघान् वाद्यांश्च भगवानजः ।
शमं नयत्वनन्तात्मा विष्णुश्चेतसि संस्थितः ॥
एतत्संभाष्य जप्तव्यं पाषण्डिभिरुपोषितैः । इति ॥

पाषण्डिभिरिति बहुवचनात्तत्सदृशानां ग्रहः । यद्यपीदं सर्वोपघाते प्रतीयते तथापि संभाषण एव । "एतत्संभाष्य जप्तव्यम्"इत्युपसंहारात् । हारीतः—

चण्डालैः सह संभाष्य द्विजसंभाषणाच्छुचिः ।
गायत्रीं व्याहरेद्वाऽपि इति धर्मो व्यवस्थितः ॥

अनेन सामान्यप्रायश्चित्तेन समुच्चयः । चण्डालादिदर्शने तु विष्णुपुराणे—

तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः ।

इति सूर्यावलोकनं च शुचिपदपाठोत्तरं कार्यम् ।

नमः शुचिपदेत्युक्त्वा सूर्यं पश्यते दीक्षितः ।

इति विष्णुधर्मात् । दीक्षितः=कृतनियमः । रात्रिस्पर्शे तु पराशरः—

अस्तं गते यदा सूर्ये चण्डालं पतितं स्त्रियम् ।
सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते ॥
जातवेदः सुवर्णं च सोममार्गं तथैव च ।
ब्राह्मणानुगतिश्चैव स्नानं कृत्वा विशुध्यति ॥

रात्रिस्नानीयं तोयमाह देवलः—

दिवाऽऽहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः ।
प्रक्षिप्य च सुवर्णं च सन्निधाप्य च पावकम् ॥

सुमन्तुः—

साक्षात् स्पर्शे तु यत्प्रोक्तं तद्व्यवान्तरितेऽपि च ।

दिवास्पर्शे तु तत्रैव—

...मुक्तौ ... स्नानमात्रं ... ॥

...—

... च ... ।

... ॥

... ।

... ॥

... ।

... ।

इति विष्णूक्तेः। तत्र स्नानदानादि ग्रहणकाले कार्यम्।

ग्रहणकाले तथा ... जनार्दनम्।

... ॥

इति ... दर्शनेऽपि कार्यम्।

... च ततः स्नात्वा ... दर्शनात् ॥ इति।

... योगियाज्ञवल्क्यः—

यदि ... स्नानादिषु ... ।

'स्नानदानादिकर्मसु' इति वा पाठः।

... विष्णुमव्ययम् ॥

इत्यादि। कालेन तु—

मानसे नियमे तुर्यं स्मरेद्विष्णुमनामयम् ॥

इति यमोक्तेः ... एवं ममाधिकारे—

विहितस्यानुष्ठानादिन्द्रियाणामनुग्रहः।

निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः ॥

इति सुमन्तूक्तेः,

जपो ... मन्त्रस्य नामजपस्य वा।

इति ... स्नानमात्रविधिना सद्भावितं बोध्यम्।

...गायत्री। ...दानानीति। ब्राह्मणभोजनमपि

*एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि ।

इति पुलस्त्योक्तेः । यदा द्वादश्यां श्रवणर्क्षं तदा शुद्धामप्येकादशीं त्यक्त्वा तत्रैवोपवासः कार्यः ।

शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणाऽन्विता ।
तयोरेवोपवासश्च त्रयोदश्यां च पारणम् ॥

इति नारदीयोक्तेः । एते च नियमाः काम्यव्रते नियताः* । नित्यव्रते सति संभवे कार्याः ।

शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणम् ।

इति कात्यायनोक्तेः । अशक्तौ तु माधवीये ब्रह्मवैवर्ते-

इति विज्ञाय कुर्वीतावश्यमेकादशीव्रतम् ।
विशेषनियमाशक्तोऽहोरात्रं भुजिवर्जितः ॥ इति ॥

अथाष्टौ महाद्वादश्यः । तत्र शुद्धाधिकैकादशीयुता द्वादशी उन्मीलिनीसंज्ञा१। द्वादश्येव शुद्धाधिका वर्धते चेत्सा वञ्जुली२। वासरत्रयस्पर्शिनी त्रिस्पृशा३। अमे पर्वणः संपूर्णाधिकत्वे पक्षवर्धिनी४। पुष्यर्क्षयुता जया५। श्रवणयुता विजया६। पुनर्वसुयुता जयन्ती७। रोहिणीयुता पापनाशिनी८ । अत्र *मूलं हेमाद्रौ ज्ञेयम् । *एताः

प्रायमप्रदानत्वात् । *एकादश्यां न भुञ्जीतेति ।

संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम्

इति व्रतमपि द्रष्टव्यम् । *नियता इति । "सायमाद्यन्तयो रह्नो"इत्यादौ "पुनर्भोजनम्"इत्यादौ च फलप्रदोक्तेः ।

*मूलमिति । ब्रह्मवैवर्ते—

उन्मीलिनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥
द्वादश्योऽष्टौ महापुण्याः सर्वपापापहा द्विजाः ।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा ॥

सप्तकल्पान्तरकृतं पापं प्रदहति सा ।
एकादशी तु संपूर्णा वर्द्धते पुनरेव सा ॥

अन्या द्वादशीत्यर्थः ।

उन्मीलिनी समुद्दिष्टा सर्वथा पापनाशिनी ॥ १ ॥
द्वादशाहद्वादशाद्य द्वादश्यामेव पारणम् ।
वञ्जुली नाम सा प्रोक्ता हत्यायुतविनाशिनी ॥ २ ॥
अरुणोदय आद्या स्याद्द्वादशी सकलं दिनम् ।
अन्ते त्रयोदशी प्रातस्त्रिस्पृशा सा प्रकीर्तिता ॥

आद्या=एकादशी । अरुणोदयं=सूर्योदयं ।

“एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्रिस्पृशं तदहोरात्रम्” इति पाद्मोत्तरखण्डे निषिद्धवचनोक्तेः ॥ ३ ॥

कुहूराके यदा वृद्धिं प्रयाते पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ॥ ४ ॥
पुष्यश्रवणपुष्यापरोहिण्या संयुतास्तथा ।

पुष्यापरः=पुनर्वसुः ।

उपोषिताः सफला द्वादश्योऽष्टौ पृथक् पृथक् ॥ इति ।

सफला इति अनेन काम्यत्वं, न तु नित्यत्वम् ।

न करिष्यन्ति ये लोके द्वादश्योऽष्टौ यथाऽऽश्रया ।
तेषां यमपुरे वासो यावदाभूतसंप्लवम् ॥

इत्यकरणे दोषश्रवणं स्तावकमित्याशयेनाऽऽह—सफला इति । काम्यार्थस्य स्वर्गार्थत्वं पुराणादौ निरूढमेव । अत्र तिथियुक्तासु न संदेहः । यत्तु—

विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ।

इति, तदुपवासद्वयासमर्थं प्रति, श्रवणद्वादशीवत् । नक्षत्रयोगयुक्तासु श्रवणद्वादशी निर्णेष्यते । तासु विभिन्नद्वादशीषु परेऽह्नि अल्पनक्षत्रयोगेऽपि तत्पुण्यमुपवासादि कार्यम् । “तिथिनक्षत्रयोगे” इत्यादिवचनात् । यत्तु हरिवंशश्रवणरोहिण्योरभिधानं तद-

[illegible] ञ्जुलिकाम उपनयेत् । [illegible] द्वयोरेकत्रे [illegible] । [illegible] ये तु शाकस्योपनयनम् ।

[illegible] इति भावः । [illegible]-सूर्यो [illegible] [illegible] वा [illegible] ।
[illegible]

[illegible] ॥

[illegible] सूर्योदय [illegible]—

[illegible] काल: [illegible] ।

[illegible] ॥

[illegible] ॥

[illegible] ।

[illegible] ॥

[illegible]

[illegible] ।

[illegible] ॥

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
इति विष्णुरहस्यात् । अशक्तौ तु माधवीये ।
एवमेकादशीं *भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥
इति तत्रैवोक्तेः । *यदा स्वल्पा द्वादशी तदोक्तं स्मृत्यन्तरे—
यदा भवति अल्पाऽपि द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा ॥
नारदीयेऽपि—
अल्पायामपि विप्रेन्द्र द्वादश्यामरुणोदये* ।
स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः ॥ इति ।
*संकटे तु माधवीये देवलः—
संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ।
अद्भिस्तु पारणां कुर्यात्पुनर्भुक्तं न दोषकृत् ॥ इति ।
संकटे=*त्रयोदशीश्राद्धप्रदोषादौ* ।

च मात्रविषयैव निर्णयः । *भुक्त्वेति फलाहारपरम् । स्वल्पेति पाठेऽपि तत्परमेव । एकादशीपारणायां माधवीये स्मृत्यन्तरे—
कलाद्वयं त्र्यंशं वाऽपि द्वादशीं न व्यतिक्रमेत् ।
पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥
इति । तत्राऽऽह्निकापकर्षमाह—*यदा स्थिति । *अरुणोदये इति महाविककालमाध्यस्नानादिकं सन्ध्यादि संक्षेपेणापि कार्यम् ।
महाहानिकरी ह्येषा द्वादशी लङ्घिता नरैः ।
करोति धर्महरणमस्नानेव सरस्वती ॥
इति द्वादशीलङ्घने दोषोक्तेः । अस्नानेति स्नानमपेत्यपिकरणेऽर्द्ध-भावत् । *संकटे=रूपं विनारम्भादा असंभवे । *त्रयोदशी-श्राद्धं=मृततिथि-गजच्छाया-श्राद्धादिरूपयोगनिमित्तकम् । प्रदोषादाविति । आदिना स्नानदानादिरूपमन्यद्वा किंचिद्ग्राह-

अत्र केचिदाहुः-'अपकर्षवाक्यानि अनाहिताग्नि[illegible]
[illegible]नि । अग्निहोत्रादीनां [illegible]
इति । श्राद्धदिने च प्रथमयाममतिक्रम्य पारणं कार्यम् ।
[illegible] । [illegible] जलपारणी कृत्वा श्राद्धानन्तरमेव [illegible]
[illegible] पुनः,नापि श्राद्धपाकें इति पाठः । [illegible]
[illegible]ने —

[illegible] तु [illegible] पारणे पुनि[illegible] ।
[illegible] पाप्नोत्य[illegible] ॥

[illegible] । [illegible]
[illegible] ।

[illegible] ।
[illegible] ॥

[illegible]

द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः ॥

इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः । अत्र केचित्सङ्गिरन्ते—'यदा भूयसी द्वादशी तदाऽपि प्रातर्मुहूर्तत्रयं पारणं कार्यम् ।

सर्वेषामुपवासानां प्रातरेव हि पारणम् ।

इति वचनात्' इति ।

अस्मद्गुरवस्तु—'बहूनां कर्मकालानां विना कारणं बाधापत्तेः प्रागुक्तवचनैश्च अल्पद्वादश्यामेवापकर्षविधानादपराह्ण एव कार्यम् । प्रातःशब्दस्तु—

सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।

इतिवदपराह्णाभिप्रायेऽप्युपपन्नः । नच वाक्यभेदापत्तिः, पुनर्भोजनसापेक्षपारणनिवृत्त्यर्थत्वात्तस्य'—इत्याहुः ।

प्रमादेन एकादश्युपवासाभावे अपरार्के वाराहे—

एकादशी विष्णुना चेद् द्वादशी परतः स्थिता ।
उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम् ॥ इति ।

केचित्तु विष्णुना चेदिति पठितम् । भक्ताविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः । अन्ये च व्रतार्के वक्ष्यन्ते इति दिक् ।

इति श्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृते
निर्णयसिन्धौ एकादशीनिर्णयः ।

उदिताऽऽदित्योऽपि नाविदम् । अनुदितहोमिनां तु उपासि प्रातः शकटाश्चोदितः कर्तव्या होम इति भवति । तममतिक्रम्येति प्रातः पारणापवादः ।

(१)इति श्रीकृष्णभट्टकृतौ निर्णयसिन्धुव्याख्यायामेकादशीनिर्णयः समाप्तः ॥

(१) इदं न पुस्तकान्तरेषु ।

अथ शुद्धाविद्धादिभेदेन स्मार्तवैष्णवयोः स्फुटज्ञानाथ श्रीवासुदेवोपाध्यायविरचितो धर्माब्धिस्थोदाहरण-सहितश्रैकादशीनिर्णयपट्टो लिख्यते ।

श्रीकाशिनाथोपाध्यायैरेकादश्या विनिर्णयः ।
कृतोऽष्टादशभेदात्मा स्मार्तवैष्णवयोः पृथक् ॥ १
संलक्ष्योदाहृतैः सिद्धिं संशोध्य ग्रन्थपट्टयोः ।
विभागैरयं च पट्टेऽस्मिन्न यथामति लिख्यते ॥ २
श्रीरामचन्द्रनामा नामप्रागर्थपृष्ठजिह्वाग्रः ।
स ग्रन्थविहितमा मे जयतितरामेव जानकीजानिः ॥
नामस्मृत्या यस्य च विबोधितां धर्मशास्त्ररूपांबुम्
निर्णयमेकादश्या निःसंदिग्धं सुखेन विलिखामि ॥

अत्र समत्वं सूर्योदयावच्छिन्नपूर्वक्षणान्त तिथिमत्त्वं षष्टिघटिकारूपम् । न्यूनत्वं तु किञ्चिन्न्यू नषष्टिघटिकात्वञ्च शुद्धाविद्धाभेदेषु · तिथिक्षयवृद्धिभ्य विलक्षणम् । यथा वैष्णवशुद्धैकादशीप्रथमभेदे दशमी ५५।५९, एकादशी-४१।५९, द्वादशी-४३।५०। एवं प मध्ये पञ्चोनचतुश्चत्वारिंशद्घटीमितं न्यूनत्वम् । एवमे स्मार्तवैष्णवयोः शुद्धाविद्धाभेदैर्विलक्षणत्वमूह्यम् ।

एते वैष्णवानामेकादश्याः शुद्धा भेदाः ।

अत्रारुणोदयवेधरहिता शुद्धा या चतुर्विधा या यो

दाहरणेन प्रदर्श्यते —

	दशमी घ०	प०	एकाद० घ०	प०	द्वादशी [redacted]	प०	
शुद्धाधिका स्मार्तार्-शिका ।	५५	५९	६० ०	० १	५९ द्व	५८ यः	इयमेकादशीमात्राधिक्यवती शुद्धा । अत्र स्मार्तगृहस्थानां पूर्वैकादश्यां, यतीनां वैष्णवानां चोर्ध्वैकादश्यामुपवास इति माधवमतं, कामाद्या अकामाद्या वैष्णवो द्वयमुपवसेदिति हेमाद्रिमतम् ।
धर्मसिन्धुमुदाहरणम् ।	५५	०	६०	१	५८	०	इदमुदाहरणं विचार्यम् । भे० ७।
शुद्धाधिका स्मार्तादशिका	५५	५९	६० ०	० १	५९ द्व	५९ य०	इयमप्येकादशीमात्राधिक्यवती शुद्धा । अत्रापि स्मार्तगृहस्थानां पूर्वैकादश्यां, यतीनां वैष्णवानां चापरैकादश्यामेवोपवास इति माधवमतं, कामाद्या
धर्मसिन्धुमुदाहरणम् ।	५५	०	६०	१	५८ द्व	० यः	अकामाद्या वैष्णवो द्वयमुपवसेदिति हेमाद्रिमतम् भे० ८।
शुद्धाधिकाधिकार-शिका ।	५५	५९	६०	१	२	५५	इयमुभयाधिक्यवती शुद्धा । [redacted] स्मार्तैर्वैष्णवैश्च परैकादश्युपोष्येत्युभयमतम् । भे० ९।
धर्मसिन्धुमुदाहरणम् ।	५५	०	६०	१	५	०	

इति वैष्णवानां शुद्धैकादशीभेदाः ।

एते वैष्णवानां विद्धैकादशीभेदाः ।

अथ विद्धमरुणोदये दशमीयुक्तम् । अरुणोदयस्तु सूर्योदयात्प्राक् चतुर्घटिकात्मकः ।

	दशमी घ०	दशमी प०	एकादशी घ०	एकादशी प०	द्वादशी घ०	द्वादशी प०	
विद्धपूर्णा न्यूनाधिकशिवा ।	५६	१	५८	०	५९	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भेदः १।
धर्माधिक्यमनुद्वादश्यम् ।	५७	०	५८	०	५९	०	
विद्धपूर्णा समन्यूनशिवा	५६	१	५८	०	६०	०	इयमप्यनुभयाधिक्यवती विद्धा । अत्रापि स्मार्तानामेकादश्यामेवोपवासो, वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भे० २।
धर्माधिक्यमनुद्वादश्यम् ।	५७	०	५८	०	५९	१	
विद्धपूर्णा द्वादश्यधिका	५६	१	५८	०	६०	०	द्वादशीमात्राधिक्यवती विद्धेयम् । अत्र स्मार्तैरेकादश्युपोष्या, वैष्णवैर्द्वादश्युपोष्या । हेमाद्रिमते तु सर्वैर्द्वादश्येवोपोष्या । भे० ३।
					१	१	
धर्माधिक्यमनुद्वादश्यम् ।	५८	०	५९	०	६०	१	
विद्धपूर्णा न्यूनाधिकशिवा ।	५८	५९	६०	०	५९	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भे० ४।
धर्माधिक्यमनुद्वादश्यम् ।	५७	०	५८	०	५९	०	

वैष्णवानां विद्धैकादशीभेदः ।

	दशमी घ०	प०	एकादशी घ०	प०	द्वादशी घ०	प०	
...विद्धसमा समद्वादशिका।	५९	१	६०	०	६०	०	इयमप्युभयाधिक्यवती विद्धा। अत्र स्मार्तानामेकाद-
...धर्मादिवर्ध्यमुदाहरणम्।	५७	०	५८	०	५९	०	दश्यामेवोपवासो वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः। भे० ५।
...विद्धसमाऽधिकद्वादशिका।	५७	१	६०	०	६०	०	इयं द्वादशीमात्राऽधिक्यवती विद्धा। अत्र स्मार्तैरेका-
					१	०	दश्युपोष्या, वैष्णवैर्द्वादश्युपोष्या। हेमाद्रिमते तु सर्वै-
...धर्मादिवर्ध्यमुदाहरणम्।	५८	०	५९	०	६०	१	र्द्वादश्येवोपोष्या। भे० ६।
...विद्धा न्यूनद्वादशिका।	५९	१	६०	०	५९	५८	इयमेकादशीमात्राधिक्यवती विद्धा। अत्र स्मार्तैर्गृह-
			०	१	क्ष	यः	स्थैः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वन-
...धर्मादिवर्ध्यमुदाहरणम्।	५८	०	६०	१	५८	०	स्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैः
					क्ष	यः	स्मार्तैरुपवासद्वयं कार्यमिति केचित्। भे० ७।
...विद्धाधिका समद्वादशिका।	५९	१	६०	०	५९	५९	इयमप्येकादशीमात्राधिक्यवती विद्धा। अत्र स्मार्तैर्गृह-
			०	१	क्ष	यः	स्थैः पूर्वैकादश्युपोष्या यतिभिर्निष्कामगृहिभिर्वनस्थै-
...धर्मादिवर्ध्यमुदाहरणम्।	५८	०	६०	१	५८	०	र्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैः
					क्ष	यः	स्मार्तैरुपवासद्वयं कार्यमिति केचित्। भे० ८।
...विद्धाधिकाधिकद्वादशिका	५९	१	६०	०	५	०	इयमुभयाधिक्यवती विद्धा। अत्र सर्वैः स्मार्तैर्वैष्णवै-
			१	०			श्चाविशेषेण परैवैकादश्युपोष्या। भे० ९।
...धर्मादिवर्ध्यमुदाहरणम्।	५८	०	६०	१	४	०	

इति वैष्णवानां विद्धैकादशीभेदाः ।

	दशमी		एकाद०		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धसमाऽधिकद्वादशिका ।	५९	५९	६०	०	६० १	० ०	इयं द्वादशीमात्राऽऽधिक्यवती शुद्धा । अत्र शुद्धत्वात्स्मार्तानामेकादश्यामेवोपवासो न द्वादश्यामिति माधवमतम् । हेमाद्रिमते तु सर्वैः परा द्वादश्येवोपोष्या । केचित्तु मुमुक्षुभिः स्मार्तैः परोपोष्येत्याहुः । भे० ६।
धर्मांघ्रिस्थमुदाहरणम् ।	५८	०	५९	०	६० ०	० १	
शुद्धाऽधिका न्यूनद्वादशिका ।	५९	५९	६० १	० ०	५८ क्ष:	५९ य:	इयमेकादशीमात्राऽऽधिक्यवती शुद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैरुपवासद्वयं कार्यमिति केचित् । भे० ७।
धर्मांघ्रिस्थमुदाहरणम् ।	५८	०	६०	१	५८ क्ष:	० य:	
शुद्धाऽधिका समद्वादशिका ।	५९	५९	६० १	० ०	५९ क्ष	० य:	इयमप्येकादशीमात्राऽऽधिक्यवती शुद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैरुपवासद्वयं कार्यमिति केचित् । भे० ८।
धर्मांघ्रिस्थमुदाहरणम् ।	५८	६०	६०	१	५८ क्ष	० य:	
शुद्धाधिकाऽधिकद्वादशिका ।	५९	५९	६० १	० ०	२	०	इयमुभयाधिक्यवती शुद्धा । अत्र सर्वैः स्मार्तैर्वैष्णवैश्चाविशेषेण परैवैकादश्युपोष्या । भे० ९।
धर्मांघ्रिस्थमुदाहरणम् ।	५८	०	६० १	० ०	४	०	

इति स्मार्तानां शुद्धैकादशीभेदाः ।

स्मार्तानां विद्धैकादशीपट्टः ।

	दशमी घ०	दशमी प०	एकादशी घ०	एकादशी प०	द्वादशी घ०	द्वादशी प०	
विद्धसमा समद्वादशिका ।	२	०	५८	०	६०	०	इयमनुभयाधिक्यवती विद्धा । [redacted] स्मार्तानामेकादश्या-
			क्ष	यः	-		मुपवासः । वैष्णवानां द्वादश्यामुपवासः ।
धर्मान्धिस्थमुदाहरणम् ।	२	०	५६	०	५५	०	भे० ५।
			क्ष	यः			
विद्धसमाऽधिकद्वादशिका ।	२	०	५८	०	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती विद्धा । अत्रैकादश्या विद्ध-
			क्ष	यः	१	०	त्वात् द्वादश्यामेव स्मार्तानामप्युपवासः । तत्र किमु वक्तव्यं
धर्मान्धिस्थमुदाहरणम् ।	१	०	५८	०	६०	०	वैष्णवानामिति । पूर्ववदत्र स्मार्तानां विद्धायास्त्यागः ।
			क्ष	यः	०	१	भे० ६।
विद्धाधिका न्यूनद्वादशिका ।	७	०	२	०	५५	०	इयमेकादशीमात्राऽऽधिक्यवती विद्धा । अत्र स्मार्तैर्गृहिभिः
					क्ष	यः	पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभि-
धर्मान्धिस्थमुदाहरणम् ।	४	०	२	०	५८	०	र्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं
					क्ष	यः	कार्यमिति केचित् । भे० ७।
विद्धाऽधिका समद्वादशिका ।	५	०	२	०	५८	०	इयमेकादशीमात्राऽऽधिक्यवती विद्धा । अत्र स्मार्तगृहिभिः
					क्ष	यः	पूर्वोपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्ण-
धर्मान्धिस्थमुदाहरणम् ।	४	०	२	०	५८	०	वैश्च परैवोपोष्या । विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं
					क्ष	यः	कार्यमिति केचित् । भे० ८।
विद्धाधिकाऽधिकद्वादशिका ।	७	०	४	०	३	०	इयमुभयाधिक्यवती विद्धा । अत्र सर्वैः स्मार्तैर्वैष्णवैश्चाप-
धर्मान्धिस्थमुदाहरणम् ।	२	०	३	०	४	०	रैव परैवैकादश्युपोष्या । एतदुदाहरणेऽपि स्मार्तानां वि-
							द्धायास्त्यागः । भे० ९।

इति स्मार्तानां विद्धैकादशीभेदाः ।

द्वादशी तु पूर्वैव *युग्मवाक्यात् —

द्वादशी तु प्रकर्तव्या एकादश्या युता प्रभो ।

इति स्कान्दाच्च ॥

त्रयोदशी तु *सर्वमते शुक्ला पूर्वा, कृष्णोत्तरा ।

---

*युग्मेति । रुद्रेण द्वादशीयुक्तेत्यादिः । सर्वकार्यपरमिदम् । उपवासे तु विशिष्यापि ।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति मात्स्येन पूर्वविद्धाविधानात् ।

द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी ।
चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी ।

इति वासिष्ठेन तत्रोत्तराविद्धानिषेधाच्च । *सर्वमते इति । "एकादश्यष्टमी षष्ठी" इति सामान्यत उत्तरा विहिता । 'द्वितीया पञ्चमी वेधात्' इति निषिद्धा च । एवं च—

षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा ॥

इति निगमवचनात्कृष्णपक्षे परा, शुक्लपक्षत्रयोदशी तु पूर्वा इति । सामान्यविशेषन्यायात् । एवं च—

त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने ॥

इति ब्रह्मवैवर्ते सामान्यवचनाच्छुक्लत्रयोदश्यामेव प्रवर्तते । या तु पूर्वा सा त्वपराह्णिकी ।

त्रयोदशी तु कर्तव्या या भवेदापराह्णिकी ॥

इति स्कान्दात् ।

या शुक्ला दृश्यते पूर्वा पूर्वता साऽपराह्णिकी ॥

'अघोरदशानिधिः पूर्वः तिथ्योऽप्यासितः क्षयात्' इति दीपिकोक्तेः ।

शुक्ला अघोरवी पूर्वा, परा कृष्णा अघोरवी ।

इति माधवाच्च ।

इति माधवाच्च । [illegible] । परदिने लाभे तु पूर्वा "दशम्यां तृतीया च" इति वचनात् । "नदि न दशम्यां" [illegible] इति [illegible] । अथ [illegible]—

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ॥

इति [illegible]

[illegible] ।

[illegible] ॥

[illegible]

[illegible] ।

[illegible]

[illegible]

चतुर्दशी तु सर्वमते *कृष्णा पूर्वा, *शुक्लोत्तरा । *उपवासे तु *अन्यापि परेति मदनरत्ने ।

आरभेत्तु व्रतं तत्र सन्तानफलसिद्धये ॥

इति तत्रैवोक्तेः । पृथक्कृत्यनिर्णयदीपे तु एतदेवेति प्रकाशः ।

*कृष्णेति ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित् ॥
उपवासादिकार्येषु एष धर्मः सनातनः ॥

इत्यापस्तम्बवचनात् । *शुक्लेति । "चतुर्दश्या च पूर्णिमा" इति युग्मवाक्यात् ।

सदा कार्या त्रयोदश्या न तु युक्ता चतुर्दशी ।
पौर्णमासीयुता सा स्याच्चतुर्दश्या च पूर्णिमा ॥

इति भविष्योक्तेः । *उपवासे इयमिति । व्रतोपवासभिन्ने इति शेषः । *अन्यापीति ।

एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इति वासिष्ठात् । व्रतोपवासे तु पक्षद्वयगताऽप्यापराह्णिकी चेत् पूर्वा ।

चतुर्दशी तु कर्तव्या त्रयोदश्या युता प्रभो ।
मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी ॥
दर्शविद्धा न कर्तव्या राकाविद्धा तथा मुने ॥

इति स्कान्दे "मम भक्तैः" इतीश्वरोक्तिलिङ्गेन रुद्रव्रतविषयत्वप्रतीतेः । आपराह्णिक्या अलाभे तु परा । "ता उपोष्याः परान्विताः" इति दर्शितवासिष्ठात् । यदि कृष्णा पूर्वा न लभ्यते तदा परा ।

अष्टम्येकादशी षष्ठी कृष्णपक्षे चतुर्दशी ।
अमावास्या तृतीया च कर्तव्या परसंयुता ॥

पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे ग्राह्ये।

*भूतविद्धे न कर्तव्ये दर्शपूर्णे कदाचन।
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥

इति ब्रह्मवैवर्तात् । अमायां योगविशेषमाहात्म्यप्रसङ्गे शातातपः—

अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै ।
जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत् ॥
अमा वा सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण विषुवत्सदृशं फलम् ॥

तत्रैव व्यासः—

सिनीवाली कुहूर्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात्स्नानं चेन्मौनिना कृतम् ॥

हेमाद्रौ बृहन्मनुः—

श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तकैः ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ॥

नागदैवतम्=आश्लेषा, मस्तकः=मृगशिरःप्रथमपाद इत्यन्ये । स च सर्वेषाम् ॥

इति ब्रह्मवैवर्तात् । *भूतविद्धे इति । तथा च "चतुर्दश्या च पूर्णिमा" इति युग्मवाक्यम्—

दर्शं च पूर्णमासं च पितुः सांवत्सरं दिनम् ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥

इति पूर्वविद्धाविधानं—

पूर्णिमा परविद्धा च नोपोष्यं तिथियुग्मकम् ॥

इति परविद्धानिषेधश्च सावित्रीव्रतविषयः ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

अथेष्टिकालः । गोभिलः—'पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः' इति । उपवासोऽन्वाधानम् ।

इति विष्णुधर्मोत्तरे—

षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे चतुर्दशी ।
एताः परयुताः पूज्याः पराः पूर्वेण संयुताः ॥

इति पाद्मे—

नागविद्धा च या षष्ठी सप्तम्या च तथाऽष्टमी ।
दशम्येकादशी विद्धा त्रयोदश्या चतुर्दशी ॥
भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गव ।
उत्तरोत्तरविद्धास्ताः कर्तव्याः काठकी श्रुतिः ॥

इति प्राचेमतं च तत्तत्तिथिव्रतेतरव्रतविषयमिति भावः ।

अन्वाधानं यत्र क्रियमाणं यागदेवता यजमानसन्निधौ तिष्ठन्ति तद्धीध्मादिसंपादनरूपप्रयोगारम्भः । "पूर्वेद्युरग्निं गृह्णाति, उत्तरमहर्यजति" इति, "पूर्वेद्युरिध्माबर्हिः करोति, यज्ञमेवारभ्य गृहीत्वोपवसति" इति श्रुतेः उपवास कालद्वयनियमः । इत्थं च "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत" इति श्रुतिद्वयमपरम् । अथ वा संधिपर्वद्वयवाचिपर्वप्रतिपत्समुदायलक्षणया कृत्स्नप्रयोगकालविधायिनी । "संधौ यजेत" इत्यादावपि लक्षणैव । अन्यथा संधेर्दुर्लक्ष्यत्वेन तत्र एकस्याप्यनुष्ठातुमशक्यत्वात् "संधिमभितो यजेत" इत्याद्येकवाक्यत्वाच्च । तदुक्तं बौधायनेन—

उत्पत्त्यासंधिकालस्य संधेर्विषय उच्यते ।
सामीप्यं विषयं प्राहुः पूर्वेणाह्ना परेण च ॥ इति ।

तथाखण्डपर्वणि पर्वप्रतिपद्योरुदयास्तमयस्पृक्त्वे पर्वण एवास्तमयपूर्वं समाप्तौ वा न कोऽपि विचारः । "श्रीमदानीकस्य" इत्यादिवक्ष्यमाणयागारम्भानकालयोरभावात् । तस्या

*तत्र मध्याह्ने तत्पूर्वं वा पर्वप्रतिपत्सन्धौ तद्दिने

पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते ॥

इति लौगाक्षिवचनात् । अत्र च त्रेधा विभागः

आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः ।
मध्याह्नस्तु तयोः सन्धिर्यदावर्तनमुष्यते ॥

तु आह—*तत्रेति । पर्वण आद्यपञ्चदशयमन्वाधानस्य

तचतुर्थांशसहितं प्रतिपदोऽशत्रयं प्रातरविच्छिन्नं तु यागस्य

पौर्णमासीपर्वस्तस्य यागस्य चतुरो विदुः ।
द्वावंशावुत्सृजेदन्त्यौ यागे च ब्रह्मकर्मणि ।

इति लौगाक्ष्युक्तेः । न ह्ययं स्वतन्त्रो यागविधिः । सावयवे

पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ॥

इति वचनान्तरवशाद्देशान्तरे प्रसक्त्यभावाद्, किं तु प

चतुर्थांशभिन्नांशाविति पर्युदासविषया पूर्वेद्युः । एवं प्रति

चतुर्थांशभिन्नाश्चतुर इत्यर्थः ।

न यष्टव्यं चतुर्थेऽशे यागैः प्रतिपदः क्वचित् ।
रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी ॥

इति कात्यायनं तु पर्युदाससिद्धार्थानुवादः । 'आद्याः प्रतिप

इत्येतावन्मात्रोक्तेः । न चाद्याः प्रतिपदस्त्रय इत्येव पर्युदाससिद्ध

वादः, मासे कर्मणि पर्वचतुर्थांशप्रतिपदाद्यत्रयांशप्रातःकालरूप

र्थविधायकत्वासम्भवादिति वाच्यम् । "अर्द्धमन्तर्वेदि अर्द्धं ब

मिनोति" इति न्यायेन एकस्य सन्धिपार्श्वद्वयवर्तिस्थूलकालवि

विधानात् । न हि पर्वचतुर्थांशप्रतिपदाद्यभागत्रययोः वि

विधेयत्वम् । तथा सति एकवाक्योपादानात् कालद्वयसमुच्चये

इति मदनरत्ने वचनात् । मध्याह्नादूर्ध्वं सन्धौ अमा-वस्यान्ते परेऽह्नि यागः ।

अपराह्णेऽपि वा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥

इति लौगाक्षिणोक्तेः । *हेमाद्रिस्त्वपराह्णसन्धाय-यित्वे परदिने प्रतिपच्चतुर्थांशे चन्द्रोदये च सति द्विती-यादिदर्शनलक्षणे सति पूर्वेद्युर्यागः ।

पर्वणोंऽशे द्वितीये तु यष्टव्यं तु द्विजातिभिः ।
द्वितीयासहितं यस्माद् दूषयन्त्याश्वलायनाः ॥ इति ।

द्वितीये स्थिते कैमुतिकन्यायेन तुर्यांशपरम् । तु-रीये स्थिते शूलपाणौ पाठः स्पष्टार्थ एव । तथा—

भूता पञ्चदशी पूर्णा द्वितीया क्षयगामिनी ।
चतुरिष्टिरमायां स्याद्भूते कल्यादिकी क्रिया ॥

इति बोधायनवचनापस्तम्बविधानात् । मदनरत्नेऽपि—

पौर्णमास्यां *"इतिवदद्भुतकर्माद्यापत्तेः । प्रातरिति तु वाक्य-भेदेन, पौरुषवाक्यं तस्यादोषत्वात् अवच्छेदकं वा प्रातरवच्छिन्न इत्यर्थात् । अधिकमन्यतोऽवगन्तव्यम् । *माधवमते इति । एतन्मतेऽमायां द्वितीया त्रिमुहूर्ता चेदित्यादि दर्शयिष्यति । तत्र हेमाद्रिमतं दर्शयति—*हेमाद्रिस्त्विति । *अपराह्णसंधाय-यीति । "द्वितीया त्रिमुहूर्ता चेत्"इत्यादीन्यापस्तम्बसाभिकृतापराह्णे-ऽमाप्रतिपत्सन्धिपराणीति तन्मतम् । *परदिने इति । अय-मर्थः—द्वितीया त्रिमुहूर्ता चेदित्यग्रिमवाक्याद् द्वितीयैव यागनिवर्तिका न चन्द्रदर्शनं, मेघादिना व्यभिचारात् । "परतः सोमदर्शनात्" इति हेतूक्तिस्तु चन्द्रोदयो लक्ष्यते । स च प्रतिपद्दृश्याने भवती-ति चन्द्रदर्शनयोग्यतालक्षणायामत्यन्तक्षयानुधावनम् । *तुरीये स्थिते । तृतीयांशस्यापूर्वविधिः । द्वितीये स्थिते पाठे तु कैमु-

चतुर्दशी चतुर्यामा अमावास्या न दृश्यते ।
प्रयोमते प्रतिपदेऽस्यात्* पूर्वा तत्रैव कारयेत् ॥ इ

निरुक्तन्यायेन तृतीयासि तात्पर्यम् । द्वितीयायाः क्षीणत्वं कांक्षमित्यथ ह-*भूतामिति । भूतस्य पूर्णत्वं निषन्न, न पञ्चदश्या इत्याह-चतुर्दशीति । अमावास्या चतुर्यामा न दृश्यते इत्यन्वयः ।*पूर्वामि अयं च प्रधानकालः । तदनुरोधेन चतुर्दश्याममावास्यायां कार्यम् । 'भूतन्यादिकौ' इत्यादिपदात् । अयं दर्शकात्ययोक्तं-हेमाद्रिमते प्रतिपद परादिकेऽपराह्णस्पर्शस्य द्वयोरभावादिनान्तरदर्शनाभिरापत्ति पूर्वस्यामाह त्रिमुहूर्तद्वितीयामर्शने चन्द्रदर्शने सति पर्वणीतरा रात्रिमध्याप्ति परादिने प्रागानिरवधारितः । न चापराह्णस्पर्शाभावे कैमुतिकन्यायेन रात्रिमध्यागपि परदिने प्राप्तिसिद्धौ "अपराह्णे वा रात्रौ" इति रात्रिग्रहणं व्यर्थं स्यादतश्चन्द्रदर्शननिषेधक एव रात्रिग्रहणमत्र सार्थकमिति वाच्यम् । अपराह्णस्पर्शेन योगेनापि रात्रौ सम्भवाभिधाने कैमुतिकन्यायेन तस्यार्थस्य सिद्धौ त्रिमुहूर्तमात्रं पञ्चदशकादिनचतुर्थभागरूपापराह्णव्यापित्वे द्वितीयादिव्याप्ति चात् । एवं च सोमदर्शनादिति हेतुक्तिः सङ्गच्छते, न तु सायाह्ने त्रिमुहूर्तव्याप्तौ । तत्र चन्द्रदर्शनस्य व्यभिचारात् । एतच्च दिवाराम्भोऽ वश्यंवर न रात्रिगतौ । परिगृह्यमाणः सायाह्नस्य सम्भवात् । मनु दिनद्वितीयभाग इति, तत्र । पौर्णिमास्यादिव्याप्तिकर्मणः पर्वद्वयेऽपि पार्वणापित्वेनैव प्रायश्यात् । तन्निमित्तं तद्वै दिवसव्याप्तिगुणा पूर्वाह्णापराह्णव्याप्ती मध्याह्नदृश्य तथा तत्र ।

[illegible]
[illegible]
[illegible]
[illegible]

यत्तु माधवः—

यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात्पुरा ।
*न क्वाप्यन्वाहितिः, किं तु सदा सन्धिदिने हि सा ॥

इत्याह ।

*तथा कालादर्शेऽप्युक्तम्—

आवर्तनादधः सन्धिर्यद्यन्वाधानं तद्दिने ।
परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः ॥ इति ।

यत्तु मदनरत्ने—

मध्यन्दिनात्स्यादहनीह यस्मिन्
प्राक्पर्वणः सन्धिरियं तृतीया* ।
सा व्यर्थिका वाजसनेयिमुख्या
सत्यामुपोष्याऽथ परेद्युरिष्टिः ॥ इति ।

तत्पौर्णमासीपरमिति तथैव । *आवर्तनोर्ध्वमर्वा-
गस्तमयात्सन्धौ वा समाप्तौ द्वे मध्याह्नादर्वाक् समाप्तौ तृती-

---

आवर्तनात्परः सन्धिर्यदि तस्मिन्नुपक्रमः ।
परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः ॥

इति गोभिलवचने 'अर्वागावर्तनात्' 'आवर्तनात्पर' इति श-
ब्दद्वयस्वारस्यात् 'आवर्तनात्तु पूर्वाह्ण' इति ग्रन्थस्थवाक्यमपि पौर्णि-
मास्यनुवादो, न तु परिभाषा । येन तद्व्याख्यानपरादौ द्वैधावि-
भक्तदिनारम्भाणां भवेत् । तस्मात् दिनसन्धौ परदिने यज्ञयावि-
भक्तदिनचतुर्थभागरूपसङ्गवपराह्णयोर्विभीदायसंधे चतुर्दश्यन्व-
न्वाधाने, सन्धिदिने याग इति । 'पर्वणोऽह्नि तृतीये तु' इत्यादिवच-
नमपि पाक्षानुकूल्येनैव । न क्वापीति । तस्य पर्वद्वयेऽपि चतुर्दश्यन्व-
न्वाधानशास्त्रस्य त्याग इत्यभिप्रायः । तथेति । चन्द्रदर्शननिषेधप्रा-
प्तिरित्यभिप्रायः । तृतीयेति पूर्वार्धवाक्यसमुदायार्थमाह—*आवर्त-
नोर्ध्वमिति । पौर्णमास्यामेव वाजसनेयिनामेव एतद्वाक्येन

अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्धुकं भवति' इति । *श्रुत्यन्तरेऽपि—'यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजाग्निमाँल्लोकानभ्युदेति' इति । इदं बह्वृचापस्तम्बविषयम् । मदनरत्नेऽप्येवम् । *आपस्तम्बभाष्यार्थसङ्ग्रहेऽप्येवम् । *अतः पक्षद्वयस्य स्वस्वसूत्रानुयायिस्येति तत्त्वम् । *'तृप्यन्त्याश्वलायनाः' इति तु *पूर्वाह्णसन्धिविषयमिति माधवः ।

---

*तैत्तिरीयेति । *श्रुत्यन्तरे=ऐतरेयब्राह्मणे । *आपस्तम्बेति । तत्र च कारिकाः ।

अपराह्णेऽथ वा रात्रौ यदि पर्व समाप्यते ।
उपोष्या तत्र राका स्यात् सा पूर्णोत्सवलक्षणा ॥
पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्याऽनुमतिस्तत्र सा श्वःपूरितलक्षणा ॥
अपराह्णे क्षपायां वा यदि पर्व समाप्यते ।
उपोष्या तु कुहूस्तत्र यदर्दनेति लक्षणा ॥
पूर्वाह्णे वाऽथ मध्याह्ने पर्वसन्धिर्यदा भवेत् ।
तत्रोपोष्या सिनीवाली श्वो न दृष्टारलक्षणा ॥ इति ।

पौर्णमासीवदेवामावास्यानिर्णयकरणादेतन्मते चन्द्रदर्शनेऽपि अमावास्यायां न निषेध इति ज्ञायते । *अत्र इति । तैत्तिरीयब्राह्मणादिविहितविशेषागमाच्चन्द्रदर्शनादिने यागनिषेध आश्वलायनानां स्वसूत्राभिमन्त्रितस्य इति भावः । नन्वन्यायानेऽपि "यदहरेव चन्द्रमा न दृश्येत तामामावास्यां कुर्वीत" इति चन्द्रदर्शनस्य पर्युदस्तत्वात्कथं तत्र तदनुष्ठानम् ? । सत्यम् । द्वयोरपि चन्द्रदर्शनरहितं दिनमेवाभिमतम् । यदा खण्डपर्वणि पूर्णायां प्रतिपदि च तत्संभवति । यदा त्वेकस्मिन्नेव दिने चन्द्रादर्शनं तदा द्वयोः स्वकालस्यासम्भवाद् इष्टगुणविशेषान्वयेन चन्द्रादर्शनदिने यागः, पूर्वस्मिंश्चन्द्रदर्शनदिने

दोषपर्वणोरन्यौ विशेषमाह माधवीये गार्ग्यः—

प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते ।
पुनः प्रणीय कृत्स्नेष्टिः *कर्तव्या यागवित्तमैः ॥

*सूत्रकारैर्नायं नियम इति मदनपारिजातः । *एवं

यान्वाधानं कार्यम् । 'इष्टयामेऽप्येके'' इति गोभिलोक्तेः । ''तद्वैके दृष्टोपवसन्ति'' इति श्रुतेश्च । एके दृष्टोपवसन्ति तदयुक्तमिति तदर्थः । ''एके'' इति न पाक्षिकाभिप्रायं, किं तु परदिने यागानुष्ठानाभिप्रायम् । तस्मात् ''यदैवैनं न पुरस्तान्न पश्चाद्ददृशे तदहरेवोपवसेत्'' इति श्रुतिश्च पर्वप्रतिपदोः पूर्णताविषयिकेति ।

नवीनास्तु तैत्तिरीयादिश्रुतिषु चन्द्रदर्शने प्रसक्तो न यागं विधत्ते किं तु स्तौति । स्तुत्या तु न विधिः कल्पयितुं शक्यते । चन्द्रादर्शने यागविधायकप्रत्यक्षश्रुतिविरोधात् । स्तुतिश्च तादृशप्रत्यक्षविधिशेषत्वेन अतिप्रशस्तमपि चन्द्रदर्शनदिनं चन्द्रादर्शनदिनाद्धीनमेवेति यागविधिशेषतया जातिलक्षणपुरुषस्तुतिवत् । अस्तु वा विधिः, परं तु रात्रिसन्धौ क्षयोभूते चन्द्रदर्शनदिने याग इति तद्विषयक इत्याहुः ।

प्रकृतमनुसरामः—ननु चन्द्रदर्शनेऽपि यागानुष्ठाने ।
द्वितीयासहितं यस्मात् दूषयन्त्याश्वलायनाः ॥

इत्यसङ्गतं स्यादित्यत आह—*दूषयन्तीति । *पूर्वाह्णेति । आवर्तने तत्पूर्वसन्ध्योरन्यो विहाय परेद्युः पूर्वचतुर्थांशे याग इत्यर्थः । न त्वपराह्णसन्धौ परेद्युर्यागे दोष इति भावः । इष्टौ सुपाक्षायां विशेषं भाष्याश्रितं—प्रणीय अग्निम् । *कर्तव्येति । एतद्वचनेन ब्राह्मणभोजनादिः कश्चन पदार्थः प्रतिपदि कार्य इति रहस्यमनुसन्धेयम् । ततो माध्यन्दिनकालमुपक्रम्य इति स्पष्टयितव्यम् । *गृह्याग्नेरिति । इष्टिपदस्वारस्यात् । अंशेयमरुचिः—

नामकर्म च कुर्वीत यथाकालं समाचरेत् ।
अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे ॥

इत्यपरार्के गर्गवचनादिति प्रयोगपारिजाते । एतं चैतत् प्रयोगरत्ने भट्टैः । कालादर्शे तु—'नामकर्म च जातके(?)' इति पाठः ।

[illegible]स्तु—

[illegible] पौर्णमासि [illegible] ।
[illegible] कुर्वीत कदाचन ॥

इति त्रिकाण्डमण्डनवचनात् [illegible] तत्र विप्रतिपत्तिः [illegible] कुर्वीदित्याहुः । कालादर्शे स्मृतिसंग्रहेऽपि—

[illegible] दर्शपूर्णमासयोरिष्टिमध्ये [illegible] ।
[illegible] तत्र कुर्वीत मलमासे विवर्जयेत् ॥ इति ।

अथ [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible], न तु [illegible] [illegible] । तथा च [illegible] [illegible], [illegible] वृद्धिरिति । तत्र—

[illegible] ।
[illegible] ।

इति [illegible] । [illegible]

[illegible]

अत्र विधुर्नीतिः । मण्डनाचार्य—'यदीच्छा यदि स्युः यदि कर्मणः करणे मोंप्यावासान्तं पौर्णमा-सी च' इति । अत्र स्मृतिभिः कालं निषेधेऽपि सत्-स्वात्मना विधेया । पूर्वोक्तः प्राह्णरेवेति । अत्र पौ-र्णमास्यन्तरावस्थानादमावास्यां तदन्तराले पूर्वाह्णे । तत्र तदन्तरालेऽत्र इत्यर्थमाह रामाण्डारः । माधवोऽपि—

इष्ट्यादिविकृतिः तत्र पर्वण्येवेति निर्णयः । इति ।

अत्र विशेषमाह त्रिकाण्डमण्डनः, कात्यायनश्च—

आवर्तनात्प्रागपरेऽह्नि पर्वस्विष्टिः

पूर्वाह्ने तु नासिकप्रकृतिं विकृत्याः ।

तदैव यागः, परतो यदि स्यात्

तन्निमित्तविकृत्याः प्रकृतेः परेद्युः ॥ इति ।

पूर्णमास्यादर्शयोऽस्पष्टमाहुः । 'यदीच्छा' इति स्मा-र्तया विकृतेः पर्वकालत्वादावर्तनात् प्राक् तस्यां 'स-

वात्यायार्थीनामावात्वादिविकाराणां यावावस्थावाविवेति मान्त्र-वचनाद्धः । न च बाधकेद । इष्टिवत्पूर्वेद्युरनुगतस्य यागस्यो-देवतावचनत्वात् पौर्णमास्यमावास्ययोरनुगतस्य पर्वद्वय-विधानावबोधत्वात् । अत्रेति । तथा च पर्वान्त्यप्रतिपद्योराम इत्यर्थाद् 'आवर्तनात् प्राक्' इति वचनमनावश्यकमित्यभिधानः । वस्तुतस्तु पौर्णमास्यमावास्ययोरितिविधायिनोर्न सङ्गता युक्ता । 'न विधौ परः शब्दार्थः' इति न्यायात् । तन्निमि-त्तेति । प्रातःकालत्वनिर्देशात् प्राह्णस्य विकृतिः, ततः प्रकृते-रपक्रमः, तस्यां चापराह्णसायंकालत्वात् । आवर्तनादिनिरासस्य प्राकृतसंबन्धार्थमर्थं पूर्वदिवसे पौर्णमास्यमावास्याद्यर्थमाह-तत्परेद्युरिति । तत्रावर्तनात्प्राक् सन्ध्यायामिति । अयं भावः-आवर्तनात्प्राक् सत्येः प्रकृत्यविकृत्योरनयोः पर्वणो विकृत्यपिकार-

निश्चयमितो यजेत'इति प्रकृतेः प्रतिपदि समाप्तिनिय
मात् । प्रकृत्यनन्तरं प्रतिपदि विकृत्युपयोगात् पूर्वेद्यु
र्विकृतिरित्युक्तं तन्त्ररत्ने पार्थसारथिना । यद्वा
०'प्रकृतेः पूर्वेद्युरपूर्वमन्ते स्यात्'इत्यापस्तम्बेनोक्तम्

नन्वपुत्रेः,

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।

इति स्मृतेरत्र प्रकृतिविकृतिनिर्वापानुरोधेन तद्दिन एवाभा
कर्मण्याप्तिसिद्धेः कथमाकाङ्क्षायां पूर्वेद्युरेव कथं विधीयते, न [illegible]
[illegible] प्रवर्तते; पुनरर्थाधिकरणन्यायात्[illegible]
किं तु [illegible] पूर्वेद्युरेव विकृतिः, तद्दिने
[illegible] ०प्रकृतेरिति । न च [illegible]
"[illegible] तु [illegible] विकृतयः" इति प्रकृतित्वम[illegible]
[illegible] कर्मत्वाभावात् प्रतिपद्विकरण[illegible]
[illegible], न तु [illegible] वाच्यम् । पुनरर्थाधिकरण[illegible]
[illegible] । यदुक्तं-'प्रतिपदि विकृत्युपयोगात्'इति । [illegible]
[illegible] एव प्रकृतेः पर्वाधिकरणत्वेन विकृते[illegible]
[illegible] एव [illegible] । न च प्रकृतेः प्रति
[illegible] विकृतिः ?, 'न कर्मणि कर्माण[illegible]
[illegible] । न हि न कर्मणीत्यत्र [illegible], किं तु [illegible]
[illegible] । न [illegible] प्रतिपत्तौ विकृत्यनुरा
[illegible] । अन्यथा [illegible] वा [illegible]
[illegible] न स्यात्, न [illegible]
[illegible]
[illegible]
[illegible]

तथाऽपि हेतुवादेन श्रुतिमूलत्वाभावादग्राह्यं वा समभिव्याहाराद्विनिबद्धप्रामाण्यमिति तदाशयः । आग्रयणे तु विशेषं वक्ष्यामः । 'अन्वारम्भणीया तु चतुर्दश्यां कार्या' इति हिरण्यकेशिसूत्रे मातृदत्तीये । *अन्येषां पर्वण्येव ।

पशौ सोमे च कालान्तरमप्याह बौधायनः—'अमावास्येन वा हविषेष्ट्वा नक्षत्रे वा' इति । शुक्लपक्षे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेष्विति केशवस्वामी दर्शपद्धतौ । चातुर्मास्येष्वपि *आद्यस्यादिमप्रयोगपक्षयोर्नक्षत्रेष्वप्यारम्भः । यावज्जीवसांवत्सरप्रयोगयोस्तु फाल्गुन्यां चैत्र्यां वाऽऽरम्भः । पशौ तु विशेषमाह कात्यायनः—

अर्वागह्नो भवति नियतं पर्वसन्धिः परस्तात्
कृत्वा तस्मिन्नहनि तु पशुं सद्य एव प्रपद्ये वा ।

कृत्यनुष्ठाननियमविधानः । *अग्राह्यं वेति । "पितृयज्ञः स्वकालविधानादनङ्गं स्यात्" (जै० सू० ४ । ४ । १९) इति सिद्धान्तसूत्रात् । *अन्येषामिति । निरपेक्षपर्वत्वेन प्रधानपरतन्त्रत्वात् । तद्विशेषेण पर्वापेक्षणात् । एवदारम्भ्यादीनां तु निर्वापानन्तरमनुष्ठाने च न पर्वापेक्षा । तदसम्भवे तु जातेष्टिवत् । जातेष्टिर्य शेषविरोधेन निर्वापानन्तरमसम्भवात् पुत्रजन्मकालमतीत्यायां पितुर्मातुश्च दशविंशतिरात्रातिक्रमे पर्वणि अनुष्ठेया । हविर्दोषादिनैमित्तिकान्यर्थेष्टयस्तु हविर्दुष्टेरनन्तरं सान्निपत्यस्तुपः प्राक् निर्वापस्पर्शौ तन्त्रमुपजीव्य निर्वापयन्ति तदानीमेव, सम्मिष्टपशुषोऽनन्तरं स्मरणे तु तत्प्रयोगं समाप्येति । *आद्यस्यादिति । आद्येऽह्नि वैश्वदेवं पर्व, चतुर्थे वरुणप्रघासान्, अष्टमनवमयोः साकमेधं, द्वादशे शुना-

आरभ्याऽथ प्रकृतिरथ चेत्पर्वसन्धिः पुरस्तात्
कृत्वा तस्मिन् प्रकृतिमथ तु स्यात्पशुः सद्य एव ॥

'अधिकारपशुस्त्वग्नीषोमीयेण सवनीयेन वा समानतन्त्रः कार्यः' इति त्रिकाण्डमण्डनः ।

सोमे त्वाश्वलायनः—'अमावास्यायां दीक्षायजनीये वाऽमावास्यायां *यजनीये वा सुत्यमहः, पौर्णमास्यां दीक्षायजनीये वा पौर्णमास्यां यजनीये वा सुत्यमहः' इति । कात्यायनसूत्रेऽपि—'पूर्वपक्षस्य प्रथमेऽहनि दीक्षेत दृष्ट्वा वा नक्षत्रयोगम्(१)' इति । पूर्वपक्षः=शुक्लपक्षः । नक्षत्रयोगे चेति । अयमर्थः—चैत्र्यादिपूर्णिमायामश्विन्यादिनक्षत्रयोगे दीक्षेतेति । आधानं तु पर्वणि नक्षत्रेषु चोक्तम् । तत्र पर्व 'नक्तं गार्हपत्यमादधाति' इत्यादिकर्मकालव्यापि ग्राह्यम् । द्विव्याप्ते तत्र परं ग्राह्यम् । सङ्कल्पस्य पर्वणि लाभात् । पूर्वनक्षत्रयोगे तदेव ग्राह्यम् । 'यत्र त्रीणि सन्निपतितान्यृतुर्नक्षत्रं

सौरीयमित्येकः पक्षः । क्रमेण पर्वचतुष्टयमिति द्वितीयः । फाल्गुन्यां पौर्णमास्यामारभ्य चतुर्षु मासेषु क्रमेणैकैकं पर्वस्येवं पावसं यमिति तृतीयः । एकपर्व तथा कृत्वा सवनेष्टिवत्सोमान्यतमेन यजेदिति तुरीयः । एकाग्रचातुर्मास्यप्रयोगेऽपि कात्यायनेनोक्तः—'अपि वाऽन्येकपर्वणि' इति । *यजनीये चेति । यदि ज्योतिष्टोमादिप्रारम्भात्पूर्वं पञ्चदशाहोरात्रमध्यमिति पाक्षिकमेतदर्शनमपूर्वमध्योक्तमेव । तथा च त्रिकाण्डमण्डनः—

ग्राह्यपर्वणि सोमश्चेदतिपत्तिश्चपर्वणि ।
मांसपूर्णा यथाकालमेव पौर्णमासी श्रुतिः ॥ इति ।

दीक्षामासकल्पे तु पूर्णाः तिथिरेवाङ्गत्वेन विधानाभावाय सोम-

(१) मुम्बईमुद्रितपुस्तके 'नक्षत्रयोगे वा' इति पाठः ।

पर्वं च, नासत्यं. विद्यनिषेधे ऋतुर्नक्षत्रे च वर्जितः' इति त्रिकाण्डमण्डनात् । आपः 'वसन्ते ब्राह्मणोऽग्नीनादधी-त' इत्यादिः । देवलकारिकायां तु—

मासादिनियमो नैव आधाने चाहिताग्नये तथा ।
सोमेष्टीर्वे तृतीयादौ आधानमथ कारयेत् ॥

इत्युक्तम् । अत्र मूलं मृग्यम् । आधाननक्षत्राणि कात्यायनसूत्रे 'कृत्तिका-रोहिणी-मृगशिर-पुनर्वसु-पूर्वोत्तरा फाल्गुनी-हस्त-चित्रा-विशाखा-ऽनुराधा-श्रवणो-त्तराभाद्रपदा' इति । सोमपूर्वाधाने विशे-षमाहाऽऽपस्तम्बः—'सोमेन यक्ष्यमाण आदधानो नर्तु-न्नक्षत्रेण यक्ष्येत' इति । अत्र यजमानस्याधानकालबा-धः । ॰अनेन सोमस्य यजमानकालता न बाध्यते' इति ह-हृदयदत्तनारायणवृत्तौ चोक्तम् । ॰तन्त्ररत्ने पार्थिके च—'ते वा एते उभये अपहतपाप्मानो ऋतवः । एष वा ऋतुमादित्य एषां पाप्मनोऽपहन्ता । यद्येनं कदाचन यज्ञ उपनमेदथादधीत' इत्यत्रोत्तरायणरूपं दैवं, दक्षिणा यनरूपं च पित्र्यमित्युभयमप्युभयं सोमाधाने शतपथे विहितत्व विहितम् । तदेकवाक्यतया शाखान्तरेऽपि 'न-र्तुम् पृच्छेत्'इत्यत्र सोमकालबाध एव । आधानकालबाध-

---

संविपूर्वेणुरेव भूयः प्रयोगैकदेशवाक्यैरिति । ॰आधानकालः=पर्वन-क्षत्रादिः । ननु ऋतुनियमो कर्कदत्तादिभिराश्रित इत्यत आह—॰तेने-ति । मीमांसकानामपि ऋत्वनियमः सम्मत इत्याह—॰तन्त्ररत्ने चेति । तत्र हि 'ते वा एते अपहतपाप्मान ऋतवः । एष वा ऋतुमादित्य एषां पाप्मनोऽपहन्ता, यद्येनं कदाचन यज्ञ उपनमेदथादधीत' इति शतपथे उत्तरायणरूपं दैवं, दक्षिणायनरूपं पित्र्यमित्युभयमप्यपहत-पाप्मत्वं परीक्ष्याकृतया सोमाधाने विहितम् । तदेकवाक्यतया शाखा-

स्य 'यदेवैनं श्रद्धोपनमेत्तदाऽऽदधीत' इति तस्यां शाखायां वाक्यान्तरेण सिद्धत्वात्सोमकालबाधार्थमेवेदमित्युक्तम्। धूर्तस्वामी तु सोमस्यापि च ऋतुनक्षत्रापि 'न सूर्क्षेत्'इति लिखनादुभयकालबाधं मन्यते। श्रीरामाण्डारस्तु काला-

---

न्तरेऽपि 'न ऋतून् सूर्क्षेन्'इत्यादौ सोमकालबाधः। 'यदेवैनं श्रद्धोपनमेद्याऽऽदधीत'इति तच्छाखास्थवाक्यान्तरेणाधानकालबाधस्य सिद्धत्वादेतस्य सोमकालबाधार्थत्वमिति। द्विगर्थस्तु उदगयनादेः प्राशस्त्यमात्रम्। न चाग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे

उपक्रम्य यथाकालमुपासीरन् द्विजातयः।
सोमं च पशुबन्धं च सर्वाश्च विकृतीरपि॥
सौम्यायने यथाकालं विदध्युर्गृहमेधिनः॥

इतिवचनादुदगयननियम इति वाच्यम्। तद्यथा पशौ काम्यपरम्, अन्यथा 'पशुः प्रसवनं तथा'इत्यनेन विरोधात्; तथा सोमेऽपि तत्सहचारात्। अत एवाग्निहोत्रादिकमपि काम्यमेव, न तु नित्यमपि। ब्राह्मणाधिकारिकस्य तस्य नित्यमासत्वात्, वैश्याद्यधिकारिकस्य च यावज्जीवश्रुत्याऽनन्तरसायङ्कालादावेव प्राप्तेर्बाधात्। उपक्रम्येति तु द्वितीयादिप्रयोगेऽनियमार्थम्। केचित्तु आधानानन्तर्यमनपेक्ष्यापि सर्वसोमानुष्ठाने कालबाधमाहुः। 'वसन्ते ब्राह्मणोऽग्निमादधीत'इति सूत्रोत्तरं 'कृत्तिकास्वादधीत'इति सूत्रम्। तथा च विकल्पः, न तु समुच्चयः। तथा सति'वसन्ते कृत्तिकास्वादधीत'इत्येव सूत्रयेत्। एवं सोमेऽपि ऋतुनक्षत्रयोर्विकल्प इति श्रीकुमारः। 'सोमेन यक्ष्यमाणो नर्तून् सूर्क्षेन्न नक्षत्रमिति, तदेतस्यार्तस्यातिवेलं वा श्रद्धायुक्तस्य'इति सूत्रम्, तदार्तस्यैव विशिष्टश्रद्धालोरप्यधिकारार्थं वाशब्दात्। तत्र केवलाधानेऽपि ऋतोर्नादरः 'यदहरेव विरजेत्' इतिवत् 'यदेवैनं श्रद्धोपनमेद्याऽऽदधीत'इति श्रुतौ यदैवैनमित्युक्तेः श्रद्धायाः सामान्यतोऽङ्गत्वेऽपि इहाधिकारितावच्छेदकत्वं'यदेव श्रद्धया करोति'इत्यादा-

न्तरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तत्वात् । तत्राद्ये कृत्तिकादिकालान्तरस्य यथा आधाने वसन्ताद्यबाधेन विधानम्, तथा 'सोमेऽप्युदगयनपूर्वपक्षपुण्याहसंनिपाते यज्ञकालो नादेयः' इति च्छन्दोगसूत्रोक्तोदगयनाद्यबाधेन सोमाग्निसाध्यरूपकालान्तराविधानादुदगयनं स्यपेक्ष्यत इत्युक्तम् । द्वितीयपक्षे तु 'यदैवैनं यज्ञ उपनमेत्' इति सर्वकालानादर उक्त इति भारद्वाजसूत्रस्थसर्वशब्दस्य च विश्वजित्सर्वपृष्ठ इतिवद्योग्यपर्यायात् सर्वकालपरत्वम् इति । तेन दक्षिणायनेऽपि भवतीत्युक्तम् । यद्गुरुभाष्ये देवस्वामिभाष्ये धन्वदत्ते च यद्यपि क्रतुषु भवतीत्युक्तमिति दिक् ॥

श्राद्धे त्वमावास्या मेषादिभक्तदिनतृतीयांशे योऽपराह्णभागस्तद्व्यापिनी ०साग्निकैर्ग्राह्या।

विव । आर्तस्येति तु सद्यस्कालापानपरत्व । 'तदहर्विदधीत पौर्णमास्यां सद्यस्कालम्' इति कर्मान्तसूत्रात् ।

प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ।
कर्तव्याऽऽग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥
एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः ।

इति वैश्वानरी तु प्रत्याम्नायत्वात्तत्कर्मकाल एव । संस्थावाजपेयस्य तु वसन्तः कालः । आधानकाल एव गुणानां प्रवृत्तेः । अन्यस्य तु तस्य शरदादिरित्यन्यत्र विस्तरः । ०साग्निकैरिति । अन्वाधानपिण्डपितृयज्ञश्राद्धान्वेवकादिने अनुष्ठातृभिरिति शेषः ।

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

इति वचनात् । एतेनान्वाधानादिमपरेद्युः कर्तव्यत्वार्थ

*पिण्डान्वाहार्यकं श्राद्धं *क्षीणे राजनि शस्यते।

दीपीपराह्णापेक्षणात् । एवं च तृतीयांशे योऽपराह्णभाग इत्यस्य सतिसप्तमीत्वात्तृतीयांशापराह्णभागयोरैक्ये तात्पर्यं, पञ्चधाभागस्यामपेक्षात् । *पिण्डान्वाहार्यकं=पिण्डपितृयज्ञोत्तरक्रियमाणं दार्शम् । तच्च तत्प्रख्यन्यायेन कर्मनामधेयम् ।

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

इति मानवेन तथैव प्रत्तेः । मासानुमासिकं=मासे मासे भवं वीप्सापर्यायत्वात् । तेनावश्यकर्तव्यतासिद्धिः । यत्तु-

पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं द्विजोऽग्निमान् ।
पिण्डान्वाहार्यकं कुर्याच्छ्राद्धमिन्दुक्षये सदा ॥

इति मात्स्यं, तत्पिण्डदानरूपपितृयज्ञासमर्थस्यानुकल्पेन तर्पणरूपतत्परम् । न चेह-

एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके ।

इत्युक्तं ब्राह्मणभोजनमत्र पितृयज्ञोऽस्त्विति वाच्यम् । तस्य दार्शेन प्रसङ्गसिद्धेः पृथगसत्त्वात् । न च-पिण्डाः=पितरः

तत आरभ्य पितरः पिण्डसंख्यां तु लेभिरे ।

इति मात्स्यात् । तेषामन्वाहार्यं=तत्सम्बन्धिपिण्डभक्षणमिति कुतो नार्थ इति वाच्यम् । सर्वस्मृतिषु पिण्डैकदेशभक्षणविधिदर्शनात् । अत एव-

यस्मादन्वाहृता मात्रा भक्षयन्ति द्विजातयः ।
अन्वाहार्यकमित्युक्तं तस्मात्तच्चन्द्रसंक्षये ॥

इति मात्स्यम् ।

पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः ।
तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥

इति मनुक्रमप्रकारविशेषानुष्ठानपरमित्युक्तमाकरे । *क्षीण इति ।

यामस्य तृतीयांशे *नातिसन्ध्यासमीपतः ॥
इति कात्यायनोक्तेः ।

*दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितम् ।
अपराह्णे पितॄणां च तत्र दानं प्रशस्यते ॥

इति शातातपोक्तेश्च । *दिनद्वये तत्सत्त्वे सर्वापराह्णव्यापी दर्शो ग्राह्यः । 'यद्युभयेद्युरेव विहितः सर्वोऽपराह्णस्थितः' इति दीपिकोक्तेः ।

चन्द्रक्षयकालः प्रशस्तः । सर्वोऽपि । *नातीति ।

सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा प्रोक्ता गर्हिता सर्वकर्मसु ॥

इति निषेधात् । ततश्चैकादशद्वादशमुहूर्तयोरेव पिण्डान्वाहार्यं तीय-मयमं पितृयज्ञं कृत्वा श्राद्धोपक्रमात् । शिथिलयकृतेस्तु तत्पूर्वमावि-दशममुहूर्तेऽपि तदुपक्रम इत्याशयेनाह—*दर्शेति । अपराह्णः पञ्चधा-विभक्तदिनचतुर्थो भागः । वस्तुतस्तु पितृयज्ञादिश्राद्धानुष्ठानार्थं दिवसतृतीयभागरूपापराह्णोऽपेक्षितः । तत्रान्त्यमुहूर्त एव नाती-त्यनेन पर्युदस्यते । सायाह्न इति वाक्यं स्वोद्देश्यविषये हेय-मेव । एवं च दशममुहूर्तादिरपराह्ण इत्यवगतमिति दिक् । अत्रोक्तदीर्घापराह्णे न पञ्चधाः त्रिमुहूर्ताधिकत्वपक्षयोरभावेन कृत्स्नकालव्याप्तितदस्पर्शपक्षयोरसंभवात्, किं तु षोढैव । तत्रैकस्मिन् दिने कार्त्स्न्येन व्याप्तिर्द्विविधा—इतरदिनेऽपराह्ण-स्पर्शेन तदस्पर्शेन [redacted] । उभयव्याप्ते द्विधा-पूर्वेद्युरेव कृत्स्न-व्याप्तिः, परेद्युरेव वा । तत्र या पूर्वेद्युरेव कृत्स्नकर्मकालव्यापिनी उत्तरादिने तदेकदेशमपि न स्पृशति सा पूर्वैवासंदेहात् । या च पूर्वेद्युरेव कृत्स्नकर्मकालव्यापिनी उत्तरादिने तदेकदेशं स्पृशति, सा द्वेधा—परदिने चन्द्रस्य दर्शनात्, तददर्शनाद्वा । तत्राद्यामभिप्रेत्याह—*दिनद्वये इति । अन्त्यायां तु परदिने चन्द्रादर्शनात् प्रतिपदेव

*यत्तु कार्ष्णाजिनिः—

भूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा ।
श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते ॥ इति ।

तदपराह्ण* चतुर्दशीवेधपरमिति श्राद्धहेमाद्रिः *अपराह्णाव्याप्तिपरमिति माधवः । *दिनद्वयेऽपराह्णव्या·

याग स्तदाऽन्वाधानानुरोधेन श्राद्धमप्येकदेशव्याप्तिदिन एव कार्यम् । त्रयाणामेककालत्वनियमात् । तथा हि–'पक्षान्ता उपवस्तव्याः' इत्याद्युपक्रमकं "यदहस्त्वेव चन्द्रमा न दृश्यते ताममावास्यां कुर्वीत" 'गताध्वा भवति" इति सूत्रद्वयम् ।

संमिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित् ।
खर्विकां तां विदुः केचिद् गताध्वामिति चापरे ॥

इति गताध्वालक्षणम् । तत्राद्यस्य दर्शाङ्गभूतोपवासपरत्वे तदधिकारिकश्राद्धविषयत्वमिति गोभिलगृह्यभाष्यकारादयः । या तु परेद्युरेव कृत्स्नकर्मकालव्यापिनी पूर्वेद्युस्तदस्पर्शिनी सा परैव, उपरस्यां कालव्याप्तिलाभात् । पूर्वेद्युरेकदेशस्पर्शस्याप्यभावात्, अदि दर्शनवेशाभावाच्च । या तु तादृशी पूर्वेद्युरेकदेशस्पर्शिनी तामप्युत्तरां दर्शयति–*यस्त्विति । *अपराह्णे इति । एतेन पूर्वेद्युरेकदेशस्पर्श उक्तः । एवं च तथोक्तरा कार्या उत्तरदिने गतिपरमर्शाभावेन यागासंभवात् । अन्वाधानादेरेव तत्रानुष्ठातुमुचितत्वात् ।

वर्द्धमानाममावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥

इति परिशिष्टाच्च । *अपराह्णाव्याप्तीति । तन्मते पञ्चधाविभक्तदिनचतुर्थो भागोऽपराह्णः । तत्राप्यथा च निर्णयः । तत्र पूर्वेद्युरेव तत्रास्ति नैव ग्राह्या । कर्मकालव्याप्त्यात् । तस्यांश निरंशत्वमवलम्ब्यात् । अतस्तदभावपरविषयः । अपराह्णव्याप्ती·

अपराह्णव्याप्त्यंशानां साम्ये च निषिद्धये पूर्वेति हेमाद्रिः ।

कदा चतुर्दशी यामं तुरीयमनुपूरयेत् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ॥

इति कात्यायनोक्तेः ।

चतुर्दश्याश्चतुर्थं यामं दर्शः पूरयेत् । चतुर्दशी यामत्रयं स्यादित्यर्थः । क्षीयमाणा=परदिनेऽपराह्णव्यापिनी नेत्यर्थः । व्यतिरेकमाह–

ति पाठे चेत्तुरीयमिति शेषः । तदा पूर्वेद्युरेवापराह्णव्यापित्वात् । कदिनद्वयेऽपराह्णव्याप्त्यभावे इति । अत्र व्याप्तिपक्षोपसंहारात् या पूर्वेद्युरेकदेशं स्पृशति सा पूर्वेत्यर्थः । कुत इत्यत आह–कदेति । चतुर्दशीदिनस्य चतुर्थं याममभावास्याऽनुपूरयेत्=तत्र प्रविशेदित्यर्थः । क्षीयमाणा=परदिने चन्द्रदर्शनप्रयोजकक्षयवती । अंशानां व्याप्तौ च निषिद्धये इति । दिनद्वयेऽपि साम्येन तदेकदेशव्याप्तौ च पूर्वेत्यर्थः । चन्द्रदर्शनसंयोगलक्षणत्वात् । नन्वत्र पूर्वस्यां श्राद्धानुष्ठानेऽन्यस्यामपि तत्रैव कर्तव्यं, तदनुपपन्नम् । पूर्वस्यां चन्द्रदर्शनाभावप्राप्त्यभावात् तत्सत्त्वे च 'यदहस्त्वेव चन्द्रमा न दृश्यते तामावास्यां कुर्वीत'इति वचनविरोध इति; सत्यम् । तस्य चन्द्रदर्शनपरत्वात् । यदुक्तं 'यदहस्त्वेव दर्शनं नैति चन्द्रमाः' तत् सत्यापेक्षया ह्येवं, 'क्षीणे राजनि चेत्यपि'इति वचनात् । या तूभयेद्युरेवैकदेशव्यापिनी सोऽपीव, पूर्वेद्युर्दर्शप्रवेशाभावात् । वैषम्येऽधिकदेशव्याप्तौ स्वाधिक्यवती ग्राह्या । अथ पूर्वस्यास्तथात्वे पूर्वेत्यत्र वचनं योजयति–क्षीयमाणेति । अपराह्णव्यापिनी नेति । आधिक्येनापराह्णव्यापिनी नेत्यर्थः । पूर्वेद्युरेवाधिक्येनापराह्णस्पृगिति यावत् । तदाधिक्यवती पूर्वेत्यर्थः । इतरथोपसंहरति–

वर्धमानाममावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥

ततः श्राद्धं च। *दिनद्वयेऽपराह्णव्याप्त्यादौ *तिथिवृद्धौ च हारीतः—

*त्रिमुहूर्ता च कर्तव्या पूर्वा खर्वा च यद्वृचैः।
कुहूरध्वर्युभिः कार्या *यथेष्टं सामगीतिभिः ॥

*त्रिमुहूर्ताभावे तु *पूर्वा नेत्यर्थः ॥

---

*दिनद्वये इति। दिनद्वये वैषम्येण एकदेशेनापराह्णव्याप्तौ इत्यर्थः । *तिथिवृद्धौ इति । पूर्वेद्युरिति शेषः । इदं च पूर्वेद्युस्तदाधिक्ययुक्तस्य यागादिनगतचन्द्रादर्शनप्रयोजकं प्राग्यम् । तदेव वर्द्धमानामावास्यादुपवासानुरोधाच्चोत्तराया ग्राह्यत्वात् । *त्रिमुहूर्ता चेति । यद्यपि पञ्चधाविभागपक्षेणेदं प्रतीयते, तथाऽपि त्रेधाविभागपक्षेऽपि तुल्यमेव । या दशमैकादशद्वादशमुहूर्तगता त्रिमुहूर्ता सा त्रेधाविभागपक्षे पूर्वैव । या खर्वा सिनीवाली च, (खर्विकालक्षणमुक्तम्) साऽपि पूर्वैव । कुहूः परा । 'बह्वृचैरध्वर्युभिः'इत्याद्युपादानं पूजार्थम् । चन्द्रदर्शने पूर्वा तददर्शने तु परेति यावत् । अत एवाह—*यथेष्टमिति । अत्रैवाभिप्रायान्तरं सूचयति–त्रिमुहूर्ताभावे त्विति। दिनद्वये वैषम्येणैकदेशव्याप्तौ, उत्तरस्या आधिक्ये स्थिते यावत् । *पूर्वा नेति । उत्तरेत्यर्थः । यद्युत्तरदिने चन्द्रदर्शनं न भवतीति शेषः । उत्तरदिने चन्द्रदर्शने तु पूर्वैवेत्यर्थः । तिथिवृद्धौ चेति चकारात् साम्यसमुच्चयः । तेन तिथेः साम्येनापि कालैकदेशस्य वैषम्येण व्याप्तौ चन्द्रदर्शनप्रयुक्तोऽधिकाग्रहणस्यापवादो बोध्यः । एतेन या दिनद्वयेऽपि साम्येन एकदेशव्यापिनी, सा–यदि क्षयेण तदा पूर्वा, सिनीवालीत्वात्; यदि वृद्धा तदा परा; वर्द्धमाना

त्वात् । तथापि चन्द्रादर्शनस्य दर्शपदमुख्यार्थत्वात् प्राबल्यम् ।
यदि त्वेवं, तदा चतुर्दशे चन्द्रादर्शने परा; तद्दिने पूर्वेति
ग्राह्यतां भवति । एवं प्रदेशान्तरापेक्षयाऽपि चतुर्थ्यादिकर्तव्यता.
इतः मतिविशदमनुसृत्यायं ग्रन्थो योजितः ।

अथ पिण्डपितृयज्ञस्यापराह्णव्यापिन्यमावास्यायामग्नेः कदाचित्प्रतिपदि
पारे विद्यमानत्वात् श्रौतस्मार्तादर्शस्य साग्निकस्यैतदपराह्णव्यापित्वेन
सम्पाद्यत्वादित्यादिविषयेषु बहुधा भावात् सर्वथा ग्रन्थो गौरवे-प्रयाति-
भवति । संपूर्णदर्शोऽपराह्णव्यापी भवति । तथाऽन्वाधानादिकर्म तु
सर्वान्वयं स्पष्टम् । वस्तुतस्तु पञ्चधाविभक्तदिनचतुर्थभाग एव
तत्र चाऽपराह्णः श्राद्धकालः सदस्य इत्याह-दर्शश्राद्धं त्विति ।
एवं चापराह्णव्यापिन्येव निर्णेया । "कर्मणो यस्य यः कालः"
इति वचनात् । एवं च पूर्वदिनापराह्णव्यापिनी सा पूर्वैव ।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्णे तु या तस्यां पिण्डानां करणं ध्रुवम् ॥

इति हारीतोक्तेश्च । या चोभयदिनापराह्णव्यापिनी सा परैव कर्म-
काललाभात् ।

अपराह्णः पितॄणां तु याऽपराह्णानुयायिनी ।
सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनी ॥

इति हारीतात् । एतदेव हेमाद्रिसंवादेन दृश्यति-दिनद्वये
हानि । माधवसंवादेनाप्याह-अपराह्णव्याप्तिरिति । उत्तरस्या
पूर्वत्वादिः । अपराह्णव्याप्त्यभावे=अपराह्णस्पर्शव्याप्तिरिति
यावत् । अत्र साग्निकनिरग्निभेदेन व्यवस्था ।

'अपराह्णव्यापिनी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥

इति जाबालिवचनात् ।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनाच्च ।- सिनीवालीकुह्वोः स्वरूप-
मेव । एतन्मते यः पञ्चधाविभक्तदिनचतुर्थभागरूपापराह्णमाश्रित्या-
दित आरभ्य सान्तो निर्णयः स एव निरग्निकान् स्त्रीशूद्रादींश्च प्रति
बोध्यः । तथापि स्वयं साग्निकैरित्युपक्रमात्तदनुसारेणाह-क्षयेपू-
र्वेति । सिनीवालीत्यर्थः । यामं तुरीयमनु इति तुरीयभागोत्तरमि-
त्यर्थः । अपराह्णव्यापिनी=अपराह्णस्पृक् नेत्यर्थः । तेन दिनद्वया-
पराह्णास्पर्शित्वलाभः । अंशतो व्याप्तावपीति । दिनद्वये साम्ये-
नैकदेशव्याप्तौ प्राप्ततिथेः क्षयसाम्यवृद्धिसम्भवात् क्षये पूर्वा,
साम्यवृद्ध्योः परेत्यर्थः । खर्वादिवाक्यात् ।

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥

इत्युक्तेश्च । दिनद्वयेऽपराह्णव्याप्त्यभावेऽपीति । दिनद्वये
अपराह्णव्याप्तौ उत्तरतिथेः क्षये पूर्वा, वृद्धिसाम्ययोस्तु परा ।

अमावास्या तु या हि स्यादपराह्णद्वयेऽपि सा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इति शिवराघवसंवादात् । अत्र च क्षयादिर्न प्राप्ततिथिगतः ।
तस्याः क्षयेऽपराह्णद्वयव्याप्त्यसम्भवात् । एकदेशपदानुपादाने स्वरसत-
स्तथा प्रतीतेः । तथा च तिथिवृद्धौ इत्यस्य उत्तरतिथिवृद्धौ साम्ये
चेत्यर्थः । एवं च त्रिमुहूर्ता चेति वाक्यमेतदनुसारेण कुशलमति-
भिर्योज्यम् । दिनद्वये वैषम्येणैकदेशव्याप्तौ अधिकव्यापिनी ग्राह्या

अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत् ।
अत्रास्तत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि ॥

इति वचनात् अधिका ग्राह्येत्यर्थः । स्वरसतः सम्पूर्णापराह्ण-
प्रत्ययेऽपि अल्पास्पानुक्त्या एकदेशलाभः । एतच्च सम्पूर्णोऽपराह्णः
श्राद्धकाल इति विवेचनमतेन अपराह्णेऽष्टकादशद्वादशमुहूर्ता-
पार्वेण मुख्यः काल इति मयूखमतेन व्यासपक्षे-त्रेधावि-
भक्ते इति । अपराह्णभाग एकादशद्वादशमुहूर्तरूपः ।

सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ॥

इति सायाह्ननिषेधात् । एतच्च पार्वणे । एकोद्दिष्टे तु कुतपाद्ये अष्टमे आरम्भः, नवमे रौहिणे समाप्तिः ।

कुतपं प्रथमे भागे एकोद्दिष्टमुपक्रमेत् ।
आवर्तनसमीपे वा तत्रैव नियतात्मवान् ॥

इति व्यासोक्तेः ।

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत् ॥

इति गौतमोक्तेश्च । यत्तु नारदः—

मध्येऽह्नस्त्रिमुहूर्तस्तु यदा चलति भास्करः ।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥

इति नारदेन कुतपो मुहूर्तत्रयात्मक उक्तस्तत्र मुहूर्तत्रयात्मकमध्याह्नस्यैकोद्दिष्टकालतया विधानेऽष्टमनवममुहूर्तयोस्तत्कालतया विनियोगेऽवशिष्टस्य दशमस्य गौणकालताविधानार्थम् ।

ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकं ह्येतत् स्वधाभवनमिष्यते ॥

इति तु एकोद्दिष्टपार्वणयोः कोटीकाराभिप्रायम् । स्वाग्निकैरिति । एतन्मते निरग्निकस्त्रीशूद्रोपलक्षणमेतत् । ग्रन्थकृन्मते तु न तदुपलक्षणं कुतपव्यापिन्या वाक्यत्वात् । पार्वणे एकादशद्वादशमुहूर्तयोरेव मुख्यकालत्वं दर्शितम् । तत्र वैषम्येणैकदेशव्याप्तावधिका ग्राह्या 'अपराह्णद्वयव्यापिनी'इत्युक्तवचनात् । एकदेशसमव्याप्तावुभयापराह्णव्याप्तौ च क्षये पूर्वा वृद्धिसाम्ययोः परा 'अमावास्या तु या हि स्यात्'इति विधरापवसंवादात् । समाद्विधाये तत्तिथिगतः, अन्त्ये परतिथिगतः । दिनद्वये कालास्पर्शे तु आहिताग्नेः, सिनीवाली, निरग्न्यादेः कुहूः । 'अपराह्णव्यापिनी'इति आपस्तम्बवचनात् । "सिनीवाली द्विजैः कार्या"इति लौगाक्षिवचनेन स्त्रीशूद्रनिरग्निकानामपि ग्रहादिवि

पिण्डपितृयज्ञस्तु कात्यायनैर्योगदिनात्पूर्वेद्युः कार्यः 'पूर्वो वाऽङ्गत्वात् 'पिण्डपितृयज्ञः' इति तत्सूत्रात् । व्याख्यातं चैतत् कर्काचार्यैः-'पूर्वं एव दर्शात् पिण्डपितृयज्ञो न पश्चात् । कुतः *अङ्गत्वात् । *तथा च श्रुतिः- 'तस्मात् पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजन्ते' इति । 'पूर्वेद्युः पितृभ्यो यज्ञं निपृणीय प्रातर्देवेभ्यः प्र तनुते' इति च । तेन तन्मते अङ्गमेवासौ । तदुक्तम्-'अ ङ्गं वा समभिव्याहारात्' इति । तेन कर्कमते *चतुर्दशीयुक्तदर्शे पिण्डपितृयज्ञ इति । श्रीअनन्तभाष्ये तु *परेद्युरित्युक्तम् । अत्र द्वेधाऽप्याचारो दृश्यते ।

आपस्तम्बानां तु परदिने मुहूर्तमपि दर्शसत्त्वे तत्र पितृयज्ञः । *तदाह आपस्तम्बः-'अमावास्यायां यदहश्च न्द्रमसं न पश्यन्ति तदहः पिण्डपितृयज्ञं कुरुते' इति । अस्य रुद्रदत्तीया व्याख्या-'पिण्डैर्युक्तः पितृयज्ञः=पिण्डपितृयज्ञः । स च कर्मान्तरं न तु दर्शाङ्गः । यथा वक्ष्यति-'पितृयज्ञः स्वकालविधानादनङ्गं स्यात्' इति । तं च यदहश्चन्द्रमसं न पश्यन्ति पञ्चदश्यां प्रतिपदि वा तदहः कुरुते । यदह

ग्रन्थस्तु योजितः । *अङ्गत्वात्-दर्शाङ्गं भवतीति शेषः । अमापु क्तापराह्णनियमं निराकर्तुमाह-*तथा चेति । अमावास्यायाम पराह्णे पिण्डपितृयज्ञ इत्यमावास्यापदं च कर्मपरमिति तदभिप्रायः । *चतुर्दशीयुक्तेति । चतुर्दशीयोगेन गतोऽध्वा यस्याः सा गतार्व नि र्व्युत्पत्तेः । अध्वा=स्थानम् । चन्द्रक्षयवदपराह्णः । *परेद्युरिति अमावास्यायामपराह्ण इत्यमावास्यापदं पर्वसंधिमदहोरात्रपरम् तस्मात्पूर्वेद्युरित्यादिश्रुतिस्तु काचित्काभिप्रायेति तदाशयः । * न्वेवम् "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरति" इति श्रुतिविरोध इत्यत आह-*तदाहेति ।

रमयोः सन्धिस्तद्वदहोरित्यर्थः इति । श्रीरामाण्डारोऽप्या-
ह-'पिण्डपितृयज्ञस्तु पर्वसन्धिमदहोरात्रापराह्णे' इति ।
अतः पर्वसन्धिदिने पितृयज्ञः । शतपथश्रुतिरपि—
"यदैवैष न पुरस्तान्न पश्चाद् ददृशेऽथ पितृभ्यो ददा-
ति" इति । पर्वसन्धिदिने हि पूर्वतः पश्चाद्वा चन्द्रो न
दृश्यत एवेत्यर्थः । कात्यायनोऽपि पितृयज्ञं प्रक्रम्य 'द-
र्शकाले सूर्यास्त श्वोभूते यजेत' इत्याह । हेमाद्रि-
स्तु-'अमावास्यायामन्वाहितेनेत्यर्थ एव । पूर्वोक्तकात्याय-
नसूत्रे यदुक्तं 'न पश्यति' इति, तत्र क्षयोऽभिमतः ।
अतश्चतुर्दश्यां चन्द्रस्य क्षीणत्वाच्चतुर्दश्यां पितृयज्ञः ।

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।

इति मनूक्तेः । यदुक्तं 'यदहस्त्वेव दृश्येत नेति च-
न्द्रमाः—' तत्क्षयोपलक्षणं ज्ञेयम् । 'क्षीणे राजनि सर्वपि'
इति, 'यदुक्तं दृश्यमानेऽपि, तच्चतुर्दश्यपेक्षया' इति च
कात्यायनोक्तेः । 'दृश्यमानेऽप्येवं' इति गार्ग्यवचनोक्तेश्च ।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्णे क्षयस्तस्यां पिण्डानां करणं ध्रुवम् ॥

इति हारीतोक्तेश्च । चन्द्रक्षयकालश्चोक्तः कात्यायनेन—

अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमेंऽशे तु पुनः किल भवेदणुः ॥ इति ।

तेन पूर्वेद्युरेव पितृयज्ञ इत्यूचिवान् । मत्स्यपुराणेऽ-
पि-'अपराह्णे पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायाम्'
इति कात्यायनसूत्रेऽदर्शनमेव क्षय एवोक्तः । 'नाति-
दर्शने ददाति' इति श्रुतेः । आनन्तयाने चतुर्दशीयुक्त-
दर्शे पितृयज्ञो भवति परदिने यागोऽपीत्यदः । तदेतत्
कात्यायनसूत्रमपि हेमाद्रिकर्कादिव्याख्यानमापस्तम्बेन-
गार्ग्यावृत्तमिति । अमावास्याऽऽदस्य निषिद्धविरोधात्-

भ्युपगमात्कातीयबौधायनादिविषयम् ।

*आश्वलायनानामपि शेषपर्वणि पिण्डपितृयज्ञः
तथा च सूत्रम्-'अमावास्यायामपराह्णे पिण्डपितृय
ज्ञः' इति ।

अत्र नारायणवृत्तिः-'अमावास्याशब्दः प्रतिपत्पञ्च
दश्योः संधिवचनोऽप्यत्रापराह्णशब्दसमन्वयात्तत्परे
रात्रे वर्तते । तस्यापराह्णेऽह्नश्चतुर्थे भागे पिण्डपितृयज्ञ
कार्यः । औपवसथ्ये यजनीये वाऽहनि । यदा त्वहोरात्र
संधौ तिथिसंधिः स्यात्तदौपवसथ्य एवाहनि क्रिया
इति । अत एव

मुहूर्तमप्यमावास्या प्रतिपद्यपि चेद्भवेत् ।
तद्यत्तमश्वयं यष्ठे ज्ञेयं शेषं तु पर्ववत् ॥

इति हेमाद्रौ वचनं पिण्डपितृयज्ञपरमित्यु
प्रयोगपारिजाते । अयं च स्मार्ताग्निमता संपू
दर्शे *श्राद्धस्याऽतिदेशेन कार्यः । व्यतिषङ्गो नामोभय
सहानुष्ठानम् । *एतच्च 'स्थालीपाकेन सह पिण्डार्थ
पूर्वस्य' इतिसूत्रे वृत्तिकृतोक्तम् ।

खण्डपर्वणि तु केचिदाहुः । पूर्वेऽह्नि पिण्ड

त्वापिरहाच्च । *आश्वलायनानामिति । शाङ्खायनान
रन्वाधानानन्तरं पितृयज्ञः । तथैव तत्सूत्रात् । *श्राद्धस्याति
षङ्गेणेति । पितृयज्ञाधीनं परमापूर्वेषकं, श्राद्धे पिण्डदानादि
च तदपूर्वमपवपि अर्थीकरणरूपाङ्गाधीनम् । अतः प्रा
पर्वणि प्रधानयोर्भिन्नकालत्वात्तत्परत्वं भिद्यते, अतोऽपर्वणि
स्थालीपाकस्तदेकाङ्गत्वादेव पिण्डदानादावारभ्यपूर्व
जायते तयोरपत्राध्येकमेवार्थीकरणपरं न तु स्वेच्छया पितृय
श्राद्धयोः पृथगनुष्ठानं कार्यं सूत्रविरोधादित्याह-*एतच्चेति

पृथक्स्थालीपाकेन श्राद्धं कृत्वा परेऽह्नि केवलः पिण्डपितृयज्ञः कार्यः । वृत्तिकृता तु—

अन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणम् ।
काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् ॥

इत्युदाहृत्य पूर्वेषु चतुर्षु स्थालीपाकादुद्धृत्याग्नौकरणमित्युक्तेर्दर्शश्राद्धे स्थालीपाको नियत इति गम्यते । स्थालीपाकस्य पितृयज्ञ एवेति पूर्वदिने व्यतिषङ्गः सिद्धः । प्रयोगपारिजाते तु *वार्षिकश्राद्धादेरपि व्यतिषङ्ग उक्तः, किमुत दर्शश्राद्धस्य ।

न्यायविदस्त्वाहुः—*सूत्रस्य पूर्णस्य संपूर्णदर्शविषयत्वात् खण्डपर्वणि *पूर्वदिने केवलं श्राद्धं परदिने च केवलः पितृयज्ञः कार्यः । अत एवोक्तं वृत्तिकृता—*'नात्रापूर्वस्थालीपाकश्रपणे, सर्वश्राद्धेषु प्रसङ्गात्' इति । प्रयो-

---

*वार्षिकेति । "यदमनुपयुक्तं ततस्स्थालीपाकेन सह पिण्डार्थमुद्धृत्य" इति सूत्रं सहोद्धरणं स्थालीपाकोऽङ्गं करणतृतीयात्वाभ्यां, उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् । ततश्च स्थालीपाकः पिण्डार्थः, वार्षिके च पार्वणविकृतित्वात्तत्प्राप्तिरित्यभिप्रायः । *सूत्रस्येत्यादि । "सह शाखया प्रस्तरं प्रहरति" इतिवत्सहार्थे तृतीया । सा चोद्धरणे एव कर्मत्वेनान्वयाहितप्रयोजिका, अतो न पिण्डार्थत्वसम्भवः । पिण्डदाने चोपभुक्तजातीयस्यैवान्नस्य करणत्वात् चरुश्रपणापेक्षेति भावः । *पूर्वदिने इति । कालभेदेन तन्त्रन्यायाप्रवृत्तेः । *नात्रेति । सिद्धस्थालीपाकानुवाद इति न "उपपदविभक्तेः" इति न्यायप्रसङ्गः, नापि खण्डपर्वणि पूर्वेद्युः स्थालीपाकप्राप्तिः । च—

पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ।

इति वचनात्तदप्राप्तिरिति वाच्यम् । तस्य एकदिनविषया-

गणारिजातोऽग्निरप्येकाष्टकासु । पूर्वदिने च श्राद्धेऽग्नौ-करणमेव, न पाणिहोमः ।

चतुर्ष्वष्टकासु साग्नीनां वह्नौ होमो विधीयते ।
पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि ॥

इति परिशिष्टे नियमात् । न च लौकिकाग्नौ पक्षान्तरे कथं गृह्याग्नौ होमः । 'नान्याग्नौ पक्वमन्याग्नौ जुहुयात्' इति निषेधात् । मैवम् । श्राद्धस्य गृह्यत्वेन स्मार्ताग्नौ *पचनाग्नौ वा कर्तव्यत्वात् । तस्मात् पूर्वेद्युः केवलं श्राद्धं, न त्वनिषङ्गः । *इदमेव च युक्तम् । आहिताग्निना

क्षितकर्मविधायकत्वेनोक्तसेवनाकाङ्क्षाविशिष्टदिनीयापूर्वविधायकत्वे मानाभावात् । *एतदष्टिपराः=आर्थिकस्थालीपाकविषयाः । अत्र विस्तरः । *पचनाग्नाविति । लौकिकाग्नौ श्राद्धानुष्ठानं च पाणिहोम एव । आश्वलायनभिन्नानां तु अन्वष्टक्येऽपि न वचनिषङ्गः तत्सूत्रानुक्तेः । तैत्तिरीयाणां पृथक्श्राद्धेऽपि न पाणिहोम इति स्मर्तव्यम् । अधिकमग्रे । *इदमेव चेति । तथा च वृत्तिः—यत्र स्थालीपाको विहितः तत्र तेन भुक्तशेषेण च पिण्डनिपरणम् । यत्र स्थालीपाकविधिर्नास्ति तत्र केवलेन भुक्तशेषेणैव पिण्डनिपरणम् । आचार्येणाष्टौ श्राद्धान्युक्तानि-"आन्वष्टक्यं च पूर्वेद्युः" इत्यादि । तत्र पूर्वेषु चतुर्षु स्थालीपाकादसमुद्धृत्याग्नौकरणम्, अग्निसमीपे भुक्तशेषेण स्थालीपाकेन च पिण्डनिपरणं पिण्डपितृयज्ञकल्पस्य तेषु विद्यमानत्वात् । उत्तरेषु चतुर्षु भोजनार्थादन्नमुद्धृत्य घृताक्तं कृत्वा पाणिहोमः, ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डनिर्वपणं तेषु स्थालीपाकविध्यभावात्, पिण्डपितृयज्ञकल्पप्राप्त्यभावाच्चेति । स्थालीपाकेनेति करणतृतीयादिनामुत्तरेषु चतुर्ष्वपि स्थालीपाकप्राप्त्यापत्तेः । किं च सर्वश्राद्धेषु अतिप्रणयनादिपितृयज्ञविकर्तव्यता न प्राप्नोति । "आन्वष्टक्यं च पूर्वेद्युः" इत्याद्युक्त्वा आचार्येण—

तु सर्वाधानिनाऽर्धाधानिना* वा संपूर्णे खण्डे वा दर्शे *श्रौताग्नौ पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धव्यतिषङ्गेणेति विस्तरभीतेर्विरमामः । संपूर्णं दर्शं च विशेषमाह लौगाक्षिः—

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥ इति ।

पक्षान्तं कर्म=अन्वाधानम् । अन्वाहार्यकं=दर्शश्राद्धम् । अयमेव साग्नेर्जीवत्पितृकस्य पिण्डपितृयज्ञकालो ज्ञेयः । तस्यापि कात्यायनेन "होमान्तमनारम्भो वा" इत्याम्नानात् । पिण्डपितृयज्ञाकरणे *प्रायश्चित्तमाह पराशरमाधवीये कात्यायनः—

पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च ।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥

इत्यलम् ।

चतुर्ष्वपि तु साग्नीनां वह्नौ होमो विधीयते ।

इति पितृयज्ञातिदेशमसज्यमानाग्नेः श्राद्धान्तरे परिसंख्यानात् ।

पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि ।

इति त्वनुवादकं विधाने वाक्यभेदादित्याद्यन्यत्र विस्तरः । दर्शश्राद्धे तु पाणिहोमः । *अर्द्धाधानिना वेति । अत्र मयूखः—"दर्श=अमावास्या तत्र भवं पार्वणम् । तद् आहिताग्निः पिण्डपितृयज्ञं कृत्वा करोति । अनाहिताग्निस्तु तद् इतरेण व्यतिषङ्ग" इति परिशिष्टम् । तत्राहिताग्निः=सर्वाधानी, अनाहिताग्निस्तु अर्द्धाधानी, केवलस्मार्ताग्निमान् । अर्धाधानेऽपि व्यतिषङ्गानुरोधादिति । ग्रन्थकारस्तु *श्रौताग्नौ दक्षिणाग्नौ । निर्मथ्यान्तरग्नितोऽनुपदमग्नि साग्निकादीन् दर्शयिष्यति । तदनुसारेणानुष्ठाने सम्प्रदायविरोधः । *प्रायश्चित्तमिति । अथ वा श्रौतग्रन्थोक्तं प्रायश्चित्तान्तरं संसर्गहोमो बोध्यः । साग्निकान् प्रत्यमावास्या निर्णीता । अन्वाधाना-

प्रकृतमनुसरामः । *निरग्निकादिभिस्त्वमावास्या-
पराह्णव्याप्त्यलाभे कुतुपकालव्यापिनी ग्राह्या ।

भूतविद्धाऽप्यमावास्या प्रतिपन्मिश्रिताऽपि वा ।
पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतुपकालिकी ॥

इति हारीतोक्तेः । इदं च निरग्निकादिविषयम् ।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनात् । अत्र *साग्निरौपासना-
ग्निरपीति मदनपारिजाते उक्तम् । *कुतुपस्त्वपराह्ण-
व्याप्त्यलाभेऽनुकल्पः ।

अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥

इति जाबालिना विधानात् । तेन साग्नीनां नि-
रग्नीनां चापराह्णव्यापिन्येव मुख्या* । *तिथिसाम्य-
वृद्धिक्षयैः *समव्याप्तौ खर्वादिना निर्णयः । वैषम्ये-

दिनद्वयस्यैककाल्यनियमनद्वहितान्प्रति यथामतं ग्रन्थोऽपि योजितः ।
तत्समस्तावे च निरग्निकादीन् प्रति माधवमतं दर्शितम् । इदानीं
हेमाद्रिमतमनुवदाह-*निरग्निकादिभिरिति । आदिना स्त्री-
शूद्रग्रहः । *साग्निरिति ।

य आहिताग्निर्धर्मः स्यात्स औपासनिकस्य तु ।

इति वचनात् । हेमाद्रिमाधवयोर्विशेषं सूचयितुं माध-
वमतं स्मारयति-*कुतुपस्त्वेति । *अपराह्णेति । दिनद्वये
अपराह्णस्पर्शाभावे इति यावत् । *मुख्येति । पूर्वेद्युरेवापराह्णव्याप्तौ
पूर्वा । उत्तरेद्युरेव तद्व्याप्तावुत्तरा, कर्मकालशास्त्रात् । "यस्यां
संस्थागतः" इत्यादिविशिष्यापि वाक्यद्वयं पूर्वमुक्तम् । *तिथी-
ति । प्रकृततिथीत्यर्थः । *समव्याप्ताविति । एतेन "तिथिक्षये
सिनीवाली" इत्यपास्तम्,

ऽधिका ० । दिनद्वयेऽपराह्णस्पर्शे कुतुपव्यापिनीति मा-
धवः । *इदमेव च युक्तम् । ०हेमाद्रिमते कुतुपव्यापि-
न्येव निरन्त्यादेर्मुख्या । सिनीवाली=दृष्टचन्द्रा । तथा
च व्यासः-

दृष्टचन्द्रा सिनीवाली, नष्टचन्द्रा कुहूः स्मृता। इति।
पूर्वदिने परदिन एव वा तद्व्यापित्वे सैव ग्राह्या ।
ऽ अंशाव्यापित्वे वैषम्येऽधिककालव्यापिनी ग्राह्या । दिन-
द्वयेऽशतः समव्याप्तौ तिथिक्षये पूर्वा, वृद्धौ साम्ये
च परा ।

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥

इति प्रचेतोवचनात् । दिनद्वये संपूर्णकुतुपव्याप्तिस्तु
तिथिवृद्धावेव भवतीत्यनन्तरवचनात् परैवेति ।

कुतुपस्तु-

अमावास्या तु या हि स्यादपराह्णद्वये तथा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इत्युक्तं च स्मर्तव्यम् । ०अधिकेति । "अपराह्णद्वयव्याप्ति" इति
शिवराघवसंवादात् । ननु कुतपस्य मुख्यकालत्वे युक्तम् ।
अन्यथा-

सिनीवाली हृदयैव श्रुत्युक्ते श्राद्धकर्मणि ।
स्यातां ते यदि मध्याह्ने श्राद्धादि स्यात्कथं तदा ॥

इत्युपक्रम्य "तिथिक्षये सिनीवाली"इति प्रचेतोवाक्यस्य निर्वि-
षयत्वं स्यात् इत्यत आह-*इदमेव चेति। "स्यातां ते यदि मध्या-
ह्ने"इति प्रामाणिकपाठात् कुतपो मुख्य इति भावः । मतान्तरं हे-
माद्रिमतमनुसरन्नाह-०हेमाद्रिमते इति । तद्व्यापिनी=कुत-
पव्यापिनी । तिथिवृद्धीति । ह्रस्वत्वाभावादिरर्थः । अत्र

पारिजातेऽप्येवम् । इदमेव सात्त्विकानिरिकल्पं [illegible] यज्ञ ज्ञेयम् ॥

अथ ग्रहणं निर्णीयते । तत्र चन्द्रग्रहणे यामत्रयं पूर्वं न भुञ्जीत । सूर्यग्रहे तु याम चतुष्टयं न भुञ्जीत ।

सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना ॥

इति माधवीये वृद्धगौतमोक्तेः ।

ग्रहणं तु भवेदिन्द्वोः प्रथमादपि यामतः ।
भुञ्जीतावर्तनात्पूर्वं पश्चिमे प्रथमादधः ॥

इति मार्कण्डेयोक्तेश्च । [illegible] । ननु चन्द्रग्रहे [illegible] उचितो न तु सूर्यग्रहे, सूर्योदया [illegible] । [illegible] । [illegible] सूर्यग्रहे [illegible] [illegible] । [illegible] [illegible] —

[illegible] । इति ।
[illegible]

[illegible] । इति ।
[illegible]

[illegible]

*अहोरात्रे न भोक्तव्यं चन्द्रसूर्यग्रहो यदा।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम्॥
*अहोरात्रनिषेधः सूर्यग्रस्तास्ते। मदनरत्ने*गार्ग्यः–
संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ।

इति च द्रष्टव्यम्। *अहोरात्रमिति। इदमर्धाद् ग्रस्तास्तपरं, मुक्तिस्नानं च तत्र परेद्युरित्यर्थः। ब्रह्माण्डेऽपि–

नाश्नीयात्तत्र तत्काले ग्रस्तयोश्चन्द्रसूर्ययोः।
मुक्तयोश्च कृतस्नानः पश्चाद् भुञ्ज्यात्स्ववेश्मनि॥

इति परान्ननिषेधः। मुक्तावपि भोजनं महानिशातः प्रागेव।

मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा॥

इति शातातपोक्तेः। महानिशा च घटीद्वयम्।

महानिशा द्वे घटिके रात्रिमध्यमयामयोः।

इति मार्कण्डेयोक्तेः। घटिकाचतुष्टयं तु युक्तं, तथा कल्पतरूक्तेः। चन्द्रग्रस्तास्ते यावच्चतुर्दशमभोजनेन स्यात्तदशक्तानां शास्त्रविहितभुक्तिकालभूताद्भागानन्तरं भागद्वयमेकभागं वा हित्वा भोजनं मदवीत्युक्तं विवेचने। ग्रहणकाले च स्वापादि निषिद्धम्।

सूर्येन्दुग्रहणं यावत्तावत्कुर्याज्जपादिकम्।
न स्वपेन्न च भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोः॥

इत्युक्तेः।

निद्रायां जायते रोगी मूत्रे दारिद्र्यमाप्नुयात्।
पुरीषे कृमियोनिः स्यान्मैथुने ग्रामसूकरः॥
अभ्यङ्गे च भवेत्कुष्ठी भोजने स्यादधोगतिः।
वचने स भवेत् सर्पो वधे च नरकं व्रजेत्॥

इति निन्दोक्तेश्च। अहोरात्रम्=अहः पूर्वा रात्रिरित्यन्वयेनाह–अहोरात्रमिति। वस्तुतोऽहश्च रात्रिश्चेत्यर्थः, तेन चन्द्रग्रस्तास्तस्यापि संभवः, तदाह–*गार्ग्य इति। *स्नानेति। स्नानं तु नित्यं मोक्ष-

वेधकाले ग्रहणे भोजने प्रायश्चित्तमुक्तं माधवीये का-
त्यायनेन—

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति॥ इति।

ग्रहणे च*त्रिरात्रमेकरात्रं वोपवासः श्रेयोऽर्थिना कार्यः।

एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च शक्तितः।
कञ्चुकादिव सर्पस्य निर्मुक्तिः पापकोशतः॥
त्रिरात्रं समुपोष्यैवं ग्रहणे चन्द्रसूर्ययोः।
स्नात्वा दत्त्वा च विधिवन्मोदते ब्रह्मणा सह॥

इति हेमाद्रौ लिङ्गोक्तेः। इदं च पुत्रवद्व्यतिरिक्त-
विषयम्।

आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही॥

इति जैमिनिवचनात्। *यदा स्वयंस्नातस्तदा पु-

कुशान्तरायं कुर्वीत ग्रहणे चन्द्रसूर्ययोः॥

आरनालं=काञ्जिकं, घृतपाचितं=द्रोणाढकादिमितं काञ्जिकं वा बदराकारमिति वाक्यात्। प्राजापत्यं=षड्रात्रसाध्यं, तदेव त्रिरात्रोपवासः। ग्रस्तास्तोत्तरनिषिद्धकालभोजनेऽपि॥ ए-कार्थः। "तस्मिन्नेव दिने" इत्यविशेषोक्तेः। "नीवारबदरो-पमम्" इति विज्ञाने। *त्रिरात्रमित्यादि। एकरात्रो-पवासो ग्रहणाहोरात्र एव। तथैव मदीये: शिष्टाचार। कन्यास्वपि: समानकर्तृकत्वे 'पूर्वं कारयेत्' इति'इति-वत्। त्रिरात्रोपवासेऽपि तृतीयदिनरात्रं ग्रहणदिवसे। यदोपवास-द्वयदिने कन्यावच्छिन्नपूर्वदिने एव, ग्रहणे पारणादि-षेधः। अपारणं चेति। पूर्वतः ग्रहणे पारणोपवासनि-षेधात् तत्त्वतः ग्रहणदिने सम्पूर्णदिने भोजनाभाव इति फल-ति। *यदा स्वयमित्यादि। मार्कण्डेये ग्रहणदर्शने 'तावा-

त्रिणः *ग्रहद्वयं दृष्ट्वा बालादिवद्भोजनं न तूपवासः । 'सायाह्ने ग्रहणं चेत्स्यात्' इति पूर्वोक्तमार्कण्डेयवचनात् ।

सायाह्ने सङ्गवेऽश्नीयाच्छारदे सङ्गवादधः ।
मध्याह्ने परतोऽश्नीयाद्योपवासो रविग्रहे ॥

इति स्मृतेश्चेति हेमाद्रिः । शारदोऽपराह्णः । माधवमते तु पुत्रिणोऽपि सर्वोपवास एव । 'अहोरात्रं न भोक्तव्यम्' इति पूर्वोक्तनिषेधस्य तेनापि पालनीयत्वात् । उपवासनिषेधस्तु व्रतरूपोपवासपरः कृष्णैकादश्यादिनिषेधवदिति । मदनरत्नेऽप्येवम् । *इदमेव च युक्तम् । वर्धमानस्तु 'अहोरात्रं न भोक्तव्यम्' इति शातातपीयात् ।

सूर्याचन्द्रमसोर्लोकानक्षयान्याति मानवः ।

इति फलश्रुतेश्चोभयदर्शने उपवासः काम्यः *न स्वयं निषेध इत्याह । तन्न । अत्र व्रतस्यापि *भागुक्तविष्णुधर्मे निषेधादर्शनात् । तथा च व्यासः—

रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तत्र दत्तमनन्तकम् ॥
वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः ।

सङ्गवे' इत्यत्र ग्रहद्वयदर्शने, तत्र बालादीनां ग्रहद्वयदर्शने तूपवासः, एकग्रहदर्शने त्वनुकल्पः । *पुत्रिण इति । पुत्री बालादिवत् "नोपवासो रविग्रहे" "न कुर्यात्पुत्रवान् गृही" इत्यनयोर्विशेषविषयत्वलाभात् । तथैव च पुत्रिणि नैकग्रहवर्जने, किं त्वयमर्थं तत्रेत्यर्थः । *इदमेव चेति । बालादिभिस्तु सर्वं दिनं नक्तं वा भोजनं विना स्थातुमशक्यत्वात्सर्वो निषेधो न पालनीयः, किं तूक्तकल्पानुकल्पौ कार्याविति भावः । *न स्वयमिति । न हि निन्दान्यायादिति भावः । *भागुक्तेति । तथा च काम्य इव नित्योऽप्युप-

तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतम् ॥

अत्र चाद्यन्तयोः स्नानं कुर्यात् ।

*ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ॥

इति हेमाद्रौ वचनात्,

स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम् ।

इति ब्रह्मवैवर्ताच्च ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेत् ॥

वासो भवत्येवेति भावः । *ग्रस्यमाने इति । एतच्च स्नानं रात्रावपि ।

तथोपरागपातादौ स्नाने दाने निशा शुभा ।

इत्युक्तेः,

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत् ॥

इत्युक्तेश्च । दानं चात्यावश्यकम् ।

अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत् ।
षडशीतिमुखे चैव विमोक्षे चन्द्रसूर्ययोः ॥

इति दानमात्रोक्तसदाशब्दात् । अत एव मलमासेऽपि कार्यमित्युक्तम् । दानं पात्रायापि ।

अश्रोत्रियः श्रोत्रियो वा पात्रं वाऽपात्रमेव वा ।
विप्रब्रुवो वाऽपि विप्रो ग्रहणे दानमर्हति ॥

इति बौधायनोक्तेः । श्रोत्रियः=संस्कारवेदाध्ययनोपयुक्तः । अश्रोत्रियः=तद्रहितः । पात्रं—

न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥

इति याज्ञवल्क्योक्तं विद्यातपोयुक्तम् । विप्रब्रुवः=गुणरहितो

इति वृद्धवसिष्ठोक्तेश्च । *सचैलाख्यं मुक्तिस्नानपरमिति मदनरत्ने उक्तम् । भार्गवार्चनदीपिकायां चतुर्विंशतिमते-

*मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके ।
स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः ॥

इदं च स्नानं *अमन्त्रकं कार्यमिति स्मृतिरत्नावल्याम् । तत्र तीर्थविशेषो भारते-

गङ्गास्नानं प्रकुर्वीत ग्रहणे चन्द्रसूर्ययोः ।
महानदीषु चान्यासु स्नानं कुर्याद्यथाविधि ॥

महानदीष्वपि नामविशेषे काश्चिच्छ्रेष्ठाः ।

प्रयागं देविका रेवा संनिहत्या च वारणम् ।
सरस्वती चन्द्रभागा कौशिकी तापिका तथा ॥
सिन्धुर्गण्डकिका चैव सरयूः कार्तिकादितः ॥

*मूलं हेमाद्रौ स्पष्टम् । व्यासः-

ध्ययनादिरहितः ।

नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः ॥

इति चतुर्विंशतिमतात् । सूतकान्ते=ग्रहणकाले ततः स्नात्वा पक्वमन्नम् । *सचैलस्यामिति ।

ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतम् ।
तयोः संपत्तिमात्रेण उपस्पृश्य क्रियाक्रमः ॥

इति ब्रह्माण्डे स्पर्शे मोक्षे च सपिण्डजननमृतिवदशुचित्वोक्त्या तयोरिव अनयोरपि सचैलमेव स्नानं कार्यं, तदुत्तरं च कर्माधिकारः । एवं—

यत्र पुंसः सचैलं स्यात् स्नानं तत्र सुवासिनी ।
कुर्वीताशिरः स्नानं शिरोरोगी जटी तथा ॥

इत्यपि न प्रवर्त्तते, शावाद्यभिधानात् इत्यभिप्रायः । मुक्तिस्नानं चावश्यकमित्याह-*मुक्ताविति । *अमन्त्रकमिति । मन्त्राचमनविधानाद् विकृतेरभावेनातिदेशाप्रवृत्तेश्च । *मूल-

मिति । हेमाद्रौ–

इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः ॥
गङ्गातोये तु संप्राप्ते इन्दोः कोटी रवेर्दश ॥
गवां कोटिसहस्रस्य यत्फलं लभते नरः ।
तत्फलं लभते मर्त्यो ग्रहणे चन्द्रसूर्ययोः ॥

*असंभवे तु माधवीये शङ्खः–

वापीकूपतडागेषु गिरिप्रस्रवणेऽपि च ।
नद्यां नदे देवखाते सरसीषूद्धृताम्बुनि ॥
उष्णोदकेन वा स्नायाद् ग्रहणे चन्द्रसूर्ययोः ॥

अत्र तारतम्यमाह मार्कण्डेयः–

शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् ।
भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।
तीर्थतोयं ततः पुण्यं महानद्यम्बु पावनम् ॥
ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिः ॥ इति

कार्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे संनिहिता शुभा ।
फाल्गुने वरुणा पुण्या चैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।
ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ॥
श्रावणे सिन्धुनाथ तु तथा भाद्रे तु गण्डकी ।
आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदा ॥

इति देवीपुराणम् । अथवाऽन्यत्र लिखन्ति ।

[illegible]

*उष्णोदकमातुरविषयम्। तथा—

गोदावरी महापुण्या चन्द्रे राहुसमन्विते।
सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने॥
नर्मदातोयसंस्पर्शो कृतकृत्या भवन्ति ते।

पृथ्वीचन्द्रोदये प्रभासखण्डे—

गावो नागास्तिला धान्यं रत्नानि कनकं मही।
संप्रदाय कुरुक्षेत्रे यत्फलं लभते नरः॥
तदिन्दुग्रहणेऽम्भोधौ स्नानाद्भवति षड्गुणम्॥

तत्रैव सौरपुराणेऽम्बुधिस्नानमुपक्रम्य—

दानानि यानि लोकेषु विख्यातानि मनीषिभिः।
तेषां फलमवाप्नोति ग्रहणे चन्द्रसूर्ययोः॥

देवीपुराणे—

गङ्गा कनखलं पुण्यं प्रयागे पुष्करं तथा।
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे॥

स्नानासंभवे स्मरणं कार्यम्।

स्मृत्वा शतक्रतुफलं दृष्ट्वा सर्वाघनाशनम्।
स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणेर्लभेत्॥

इदमत्र समयप्रदीपादानात्।

मृते जन्मनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा॥

इत्यत्राह—*उष्णोदकमिति॥

आदित्यकिरणैः पूतं पुनः पूतं च वह्निना।
अतो व्याध्यातुरः स्नायाद्ग्रहणेऽप्युष्णवारिणा॥

इति व्यासोक्तेः। अपि नाऽस्पृश्यस्पर्शनादीनां। अतः उष्णोदकायोग्यरोगिणस्तु—

आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः।

स्नात्वा चाजिमत्रं पुण्यं प्राप्नुयादग्निचारतः।
रविचन्द्रोपरागे च अयने चोत्तरे तथा॥

इति मार्कण्डेयोक्तेः। अत्र*श्राद्धमाह कल्पतरुः—
चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्।
तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे॥

भारते—
*सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने।
अकुर्वाणस्तु नास्तिक्यात्*पङ्के गौरिव सीदति॥

विष्णुः—
राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम्।
इदं चामान्नेन हेम्ना वा कार्यं, न त्वन्नेन।
आपगनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा।

इत्यादि अग्रिमक्रमेण स्नातव्यं, गोरजःस्नानादिकमपि वा कार्यम्। *श्राद्धमिति। श्राद्धं तर्पणं च स्पर्शे कार्यम्॥

त्रिदशाः स्पर्शसमये तृप्यन्ति पितरस्तथा।
मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः॥

इति वासिष्ठात्। *सर्वस्वेनापीति। यदि सङ्क्षेपेणापि सामग्रीसम्पादने सर्वस्य व्ययो भवति तदाऽपीत्यर्थः।

विशिष्टे ब्राह्मणे प्राप्ते सूर्येन्दुग्रहणे ऽयने।
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्वीत चेच्छया।

इत्यत्र इच्छया चेति "श्राद्धं प्रति रुचिश्चैव"इत्येतत्समानार्थम्। अतथाकरणे प्रत्यवायमाह-*पङ्के इत्यादि। *घृतस्येति। घृतस्य प्राचुर्यं बोध्यम्। तेन न पाकानुपपत्तिः। तथा च अन्ननिवेदनवाक्ये 'इदमन्नम्'इत्यत्र पिण्डदानवाक्ये च 'अयं पिण्डः' इत्यत्र 'इदं घृतम्'इति प्रयोग इत्यर्थः। 'गृहीते राहुणा श्राद्धमस्तु'इति ग्रहणकालीन-श्राद्धतर-भोजन-

आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा ॥

इति शातातपोक्तेरिति हेमाद्रिमाधवादयः ।

*अपरार्कस्तु एतद्द्विजातीनां पाकाभावे ग्रहणं तद्वि-धिश्राद्धवत् ।

पाकाभावे द्विजातीनामामश्राद्धं विधीयते ।

इति सुमन्तूक्तेः ।

सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥
*घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेत् ॥

इति वायवीयोक्तेश्चेत्याह । विज्ञानेश्वरोऽप्याह—'ग्रहणे श्राद्धे *भोक्तुर्दोषो दातुरभ्युदयः' इति ।

सूतके मृतके भुक्ते गृहीते शशिभास्करे ।
छायायां हस्तिनश्चैव न भूयः पुरुषो भवेत् ॥

इत्यापस्तम्बेन भोजननिषेधात् । अयं च निषेधः *श्राद्धभोक्तुर्हस्तिच्छायासाहचर्यात् । अत्र *ग्रहणनिमित्तक-

---

भ्युदयार्थम् । तत्र गजच्छायायां श्राद्धभोजने यत्प्रायश्चित्तं तत्कार्यं "न भूयः पुरुषो भवेत्" इति दोषश्रवणात् । *अपरार्कस्त्विति । तुनाऽरुचिः । सा चाऽऽमहेमश्राद्धमेव कार्यं विधानात् । पाकाभावे इत्यस्य यत्र पाकसम्भवस्तत्राऽऽमश्राद्धमिति नार्थः, किन्तु यत्र पाको विहितोऽपि केनचिद्धेतुना न सम्भवति तत्र श्राद्धं न त्याज्यं, किं तु आमश्राद्धं कार्यमित्यर्थः । ग्रहणे तु पाको न विहित इति न पाकश्राद्धप्राप्तिः । *घृतेनेति । आमश्राद्धे बहुघृतस्य हेमश्राद्धे च तद्द्रव्यस्य दानार्थं, घृतमिति तु आमहेमश्राद्धयोः मधुरघृतद्रव्यकपिण्डदानार्थम् । *भोक्तुरिति । विज्ञानेश्वरोऽपि ग्रासमात्रनिगृह्य भोजनार्थकः सामिपादेः प्रतिगृह्य यथेष्टविनियोगोपलक्षणम् । *श्राद्धभोक्तुरिति ।

श्राद्धैर्थामासंक्रान्त्यादिनैमित्तिकानां सिद्धिः। 'दार्शिकालभ्ययोरपि' इति कालादर्शोक्तेः।

अथाशौचमध्येऽपि स्नानश्राद्धादि कार्यमेव।

सूतके मृतके चैव न दोषो राहुदर्शने।
*तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते॥

इति माधवीये वृद्धवसिष्ठोक्तेः।

*स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके।

इति व्याघ्रपादोक्तेश्च। कालादर्शे आङ्गिराः-

सर्वे वर्णाः सूतकेऽपि मृतके राहुदर्शने।
स्नात्वा श्राद्धं प्रकुर्वीरन्दानं शाठ्यविवर्जितम्॥

मदनपारिजातेऽप्येवम्। तेन

स्नानमात्रं प्रकुर्वीत दानश्राद्धविवर्जितम्।

इति *निर्मूलं वदन्तो गौडाः परास्ताः। इयं च शु

भस्य श्राद्धीयं मतिग्रहीतुरित्यर्थः। तस्यैव "न भूयः पुरुषो भवेत्" इति दोष इति। *ग्रहणेति। देशकालाद्यविशेषे,न तु तद्विशेषे। *तावदेवेति। ग्रहणविहितसकलकर्मसु इति शेषः। स्नानमात्रे तद्वैयर्थ्यात्। अत एवानुपदमिदं चेत्यादि। *स्मार्तेति। सूतके- आशौचे राहोरुपरागादन्यत्र तदन्यनिमित्तकानां स्मार्तकर्मणां परित्यागो,न तु तन्निमित्तकानामित्यर्थः। जननमरणनिमित्तकाशौचयुक्तानामधिकारः अविशेषेण ग्रहणनिमित्तककर्मसामान्ये नास्तीति यावत्।

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतके तथा।

इत्यादिविशेषविधिस्तु स्नानाकरणेऽनिष्टविशेषबोधनार्थ इति हेमाद्रिः। एतन्मते स्मार्तः तार्पहोमादिः तत्पटिकादिगौणकाले ग्रहणानन्तरं कार्यः। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवत् एव स्वर्गे "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इति तदाशिरिक्तवि

इति षट्त्रिंशन्मतात् । ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपारिजाते गोभिलः—

दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।
अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः ॥ इति ।

अत्र रविपितृसुतशब्दाः प्रदर्शनार्थाः, न्यायसाम्यात् । तेन चन्द्रग्रहणेऽपि सपिण्डादिवार्षिकमन्नादिना तद्दिने एव कार्यमिति मदनपारिजाते व्याख्यातम् । पृथ्वीचन्द्रोदयेऽप्येवम् । तेन यानि—

आमश्राद्धं प्रकुर्वीत माससंवत्सरादृते ।
अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचित् ॥

इति मरीचिलौगाक्ष्यादिवचनानि, तानि ग्रहणदिनातिरिक्तविषयाणि । निर्णयामृतेऽप्येवम् । यानि तु—

ग्रहणात्तु द्वितीयेऽह्नि रजोदोषात्तु पञ्चमे ।
ग्रस्तोदये यदा चन्द्रे प्रत्यब्दे समुपस्थितम् ॥
तद्दिने चोपवासः स्यात्प्रत्यब्दं तु परेऽहनि ।

तथा—

ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि ।
प्रत्यब्दं तु तदा कार्यं परेऽहन्येव सर्वदा ॥
चन्द्रसूर्योपरागे च तथा श्राद्धं परेऽहनि ।

इत्यादि वचनानि, तानि महानिबन्धेषु क्वाप्यनुपलम्भान्निर्मूलानि, प्रत्युत पूर्वोक्तनिबन्धेषु तद्दिन एव श्राद्धमुक्तमित्यलम् ।

दानत्वात् सद्यः । श्राद्धं च दिवाभोजनमकृत्वा कार्यं न तु भोजनं कृत्वा । श्राद्धात्प्राक् तद्दिनभोजननिषेधस्येहापि निष्प्रत्यूहं प्रवृत्तेः । तर्पणं तु भुक्त्वाऽपि कार्यं चित्रितयतर्पणवदिति सम्प्रदायः ।

ग्रहणादिसप्तदिनपर्यन्तं रामगोपालागमदीक्षोक्ता शिवार्चनचन्द्रिकायां ज्ञानार्णवे—

*मन्त्राद्यारम्भणं कुर्याद्ग्रहणे चन्द्रसूर्ययोः ।
ग्रहणादावपि देवेशि कालः सप्तदिनावधि ॥ इति ।

रुद्रयामले—

*(१)सत्तीर्थेऽर्कविधुग्रासे *तन्तुदामनपर्वणि ।
*मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥

---

*मन्त्रादीनि । आदिना पुरश्चर्यादिग्रहः *सत्तीर्थे इत्यादि । अत्रत्वं सप्तमी न तु निमित्तत्वे । तेन तेषु तदकरणेऽपि न दोषः । एवं तुलादिमहादानादावपि ग्रहणस्याङ्गत्वमेव न निमित्तत्वमित्यूह्यम् । *तन्तुदामनि । पवित्रारोपणदमनारोपणकालयोः ।
*मन्त्रदीक्षा=मन्त्रोपदेशः ।

महादीक्षा तथा दीक्षा उपदेशस्तथा परः ।
युगे युगे च कर्तव्य उपदेशः कलौ युगे ॥

इत्युक्तः ।

चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥

इत्युपदेशस्वरूपम् । गुर्वलाभे तु मन्त्रशास्त्रे—

गुरोरभावे विप्रेन्द्र मन्त्रग्रहणमुच्यते ।
कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ॥
ताडपत्रे (२)मनुं लिख्य स्थापयीत तदग्रतः ।
क्षीरखण्डादि नैवेद्यं स्थापयीत ततः शिवे ॥
ताडपत्रं समालोक्य पठेदष्टोत्तरं शतम् ।
एवं गृहीतो मन्त्रश्चेद्गुरोरपि विशिष्यते ॥

---

(१) 'चन्द्रसूर्यग्रहे तीर्थे महापर्वादिके तथा' इति क्वचित्पाठः ।
(२) मनुं=प्रासादमन्त्रम् ।

अत्र सूर्यग्रहणमेव *मुख्यम्।

सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत्।
सूर्यग्रहणकालेन समो नान्यः कदाचन॥

न मासतिथिवारादिशोधनं सूर्यपर्वणि।

इति तत्रैव कालोत्तरवचनात्।

*चन्द्रग्रहे तु या दीक्षा या दीक्षा ब्रह्मचारिणाम्।
वनस्थस्य च या दीक्षा दारिद्र्यं सप्तजन्मसु॥

इति तत्रैव योगिनीतन्त्रे निषेधाच्च॥

ग्रहणं च जन्मराश्यादौ निषिद्धम्। तदुक्तं ज्योतिषे-

त्रिषडदशाऽऽयोपगतं नराणां
शुभप्रदं स्याद्ग्रहणं रवीन्द्वोः।
द्विसप्तनन्देषुषु मध्यमं स्या-
च्छेषेष्वनिष्टं कथितं मुनीन्द्रैः॥ इति।

आयः=एकादश, नन्दाः=नव, इषुः=पञ्च। मदनरत्ने गर्गः-

जन्मसप्ताष्टरिःफाङ्कदशमस्थे *निशाकरे।
दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि च॥

रिःफं=द्वादश, अङ्काः=नव, निधनं=सप्तमतारा।

पृथ्वीचन्द्रोदये विष्णुधर्मे-

यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ।
तज्जातानां भवेत्पीडा ये नराः शान्तिवर्जिताः॥

गुरौ संभाविता दोषाः प्रायेण तु कलौ युगे।
एवं गृहीते मन्त्रस्य सिद्धिर्भवति पार्वति॥ इति।

*मुख्यमिति। सूर्यग्रहदीक्षायाः माहात्म्यार्थमिदम्। अन्यथा ज्ञानार्णवतन्त्रचन्द्रग्रहदैवस्यर्थात्। *चन्द्रग्रहे इति। निषेधार्थ स्तुत्यर्थमिति द्रष्टव्यम्। *निशाकरे इति। दिवाकरेऽपि ग्राह्य।

तत्रैव पुराणान्तरे—

सूर्यस्य संक्रमो वाऽपि ग्रहणं चन्द्रसूर्ययोः ।
*यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथवा मृतिः ॥
*तस्य दानं च होमं च देवार्चनजपौ तथा ।
उपरागाभिषेकं च कुर्याच्छान्तिर्भविष्यति ॥
स्वर्णेन वाऽथ पिष्टेन कृत्वा सर्पस्य चाकृतिम् ।
ब्राह्मणाय ददेत्तस्य न रोगादिभयं महत् ॥

जन्मनक्षत्रं तत्पूर्वोत्तरे च त्रिजन्मनक्षत्रमित्युच्यते । जन्मदशमैकोनविंशतितारा इति केचित् । सर्पस्य=चन्द्राकारस्य राहोरित्यर्थः । अद्भुतसागरे गार्ग्यः—

यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते ।
राज्यभङ्गं सुहृन्नाशं मरणं चात्र निर्दिशेत् ॥

राज्यस्य नक्षत्रम्=अभिषेकनक्षत्रमिति तत्रैव व्याख्यातम् । भार्गवार्चनदीपिकायां ज्योतिःसागरे—

*सौवर्णं कारयेन्नागं पलेनाथ पलार्धतः ।
तदर्धेन तदर्धेन फणायां मौक्तिकं न्यसेत् ॥
ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः ।
कांस्ये वा कान्तलोहे वा न्यस्य दद्यात्सदक्षिणम् ॥
चन्द्रग्रहे तु रूप्यस्य बिम्बं दद्यात्सदक्षिणम् ।

---

*यस्येति । होरायां ग्रहणे तु—

होरायां ग्रहणे यस्य स वा मरणमृच्छति ।

इति द्रष्टव्यम् । *तस्य दानं चेति । विभवे दानहोमौ, तदभावे एकैकः; चकारद्वयात् । होमदेवार्चनजपेषु विशेषस्तत्रैव ।

मण्डलाधिपदेवत्यैर्मन्त्रैर्मृत्युञ्जयादिभिः ।
होमं कुर्यात्प्रयत्नेन तन्मन्त्रान् जपेद्बुधः ॥ इति ।

मण्डलानि=अश्विन्यादिगणात्मकानि, तदधिपाः=अग्निवरुणवाय्विन्द्राः । नागपात्रदानमशक्तस्य । शक्तस्य त्वाह—*सौवर्णमिति ।

नागं रुक्ममयं सूर्यग्रहे बिम्बं च हेमजम् ॥
*तुरङ्गरथगोभूमितिलसर्पींषि काञ्चनम् ॥

कालविवेकेऽपि—

सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनम् ।
सदक्षिणं सवस्त्रं च ब्राह्मणाय निवेदयेत् ॥
सौवर्णं राजतं वाऽपि बिम्बं कृत्वा स्वशक्तितः ।
उपरागभवक्लेशच्छिदे विप्राय कल्पयेत् ॥

मन्त्रस्तु—

तमोमय महाभीम सोमसूर्यविमर्दन ।
हेमताराप्रदानेन मम शान्तिप्रदो भव ॥
विधुन्तुद नमस्तुभ्यं सिंहिकानन्दनाच्युत ।
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात् ॥ इति

अत्र शान्तिरप्युक्ता हेमाद्रौ मात्स्ये-

यस्य राशिं समासाद्य भवेद्ग्रहणसंभवः ।
स्नानं तस्य प्रवक्ष्यामि मन्त्रौषधिसमन्वितम् ॥
चन्द्रोपरागं सम्प्राप्य कृत्वा ब्राह्मणवाचनम् ।
संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥
पूर्वमेवोपरागस्य समानीयौषधादिकम् ।
स्थापयेच्चतुरः कुम्भानव्रणान्सलिलान्वितान् ॥
गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥

---

*तुरङ्गेति । गजादिदानमप्यन्यस्य शक्तस्यावश्यकम् । राज्ञाभिषेकनक्षत्रोपरागे च दानहोमादिपुरश्चरणादिदानपर्यायावश्यकं शान्तिश्च कार्या । पुरश्चरणचन्द्रिकायाम्—

अथ चन्द्रोपरागे पुरश्चरणमिष्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः ॥
स्नात्वा समुद्रगामिन्यां नाभिमात्रोदके स्थितः । इति ।

पञ्चगव्यं पञ्चरत्नं पञ्चत्वक् पञ्चपल्लवम् ।
रोचनं पद्मकं शङ्खं कुङ्कुमं रक्तचन्दनम् ॥
शुक्तिस्फटिकतीर्थाम्बुसितसर्षपगुग्गुलान् ।
मधुकं देवदारुं च विष्णुक्रान्तां शतावरीम् ॥
बलां च सहदेवीं च निशाद्वितयमेव च ।
गजदन्तं कुङ्कुमं च तथैवोशीरचन्दनम् ॥
एतत्सर्वं विनिक्षिप्य कुम्भेष्वावाहयेत्सुरान् ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥
सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु ।
मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ॥
चन्द्रोपरागसम्भूतामग्निः पीडां व्यपोहतु ।
यः कर्मसाक्षी लोकानां यमो महिषवाहनः ॥
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।
रक्षोगणाधिपः साक्षान्नीलाञ्जनसमप्रभः ॥
खड्गहस्तोऽतिभीमश्च ग्रहपीडां व्यपोहतु ।
नागपाशधरो देवः सदा मकरवाहनः ॥
स जलाधिपतिर्देवो ग्रहपीडां व्यपोहतु ।
प्राणरूपो हि लोकानां सदा कृष्णमृगाधिपः ॥
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ॥
चन्द्रोपरागकलुषं धनदोऽत्र व्यपोहतु ।
योऽसाविन्दुधरो देवः पिनाकी वृषवाहनः ॥
चन्द्रोपरागपापानि स नाशयतु शंकरः ।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥
ब्रह्मविष्ण्वर्करुद्राश्च दहन्तु मम पातकम् ।

एवमावाहयेद्देवान्मन्त्रैरेभिश्च वारुणैः ॥
एतानेव तथा मन्त्रान्स्वर्णपट्टे विलेखयेत् ।
ताम्रपट्टेऽथ वाऽऽलिख्य नववस्त्रे तथैव च ॥
मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः ।
कलशान् द्रव्यसंयुक्तान्नानारूपसमन्वितान् ॥
गृहीत्वा स्नापयेद् गुरुं भद्रपीठोपरि स्थितम् ।
पूर्वैरेव तु मन्त्रैश्च यजमानं द्विजोत्तमाः ॥
अभिषेकं ततः कुर्यान्मन्त्रैर्वारुणसूक्तकैः ।
आचार्यमर्चयेत्पश्चात्स्वर्णपट्टं निवेदयेत् ॥
आचार्यदक्षिणां दद्याद्गोदानं च स्वशक्तितः ।
होमं वाऽपि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा ॥
दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितम् ।
सूर्यग्रहे सूर्यनामयुक्तान्मन्त्रांश्च कीर्तयेत् ॥
अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत् ।
न तस्य ग्रहणे दोषः कदाचिदपि जायते ॥
इति ग्रहणशान्तिः ॥

भार्गवार्चनदीपिकायां ब्रह्मसिद्धान्ते—
सर्वैः पटस्थितं वीक्ष्यं खस्थं तैलाम्बुदर्पणैः ।
ग्रहणं गुर्विणी जातु न पश्येत पटं विना ॥
तथा मङ्गलकृत्येषु विधिविशेषो हेमाद्रौ—
त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम् ।
माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥
प्रकारान्तरं तत्रैवोक्तम्—
द्वादश्यादितृतीयान्तो वेध इन्दुग्रहे स्मृतः ।
एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तितः ॥
इदं च पूर्णग्रासे । 'अन्यत्र खण्डग्रहे तयोः' इति त-
भिति।तदुक्तं दीपिकायाम्—"खण्डग्रहे खेतयोः माङ्ग-

मैत्रेयोक्तेः । इदं च *ग्रस्तास्ते त्रिदिनं पूर्वम्' इति नारदेन ग्रस्तास्ते विशेषोक्तेर्ग्रस्तास्तभिन्नग्रहणपरम् । ज्योतिर्निबन्धे च्यवनः—

ग्रहणोत्पातभं त्याज्यं मङ्गलेषु ऋतुत्रयम् ।
यावच्च रविणा भुक्त्वा मुक्तं भं दग्धकाष्ठवत् ॥

अन्यानि चाग्नेयादिमण्डलानि तत्फलं वर्णाधिकारादिफलं च दैवज्ञेभ्यो ज्ञेयम् । पुरश्चरणचन्द्रिकायाम्—

*चन्द्रसूर्योपरागे च स्नात्वा प्रयतमानसः ।
*स्पर्शादिमोक्षपर्यन्तं जपेन्मन्त्रं समाहितः ॥

अथ दिनं तथा ग्रहणदिनं निरस्य' इति *ग्रस्तास्ते इति । 'ग्रस्तोदये तूत्तरं त्रिदिनम्' इति केचित् । आग्नेयादीनि=आग्नेयवारुणवायव्यैन्द्राणि । अत्राथर्ववेदोक्ताः शान्तयः शान्तिभिः कारणीयाः ।

आग्नेयीं कारयेच्छान्तिं शान्तिं कुर्वीत वारुणीम् ।
वायवीं च तथा कुर्यान्माहेन्द्रीं तत्र कारयेत् ॥

इति कात्यायनोक्तेः । एवं शान्तिभिस्तादर्थ्यं नाडीदोषवारणाय स्नानादि कार्यम् ।

ग्रहणादिवीदिननाडीनक्षत्रदोषशमनाय ।
सह शतपुष्पैः स्नानात्फलिनीचन्दनोशीरैः ॥
ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा ।
भास्करग्रहणे दद्याच्च तद्दोषोपशान्तये ॥
घृतकुम्भोपरि लिखितं शङ्खं नवनीतपूरितं दद्यात् ।
नाड्यादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे ॥

इत्यादिवचनात् । *चन्द्रसूर्योपरागे चेति ।

यद्वा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः ।

इति पाठान्तरात् पूर्वोपवासानन्तरं नाभिमात्रोदके स्थितः इत्यनुवर्तते । *स्पर्शादीनि । अतश्च ग्रस्तोदये ग्रस्तास्ते च न पुरश्चरणम् ।

प्रतिग्राही कुरुक्षेत्रे न भूयः पुरुषो भवेत् ।
तथाऽपि मनसः शुद्ध्यै प्रायश्चित्तं समाचरेत् ॥
तप्तकृच्छ्रद्वयं कुर्यादैन्दवेन समन्वितम् ।
सत्रेण वा यजेताथ जपेद्वा लक्षसप्तकम् ॥
वापीकूपतडागादिखननैर्विसृजेद्धनम् ॥ इति ।

अन्यच्च—

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुद्ध्यन्ति दानेन तपसैव च ॥

इति मनूक्तमुत्सर्गोत्तरं ज्ञेयमिति दिक् । ग्रहणान्तरितस्य पूर्वसंकल्पितद्रव्यस्य द्वैगुण्यं भवतीति शिष्टाः । पठन्ति च ग्रहणपर्वणि—

अन्येषां तु—

षड्गुणं चाष्टगुणितं यथासंख्यं द्विजातयः ।
तेषां स्त्रीणां तु विज्ञेयस्तेषामेव समो जपः ॥
यं वर्णमाश्रितः शूद्रस्तज्जपस्तस्य कीर्तितः ।

इत्यपि द्रष्टव्यम् ।

यद्यदत्तं द्वितीयेन्न तस्य स्याद् द्विगुणो जपः ।

इति मन्त्रशास्त्रं तु अशक्तपरम् । तप्तकृच्छ्रं=तप्तस्याम्नायः प्राजापत्यद्वयम् । ऐन्दवं=चान्द्रायणं, प्राजापत्याष्टकम् ।

यथोक्तं यत्र वा नोक्तमिह पातकनाशनम् ।
प्राजापत्येन कृच्छ्रेण शोधयेन्नात्र संशयः ॥

इति वचनात् । तदुभयोत्तरं सत्रं कार्यम्, अथ वा तदुभयोत्तरं सप्तलक्षगायत्रीजपः ।

भक्त्या भोजयेद्विप्रान् शतं साग्रमतन्द्रितः ।

इत्युत्तरार्द्धम् । चाण्डालकरणे तु विप्रेभ्यो देयमित्याह—अप्रत्ययेति । ग्रहणभोजनेऽप्येतदेव प्रायश्चित्तम् "न भूयः पुरुषो भ-

यावत्तिष्ठति सो काले मनुष्यो कृतभिरहित ।
उपरागसमीकरणे तथाऽऽस्नं त्रिगुणं भवेत् ॥
दर्शोपर्वसु स्नानदानं शतगुणं भवेत् ।
सूर्यग्रहे सहस्रं स्वरभानोऽनन्तकं स्मृतम् ॥ इति ।

अत्र मूलं चिन्त्यम् ॥ अत्र केचिद्दीक्षितानुगा आहुः—"पर्वणस्तु निमित्तत्वेन नाशितत्वात् प्रत्यक्षत्वात् ज्योतिः-शास्त्रादिना ज्ञातस्य ज्ञानस्य निमित्तत्वे प्राप्तेऽपि-

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरे ॥

इति व्यासादिवचनेषु दर्शनपदस्य चाक्षुषज्ञान-रूपैकदेशपरत्वेन निमित्तत्वम्। अन्यथा दर्शने लक्षणा स्यात्। तेन मेघाच्छादनेऽस्पर्शानां जन्ममरणाद्यादिनि-षिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकारः" इति। तन्न-मत्सरेणाह—'दर्शनशब्देन चाक्षुषज्ञानं गृह्यते, न ज्ञानमा-त्रम्। अज्ञातस्य निमित्तस्यासम्भवात्तस्मिन्नसत्यमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः। तेन चाक्षुषयोग्यः कालः पुण्यः। योग्यत्वं च प्रत्यासत्त्येन चाक्षुषज्ञानप्रति-बन्धकराहित्यम्। *तेन मेघच्छन्ने योग्यताऽभावान्न स्ना-नादि' इति। निर्णयामृतेऽप्येवम्। तदेतत्तुच्छम्। यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ॥

इति वाक्यं व्यर्थं स्यात्। चाक्षुषज्ञानाभावेन प्राप्त्य-

येत्" इत्युक्तेः। *दर्शनेति। राहुदर्शने इत्यस्य कृदभिहितन्या-येन दृश्यमाने राहावित्यर्थः। *तेनेति। "दृष्ट्वा स्नायात्" "भुक्तिं दृष्ट्वा तु भुञ्जीत" इत्यादौ च स्नानादिकर्तृगतस्यैव दर्शनस्य धातु-सम्बन्धाधिकारविहितक्त्वाप्रत्ययाद्विशेषणत्वप्रतीत्या स्नानादावप्य-

भावात् । गाण्डूर्वेकरणाच निषेधस्य । न चेदं ग्रस्तास्तपरम् । रविचन्द्रयोरस्तानन्तरं रात्रिर्दिवाग्रहणस्यादिति वाच्यम् । तत्रपद्यस्य ग्रहपदस्याऽधिकरणत्वापेक्षायां निमित्तपरत्वे च तद्दर्शननिमित्तकस्नानदानादेरस्तास्तमयेऽप्यभावापत्तेः । अथ तथेति रात्रिदिने उच्येत ग्रस्ता वैश्वदेवीतिवद्गुणभूतेऽपि । तत्र । *तादृशमन्त्रलिङ्गाभावात् । तयोर्निमित्तत्वेऽधिकरणत्वे वाऽन्यमपुष्कलानायत्तभावापत्तेश्च । *किं च

नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

इति मनुवचनं चाप्येवम्*, 'दृष्टोऽरिष्टप्रदो राहुः' इत्यादि च । न चात्र विहिते दर्शने निषेधाप्रवृत्तिपर्युदस्तनीयताऽपि न युक्तेति वाच्यम् । दर्शनस्य निमित्तत्वानुवादेन *विधेयत्वाभावात् । एतच्चाग्रे वक्ष्यामः ।

स्थः । अन्यथा दर्शनाद्यगमादौ स्नानाद्यपत्तेरिति भावः । दर्शनोपधाननिषेधे एकस्यापि कर्मणस्तत्काले कर्तुमशक्यत्वाद्योग्यतानिषेधः । *इदमिति । तावताऽपि तद्दृश्यर्थपरिहारात् । *सेति । "तप्ते पयसि दध्यानयति सा वैश्वदेवी" इति श्रुतौ गुणीभूतं पयस्तच्छब्दार्थः । *तादृशेति । वैश्वदेवीशब्दार्थान्वयेन मान्त्रवर्णिकदेवतासंबन्धेन यागे विनियोगलाभात्पयोलाभः, न चेह तथा किञ्चिदस्तीत्यर्थः । ननु अन्यनिमित्तकस्नानादिचोदनाति तद्विषयकत्वापादितस्थल आह—*किं चेति । *उपात्येतेति । उपरक्तेक्षणस्यासिद्धेः । *विधेयत्वेति । येन "मा हिंस्यात्" इत्यस्यापीषोमीयादिबाधिनेव प्रकृते दर्शनविधिना निषेधस्य बाधनात्तद्गोचरत्वं स्यात्तदेव तु नेत्यर्थः । ननु—

एकरात्रमुपोष्यैव राहुं दृष्ट्वाऽमलं नरः ।
पुण्यमाप्नोति कृत्वा च स्नानश्राद्धे विधानतः ॥

*मलद्वये च दर्शनस्य विधौ तत्र स्नानविधौ च *विरुद्धत्रिकद्वयापत्तेः । अस्तु *सकृद्दर्शनविधानेन संकोच इति चेन्न । 'मुक्तिं दृष्ट्वा ततः स्नायात्' इति मुक्तिस्नानेऽपि चाक्षुषज्ञानस्य निमित्तत्वापत्तेः । अस्तु किं तर्हि तत्त्वमिति चेत् । न, ग्रस्तास्ते

तयोः परेद्युरुदये दृष्ट्वाऽभ्यवहरेच्छुचिः ।

इति दर्शनोत्तरं भोजनविधानादन्यस्य पूर्वेद्युःकाल इव यावद्दर्शनं भोजननिषेधापत्तिः । मध्येऽभ्रीभूतस्य सुतरां यावच्चक्षुःप्राप्त्युपवासप्रसङ्गश्च । अथामलोत्तुरतया तत्र ज्ञानमात्रं विवक्ष्यते । तत्सत्पूर्वमपि लिङ्गेन

इति वाक्येन उपवासदर्शनोभयपूर्वकस्नानश्राद्धे विधाय तत्रास्पष्टफलत्वफलसंबन्धो बोधनीयः, न तूपवासदर्शनयोः स्नानादिफलसंबन्धः । बहुषु वचनेषु स्नानश्राद्धयोरेव फलसंबन्धश्रवणात् । दर्शनोपवासयोरफलत्वादङ्गतया विधिरस्त्वत आह—*मलद्वये चेति । *विरुद्धेति । दर्शनस्य विधौ तत्र स्नानादिविधौ च दर्शनस्य उपादेयत्वविधेयत्वगुणत्वानि त्रीणि उद्देश्यत्वानुवाद्यत्वमुख्यत्वानि त्रीणि इति विरुद्धेत्यर्थः । यथा "वाजपेयेन स्वाराज्यकामो यजेत" इत्यत्र वाजपेयेन यागं कुर्यात् यागेन स्वाराज्यं संपादयेदित्यर्थमाशङ्क्य यजत्यर्थे पदत्वविधेयत्वगुणत्वानि उद्देश्यत्वानुवाद्यत्वमुख्यत्वानीति विरुद्धत्रिकद्वयापादितम् । तदुक्तं माधवेन—

उपादेयविधेयत्वगुणत्वाख्यं त्रिकं यजेः ।
उद्देश्यानूक्तिमुख्यत्व त्रिकं तस्य गुणं प्रति ॥ इति ।

*सकृदिति । सर्वनैमित्तिकार्थं तन्त्रेण सकृद्दर्शनं विधेयम् । तत्र न विरुद्धत्रिकद्वयम्, अनुवादत्वानुपगमात्, "दृष्टोऽरिष्टप्रद" इति "नोपरक्तम्" इत्यादि च रागप्राप्तेक्षणनिषेधपरम् । न च नोपरक्तमित्यनेनादृष्टं तथा, "अरिष्टप्रदः" इति तु वैफल्यपरमिति वा-

[illegible]
[illegible]
[illegible] । [illegible]

[illegible] । [illegible]
[illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible] सर्वदा [illegible]
[illegible] । [illegible]
[illegible] न [illegible] । [illegible]
[illegible] । किञ्च [illegible]
[illegible] न तु [illegible]
[illegible] । [illegible]
[illegible], किं तु [illegible]
[illegible] । यथा [illegible]
[illegible]
[illegible] । [illegible]
[illegible] एव, अतु
[illegible]
[illegible] च [illegible]
[illegible] । तत्र [illegible]
[illegible], पुरुषार्थ-
[illegible] च [illegible] पुरुषार्थम् । [illegible]
[illegible] सर्वत्रैवेति भावः ।
[illegible] । यथा च '[illegible]' इति [illegible]

तस्य गतिः ? । इत्येकदेशग्रविशेषणगम्यात्‌ सहैकवाक्यत्व-*विवक्षयाऽर्थतः सिद्ध*ज्ञानमात्रानुवादत्वं सर्वं सुस्थम्‌ । अङ्गुल्यादिना देशग्रहणव्यावृत्त्या वा दर्शनस्यार्थवत्त्वम्‌ । *न चोक्तयोग्यताऽपि साऽस्ति, दर्शनोत्तरं मेघच्छन्ने योग्यताऽभावापत्त्या दानाद्यभावापत्तेः । *तेन तत्तद्देशावच्छेदेन ज्योतिःशास्त्रार्थत्वमेव योग्यता । किं च—

रजसो दर्शने नारी त्रिरात्रमशुचिर्भवेत्‌ ।
इत्यदृश्यत्वरजस्स्त्रीणामा*शौचाभावप्रसङ्गः ।

दिवासाधारणार्थं व्यधिकरणस्यापि दर्शनस्य निमित्तावच्छेदकत्वेनावयाच्चन्द्रसूर्योपरागः यस्मिन्‌ देशे यावत्कर्मपर्यन्तं चाक्षुषज्ञानयोग्यः स तद्देशे तावत्कर्मसु निमित्तमिति निष्कर्षः । देशान्तरभ्रम "सूर्यग्रहो यदा रात्रौ" इत्यादिद्वीपान्तरस्यपर्युदासात्‌, द्वीपान्तरस्थान्‌ प्रति तयोर्द्रष्टुं योग्यत्वात्‌ । अतिसूक्ष्मत्वाऽनादेश्यं तु न निमित्तयोग्यत्वात्‌ ।

रात्रौ सूर्यग्रहः स्याद्दिवा चन्द्रग्रहस्तथा ।
नादेश्यमुभयं राहोः यत्र सूक्ष्मतमं भवेत्‌ ॥

इति गणकैः पाठाच्च । तस्य च शास्त्रतो ज्ञानमेवानुष्ठानप्रयोजकं, तत्कालश्च तादृशः न तु संक्रान्त्यादिवत्‌ पूर्वापरकालः । तथा च चाक्षुषज्ञानयोग्येऽल्पकालीनेऽपि ग्रहणे स्नानदानादि स्नानमेव वा यावत्कर्तुं शक्यं तावत्कुर्यात्‌ । वर्तमानमेव हि ग्रहणं निमित्तं न त्वतीतं भावि चेति वक्तुं यावत्पदमिति निष्कर्षः । *उद्देश्यं= ग्रहणम्‌ । *अविवक्षया चाक्षुषत्वस्येत्यादिः । *ज्ञानमात्रेति । तदुक्तं—चाक्षुषज्ञानयोग्य इति शास्त्रतो ज्ञानमात्रेति चार्थः । इदानीं मेघच्छन्नत्वेन चाक्षुषज्ञानप्रतिबन्धकराहित्यरूपां तद्योग्यतां दूषयति— *न चेति । स्वयं योग्यतामाह—*तेनेति ।
*आशौचाभावेति । तथापि रजोदर्शनस्याशौचाङ्गतापत्त्या तदङ्गासम्भवात्‌ । यदि तु भावलक्षणसप्तमी तर्हीदानीमपि तुल्यैव प्रस-

यत्तु गर्गेणोक्तम्—*ज्ञानोत्तरं त्वधिकारो *न ज्ञानकाले । स्नानकाले *ज्ञानाभावात् । एवं *दर्शनोत्तरं सुप्तिपर्यन्तमभावेन योज्यतेति, तदपि *प्रतिज्ञामात्रम् । *किञ्च स्मर्यते

तयोः पर्वकदृष्टे स्नानमथ वदन्त्युद्विजः ।

इत्यादिवाक्यवैयर्थ्यापत्तिः । चाक्षुषज्ञानान्यथानुपपत्तिवशात्तु दर्शने स्नानसिद्धेः । ननु सुप्तिस्नानं वाक्यीयदर्थवैकल्याभावात् । तथा च श्रीनोऽपि विविक्तवर्णो विद्यते । तदा 'दृष्टे स्नायात्' इत्यत्रापि नाद्वियानएव । 'दृष्ट्वा स्नायात्' इत्यादौ तु श्रुतिविरुद्धाध्याहारेणैव, न तु तस्य वाक्यीयत्वादिति भावः ।

ज्ञानोत्तरं=चाक्षुषज्ञानोत्तरम् । *न ज्ञानकाले=न चाक्षुषज्ञानकाले । चाक्षुषज्ञानकालस्याङ्गत्वाधिकारत्वाभावादकत्वादिति भावः । *ज्ञानाभावात्=ज्ञानरूपाङ्गाभावात्तत्पादेरधिकारः *दर्शनोत्तरमिति । योग्यतावशाज्ज्ञानस्य सकृद्दर्शनस्यैव दानादिप्रयोगकालत्वोपगमादित्याशयः । *प्रतिज्ञामात्रमिति । ज्ञानमात्रस्य शास्त्रदर्शनं नियम्यते, न स्वपूर्वं विधीयते, शाब्दज्ञानवत् । तथा चान्यादीनामवाक्यत्वेन तद्ज्ञानाभावेऽपि यथावस्तुस्थित्यैव नैमित्तिकेऽधिकारो दुर्वारः । नन्वेवमपाङ्गज्ञानेऽप्यधिकारे तत्स्मादकाले विद्यायामभावेऽपि अधिकारः स्यात् । न स्यात् । कर्मप्रयोगविरुद्धवयोऽभ्ये हि न यथायोग्यमपायविषयम् । यथा स्वतः सिद्धतया कर्मानुरोधेन कर्तुमशक्येषु देशकालकर्तृकत्वब्राह्मणराजन्यादिषु यथा वा विध्यन्तरसिद्धतया तादृशेषु आधानविधिसिद्धेष्वग्निषु, अध्ययनविधिसिद्धायां विद्यायां च न प्रयोगवचो दर्शननियम इति भवति यथावस्तुपक्षविषयः । तस्मादन्यादेस्तद्ज्ञानाभावेऽपि स्नानं दुर्वारमिति भावः । एतच्च दर्शनस्य स्नानेऽङ्गत्वमुपेत्य दूषणमुक्तम् । इदानीं वस्तुतस्तस्याङ्गत्वमेव न सम्भवतीत्याह—*किञ्चेति ।

योऽवरमपि स्नानाधानयोन्न । ज्ञानपक्षेऽप्येष दोषस्तुल्य इति चेत् सत्यमिति । यदि ज्ञानवाचकं पदं श्रूयेत, तत्तस्मादसत्तो विचार्येत । इतिरेतु श्रूयत इति चेत्-इदम् । कथं तर्हि ज्ञानं लभ्यते ? । 'संक्रान्तौ स्नायात्' इतिवदत्र्यर्थादित्यवेहि । अभ्युदयादेश योऽद्यपिशेषणाद्यिक्षतानो वाक्यभेदोऽपि । अस्तु तर्हि दृष्टं ग्रहणं निमित्तमिति चेत् । ग्रहणाश्रयेऽस्तोत्तरं स्नानपक्षेः विशिष्टोद्देशे वाक्यभेदात्त । तथाप्येतत्तुल्यमिति चेत् 'चाक्षुषदर्शनगोचरे' इति वचनेन अतत्प्रतिषेधात् । तत्र स्वल्पग्रह इव ग्रहणास्तेऽपि स्यात् ।

यद्-दृष्टे इति।०अर्थादिति। ननु संक्रान्तौ ज्ञानस्याधिकारत्वं युक्तं न तु 'दृष्टे राहौ' इत्यादौ, दृष्टे इति श्रवणादिति चेत् । अत्राहुः-दृष्टे इति । "यस्य च भावेन भावलक्षणम्"(पा० सू० २-३-३७)इति सूत्रेण सप्तमी । ज्ञानरूपभावलक्षणसूत्रादुपविषयकभावान्तरापेक्षायां तस्य निमित्तत्वेन लक्षणत्वात् । तत्स्वभावलक्ष्यो ज्ञानरूपो भावो दर्शनेन लक्ष्यः । यथा "यस्य हविर्निरुप्तं पश्चात् चन्द्रमा-अभ्युदेति" इत्यादौ निरुप्तशब्देन मलिनमात्रम् । अवधुतस्य हविषोऽभिधानोक्तचन्द्रोदयलक्षणः सम्पर्कात् । न चैवं लक्षणा । प्रधानभूतसप्तम्यर्थान्वयानुरोधेन गुणभूते प्रातिपदिके तस्या अदोषत्वात् । प्रातिपदिकार्थानुरोधेन सप्तम्या एवार्थत्यागे तु तस्या एवासाधुत्वापत्तेः । यस्मात् शास्त्रीयज्ञानं दृष्टेरभिधेयमेव । "पञ्चार्थधानावलोचने" "षट् दर्शनानि" इति प्रयोगात् । तथा च न लक्षणाऽपि ।

इयान् परं भेदः-"संक्रान्तौ स्नायात्" इत्यादौ निमित्तमहिम्ना "दृष्टे राहौ स्नायात्" इत्यादौ तु लक्षणमहिम्नेति । दर्शनविशेषणतया निमित्तान्तर्भावं गृहाने-०आशिष्यति । ०तत्प्रतिषेधादिति । योगपद्यत्वेन निमित्तावच्छेदकस्यावेदितत्वात् ।

किञ्च दर्शनस्य विधित्वानुपपत्तेश्च ! । प्राप्तं प्रधानो- द्देशेन दर्शनविधिरुत दर्शनोद्देशेनास्नानविधिरुत स्ना- नोद्देशेन दर्शनविधिः ? । नाद्यः । उद्देश्यत्वेन स्नानवि- धाने दर्शनविधाने च वाक्यभेदात् । अत एव द्वितीयो- ऽपि परास्तः । न तृतीयः । स्नानस्योद्देश्यत्वे दर्शनस्य निमित्तत्वेनाविधेयत्वापत्तेः । अन्यथा निमित्तनाशे प्रधानस्नानविधिः केन वार्यते । अथ स्नानोद्देशेन तु द- र्शनविशिष्टस्नानविधिः, कालिकस्य प्राप्तं दर्शनं नि- मित्तीकृत्य स्नानमात्रविधिः । न । *स्नानस्य प्रधान- स्य प्राप्तौ तदङ्गदर्शनप्राप्तिः, अतएव न निमित्ते सति स्नानविधेरन्यथासिद्धत्वात् । एवं दर्शनविधौ सति नि- मित्तकस्नानविधिः । सति च प्रधानस्नानविधौ त- दङ्गदर्शनविधिः । तत्र*अधिकारे प्रयोजनाभावे च वै-

*एतेन=विशेषणविशेष्यभावमपि विधेयत्वापत्त्या वाक्य- भेदेन । *स्नानाद्यङ्गेष्वपि निधारणमसौ । क्वचित् "दृष्ट्वा स्नायात्" इत्यादौ दर्शनस्य प्राप्त्यभावेन दृष्टवि- *शिष्टस्नानविधिः । नन्वस्तु 'दृष्ट्वा स्नायात्' इत्यादौ दर्शनविधि- शिष्टस्नानविधिः "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा" इति विशिष्टविधिवदिति चेन्न । "वारवन्तीयमग्निष्टोमसाम कृत्वा" इत्यादौ सर्वथैवाप्राप्तत्वेनपक्तृत्वा तदुत्तरक्रियाकरणासम्भवतयैव वि- शिष्टविधिः, इह तु कथंचिदपि प्राप्ते लाघवाय न तद्विधिः । क्त्वो हि न विधायकत्वं, स्नात्यादेः परस्य लिङादेस्तदर्थविधान एव व्यापृतत्वमिति विशेषात् । *अधिकार इत्यादि । स्नानाधि- कारिणः सिद्धस्य दर्शनाधिकारासिद्धिः तस्य स्नानाद्यङ्गत्वात्, अङ्गा- नां च प्रधानाधिकारिकत्वाद्, दर्शनाधिकारिणश्च स्नानाद्यधिकार- सिद्धिः तस्य दर्शननिमित्तकत्वात् । एवं स्नाने दर्शने प्रयोजकं

इदम् । अन्यत्रार्थपूर्वकालत्वविधौ न्यायस्यैव प्रापकत्वेः ।
अन्यथा स्नानीयात्मनि दर्शनमङ्गं स्यात् । न द्वितीयः ।

यथाश्रुतार्थ,दर्शने च स्नाने निमित्तज्ञानत्वादेरर्थः । ननु यद्येवं तर्हि दर्शनस्य निमित्तत्वेऽपि पुत्रवद्गृहिविधिमद्ग्रहणाधिकारमयुक्तविरोधाः, पुत्रवद्गृहिणोऽपि निमित्तोऽन्य स्नानं विधाय यथायथमद्भवया दर्शनं विधीयतां, दोषाभावात् । तथा हि निमित्तमत्र चात्रीयं यद्योगकं भद्रार्थो निमित्तकानां विधानात् । ज्ञानं स्वयंवत्तया । तथा च चन्द्रादिःस्नायादर्शनयोग्यं ग्रहणं निमित्त्य यथाशास्त्र मासिमित्तकं मदग्रहुदमाचर्न स्नानाचरणस्य तत्पुत्रस्या दर्शनमयुक्तोरिति न ययुक्तोर्विरोधः, नापि पुत्रवृत्तेः । शास्त्रीयाचारस्तयाः शास्त्रावगतनिमित्तत्वादन्त्रैनस्य निमित्तेऽनन्वर्थावात् । अत एव न विधिमद्वृत्तेः, नाप्यधिकारस्य । अधिकारो हि कर्तृत्वपूर्वकं फलस्वाम्यं विधेयपोरद्रवयानयोरेकपदोनकालेन मदद्गाक्षिप्तायाः कर्तृताकैवयात् न स्वविधेयस्य दर्शनस्येत्ययाद–अन्यत्रार्थेति । निरूपितमेतत् । ननु दृष्टविशेषाणाभिलाक्षितस्य दर्शनस्याद्दपनिरूपणं स्वनाशुवादन्याचीणात् ग्रहणदर्शने स्नानादिकं यति निमित्तमस्तु ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।

इति वचनात्, सदैव चाण्डालं भवपि तथाऽस्तु । अन्यथा "नाशुची राहुसारकाः" इति निषेधात् निषेधालक्षानां शिष्टानां स्नानाचरणापत्तेः, अस्क चाऽन एव निषेधात् सपिण्डजननादिना निमित्तान्तरेणाशुचेर्दर्शनाभावात्स्नानादेरभावः, अस्क च निषेधातिक्रमजन्यप्रत्यवायपरिहारस्योपायापेक्षत्वेन तद्दर्शनया—

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतके तथा ।

इति स्नानादिविधानं सुरापानादिनिमित्तस्नानाद्यधिकारि-

तथा—

न कालनियमः सेतौ समुद्रस्नानकर्मणि ।

सन्निधिश्च तत्रैव—

पिप्पलादसमुत्पन्ने कृत्ये लोकभयङ्करे ।
पाषाणस्ते मया दत्त आहारार्थं प्रकल्प्यताम् ॥

इति पाषाणं प्रक्षिप्य—

विश्वाची च घृताची च विश्वयोने विशां पते ।
सान्निध्यं कुरु मे देव सागरे लवणाम्भसि ॥
नमस्ते विश्वगुप्ताय नमो विष्णो अपांपते ।
नमो जलधिरूपाय नदीनां पतये नमः ॥
समस्तजगदाधार शङ्खचक्रगदाधर ।
देव देहि ममानुज्ञां तव तीर्थनिषेवणे ॥
त्रिनयनानलकर्मीजालं नमो विष्णुमुखापतिम् ।
सान्निध्यं कुरु देवेश सागरे लवणाम्भसि ॥

अग्निश्च तेजो मृडया च देहो
रेतोधा विष्णुरमृतस्य नाभिः ।
एतद् ब्रुवन्पाण्डव सत्यवाक्यं
ततोऽवगाहेत पतिं नदीनाम् ॥

इति भारतोक्तमन्त्रेणावगाह्य विधिवत्स्नात्वा—

सर्वरत्नमय श्रीमान् सर्वरत्नाकरो यतः ।
सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे ॥

इत्यर्घ्यं दत्त्वा तर्पयेत् । तथोक्तं पूर्वोक्तान्देवानित्यादि-

पिप्पलादं निकलं च कुमारं शौनकं तथा ।
वसिष्ठं वामदेवं च पराशरमुमापतिम् ॥
वाल्मीकिं नारदं चैव वालखिल्यानपि च ।
सर्वं वीर्यं स्वकीयं च सर्वं सन्तर्पयाम्यहम् ॥

तारं पवनजं हनूमन्तं सुग्रीवं चाङ्गदं तथा ।
नीलं च द्विविदं चैव ऋषभं शरभं तथा ॥
रामं च लक्ष्मणं चैव सीतां चैव यशस्विनीम् ।
एतांस्तु सर्वान्संपूज्य जलमध्ये विशोधनः ॥
आब्रह्मस्तम्बपर्यन्तं परिकल्पितमचराचरम् ।
तया दत्तेन तोयेन तृप्तिमेवाभिगच्छतु ॥ इति ॥

इति श्रीमीमांसकनारायणभट्टसूरिसूनुरामकृ-
ष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभ-
ट्टकृते निर्णयसिन्धौ प्रथमः परि-
च्छेदः समाप्तः ॥

गुणरसेभमनाथमिताब्दका-
धिकनभस्य सितेऽष्टमिकातिथौ ।
सुरगुरावसितादृषुमूलजि-
त्प्रथमनिर्णयसिन्धुसटिप्पणम् ॥ १ ॥
हुतभुगुत्स्विभचन्द्रसमागता-
धिकनभस्य सिताष्टमिकातिथौ ।
प्रथमनिर्णयसिन्धुपरिच्छिदा
विवरणं व्यलिखल्लघुमूलमित् ॥ २ ॥

इति प्रथमस्य वृत्तिः ॥



चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥

इति हेमाद्रौ ब्राह्मोक्तेः । दिनद्वये तद्व्याप्तावव्याप्तौ* वा पूर्वैव । तदुक्तं ज्योतिर्निबन्धे—

वत्सरभूपमन्त्रिणां रसधान्येश्वरमेघपतीनाम् ।
श्रवणात्पठनाच्च वै नृणां शुभतां यात्यशुभं सह श्रिया ॥
चैत्रे मासि महाबाहो पुण्या या प्रतिपत्परा ।
तस्यां वै निम्बपत्राणि प्राश्य संशृणुयात्तिथिम् ॥

तत्र (१)यष्टीप्रवेशः कार्यः । उपरिचरवसूक्तायाम्—

यष्टिं च वैणवीं तस्मै ददौ वृत्रनिषूदनः ।
इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालनीम् ॥
ततः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा ।
प्रवेशं कारयामास गते संवत्सरे तदा ॥
ततः प्रभृति चाद्यापि यष्टेः क्षितिपसत्तमैः ।
प्रवेशः क्रियते राजन् यथा तेन प्रवर्तितः ॥
अपरेद्युस्ततस्तस्याः क्रियते तूच्छ्रयो नृपैः ।
अलङ्कृतायाः पिटकैर्गन्धैर्माल्यैश्च भूषणैः ॥
माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च ।

इति भारतात् । पिटकः=काष्ठादिरचितपात्रभेदः ।

*अव्याप्ताविति । तत्राऽमावास्यासत्त्वेऽपि संकल्पः प्रातरेव । 'प्रातः संकल्पयेत्' इति वाक्यात्, सङ्कल्पवचनाच्च प्रतिपत्संकीर्तनम् । आपाद्यमाकल्पस्य प्रयोगाविषयत्वे संकल्पविषयत्वात् ।

केचित्तु ततोऽप्युपः कालः प्रशस्तः 'तावति कुर्वीत यत्कारी स्यात्' इति श्रुतिव्याख्याने वेदभाष्ये सूर्योदयारम्भागारम्भस्य तनायवि शास्त्रोक्तदोषाणामुपशामकत्वोक्तेः, मीमांसकैः 'पुरस्ता'

(१) 'तत्र च यष्टीकार्या' इति क्वचित् पुस्तके पाठः ।

दिनद्वये चेत्प्रतिपद्
यो वारोऽर्कोदये स वर्षपः ।
उदयद्वितये पूर्वो
नोदयद्वितयेऽपि पूर्वः स्यात्(१) ॥
वत्सराद्यैत्रसितादेरुदयाकालतः प्रवृत्तिरब्दादेः ॥ इति ॥
वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥

इति वृद्धवसिष्ठोक्तेः ।

चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत् ।
तदहि ब्रह्मणः कृत्वा सोपवासस्तु पूजनम् ॥
संवत्सरमवाप्नोति सौख्यानि भृगुनन्दन ॥

इति हेमाद्रौ विष्णुधर्मोक्तेः । यदा तु चैत्रो मलमासो भवति तदा दैवकार्यस्य तत्र *निषिद्धत्वाच्छुद्धे मासि संवत्सरारम्भः कार्य इति केचिदाहुः । निष्कर्षस्तु—

शुक्लादेर्मलमासस्य सोऽन्तर्भवति चोत्तरः ।

इत्यादिवचनादधिमासपर्यन्तःपातान्मलमासमारभ्यैव वर्षप्रवृत्तेः शुभकालादावपि मलमास एव कार्य इति वयं प्रतीमः ।

ननु शुभकालादौ चैत्रशुक्लप्रतिपदन्तरस्याभावात्तु-त्तं तन्मध्य एवानुष्ठानम् । मलमासे [illegible] शुद्धप्रतिपदन्त-

प्रषद्विनौ निर्वपेत्'इत्यस्य नियमविधित्वार्थमुपःकालस्यापि यातः-शुद्धत्वाच्यत्वोपगमाय । 'अश्लीलसंवस्तु मासः परं निषिद्धो न धीर्देत्येति स्वरूपात्'इत्याहुः । *निषिद्धत्वादिति ।

(१) यदा दिनद्वये उदयकाले चैत्रशुक्लप्रतिपत् तदा पूर्वस्मिन् दिने यो वारः स वर्षेशः । यदा दिनद्वयेऽप्युदयकाले प्रतिपन्नास्ति तदाऽपि पूर्वस्मिन्नेव वारो वर्षेश इत्यर्थः ।

रस्य सम्भवात् शुद्ध एव वत्सरारम्भो युक्त इति चेन्न, भ्रान्तोऽसि । न हि प्रतिपदन्तरसत्त्वं प्रयोजकं, किं तु रूपापत्तेः वर्षेशाद्य(१)पापत्तेश्च । अपि [illegible] वत्सरारम्भस्तु मलमासेऽपीत्युक्तं प्राक् । न हि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेऽन्तर्भवतीति प्रमाणाऽपि सुवचम् । अत्र तैलाभ्यङ्गो नित्यः ।

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ॥

इति वसिष्ठोक्तेः ।

आश्विनेऽपि नवरात्रारम्भः । तदुक्तं मार्कण्डेयपुराणे—

शरत्काले महापूजा क्रियते या च वार्षिकी ॥ इति ।

तत्र प्रतिपदेव ग्राह्या ।

[illegible] द्वादशे मासि कीर्तिताः ।
त्रयोदशे तु [illegible] निष्फलाः परिकीर्तिताः ॥
[illegible] मासि कुर्वीत न कथञ्चन ।
[illegible] ॥
[illegible] । [illegible] ।

[illegible]

[illegible]

(१) [illegible]

अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने ।
मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ॥
इति देवीपुराणात् ।
तिस्रो ज्ञेयाः पराः प्रोक्तास्तिथयः कुरुनन्दन ।
कार्तिकाश्वयुजोर्मासोर्ज्येष्ठे मासि च भारत ॥
इति हेमाद्रौ प्रासङ्गिकः । पराः=परयुताः ।
*अत्र विशेषः पारणानिर्णयश्च शारदनवरात्रे वक्ष्यते ।
अथ प्रपादानमुक्तमपरार्के भविष्ये—
अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ।
पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेत् ॥
इत्युपक्रम्य—
ततश्चोत्सर्जयेद्विद्वान्मन्त्रेणानेन मानवः ।
'प्रपेयं सर्वसामान्या *भूतेभ्यः प्रतिपादिता ॥
अस्याः प्रदानात्पितरस्तृप्यन्तु हि पितामहाः' ।
अनिवार्यं ततो देयं जलं मासचतुष्टयम् ॥ इति ।
तथा—
प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सुना ।
प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः ॥
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ॥
तत्र मन्त्रः—
'एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः' ॥
अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ॥ इति ।

---

*अत्रेति । चण्डिकार्चनविषयकसकलविधिनिषेधाना-
मिहापि प्रवृत्तिरिति भावः । *भूतेभ्य इति । पश्वादिसाधारण्य-

चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां संपूज्य दोलो-
त्सवं कुर्यात्। तदुक्तं निर्णयामृते देवीपुराणे—

तृतीयायां यजेद्देवीं शंकरेण समन्विताम्।
कुङ्कुमागरुकर्पूरमणिवस्त्रसुगन्धकैः॥
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः।
आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा॥ इति

अत्र चतुर्थीयुता ग्राह्या।

मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे।

इति माधवोक्तेः। अत्र सौभाग्यशयनव्रतमुक्तं मात्स्ये-

वसन्तमासमासाद्य तृतीयायां जनप्रिये।
सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिः॥ इति

०तदपि परयुतैव।

इयं च मन्वादिरपि। अत्रैव मत्स्यजयन्त्यादिरि-
र्णीयते(१)। तत्रोक्ता दीपिकायाम्—
'चित्रार्की च तिथिविधिनभस्याद्यो कृष्णोमोऽनलो मह।
चित्रार्को च शिवोऽश्वोऽप्यतिथी मन्वादयो मघो'॥
इति।

तिथि:=पूर्णिमा। अग्निः=तृतीया। वैति। चैत्रादौ
ज्येष्ठादिमासैः। आशा=दशमी। कृष्णोमः=कृष्णाष्टमी।
अनलः=तृतीया। महः=नवमी। अर्कौ=द्वादशी। इति।
मार्गशीर्षे चैत्रयोः। शिवः=एकादशी। अश्वः=सप्तमी।
सर्वोऽप्याषाढादिमासेषु मन्वादय इत्यर्थः। अत्र

चन्द्रः। ०अत्रापीति। गौरीव्रतम्। ०मुख्येति।

अश्वयुक् शुक्लनवमी कार्तिके द्वादशी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥

(१) [illegible]

मन्वादिश्राद्धं नित्यम्। अकरणे प्रायश्चित्तदर्शनात्। तदुक्तमृग्विधाने—

त्वं भुवः प्रतिमन्त्रं च शतवारं जले जपेत्।
मन्वाद्यो यदा न्यूनाः कुरुते नैव वा पितुः॥ इति।

एवं यत्र प्रायश्चित्तवीप्सादिदर्शनं तानि षण्णवतिश्राद्धानि नित्यानि। तानि तु—

अमायुगमनुक्रान्तिधृतिपातमहालयाः।
अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिताः॥

इत्युक्तानि। चकारादष्टकाग्रहणम्।

चैत्रशुक्लतृतीयैव मत्स्यजयन्ती। अत्रैव प्रसङ्गाद्दशावतारजयन्त्यो निर्णीयन्ते। तत्र पुराणसमुच्चये—

मत्स्योऽभूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे
वाराहो गिरिजासुते नभसि यद्भूते सिते माधवे।
सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे
रामो गौरितिथावतः परशुभृद्रामो नवम्यां मधोः॥
कृष्णोऽष्टम्यां नभसि सितपरे, चाश्विने यद्दशम्यां
बुद्धः, कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण।
बाह्लौ मध्ये वामनो रामरामौ
मत्स्यः क्रोडश्चापराह्ने विभागे।
कूर्मः सिंहो बौद्धकल्की च सायं
कृष्णो रात्रौ कालसाम्ये च पूर्वे॥ इति।

केचित्तु स्फुटान् श्लोकान् पठन्ति। तथा-

अत्र विशेषानिर्देशे शुद्धाः। षण्णवत्य इति। यत्र सांवत्सरिद्वैधीभावादि तत्र षण्णवत्यादि अविशेषाणि मन्वादिवत् प्रावृत्यात्। एवं दशावतारत्ययादि। हुतभुक्=तृतीया। विधुः=द्वादशी। गिरिजासुतः=चतुर्थी। भूतं=चतुर्दशी। हरिः=द्वादशी। गौरि=

नभस्ये तु द्वितीयायां बलभद्रोऽभवद्धरिः* ॥
श्रावणे बहुलेऽष्टम्यां कृष्णोऽभूल्लोक*रक्षकः ।
*ज्येष्ठशुक्लद्वितीयायां बौद्धः कल्की भविष्यति ॥
यत्किञ्चिद्दीयते दानं तद्दानं मेरुणा समम् । इति ।

*हरिरिति । बलभद्रकृष्णयोर्मतभेदेन गणनायां भेदः। बलभद्र एवावतार इति स्वाभिप्रायः।

*रक्षक इति ।

अर्द्धरात्रे च रोहिण्यां सा तिथिः सर्वकामदा ॥
अर्द्धरात्रेऽष्टमी पुण्या पूर्वा वा यदि वा परा ।
रोहिणीसहिता स्तोका मुक्तिदा सर्वजन्तुषु ॥
तत्रोपवासं कुर्वीत नात्र कार्या विचारणा ।
उपोषणं जागरणं विशेषेण प्रशस्यते ॥

स्नानं दानमित्यादिश्लोकः ।

जातः कंसवधार्थाय भूभारोत्तारणाय च ॥
दानवानां वधार्थाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातः कृष्णः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ।

*ज्येष्ठ इति ॥ भाद्रे बौद्धः, ज्येष्ठे कल्कीत्याहुः ।

भाद्रशुक्लद्वितीया च हस्तनक्षत्रसंयुता ॥
चन्द्रोदये समुत्पन्नो बौद्धरूपोऽभवद्धरिः ।
नन्दायुक्ता न कर्त्तव्या द्वितीया विष्णुतत्परैः ॥
कामान्मोहात्प्रकुर्वीत दुष्टानां विजयो भवेत् ।
तस्मात्सर्वप्रयत्नेन गौरीयुक्ता प्रशस्यते ॥
तत्रोपवासं कुर्वीत विष्णुसायुज्यमाप्नुयात् ।
जातः कारुण्यमायाय दुष्टानां निधनाय च ॥
परित्राणाय साधूनां जातो बौद्धः स्वयं हरिः ।
गृहाणार्घ्यं मया दत्तं श्रीदेव्या सहितो हरे ॥

इति । पौराणास्तु वाराहपुराणवचनेन पाथयानि वर्णित—

'आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ ।
जयन्ती मत्स्यनाम्नीति तस्यां कार्यमुपोषणम् ॥
नभोमासि तृतीयायां हरिः कमठरूपधृक् ।
नभस्यशुक्लपञ्चम्यां वराहस्य जयन्तिका ॥
वैशाखे तु चतुर्दश्यां नृसिंहः समपद्यत ।
मासि भाद्रपदे शुक्लैकादश्यां वामनो हरिः ॥
वैशाखे शुक्लपक्षे तु तृतीयायां भृगूद्वहः ।
चैत्रे नवम्यां रामोऽभूत्कौशल्यायां परः पुमान् ॥
श्रावणे बहुलेऽष्टम्यां वासुदेवो जनार्दनः ।
पौषशुक्ले तु सप्तम्यां कुर्याद् बौद्धस्य पूजनम् ॥
माघशुक्लतृतीयायां कल्किनः पूजनं हरेः ।
प्रातः प्रातस्तु मध्याह्ने सायं सायं तथा निशि ॥
मध्याह्ने मध्यरात्रे च सायंप्रातरनुक्रमात् ॥

इति । तदत्र समूलत्वनिर्णये सति कल्पभेदेन व्यवस्था द्रष्टव्या । एताश्च तदुपासकानां नित्याः, अन्येषां तु काम्याः । जन्माष्टम्यादौ तु विशेषं वक्ष्यामः ॥

स्नानं दानमित्यादि ।
ज्येष्ठे शुक्लद्वितीया च पुनर्वसुसमन्विता ॥
सूर्योदये समुत्पन्ने कल्की विष्णुस्तदाऽभवत् ।
द्वितीया गौरिसंयुक्ता सर्वदा व्रतादिषु ॥
नन्दायुक्ता न कर्तव्या विष्णुसायुज्यमिच्छता ।
स्नानं दानं च यत्किञ्चित्तदक्षय्यमुदाहृतम् ॥
जातो म्लेच्छवधार्थाय दुष्टानां निधनाय च ।
परित्राणाय साधूनां धर्मसंस्थापनाय च ॥

*चैत्रशुक्लपञ्चमी कल्पादिः । तदुक्तं हेमाद्रौ मात्स्ये—
ब्रह्मणो या दिनस्यादिः कल्पादिः सा प्रकीर्तिता ।
वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च ॥
पञ्चमी चैत्रमासस्य तस्यैवान्त्या* तथा परा ।
शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी ॥
नवमी मार्गशीर्षस्य*सप्तैताः संस्मराम्यहम् ।
कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः ॥

गृहाणार्घ्यं मया दत्तं कृपाचार्येण हे हरे । इति ।
*चैत्रशुक्लेति । ब्राह्मे—
शुक्लायामथ पञ्चम्यां चैत्रमासि शुभानना ।
श्रीमत्स्यलोकान्मानुष्यं संप्राप्ता केशवाज्ञया ॥
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुञ्चति । इति ॥
*अन्त्या=अमावास्या ॥ *सप्तेति । त्रिंशदमी कल्पादयः।
अथ कल्पादयो राजन् कथ्यन्ते तिथयः शुभाः ॥
यासु श्राद्धे कृते तृप्तिः पितृणामक्षया भवेत् ।
चैत्रशुक्लप्रतिपदि श्वेतकल्पः पुराऽभवत् ॥
तस्य शुक्लत्रयोदश्यामुदानः समजायत ।
कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत् ॥
अथ कृष्णत्रयोदश्यां गौरीकल्पोऽप्यकल्पत ।
वैशाखस्य तृतीयायां शुक्लायां नीललोहितः ॥
चतुर्दश्यां तु शुक्लायां संजातो गारुडाभिधः ।
समानस्तु तृतीयायां कृष्णायामुदपद्यत ॥
माहेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत् ।
ज्येष्ठशुक्लतृतीयायां वामदेवस्य संभवः ॥
पौर्णमास्यां तु तत्रैव कूर्मः प्रवर्तते नृप ।

कृष्णपक्षे तृतीयायामग्नेः समगच्छत ॥
पञ्चदश्यां तु कृष्णायां पितृकल्पः समागमत् ।
शुक्ले चतुर्थीमाषाढे मासि नारायणोऽभवत् ॥
चतुर्दश्यां तस्य कृष्णायां सोमकल्पः समागमत् ।
श्रावणे शुक्लाष्टम्यां रौरवः समवर्तत ॥
तस्यैव कृष्णपक्षाष्टम्यां मानवः समपद्यत ।
षष्ठ्यां प्रौष्ठपदे शुक्ले मासि प्राणाभिधोऽभवत् ॥
सितेतरायां षष्ठ्यां तु तस्य तत्पुरुषाह्वयः ।
वृद्धकल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य च ॥
कृष्णायामपि वैकुण्ठः सविवेश विशांपते ।
कार्तिकस्य सिताष्टम्यां कल्पः कन्दर्पसंज्ञकः ॥
असितायां पुनर्जज्ञे लक्ष्मीकल्पस्य कल्पना ।
मार्गशुक्लदशम्यां तु कल्पसत्योऽभ्यवर्तत ॥
असितायां च सावित्रीकल्पः प्रारम्भमभ्यगात् ।
पौषे दशम्यां शुक्लायामीशानः प्रादुरास ह ॥
असितायामघोरस्य कल्पस्योपक्रमोऽभवत् ।
एकादश्यां तु शुक्लायां माघे ध्यानः प्रजज्ञिवान् ॥
तस्यामेव तमिस्रायां वाराहः माघ भूपते ।
सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य ह ॥
कृष्णायामपि वै राज्ञो विरराम महात्मनः ।
इति त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः ॥
आरम्भतिथयस्तासु शुक्लाः पुण्यतमा मताः ।
आसु श्राद्धं कृतं पुण्यमाकल्पस्यापि कल्पते ॥ इति ॥

दीपिकाऽपि—

'स्युः पक्षद्वयगाः क्रमात्प्रतिपदाद्याश्चैत्रमासक्रमात्
भूतौ माधवगौ मधौ तु मदनौ.ज्येष्ठस्थिते पर्वणी.।

[illegible] निर्णयो [illegible] । [illegible]

[illegible] —

[illegible] ।
[illegible] ॥
[illegible] ॥

[illegible] । [illegible]

[illegible] ।

[illegible] । [illegible]

[illegible] —

[illegible]
[illegible] ॥

[illegible]
[illegible] ।
[illegible]

[illegible] —

[illegible] ।
[illegible]

[illegible]

[illegible]

पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी ।
प्रातस्तु विधिवत् स्नात्वा वाजपेयफलं लभेत् ॥ इति ।

तिथितत्त्वे कालिकापुराणे—

चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रं तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नायात् कैवल्यमवाप्नुयात् ॥

*लौहित्यो ब्रह्मपुत्रः । मन्त्रस्तु—

'ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ।
अमोघागर्भसम्भूत पापं लौहित्य मे हर ॥'

चैत्रशुक्लनवमी रामनवमी । तदुक्तमगस्त्यसंहितायाम्—

'चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ।
उदये गुरुगौरांशोः स्वोच्चस्थे ग्रहपञ्चके ॥
मेषं पूषणि सम्प्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत् सकलया कौशल्यायां परः पुमान् ॥
तस्मिन् दिने तु कर्त्तव्यमुपवासव्रतं सदा ।
तत्र जागरणं कुर्याद्रघुनाथपरो भुवि ॥' इति ।

इदं च मध्याह्नयोगिनी ग्राह्या ।

चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥

---

* लौहित्य इति ।
लौहित्यमाहात्म्यं [illegible] ।
इति कालिकापुराणम् ।
[illegible] ।

परवदन्यायेन काम्यं नित्यं च । तदुक्तं हेमाद्रावगस्त्यसंहितायाम्—

उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ।
तस्मिन् दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ॥
सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः ।
अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम् ॥
पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः ।
यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः ॥
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥

तथा—

भवति" इति फलश्रवणात् नित्यः [illegible] विधीयते । "तस्मिन् [illegible] सुरं कुर्वीत" इति [illegible] ।

[illegible]

[illegible]

अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् ।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ॥
प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥

अत्र च विष्णूपासकानामेवेदं व्रतं नित्यं; अन्ये त्वन्ये "ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादौ इत्यादावेकरूपाणां नित्यानां यज्ञादीनाम् आत्मविविदिषार्थं विधानात्संयोगभेदाद् भेदः, तद्वदुपवासेऽपीति । तत्र काम्यप्रयोगेण प्रसङ्गात् नित्यसिद्धिः ।

काम्येऽपि नित्यसिद्धिः स्यात्तन्त्रेणोभयात्मिका ।

इति स्मृतेः । श्राद्धे निमन्त्रितब्राह्मणस्यैकस्मादेव भोजनादन्यफलत्वादसिद्धिः प्रसङ्गात् स्वतृप्तिरितिवत् प्रजाविधार्थमनुष्ठितेन यज्ञादिना नित्यतासिद्धिवच्च । एतेन काम्यं परित्यज्य केवलं नित्यमनुष्ठातुं शक्यं न तु नित्यं परित्यज्य काम्यमिति कथं प्रयोगभेद इत्यपास्तम् । नन्वेवमपि सकृदनुष्ठानेन कथमनेकार्थसिद्धिः । दर्शपूर्णमासयोः पञ्चानां प्रयाजानां मध्ये श्रीत्वेऽपि सकृत्प्रयाजादिनाऽङ्गेनोपकारवन्नित्यं काम्यं चोपवासे सति सकृत्सकृदङ्गानुष्ठानस्य न्याय्यत्वादिति चेत् । प्रसङ्गस्वीकारात् । यथा पश्वर्थमनुष्ठितेन प्रयाजादिना तत्प्रयोगमध्यपातिपशुपुरोडाशोपकारवदिति भावः ।

अत्र त्वन्येषामिति । विष्णुपरायणैरित्यत्र विष्णुशब्दस्य प्रकृतरामात्मकविष्णुपरत्वात् तत्परायणाः तन्मन्त्रदीक्षिताः तैः, नियमेन तेषामेव,

तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा ।

इति नित्यप्रयोगविधौ सदाशब्देन तदन्वयात् ।

सूर्यग्रहे कुरुक्षेत्रे महादानैर्मुहुर्मुहुः ।
तत्फलं समवाप्नोति श्रीरामनवमीव्रतात् ॥

इति काम्यप्रयोगश्च सर्वेषाम् । न च तद्विधौ विष्णुपरायणैरि-

दानित्याहुः । अन्ये तु अकरणे*दोषश्रवणात्

तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ।

इति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि स
षां नित्यम् । अन्यथा जन्माष्टम्यादावपि तदुपासका
मेव नित्यतां वक्तुः को वारयितेत्याहुः ।

अत्र विशेषो हेमाद्रावगस्त्यसंहितायाम्—

आचार्यं चैव संपूज्य मधुपर्कार्घ्यवेदिभिः ।
श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ॥
तत्राचार्यो भव प्रीत श्रीरामोऽसि त्वमेव च ।

तथा—

स्वगृहे चोत्तरे देशे दानस्योज्ज्वलमण्डपम् ।
शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलंकृतम् ॥
गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलंकृतम् ।
गदाखड्गाङ्गदैश्चैव पश्चिमे सुविभूषितम् ॥
पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतम् ।
मध्ये हस्तचतुष्काढ्यं वेदिकायुक्तमानतम् ॥
ततः संकल्पयेदेवं राममेव स्मरन्मुने ।
अस्यां रामनवम्यां च रामाराधनतत्परः ॥
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ।
इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः ॥

[illegible]

श्रीरामप्रतिमेयं दास्ये रामभक्ताय धीमते ।
प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे ॥
अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च ।
ततः स्वर्णमयीं रामप्रतिमां पलमात्रतः ॥
निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीम् ।
बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने ॥
वामेनाधःकरेणाराद्देवीमालिङ्ग्य संस्थिताम् ।
सिंहासने राजतेऽत्र पलद्वयविनिर्मिते ॥

तथा—

अशक्तो यो महाभागः स तु वित्तानुसारतः ।
(१)पलेनार्ध तदर्धेन तदर्धार्धेन वा मुने ॥
सौवर्णं राजतं वापि कारयेद्रघुनन्दनम् ।
पार्श्वे भरतशत्रुघ्नौ धृतच्छत्रकरावुभौ ॥
चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत् ।
दक्षिणाङ्के दशरथं पुत्रावेक्षणतत्परम् ॥
मातुरङ्कगतं राममिन्द्रनीलसमप्रभम् ।
पञ्चामृतस्नानपूर्वं *संपूज्य विधिवत्ततः ॥

स्वर्यन्तं च यजमानाचार्ययोरभोजने हविष्यादिभक्षणे वैकल्पान्य-
तोऽवसातव्यम् । ज्ञानमुद्रालक्षणं तु—

तर्जन्यङ्गुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् ।
वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा श्रीरामस्य महाप्रिया ॥ इति ।

*संपूज्येति । पूजा दीक्षावतां मूलमन्त्रेण अन्येषां तु पुरुषसू-
क्तविष्ण्वादिसूक्तैः नाममन्त्रेण वा । स्त्रीशूद्राणां तु नाममन्त्र एव ।

---

(१) 'पलेनार्धेन तदर्धार्धेन तदर्धार्धेन वा मुने' इति मुद्रितपुस्तके पाठः ।

कौसल्यामन्त्रस्तु—

रामस्य जननी चासि राममूर्तिमिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥
नमो दशरथायेति पूजयेत्पितरं ततः ॥

अथ षड्दशावरणपञ्चावरणादिपूजा ऽन्यत्र ज्ञेया ।

उदयति ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणे-
राविर्भूतमभूदपूर्वविभवं यत्किञ्चिदेकं महः ॥

इति मन्त्रभावना कुर्वन्नाद्यानि धारयेत् ।

इन्द्राद्याश्च गच्छन्तु नैर्ऋतो वरुणोऽनिलः ।
कुबेर ईशो ब्रह्मादिदिक्पालाः स्नापयन्तु ते ॥

इति स्नानमन्त्रः । ॐ दशावरणेष्वादि ।

अथ न्यासः । आदौ प्रणवः सर्वत्र श्रीपूर्वकम् । तत्र प्र-
तां पूर्वोक्तः रां हृदयाय नमः, रीं शिरसे स्वाहा, रूं शिखायै
वषट्, रैं कवचाय हुं रौं नेत्रत्रयाय वौषट्, रः अस्त्राय फट् ॥

[illegible] ।
[illegible] ॥

इति ध्यात्वा । [illegible]
[illegible]

नाय सौराष्ट्राय अकोपाय धर्मपालाय सुमन्त्राय इति पञ्चमम् ॥ अथ द्वादशपत्रपत्रेषु वसिष्ठाय वामदेवाय जाबालये गौतमाय भरद्वाजाय कौशिकाय वाल्मीकये नारदाय सनकाय सनन्दनाय सनातनाय सनत्कुमाराय इति षष्ठम् । अथ षोडशपत्रपत्रेषु नीलाय नलाय सुषेणाय मैन्दाय शरभाय द्विविदाय गन्धनाय गवाक्षाय किरीटाय कुण्डलाय श्रीवत्साय कौस्तुभाय शङ्खाय चक्राय गदायै पद्माय इति सप्तमम् । अथ द्वात्रिंशत्पत्रपत्रेषु ध्रुवाय धराय सोमाय अद्भ्यः अनिलाय अनलाय प्रत्यूषाय प्रभासाय वीरभद्राय शम्भवे गिरीशाय अजैकपदे अहिर्बुध्न्याय पिनाकिने भुवनाधीश्वराय कपालिने दिक्पतये स्थाणवे भगाय वरुणाय सूर्याय वेदाङ्गाय भानवे इन्द्राय रवये गभस्तिने यमाय हिरण्यरेतसे दिवाकराय मित्राय विष्णवे धात्रे इत्यष्टमम् । अथ भूपुरे ॐ लं इन्द्राय सुराधिपतये वज्रायुधाय सवाहनाय सपरिवाराय सशक्तिकाय नमः ॥ ॐ रं अग्नये तेजोऽधिपतये इत्यादि पूर्ववत् । एवमग्रेऽपि । मं यमाय प्रेताधिपतये । क्षं निर्ऋतये रक्षोऽधिपतये । वं वरुणाय जलाधिपतये । यं वायवे प्राणाधिपतये । सं सोमाय नक्षत्राधिपतये । हं ईशानाय विद्याधिपतये आँ ब्रह्मणे लोकाधिपतये पूर्वेशानयोर्मध्ये । ह्रीं विष्णवे भूताधिपतये निर्ऋतिपश्चिमयोर्मध्ये इति नवमं भद्रादेः । वज्राय शक्तये दण्डाय खड्गाय पाशाय ध्वजाय गदायै शूलाय अङ्कुशाय पद्माय इति दशमम् । तदुक्तं रामार्चनचन्द्रिकायाम्–

'षट्कोणे मन्त्रवर्णाभिः स्यादङ्गैर्हृदयादिभिः ।
द्वितीयाऽऽत्मादिभिर्देवैरष्टपत्रस्य तु मूलके ॥
तृतीया वासुदेवाद्यैरष्टपत्रे तथैव च ।
चतुर्थी वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात् ॥
धृष्ट्याद्यैः पञ्चमाऽऽवृत्तिर्द्वितीयाष्टदले तथा ।
षष्ठी द्वादशपत्रे तु वसिष्ठाद्यैर्महर्षिभिः ॥

*अशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः ।
दशाननवधार्थाय धर्मसंस्थापनाय च ॥
राक्षसानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामे प्रपूजयेत् ॥
दिवैवं विधिवत्कृत्वा रात्रौ जागरणं ततः ।
ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः ॥
समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने ।
ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः ।
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ॥

सप्तमी पोडशान्ते स्यादष्टमी लोकपैः कपिपुङ्गवैः ।
ध्रुवाद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपत्रकैः ॥
इन्द्राद्यैर्भूगृहे चान्ते नवमावरणं भवेत् ।
तदस्त्रैर्वज्रवत्याद्यैर्दशमावरणं भवेत् ॥' इति ।
अत्र पूज्यपूजकयोर्मध्ये प्राची ।
'देवा ये स्वस्य चाप्यग्रे प्राची प्रोक्ता विचक्षणैः ।
प्राच्येव प्राची नोद्दिष्टा मुक्त्वा देवस्य पूजनम् ॥
इति रामार्चनचन्द्रिकावचनात् । तत्राशक्तस्य पञ्चावरणपूजा भवति । सापि तत्रैव ।
पूर्वषट्कोणकोणेषु हृदयादीनि षट्क्रमात् ।
दले हनूमत्प्रमुखान् सुग्रीवादीन् दलमध्यतः ॥
दलाग्रे लोकपालांश्च तदस्त्राणि ततो बहिः । इति ।
अर्घो रामार्चनचन्द्रिकायां द्रष्टव्यः । *अशोकेति* ।
'दत्त्वा पुष्पाञ्जलिं पूर्वं गृहीत्वा शङ्खमुत्तमम् ।

साज्येन पायसेनैव स्मरन् राममनन्यधीः।
ततो भक्त्या सुसन्तोष्य आचार्यं पूजयेन्मुने॥
ततो रामं स्मरन् दद्यादेवं मन्त्रमुदीरयन्।
'इमां स्वर्णमयीं रामप्रतिमां समलंकृताम्॥
चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते।
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः॥'
इति दत्त्वा विधानेन दद्याद् दक्षिणां शुभम्॥
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः'॥ इति।
इयं मलमासे न कार्या।

'मुजसमव्रतं स्यात्तोपवासः कृतो भवेत्'। इति,
'न कुर्यान्मलमासे तु महादानव्रतानि च।'

इति च माधवीये सङ्ग्रहवचनात्। ननु रामनवमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्तव्यता स्यादिति चेत्, अत्र ब्रूमः—

फलपुष्पाम्बुसंपूर्णं युक्तं च तुलसीदलैः॥'
इत्यादि॥
शुभमिति।
विप्रान्संभोज्य विधिवत् आचार्यः पारयेद्व्रतम्।

इति बोध्यम्। अथ दुर्दशाप्रस्तानां दशादित्यव्रतं हेमाद्रौ। तत्र—

आदित्यवारयुक्तायामेव शुक्लदशम्यां कार्यम्।
'रविवारेण युक्तायां दशम्यां पूजयेद्रविः।'

इत्युक्तेः। तिथिश्च मध्याह्नव्यापिनी। दिनद्वये तत्सत्वेऽसत्वे च परा, एकदेशव्याप्तौ तु महत्वाल्पत्वाभ्यां निर्णयः। तिथिश्च रविवारे सावशतिथियोगे। तत्प्रयोगः-तिथिवारकीर्तनान्ते 'मम दुर्दशानिवृत्तिपूर्वकशुभदशाप्राप्त्यर्थं दशादित्यव्रतमहं करिष्ये' इति सङ्कल्प्य तदङ्गतया गणपतिपूजापुण्याहवाचननान्दीश्राद्धानि कृत्वा

नैकादश्युपवासस्य मतत्येन प्राप्तिः। किन्तु
'एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।'
इत्यादिनिषेधस्य मलमासेऽपि पालनीयत्वात्
एकादश्यां पुत्रवद्गृहिण इत्यादिरुपवासः प्रसज्येत
न स्थितम् तथेति मतत्येन प्राप्तिर्वाच्या। सा च निषिद्धे
स्थप्रसङ्गः।

स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले।
इति निषेधाच्च। एवं जन्माष्टम्यादावपि बोद्धव्यम्
इति रामनवमी॥

चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे-
'चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः॥'इति
चैत्रशुक्लद्वादश्यां दमनोत्सवः।
'द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः।
बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम्॥
इति रामार्चनचन्द्रिकोक्तः।

सूर्यं पञ्चोपचारैः सम्पूज्य प्राङ्मुखो बहिर्देशे गोमयोपलिप्ते
इङ्गाललिखिता दशदुर्दशापुत्रिकाः पूजयेत्। तासां—
'दुर्मुखा दीनवदना मलिनाऽसत्यवादिनी।
दुर्बुद्धिदायिनी हिंसा क्रूरा मित्रविरोधिनी॥
उच्चाटनकरी नाम बहुचिन्ताप्रदायिनी।'
एताश्चतुर्थ्यन्तनामभिः एकैकपुत्रिकायामावाह्य षोडशोपचारैः
पूज्याः, फलानि दश, दश वराटिका दक्षिणेति। ततः—
'नित्यं पापरते पापे देवद्विजविरोधिनि।
गच्छतां दुर्दशे देवि नीतिशास्त्रविरोधिनि॥'
इति प्रत्येकं विसर्जयेत्। ततः शीतोदकेन स्नायात्। अथ

*ऊर्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ॥'

इति तत्रैव पाद्मवचनाच्च ।

शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्यम् ।
'तत्र स्यात्स्वस्वतिथिषु वह्न्यादेर्दमनार्पणम् ।'

इति तत्रैवोक्तेः । (ज्योतिःप्रकाशेऽपि—

इष्टस्वदेवप्रतिष्ठायां मन्त्रसंग्रहणे तथा ।
पवित्रदमनारोपे मासा नक्षत्रतिथिर्बुधैः ॥)(१)

तिथयस्तु—

वह्निर्विरिञ्चिर्गिरिजा गणेशः

ौ हस्तौ पादौ च प्रक्षालयेत् । ततः शुचि शुभ्रं वस्त्रं परिधाय
ं प्रविशेत् । ततो भित्तौ काष्ठफलकेन अष्टदलं लिखित्वा तत्र
गन्धचन्दनादिना दशपुत्रिका लिखेत् । ताश्च—

सद्बुद्धिदा सुखकरी सर्वसम्पत्प्रदायिनी ।
इष्टभोगप्रदा लक्ष्मीः कीर्तिदा सुखदायिनी ॥
पुत्रप्रदा च विजया दशमी धर्मदायिनी । इति ॥

लिखितसुदशापुत्रिकाणां पुरः दशग्रन्थिपूर्णं पट्टदोरकं सूत्रदो-
रकं वा प्रतिष्ठाप्य तत्र रविं पूजयेत् । षोडशोपचारैः पूजां कृत्वा

'भद्रोपवासप्रदा दात्रि भद्रे त्रिजगतां सदा ।
भगनः कामदात्रे च जगत्पूज्याय ते नमः ॥'

इति विसर्जयेत् । तत्पश्चात्पूर्वोक्तनामभिर्दश सुदशाः ताश्च पु-
त्रिकाश्च पूजयेत्, दश मधुरफलानि दक्षुकादिदक्षिणा, नात्र विस-
र्जनम् । दशभिर्मोदकैर्भोजनं, क्षारलवणवर्जितम् । इति संक्षिप्तो
दशादित्यव्रतप्रयोगः ॥

*ऊर्जे इति नित्यस्तवम् ।

१-कोष्ठान्तर्गतः पाठो लिखितपुस्तके नास्ति ।

फणी विशाखो दिनकृन्महेशः ।
दुर्गाऽन्तको विश्वहरिः स्मरश्च
शर्वः शशी चेति तिथीषु पूज्याः ॥

इत्युक्ताः ।

अथागमोक्तदीक्षावतो दमनारोपणविधी रामार्चनचन्द्रिकायाम् । तत्रैकादश्यां —

'क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ।
उपवासेन त्वां देव तोषयामि जगत्पते ॥
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ।
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ॥
तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते ।

इति देवं संप्रार्थ्य दमनमादाय पञ्चगव्येन प्रोक्ष्य वारिणा प्रक्षाल्याशोकमूले देवाग्रे वा—

'अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्तिं हर मे नित्यमानन्दं जनयस्व मे ॥

इत्यशोकम्,

'मृत्यादिकालपर्यन्तः कालरूपो महाबलः ।
कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥'

इति कालम्,

'वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताश्रय ।
सहस्रमुखसंवास कामरूप नमोऽस्तु ते ॥'

इति वसन्तम्,

'कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत ।
ऋषिगन्धर्वदेवादिविमोहक नमोऽस्तु ते ॥

इति दमनं च संपूज्य—

'नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥'

इति दमनमुपस्थाप्य 'ॐ कामाय नमः' इति संपूज्य निशायां देवताग्रे पञ्चवर्णैः चन्दनेन वा अष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिर्वृत्तं चतुरस्रं च कृत्वा तत्र कुम्भं संस्थाप्योपरि वस्त्रेऽष्टदले दमनं पूजयित्वा—

'पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभो ।
दमन त्वमिहागच्छ सांनिध्यं कुरु ते नमः ॥'

'ॐ क्लीं कामदेवाय नमः' 'ॐ ह्रीं रत्यै नमः' इत्यावाह्य दिक्षु पूर्वादितः-क्लीं कामायनमः (बीजादिनमोऽन्तं सर्वत्र) भस्मशरीराय० अनङ्गाय० मन्मथाय० वसन्तसखाय० स्मराय० इक्षुचापाय० पुष्पास्त्राय० इति पूजयित्वा— 'ॐ तत्पुरुषाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् ॥' इत्यष्टोत्तरशतं संमन्त्र्य पूजयित्वा 'क्लीं नमः' इति पुष्पाञ्जलिं दत्त्वा—

'नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥'

इति नत्वा—

'आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सांनिध्यं कुरु केशव ।
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि संनिधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम् ।
सर्वदा सर्वथा विष्णो नमस्तेऽस्तु प्रसीद मे ॥'

इति देवं संप्रार्थ्य पुष्पाञ्जलिं दत्त्वा गन्धेन चन्दनस्पर्शेन वा रक्षां कुर्यात् । ततः प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य पाद्यपूर्वोपचारयुतं दमनमादाय मूलमन्त्रं

पद्धतिः—

'देवदेव जगन्नाथ वाञ्छितार्थप्रदायक ।
हृत्स्थान् पूरय मे कामान् कामेश्वरीपते ॥
इदं दमनकं देव गृहाण मदनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन् परिपूरय ॥'

इति मन्त्रान्ते पुष्पाञ्जलिदानेन देवं समर्पयेत् । म
ऽङ्गदेवताभ्यः स्वस्वमन्त्रेण दत्वा प्रार्थयेत्—

'मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥
वनमालां यथा देव कौस्तुभं सततं हृदि ।
तद्वद्दमनकीं मालां पूजां च हृदये वह ॥
जानताऽजानता वाऽपि न कृतं यत्तवार्चनम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ॥
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥'

'मन्त्रहीनम्' इति च संप्रार्थ्य पञ्चोपचारैः पुनः पूज्य नीराज्य प्रार्थयेदिति । दीक्षारहितानां तु मा समर्पणम् । अत्र च द्वादशीमनङ्गीकृत्य पारण पाख्यात् ।

'पारणाहे न लभ्येत द्वादशी घटिकाऽपि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे' ॥

इति तत्रैवोक्तेः । गौणोऽपि काल उक्तस्तत्रैव—

'कहरौ न दमनारोपः स्यान्मधौ विघ्नतो यदि ।
वैशाखे श्रावणे वाऽपि तत्तिथौ स्यात्तदर्पणम् ॥'

कहरौ=द्वादश्याम् ।

'श्रावणाद्यपि शुक्लास्ते कर्तव्यमिति नारदः।'
इति पाठान्तरम्। इदं च मलमासे न कार्यम्।
'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।'
इति काठकादौ मलमासवर्ज्येषु परिगणनात्।
'उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा।
उत्तरं नियतं कुर्यात्पूर्वं नहि कृतं भवेत्॥'
इति माधवीये प्रजापतिवचनाच्च। शुक्रास्तादौ तु कार्यमेव। पूर्वोक्तवचनात्।
'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।
ईशानस्य बलिं विष्णोः शयनं परिवर्तनम्।
कुर्यात्सुप्रकाशे च गुरोर्मौढ्येऽपीति विनिश्चयः॥'
इति ज्योतिर्निबन्धे वृद्धगार्ग्यवचनाच्च।

इति दमनारोपः॥

चैत्रशुक्लत्रयोदश्यामनङ्गपूजनं (हेमाद्रौ भविष्ये—
'चैत्रोत्सवे सकललोकमनोविनोदे
काले त्रयोदशतिथौ च वसन्तयुक्ते।
पत्न्या सहार्च्य पुष्पशरोऽथ योऽपि
सौभाग्यरूपसुतसौख्ययुतः सदा स्यात्॥'(१)
तत्र सा पूर्वा ग्राह्या।
अपूर्वेति।
'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्री चतुर्दशी।
कामत्रयोदशी रम्भा कर्तव्याः पूर्वसंयुताः॥'
इति वचनात्।
'त्रयोदशी प्रकर्तव्या सर्वदा द्वादशीयुता।'
इति स्कान्दाच्च शुक्लत्रयोदशी पूर्वविद्धा ग्राह्येति च

१—अत्रार्थे [illegible]

'त्रयोदशातिथिः पूर्वः सितः' इति दीपिकोक्तेः।
चैत्रशुक्लचतुर्दशी *पूर्वा ग्राह्या।

'मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी।
सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचन॥'

इति हेमाद्रौ बौधायनोक्तेः।

*'परा पूर्वाह्णगामिनी' इति वा पाठः। अत्र केचि यथाश्रुतमेवार्थं वर्णयन्ति।

'निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः।
अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत्॥'

इति ब्रह्मवैवर्तात्। हेमाद्रिमाधवादिलिखनमप्येवम्। संप्रदायविदस्त्वाहुः—

'चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो।'

इति स्कान्दमुत्सर्गः। तदपवादश्च-

तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता॥'

इति नारदीयवचनं, तदपवादश्च-'मधोः श्रावणमासस्य' इति, तत्र 'अपवादाभावे पुनरुत्सर्गस्य स्थितिः' इति न्यायेन*पूर्वविद्धैव प्राप्नोति सिध्यति। ब्रह्मवैवर्तं तु सामान्यरूपमन्यत्र सावकाशमिति। तेन पूर्व

ग्राह्या किन्तु आपराह्णिकी पूर्वविद्धेत्यर्थ इति केचित्। परे तु सायाह्नव्यापिनी आपराह्णिकी चेदिति सामान्यतो नियमः। अनङ्गत्रयोदशी तु अनापराह्णव्यापिनी सायाह्नव्यापिनी ग्राह्येति वाक्यद्वयं सार्थकमित्याहुः॥ *पूर्वेति* । दमनकविशेषारोपणादी इति शेषः। *परा=पातान्तरवर्तिनी शुक्ला पूर्वाह्णगामिनी इत

दिने मुहूर्तत्रयव्याप्ते पूर्वा अन्यथोत्तरेति ॥

चैत्रपूर्णिमा सामान्यनिर्णयात्परैव । अत्र विशेषो निर्णयामृते विष्णुस्मृतौ—'चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति' इति ।' तथा पाद्मे—

'मन्दे वाऽर्के गुरौ वाऽपि वारेष्वेतेषु चैत्रिका ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् ॥' इति ।

अत्र सर्वदेवानां दमनकपूजोक्ता तत्रैव वायवीये—

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ॥ इति ।

अत्र स्वतिथ्या समुच्चय इति केचित् । *स्वीयतिथ्यामकरणेऽत्र दमनपूजनमित्यन्ये । दीक्षितमतादितराविषयत्वेन व्यवस्थेत्यपरे । इयं मन्वादिरपि । सा च पूर्वमुक्ता ॥

*चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञो योगो गौ-

व्याप्त्यस्तात्तथोक्तम् । एतेन 'पूर्वाह्णव्याप्तित्वस्यापि विधाने वाक्यभेदः । मधुश्रावणशुक्लचतुर्दशीभिन्नानां पूर्वाह्णगानां ग्रहणस्याप्राप्तेरनुवादकत्वासंभवात्' इत्यपास्तम् । *स्वीयेति ॥ 'तत्र स्वास्वीयतिथिषु' इत्युक्तेः ॥

*चैत्रकृष्णेति । तिथिकृत्यत्वात्कृष्णादिपर्यासो न ॥ तुलादिः । चित्रातः शतभिष एकादशत्वेन पक्षह्रासेऽपि चैत्रोत्तरत्रयोदश्या असम्भवात् । गङ्गास्नानं च रात्र्यादावपि कार्यम् ।

'दिवा रात्रौ च संध्यायां गङ्गायां च प्रसङ्गतः ।
(प्रसङ्गतोऽवसम्भवः ।)
स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृतजलैः ॥'

इति ब्रह्माण्डात् । एवं महानिशायामपि ।

'महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।

देपु प्रसिद्धः । तदुक्तं वाचस्पतिकृतौ शूलपाणौ च स्कान्दे—

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥'

तत्रैव ज्योतिषे—

'चैत्रासिते वारुणऋक्षयुक्ता
त्रयोदशी सूर्यसुतस्य वारे ।
योगे शुभे सा महती महत्या
गङ्गाजलेऽर्कग्रहकोटितुल्या ॥' इति ।

त्रिस्थलीसेतौ ब्रह्माण्डपुराणे—

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत शतसूर्यग्रहैः समा ॥' इति ।

कल्पतरौ ब्राह्मे—

'मधौ कृष्णत्रयोदश्यां शनौ शतभिषायुता ।
वारुणीति समाख्याता शुभे तु महती स्मृता' ॥

'तत्र स्नानं न कर्तव्यं काम्यनैमित्तिकादृते ॥'
इति देवलोक्तेः । यत्तु—

'त्रयोदश्यां तृतीयायां दशम्यां च विशेषतः ।
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथं च न ॥'
'स्नानं कुर्वन्ति या नार्यश्चन्द्रे शतभिषाङ्गते ।
सप्त जन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥'

इति निषेधवचनं तु मोमार्थस्नानपरम् ।

*चैत्रकृष्णचतुर्दश्यां विशेषः पृथ्वीचन्द्रोदये। स्कान्दे—

'चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ।
न प्रेतत्वमवाप्नोति गङ्गायां तु विशेषतः'॥ इति।

अत्र पूर्वा ग्राह्या कृष्णपक्षस्थत्वात्। गौडैस्त्वेतदेव ...रचतुर्दश्यामित्येवं देवलीयत्वेन पठितम्॥

इति श्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टकृते कालनिर्णयसिन्धौ चैत्रमासः॥

मेषसंक्रमे प्रागपरा दश दश घटिकाः पुण्यकालः। ...र्शे तु प्रागुक्तम्। अत्र धर्मघटादिदानमुक्तं पृथ्वीचन्द्रोदये पाद्मे—

'तीर्थे चाल्पदिने स्नानं तिलैश्च पितृतर्पणम्।
दानं धर्मघटादीनां मधुसूदनपूजनम्॥
माधवे मासि कुर्वीत मधुसूदनतुष्टिदम्॥'

अथ वैशाखस्नानम्। तत्र पृथ्वीचन्द्रोदये विष्णुस्मृतिपाद्मयोः—

'तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम्'॥

इति सौरमास उक्तः। अन्यत्पक्षत्रयमुक्तं तत्रैव पाद्मे—

'भोगाय क्रियते यत्तु स्नानं याहच्छिकं नरैः।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु॥'

इत्युक्तेः। संकल्पे च चान्द्रादिशब्दैस्तन्मासतिथ्यादिग्रहेऽपि मासादीनामधिकरणत्वेनोल्लेखः। मासादिशब्दैव चान्द्रादियोगप्र...ऽपि निमित्तत्वेन तद्योगानाम्। दशहरादिष्वप्येवमेव।

*चैत्रकृष्णेति। पूर्णिमान्तमानेन तिथिकथनत्वात्॥

'मधुमासस्य शुक्लायामेकादश्यामुपोषितः ।
पञ्चदश्यां च भो वीर मेषसंक्रमणे तु वा ॥
वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकम्' ॥

तत्र मन्त्रः—

'वैशाखं सकलं मासं मेषसंक्रमणे रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥'
मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् ।
निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥
माधवे मेषगे भानौ मुरारे मधुसूदन ।
प्रातःस्नानेन मे नाथ फलदो भव पापहन्' ॥ इति ।

तीर्थविशेषोऽपि तत्रैवोक्तः—

'मेषसंक्रमणे भानोर्माधवे मासि यत्नतः ।
महानद्यां नदीतीर्थे नदे सरसि निर्झरे ॥
देवखातेऽथवा स्नायाद्यथा प्राप्ते जलाशये ।
दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन् ॥' इति ।

सङ्कल्पे च *तत्तत्तीर्थनाम ग्राह्यम् । अज्ञाने तु
विष्णुतीर्थमिति वदेत् ।

'यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः ।
तत्रेत्युच्चारणं कार्यं विष्णुतीर्थमिदं स्थिति ॥
तीर्थस्य देवता विष्णुः सर्वत्रापि न संशयः ॥'

इति तत्रैवोक्तेः ।

---

*तत्तत्तीर्थनामेति । अपिः पूरणीयः । तेन विष्णुतीर्थस्य यथायथतीर्थनाम विष्णुतीर्थमिति चेत्यर्थः । 'तीर्थस्य देवता विष्णुः सर्वत्रापि' इति सर्वत्रपदात् । एवं 'नद्यां नद्यन्तरस्मृतिः' इति निषेधो गङ्गास्मरणे न प्रवर्तते ।

तथाऽन्यत्रापि विशेषस्तत्रैव पाद्मे—

'तुलसीं कृष्णगौराख्यां तथाऽभ्यर्च्य मधुद्विषम् ।
विशेषेण तु वैशाखे नरो नारायणो भवेत् ॥
माधवं सकलं मासं तुलस्या योऽर्चयेन्नरः ।
त्रिसंध्यं मधुहन्तारं नास्ति तस्य पुनर्भवः' ॥

तथा—

'प्रातः स्नात्वा विधानेन माधवे माधवप्रियम् ।
योऽश्वत्थमूलमासिञ्चेत्तोयेन बहुना सदा ॥
कृत्वा प्रदक्षिणं तं तु सर्वदेवमयं ततः ।
पितृदेवमनुष्यांश्च तर्पयेत्सचराचरम् ॥
योऽश्वत्थमर्चयेद्देवमुदकेन समन्ततः ।
कुलानामयुतं तेन तारितं स्यान्न संशयः ॥
कण्डूय पृष्ठतो गां तु स्नात्वा *पिप्पलतर्पणम् ।
कृत्वा गोविन्दमभ्यर्च्य न दुर्गतिमवाप्नुयात्' ॥

तथा—

'एकभक्तमथो नक्तमयाचितमतन्द्रितः ।
माधवे मासि यः कुर्याल्लभते सर्वमीप्सितम् ॥
वैशाखे विधिना स्नानं देवनद्यादिके बहिः ।
हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः ॥

'स्नानकालेऽन्यतीर्थेषु कीर्त्यते जाह्नवी जनैः ।
विना विष्णुपदीमन्यत्समर्थं नाघशोधने ॥'

इति स्कान्देनान्यतीर्थे भागीरथीस्मरणकार्यताबोधनात् । केचित्तु गंगायमुनाशतद्रुसरस्वतीनां स्मरणे न दोषः । 'इमं मे गङ्गे यमुने सरस्वति'इति मन्त्रेणाघमर्षणोक्तेरिति प्राहुः । भागीरथ्यामन्यतीर्थस्मरणं न कार्यम् । प्रयागादिमणिकर्णिकादिः स्मरणं कुर्वन्ति । *पिप्पलतर्पणम्=अश्वत्थसेचनम् ।

यत् दानं दत्तं देवि सम्पूर्णफलदायकम् ।
आप जलमहस्रोऽयं पानं ददाति दायकम्' ॥

मदनरत्ने स्कान्दे—

'प्रपा कार्या च वैशाखे देवे देया गलन्तिका
उपानद्व्यजनच्छत्रसूक्ष्मवासांसि चन्दनम् ॥
जलपात्राणि देयानि तथा पुष्पगृहाणि च ।
पानकानि च चित्राणि द्राक्षारम्भाफलान्यपि'

निबन्धे—

'ददाति यो हि मेषादौ सक्तूनम्बुघटान्वितान् ।
पितॄनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते' ॥ इ

तथा—

'वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने ।
ददाति सुरराजेन्द्र स याति परमां गतिम् ॥'

एवं सम्पूर्णमासस्नानाशक्तौ त्र्यहं वा स्नायात् । तदुक्तं
वैव पाद्मे—

त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रयम् ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ॥
प्रातःस्नानः सनियमः सर्वपापैः प्रमुच्यते ॥

दा तु वैशाखो मलमासो भवति तदा काम्य
समाप्तिनिषेधात्* मासद्वयं स्नानं तन्नियमांश्च कु
ः । मासोपवासचान्द्रायणादि तु मलमासे
पयेत् । तदुक्तं दीपिकायाम्—
नियतत्रिंशद्दिनत्वाच्छुभे मास्यारभ्य समा
मासोपवासव्रतम्' इति ।

लन्तिका=सन्ततपतद्धारमुदकपात्रम्(?) । *निषेधादि
'अलिञ्जरः स्यान्मणिकः कर्कर्यालुर्गलन्तिका' । इत्यमरः ।

अत्र दानविशेष उक्तोऽपरार्के वामनपुराणे—

'गन्धाश्च माल्यानि तथा वैशाखे सुरभीणि च ।
देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥'

एवं स्नाने कृते तस्योद्यापनं कार्यम् । तदुक्तं तत्रैव—

मासमेवं बहिः स्नात्वा नद्यादौ विमले जले ।
एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा ॥
उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ।
मण्डले कारयेदादौ कलशं तत्र विन्यसेत् ॥
निष्केण वा तदर्धेन तदर्धार्धेन वा पुनः ।
शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितम् ॥
लक्ष्मीयुक्तं जगन्नाथं पूजयेदासने बुधः ।
भूषणैश्चन्दनैः पुष्पैर्दीपैर्नैवेद्यसंचयैः ॥
एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ।
ततोभूते कृतकर्माऽथ प्रहृष्टो ब्राह्मणान्यजेत् ॥
होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः ।
तिलाज्येन यवैर्वाऽपि सर्वैर्वाऽपि स्वशक्तितः ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
प्रतद्विष्णु(१)रनेनैव इदंविष्णुरनेन वा ॥

आरब्धं कर्म परिशीलयतु कार्यमात्मविशुद्धये ।

इत्यनुष्ठानवचनादेतदपि द्रष्टव्यम् । अर्घ्यं=विश्वदेवताकं गन्धादि । सर्वभूतसौहार्दमिति केचित् ।

---

(१) स तु मन्त्रो ऋग्वेदसंहितायां द्वितीयाष्टके द्वितीयाध्याये—'प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा' इति । अस्यार्थः—'स महानुभावो विष्णुः वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तूयते प्रकर्षेण स्तूयते सर्वैः । वीर्येण स्तूयमानत्वे दृष्टान्तः—मृगो न=

व्रतसंपूर्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीम्।
पादुकोपानहौ छत्रं गुरवे व्यजनं तथा॥
शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा।
ब्राह्मणान्भोजयेत्तेभ्यो दद्याच्च दक्षिणाम्॥
कलशाञ्जलसम्पूर्णांस्तेभ्यो दद्याद्यवांस्तथा।
एवं कृते माधवस्य सुस्नानविधौ शुभे॥
फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात्॥'

एतदशक्तौ तत्रैवोक्तम्—

'वैशाख्यां विधिना स्नात्वा भोजयेद्ब्राह्मणान्दश।
कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः'॥ इति॥
वैशाखस्नानमाहात्म्यं [illegible]पुराणोक्तं । शाकद्वी[illegible]

अथ वैशाखशुक्लतृतीयाऽक्षय्यतृतीया । गौरीव्रते तु द्वितीया[illegible]
[illegible]ऽपि ग्राह्या ।

सा च पूर्वाह्णव्यापिनी परा । यदा परा न [illegible] तदा द्विती[illegible]
[illegible] ग्राह्या [illegible] । तदभावे पूर्वा ।

[illegible]

ह्नव्यापिनी ग्राह्या । दिनद्वयेऽपि तद्व्याप्तौ परैव । तदुक्तं
निर्णयामृते नारदीये—

'वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता ।
दुर्लभा बुधवारेण सोमेनापि युता तथा ॥
रोहिणीबुधयुक्तापि पूर्वविद्धा विवर्जिता ।
अपरा कृताऽपि मासेन पुण्यं हन्ति पुराकृतम् ॥
गौरी विनायकोपेता रोहिणीबुधसंयुता ।
विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदा' ॥ इति ॥

इयं युगादिरपि । सा चोक्ता [illegible]—

'माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी ।
तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः' ॥ इति ।

यत्तु ब्राह्मे—

'माघस्य पौर्णमास्यां तु घोरं कलियुगं स्मृतम् ।'

इति प्रागुक्तं,

'वैशाखमासस्य च या तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी, पञ्चदशी च माघे ॥'

इति विष्णुपुराणे चकारेण तमिस्रपक्षानुषङ्गेऽपि पूर्वानुरोधात्पौर्णमास्येव ज्ञेया । 'मे शुक्ले' इत्यादिकं तु निर्मूलमित्याहुः । तत्र ।

'एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्त्तव्या यदि न स्यात्परेऽहनि ।'

इत्युक्तत्वादिति । अपूर्वविद्धेति । [illegible] ।
पादिके च त्रिदशैव ग्राह्या ।

अपूर्वेति । [illegible] । एवं पूर्वत्रापि ।

'दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम्।'
इति *भविष्यविरोधात्।

एतेन ग्रन्थानुसारात्पूर्णिमायामेव युगादित्वं वदन् शूलपाणिः परास्तः। *तेन कल्पभेदाद्युगभेदात् व्यवस्थेति तत्त्वम्। एतेन—

'कार्तिके नवमी शुक्ला माघमासे च पूर्णिमा।'
इति बृहन्नारदीयं व्याख्यातम्। *निर्मूलत्वोक्तिस्तु दीपाज्ञानकृता। अत्र श्राद्धमुक्तं मात्स्ये—

'कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु।
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत्॥' इति।

भारतेऽपि—

'या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः।
स्नात्वा हुत्वा च दत्वा च जप्त्वाऽनन्तफलं लभेत्॥'
इति।

श्राद्धेऽपि पूर्वाह्णव्यापिनी ग्राह्या।

'पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः॥'
इति माधवोक्तेः।

'ये श्राद्धे च तथा कृष्णे युगादौ कवयो विदुः।
शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके॥'

---

*भविष्येति।

'नवम्यां शुक्लपक्षस्य कार्तिके निरगात्कृतम्।
त्रेता सिततृतीयायां वैशाखे समपद्यत॥'
इति पूर्वम्—

'कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः॥'
इत्युत्तरेण च वचनेन संकलितवाक्यार्थादिति भावः। इदं तु विचार्यं का युगादिः [illegible]-*तेनेति। *निर्मूल-

इति हेमाद्रौ नारदीयवचनाच्च । दीपिकाऽपि—
'कर्मतिथयः पूर्वाह्णिकाः स्युः सिते विशेषादपराह्णिकाश्च बहुले' इति । स्मृत्यर्थसारेऽपि मन्वादिश्राद्धेषु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या, कृष्णपक्षेऽपराह्णव्यापिनी' इति ।
दैवोदासीये गोभिलः—
'वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥' इति ॥
गोविन्दार्णवेऽप्येवम् । तेनेयं पूर्वाह्णव्यापिनी । दिनद्वये तत्त्वे *परैवेति धर्मतत्त्वविदो हेमाद्र्यादयः । अनन्तभट्टस्तु—
'सर्वेधृतिव्यतीपातौ युगमन्वादयस्तथा ।
सम्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥'
इत्याह । दानादावित्ति *श्राद्धसंग्रहः । उपवासनिर्णये वक्ष्यते । हेमाद्रावप्येवम् । माधवस्तु व्यतीपातः श्राद्धेऽपराह्णव्यापी ग्राह्य इत्याह । स्मृत्यर्थसारे तु कुतुपकालयोगीत्युक्तम् । यत्तु मार्कण्डेयः—
'शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे हि रौहिणं तु न लङ्घयेत् ॥'
रौहिणो=नवमो मुहूर्तः,
*अत्र शुक्लपक्षयुगादिश्राद्धं *पूर्वाह्णे कार्यमिति मूल-

स्योक्तिरिति । मासस्येत्यादि । *परैवेति । कर्मकालशास्त्रबाधित्वेत्यादि । *श्राद्धेति । पौर्वाह्णिकत्वेऽप्यपराह्णव्याप्त्यन्देन कार्यमिति भावः । सिद्धान्तमाह-*अत्रेति । *पूर्वाह्ण इति । "शुक्लपक्षस्य" इति मार्कण्डेयवाक्येन कृष्णपक्षे श्राद्धारम्भ इव शुक्लपक्षश्राद्धसमाप्तौ रौहिणस्यैवोक्तेः ॥

अपरार्के यमः—

'कृतोपवासाः सलिलं ये युगादिदिनेषु च ।
दास्यन्त्यन्नादिसहितं तेषां लोका महोदयाः ॥' इति

वैशाखे मलमासे सति तत्रैव युगादिः कार्या । तथा च हेमाद्रौ ऋष्यशृङ्गः—

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादितः ॥' इति ।

एतद्दशहरादिकं वृषादिसंक्रमे इष्टम् । 'कन्यागते तु रवौ' इत्यादिना सौरमासोक्तेरित्यर्थः । कालादर्शेऽपि—

अब्दोदकुम्भमन्वादिमहालययुगादिषु* ।

इति मलमासकर्तव्येषु परिगणनाच्च । महालयश्चात्र मघात्रयोदश्युच्यत इति माधवः । स्मृतिचन्द्रिकायां तु मासद्वये कर्तव्यमित्युक्तम् ।

ननु ज्येष्ठवैशाखादिशब्दाश्चान्द्रा एव मुख्याः तत्कथमनु पौक्तिरित्यत आह—*एतदिति । यद्यपि 'वृषे रवौ' इति सौरमुख्यस्यैव दशहरा न तु युगादिस्तथाऽपि 'एतदिष्टं वृषादितः' इति विधेयद्वयहेतुनिर्देशादेव युगादिवाक्येऽपि सौर एव मासो ग्राह्य इति भावः । *युगादिष्विति मन्वाद्युपलक्षणम् । युगादिकार्यं युगादितिथिमध्ये एव कार्यम् ।

पुरुषा जज्ञिरे । तथा च तैत्तिरीयैः समाम्नातम्—'सोऽङ्गारेणाप्सु प्रहरत्, तत एकतोऽजायत, स द्वितीयमभ्यपातयत् ततो द्वितोऽजायत,' इति । तत्र उदकपानार्थं प्रवृत्तस्य कूपे पतितस्य प्रतिरोधायासुरैः परिधयः परिधायकाः कूपस्याच्छादकाः स्थापिताः । तस्यया सोऽपि मुक्तः ।' इति श्रीमन्माधवाचार्याणाम् । अत्र यत्र यत्र मन्त्रार्थसामर्थ्यं निर्दिष्टाः तत्र मन्त्रार्थनिर्देशप्रयोजनं स्फुटमेव । विदायताऽपि निर्देशात् सर्वं च अपकाले तत्तन्मन्त्रार्थस्मरणं तावदवश्यमपेक्षितम् । माधवा च पश्य न गच्छन् कर्मानर्थानिति मन्त्रार्थस्मरणमावश्यकम्' इति ध्येयम् ब्राह्मणवचनेषु मारवणान्त इति ज्ञेयम् ।

'योगादिकं पार्विकं च श्राद्धं चापरपक्षिकम् ।

'मन्वादौ [redacted] युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥'

इति स्कान्दात् । माधव इत्याचार्यः । महालयश्राद्धं कन्यायामुक्तमेव । तथैव—

'हंसे कन्यासु यस्मिंश्चे शाकेनापि गृहे वसन् ।
पक्षयोरन्तरे दद्यादुभयोरपि पक्षयोः ॥'

इति विधानात् ।

'सूर्ये कन्यास्थिते श्राद्धं यो न कुर्याद् गृहाश्रमी ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपैष्यति ॥'

इत्यादिनिषेधाच्च । तथा च यदा सिंहोपक्रमः कन्यासमाप्यः प्रथमः पक्षः, कन्योपक्रमस्तुलासमाप्यश्चरमस्तदा पूर्वत्र पञ्चम्यादिपक्षेण परत्र [redacted] सङ्कल्पक्षेण कन्याभागे श्राद्धम् । यदा तु दर्शान्त्यभाग एव कन्यासंक्रमः तदनन्तरदर्शान्तिकक्रमेण यदि तुलासंक्रान्त्या कन्यायामधिमासस्तदा दर्शश्राद्धवेला यावत्सिंहस्थासौराधिकमास एव कन्यायां येन केनापि पक्षेण श्राद्धम् । "रोगे चालब्धयोगेऽपि" इति वचनात् । तथा च महालयशब्दस्य तत्परत्वसम्भवेऽलं यथात्रयोदशीपरत्वेन । यत्तु—

'मासः कन्यागते भानावसंक्रान्तो भवेद्यदि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयम् ॥'

इति वचनं, तत्रोत्कर्षे विषये मानाभावात् । किन्तु पित्र्यमिति सामान्यतः श्रवणात् सांवत्सरिकादिश्राद्धविषयम् । तस्य शरदि विधानेनाश्विनेऽप्राप्तेरिति । महालयपदं तीर्थविशेषपरमिति केचित् । महालयविधावाश्विनादिशब्दानां चान्द्रपरत्वात्तत्परं चिन्त्यमेवेत्यपरे ॥

'युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ ।
गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत् ॥
तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम् ॥'इति ।
अयं निर्णयः सर्वयुगादिषु बोद्धव्यः ॥ इति युगादिनिर्णयः ॥

इयमेव तृतीया परशुरामजयन्ती । सा प्रदोषव्यापिनी ग्राह्या । तदुक्तं मार्गवार्चनदीपिकायां स्कान्दभविष्ययोः—

'वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ ।
निशायाः प्रथमे यामे रामाख्यः समये हरिः ॥
स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते ।
रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयम् ॥' इति ।

दिनद्वये तद्व्याप्तावव्याप्तौ समव्याप्तौ च परा, अन्यथा पूर्वैव । तदुक्तं तत्रैव भविष्ये—

'शुक्ला तृतीया वैशाखे शुद्धोपोष्या दिनद्वये ।
निशायाः पूर्वयामे चेदुत्तराऽन्यत्र पूर्विका ॥' इति ।

वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिः । तदुक्तं पृथ्वीचन्द्रोदये ब्राह्मे—

'वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् ॥' इति ।

अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावव्याप्तावेकदेशव्याप्तौ वा पूर्वा । युग्मवाक्यात् ॥

वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ ज्योतिःशास्त्रे—

करणे तर्पणं ब्राह्मणभोजनं चार्थः । पृथक्वचनान्यन्यत्र । उपवा-

'पञ्चाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे ।
पाशाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः ॥
अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ॥' इति ।

पञ्चाननः=सिंहः, पाशाभिधाना तिथिः=द्वादशी करभः=हस्तः ॥

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती । सा*प्रदोषव्यापिनी ग्राह्या । तदुक्तं हेमाद्रौ नृसिंहपुराणे—

'वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे ।
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥
वर्षे वर्षे तु कर्तव्यं मम सन्तुष्टिकारणम् ॥' इति ।

दिनद्वयेऽपि तद्व्याप्तावंशतःसमव्याप्तौ च परा* । विषमव्याप्तौ त्वधिकव्याप्तिमती । दिनद्वयेऽप्यव्याप्तौ परा परदिने*गौणकालव्याप्तेः सत्त्वात्पूर्वदिने च तदभावात् । यत्तु—

से तु पूर्वा ।

सवैधृतिर्व्यतीपातो युगमन्वादयस्तथा ।
सन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥

इति वचनात् । *प्रदोषेति ।

'अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ।'

इति स्कान्दात् । जयन्तीषु जन्मकालस्यैव पूजारूपकर्मकालत्वात् । *परेति । संकल्पकाले सत्त्वात् । *गौणकालेति ।

'ततो मध्याह्नवेलायां नद्यादौ विमले जले' ।
इत्युपक्रम्य—
'परिधाय ततो वासो व्रतकर्म समारभेत्' ।
इति तत्रैवोक्तं, तत्संकल्परूपव्रतोपक्रमविषयम् । न त्वेतावता मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यम् । पूर्वोक्तवचनविरोधात् ।

'वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके ।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः' ॥

इति टोडरानन्दे स्कान्दात् । "कूर्मः सिंहो बौद्धकल्की च सायम्" इति पूर्वोक्तपुराणसमुच्चयवचनाच्चेति केचित् । तच्चं तु पूर्ववचसामनाकरत्वेन निर्मूलत्वात्, हेमाद्रौ नृसिंहपुराणे—

'मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्' ।

इत्युपक्रम्य—

स्वातिनक्षत्रयोगे च शनिवारे तु मद्व्रतम् ।
सिद्धयोगस्य संयोगे वणिजे करणे तथा ॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ।
सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम् ॥
एतदन्यतरे योगे मद्दिनं पापनाशनम् ।
केवलेऽपि प्रकर्तव्यं मद्दिने व्रतमुत्तमम् ॥
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ ॥'

इत्युक्त्वा—

यत्तु नृसिंहपुराणे—
'वैशाखशुक्लपक्षस्य चतुर्दश्यां दिवाकरे ।
अस्तंगामिनि सर्वेषां पुरस्तात्स्तम्भमध्यतः ॥

'पञ्चाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे ।
पाशाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः ॥
अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ॥' इति ।

पञ्चाननः=सिंहः, 'पाशाभिधाना' तिथिः=द्वादशी । करभः=हस्तः ॥

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती । सा*प्रदोषव्यापिनी ग्राह्या । तदुक्तं हेमाद्रौ नृसिंहपुराणे—

'वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे ।
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥
वर्षे वर्षे तु कर्तव्यं मम सन्तुष्टिकारणम् ॥' इति ।

दिनद्वयेऽपि तद्व्याप्तावंशतःसमव्याप्तौ च परा* । विषमव्याप्तौ त्वधिकव्याप्तिमती । दिनद्वयेऽप्यव्याप्तौ परा । परदिने*गौणकालव्याप्तेः सत्त्वात्पूर्वदिने च तदभावात् । यत्तु—

से तु पूर्वा ।

सर्वभूतिर्व्यतीपातो युगमन्वादयस्तथा ।
मन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥

इति वचनात् । *प्रदोषेति ।

'अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ।'

इति स्कान्दात् । जयन्तीषु जन्मकालस्यैव पूजाद्यङ्गत्वेना-

'ततो मध्याह्नवेलायां नद्यादौ विमले जले'।

इत्युपक्रम्य—

'परिधाय ततो वासो व्रतकर्म समारभेत्'।

इति तत्रैवोक्तं, तत्संकल्परूपप्रथमोपक्रमविषयम्। न त्वेतावता मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यम्। पूर्वोक्तवचनविरोधात्।

'वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः'॥

इति टोडरानन्दे स्कान्दात्। 'कूर्मः सिंहो बौद्धकल्की च सायम्' इति पूर्वोक्तपुराणसमुच्चयवचनाच्चेति केचित्। तत्त्वं तु पूर्ववचसामनाकरत्वेन निर्मूलत्वात्, हेमाद्रौ नृसिंहपुराणे—

'मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्'।

इत्युपक्रम्य—

स्वातिनक्षत्रयोगे च शनिवारे तु मद्व्रतम्।
सिद्धयोगस्य संयोगे वणिजे करणे तथा॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः।
सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम्॥
एतदन्यतरे योगे तद्दिनं पापनाशनम्।
केवलेऽपि प्रकर्तव्यं मद्दिने मत्सुखप्रदम्॥
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ॥'

इत्युक्तत्वात्—

परन्तु नृसिंहपुराणे—

'वैशाखशुक्लपक्षस्य चतुर्दश्यां निशामुखे।
अस्यामाविरि सर्वेषां पुरस्तात्स्तम्भमध्यतः॥

'ततो मध्याह्नवेलायां नद्यादौ विमले जले ।'

इत्यादिना मध्याह्न एव व्रतविधानाच्चतुर्दश्युत्तरार्धवणिजे करणे मध्याह्ने च स्पष्टं जन्म प्रतीयते । संध्यायां जन्म तु काप्यनुक्तेर्मौलयकृतं, तद्दशाब्निर्णयश्च द्वेव एवेति । (१)इयमेव योगविशेषेणातिप्रशस्ता । तदुक्तं तत्रैव—

'स्वातिनक्षत्रयोगे च शनिवारे च मद्व्रतम् ।
सिद्धयोगस्य संयोगे वणिजे करणे तथा ॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ।
एभिर्योगैर्विनापि स्यान्मद्दिनं पापनाशनम् ॥
सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः ॥'

तथा—

'सिंहःस्वर्णमयो देवो मम सन्तोषकारकः ।'

तथा—

'विज्ञाय मद्दिनं यस्तु लङ्घयेत्पापकृन्नरः ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥
इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च । अथा-

मवभूव महाविष्णुर्नरसिंहाकृतिर्नृप ।
तस्यां व्रतं नरैः कार्यं महाविष्णोरतिप्रियम् ॥'

विवस्वत्यस्तङ्गामिनीति सायाह्नलाभः । भविष्ये च—

'अवतारो नृसिंहोऽभूत् त्रेतायां चादिकल्पके ।
सायंकाले सदसतो रक्षोदमनकारणात् ॥' इति ।

स गौणः । प्रदोषस्य मुख्यकालत्वेन तत्पूर्वस्य सायाह्नस्यैव बहुषु गौणत्वदर्शनात् । वस्तुतस्तु—

---

(१) कचित्पुस्तके 'तथा'इत्यधिकम् ।

अत्र विशेषः—मध्याह्ने मृद्गोमयतिलामलकस्नानं कृत्वा—

'नृसिंह देवदेवेश तव जन्मदिने शुभे ।
उपवासं करिष्यामि सर्वभोगविवर्जितः ॥'

इति मन्त्रेण संकल्पं कृत्वा आचार्यं वृत्वा सायंकाले—

'हैमीं तु तत्र सन्मूर्तिं स्थाप्यालक्ष्म्यास्तथैव च ।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥
यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः ॥'

इत्युक्तां नृसिंहमूर्तिं शक्त्या कृतं सुवर्णसिंहं च कलशोपरि सम्पूज्य रात्रौ जागरणं कृत्वा प्रातः पुनः सम्पूज्य—

त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तङ्गते सति ।

इत्युक्तः प्रदोषः । प्रविष्टे च सायंकालो न तु सायाह्नः । स च—

'नक्षत्रदर्शनात्संध्या सायं तत्परतः स्थितम् ।'

इति कथितः । नक्षत्रदर्शने च घटीत्रयात्मकः कालः ।

'सायंसंध्या त्रिघटिका अस्तादुपरि भास्वतः ।'

इत्युक्तेः । अस्तङ्गामिनीत्यस्यापि अयमेवार्थः । एवं च प्रदोषसायंकालशब्दाभ्यां सायंसंध्योर्ध्वं घटीत्रयं अल्पकालः तत्पूर्वः सायाह्नस्तु पूर्वोक्तयुक्त्या गौणकाल इति । कल्पतरौ इति । लक्ष्मीनृसिंहाभिप्रायम् । प्रातःस्नानानन्तरं सूर्यादिभ्यो नमस्कृत्य वक्ष्यमाणेन मन्त्रेण व्रतं निवेदयस्य प्राणानायम्य सकलं तात्पर्यार्थं गृहीत्वा संकल्पं कुर्यात् ।

'नियमं च प्रकुर्वीत दन्तधावनपूर्वकम् ।'

इति नारसिंहात् । दन्तधावनशब्दः प्रातःकृत्योपलक्षणम् । दन्तधावनं च सुवर्णादिना द्वादशगण्डूषैर्वा कार्यम् । उपवासदिने काष्ठनिषेधात् । प्रतिज्ञा च विध्यापादनपादकन्यादिसंधारणं नि-

'नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः ॥'

इत्याचार्याय दत्त्वा—

'मद्वंशे ये नरा जाता ये जनिष्यन्ति चापरे ॥
तांस्त्वमुद्धर देवेश दुस्तराद्भवसागरात् ।
पातकार्णवमग्नस्य व्याधिदुःखाम्बुवारिभिः ।
तीव्रैश्च परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुनिधिवासिंस्त्वं चक्रपाणे जनार्दन ।
व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव ॥'

राकार्यम् ।

'व्रतस्थेन न कर्तव्या संगतिः पापिभिः सह ।'

इति वचनात् । संकल्पमन्त्रश्च—

'श्रीनृसिंह महोग्रस्त्वं दयां कृत्वा ममोपरि ।
अद्याहं च विधास्यामि व्रतं निर्विघ्नतां नय ॥' इति ।

ततो मध्याह्ने नद्यादौ मृद्गोमयतिलामलकैः स्नात्वा नित्यकर्म कृत्वा गृहमागच्छेत् ।

मध्याह्ने संकल्पलिखनं चानुकल्पः । अन्यथा 'नियमं च प्रकुर्वीत' इत्यादिना संकल्पमभिधाय व्रतस्थेनेत्यादिना मिथ्यालापादिवर्जनं च प्रदर्श्य ततो मध्याह्नवेलायामित्याद्यभिधानविरोधात् । 'नित्यकर्म समाचरेत्' इति पाठे नित्यं=मध्याह्नसंध्यादि । ततो गोमयेनोपलिप्तेऽष्टदलं कृत्वा तत्र कलशं संस्थाप्य प्रतिमां हैमीं पलतदर्धतदर्धार्धमितां संस्थाप्य नूतनायाग्न्युत्तारणप्राणप्रतिष्ठे कृत्वा मूलमन्त्रेण वैदिकेन नाम्ना वाऽऽवाहनादि कृत्वा पञ्चामृतेन शुद्धोदकेन च संस्नाप्य यज्ञोपवीतवस्त्रे दत्त्वा आचमनं दद्यात् ।

'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ।'

इत्युक्तेः ।

'चन्दनं शीतलं दिव्यं चन्द्रकुङ्कुममिश्रितम् ।
ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर ॥'

चन्दनम् ।

'कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ।
पूजयामि नृसिंह त्वां भक्त्या सह नमोऽस्तु ते ॥'

पुष्पम् ।

'कालागुरुमयं धूपं सर्वदेवसुखावहम् ।
करोमि ते महाविष्णो सर्वकामसमृद्धये ॥'

धूपम् ।

'दीपः पापहरः प्रोक्तस्तमोराशिविनाशनः ।
दीपेन लभ्यते तेजस्तस्माद्दीपं ददामि ते ॥'

दीपम् ।

'नैवेद्यं सुखदं चारु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्वपापक्षयं कुरु ॥'

नैवेद्यम् । ततः फलं ताम्बूलं दक्षिणां च दद्यात् । ततोऽर्घं दद्यात् ।

तत्र मन्त्रः—

'नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः ॥'

ततो नीराजनं पुष्पाञ्जलिं दत्त्वा स्तोत्रादिना स्तुत्वा प्रार्थयेत् ॥

तत्र मन्त्रः—

'पीताम्बर महाबाहो प्रह्लादभयनाशन ।
यथाभूतेनार्चनेन यथोक्तफलदो भव ॥'

ततो रात्रौ गीतवाद्यपुराणश्रवणादिभिर्जागरणं कृत्वा पुनः स्नातः संपूज्य तत्कल्पानुसारेण सोपस्करां प्रतिमां ब्राह्मणाय दद्यात् । मन्त्रः—नृसिंहाच्युतेति मन्त्रेण । ओं नृसिंहार्चितपदस्पदादि

इति प्रार्थयेदिति संक्षेपः ॥

वैशाखपौर्णमास्यां विशेषोऽपरार्के जाबालिनोक्तः—

'शुनान्नमुदकुम्भं च वैशाख्यां च विशेषतः ।
निर्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ॥
सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पञ्च च ।
तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति ॥' इति ।

उदकुम्भदानमन्त्रस्त्वस्मत्कृततृतीयप्रकरणे उक्तः भविष्येऽपि—

'वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥'

अत्र कृष्णाजिनदानं कार्यम् । तथा च विष्णुः—

'कृष्णाजिने तिलान्कृष्णान्हिरण्यं मधुसर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥' इति

इति श्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टकृते कालनिर्णयसिन्धौ वैशाखमासः समाप्तः ॥

दत्त्वा प्रार्थयेत् 'नृहरौ ये नरा' इत्यादि । एवं प्रार्थ्य तां देवं विसृज्य च यथाविधि उपहारादिकं सर्वमाचार्याय निवेदयेत् ।

'दक्षिणाभिः सुसंतोष्य ब्राह्मणांस्तु विसर्जयेत् ।
मध्याह्ने तु समायुक्तो नरो भुञ्जीत बन्धुभिः ॥' इति ॥

यत्तु मध्याह्ने नृसिंहजन्म, जयन्तीषु तत्काल एव पूजाकालः, तत्कालीना च तिथिरिति,तदसत् । मध्याह्नः सायमेव वा प्रदोषव्याप्तिकालः मध्याह्नस्तु प्रमाहस्नानादिकर्मणकाल इत्यभिप्रायेणाह-कर्तव्य इति । नृसिंहजयन्तीनवरात्रं महोदधौ—

'सन्ध्यायामर्चनं कार्यं चतुर्दश्यां समापनम् ।
नवरात्रमिति प्रोक्तं नृसिंहस्य रवीशितुः ॥' इति ।

इति वैशाखः ।

वृषसंक्रान्तौ पूर्वाः षोडश घटिकाः पुण्यकालः। रात्रौ संक्रमे सति प्रागेवोक्तम्॥

ज्येष्ठशुक्लतृतीयायां रम्भाव्रतमुक्तं भाविष्ये-

'भद्रे कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम्।
ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा॥' इति।

सा पूर्वविद्धा ग्राह्या।

'*बृहत्तपा तथा रम्भा*सावित्री*वटपैतृकी।
*कृष्णाष्टमी च भूता च कर्तव्या*सम्मुखी तिथिः॥'

इति स्कान्दोक्तेः॥

*ज्येष्ठशुक्लदशमी दशहरा। तदुक्तं हेमाद्रौ ब्राह्मे—

ज्येष्ठशुक्लप्रतिपदि दशाश्वमेधस्नानम्।

'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम्।
दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः।'

इति काशीखण्डात्। *बृहत्तपा=श्रावणकृष्णद्वितीया। *सावित्री=ज्येष्ठशुक्लपूर्णिमा। *वटपैतृकी=ज्येष्ठकृष्णामावास्या। *कृष्णाष्टमी=कृष्णपक्षाष्टमी। *सम्मुखी=सायाह्नव्यापिनी। त्रिमुहूर्ताभावे तु परा।

*ज्येष्ठेति। दशभ्यः श्रीगङ्गायाः क्रमेण दशहरात्वमुक्तम्। दशपापानि मनुनोक्तानि—

'पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥
अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम्॥' इति।

'ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥' इति।

वाराहेऽपि—

'दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि।
अवतीर्णा यतः स्वर्गात् हस्तर्क्षे च सरिद्वरा ॥
हरते दशपापानि तस्माद्दशहरा स्मृता ॥' इति।

स्कान्दे तु दशयोगा उक्ताः।

*'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
व्यतीपाते*गरानन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते' ॥ इति।

अत्र बुधभौमयोः कल्पभेदेन व्यवस्था। इयं च यत्रैव योगबाहुल्यं सैव ग्राह्या। योगाधिक्ये फलाधिक्यात्। ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे।

---

*ज्येष्ठे इति। ज्येष्ठश्चान्द्रमानेन न तु सौरमानेन। 'वृषे रवौ' इत्यनेन पौनरुक्त्यापातात्। 'वृषे रवौ' इति पुण्यतमत्वार्थम्। नन्वेवं 'दशहरासु' इत्यनुक्तपैठीनसिवाक्यस्य का गतिः? दशहरास्वरूपस्य सौरघटितत्वादिति चेन्न। अधिमासे दशहरासु तत्तन्नक्षत्रयोगस्यैव वृषस्थरवेरपि लाभात्तत्रापि सा कार्येत्यर्थात्। अत एव दशहरास्विति अनेकसमुदायाभिप्रायं बहुवचनम्। अन्यथा तद्गतदशम्या एकत्वाच्च दनुपपत्तेः। एतच्च राशिविशेषस्थरवियोगघटितालभ्ययोगस्य महापुण्यदं तदितरालभ्ययोगस्य युगादिवदं च मन्वादीनामुपलक्षणम्। न च बुधहस्तयोग एवानन्द इति कथं पृथगुक्तम्, एवं हस्तस्य दिननक्षत्रस्य कन्याचन्द्राविनाभाव एवेति वाच्यम्। प्रवृत्तिनिमित्तभेदेन तद्भेदात्। बुधनक्षत्रयोः प्रवृत्तिनिमित्तमेकैकमात्रवृत्ति आनन्दपदं तूभययोगि। एवं हस्तस्य शुक्लपक्षाविनाभावेऽपि। *गरं करणभेदः। 'कुजेऽहनि' इत्युक्तेराह—*अत्रेति। *न तु शुद्धे इति।

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु' ।
इति हेमाद्रौ ऋष्यशृङ्गोक्तेः । तथा स्कान्दे—
'यां०काञ्चित्सरितं प्राप्य दद्याद्दर्भैस्तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः' ॥
अत्र विशेषः काशीखण्डे—
'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः ॥
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् ॥'
तथा—
'लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः ॥'
तथा भविष्योत्तरकाशीखण्डयोः—
'निशायां जागरं कृत्वा समुपोष्य च भक्तितः ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसङ्ख्यया ॥
तथा दीपैश्च ताम्बूलैः पूजयेच्छ्रद्धयाऽन्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै जले ।
सक्तुपिण्डान् गुडपिण्डान्दद्याच्च दशसङ्ख्यया ॥
ततो गङ्गातटे रम्ये हैम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥
संस्थाप्य पूजयेद्देवीं तदलाभे मृदाऽपि च ।
अथ तत्राप्यशक्तश्चेच्छिलापिष्टेन वै सुधीः ॥
वक्ष्यमाणेन मन्त्रेण कुर्यात्पूजां विशेषतः ।

'शूद्रेऽपि'इति तु कृत्यरत्नावली । १ यां कांश्चिदिति । श्रीगङ्गा-
या अलाभे ।

नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥
भगीरथं च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थांस्तिलान्दद्याद्दशविप्रेभ्य एव च ।
दशप्रस्थान्यवान्दद्याद्दशसङ्ख्यागवीस्तथा ॥'

प्रस्थः=षोडशपलानि । पलं तु 'मुष्टिमात्रं पलं स्मृतम्' इति मदार्णवे उक्तम् ।

'मत्स्यकच्छपमण्डूकमकरादिजलेचरान् ।
हंसकारण्डवबकचक्रटिट्टिभसारसान् ॥
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ।
तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ॥
गङ्गायां प्रक्षिपेदाज्यदीपांश्चैव प्रवाहयेत् ।
पुष्पाद्यैः पूजयेद्गङ्गां मन्त्रेणानेन भक्तितः ॥
'ॐनमः शिवायै नारायण्यै दशहरायै गङ्गायै नमो नमः॥'
इति मन्त्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशम् ।
जपेत्पञ्चसहस्राणि दशधर्मफलं लभेत्' ॥

काशीखण्डे त्वन्यो मन्त्र उक्तः—

'नमः शिवायै प्रथमं नारायण्यै पदं ततः ।
दशहरायै पदमिति गङ्गायै मन्त्र एव वै ॥
स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ।
पूजा दानं जपो होमस्तेनैव मनुना स्मृतम् ।' इति ।

अत्र गङ्गास्तोत्र(१)पाठमपि दशवारं कुर्यात् । तदुक्तं

१—तच्च स्तोत्रं गङ्गाष्टविधिविस्तरे उक्तो पर्वविधौ। यथा-'ॐ नमः शिवायै गङ्गायै शिवदायै नमो नमः। नमस्ते रुद्ररूपिण्यै ब्रह्मण्यै ते नमो नमः। नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः। सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये। सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोऽस्तु ते। स्थास्नुजङ्गमसम्भूतविषहन्त्र्यै नमो

भविष्ये—

> 'तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः ।
> यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥
> सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः ॥' इति ।

नमः । भोगोपभोगदायिन्यै भोगवत्यै नमो नमः । मन्दाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमः सदा ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः । नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ नन्दायै लिङ्गधारिण्यै नारायण्यै नमो नमः । नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥ बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमो नमः । नमस्ते विश्वमित्रायै नन्दिन्यै ते नमो नमः ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः । शान्तायै च वरिष्ठायै वरदायै नमो नमः ॥ उस्रायै सुखदोग्ध्र्यै च सञ्जीविन्यै नमो नमः । ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः ॥ प्रणतार्तिप्रभञ्जिन्यै जगन्मात्रे नमोऽस्तु ते । सर्वापत्प्रतिपक्षायै मङ्गलायै नमो नमः ॥ शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ निर्लेपायै दुर्गहन्त्र्यै दक्षायै ते नमो नमः । परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥ गङ्गे ममाग्रतो भूया गङ्गे मे देवि पृष्ठतः । गङ्गे मे पार्श्वयोरेहि त्वयि गङ्गेऽस्तु मे स्थितिः ॥ आदौ त्वमन्ते मध्ये च सर्वं त्वं गाङ्गते शिवे । त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ गङ्गे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे । य इदं पठति स्तोत्रं भक्त्या नित्यं नरोऽपि यः ॥ शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसम्भवैः । दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते । ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ॥ तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः । यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः । अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् । पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ॥ असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् । परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् । एतानि दश पापानि हर त्वं मम जाह्नवि ॥ दशपापहरा यस्मात्तस्माद्दशहरा स्मृता । त्रयस्त्रिंशच्छतं पूर्वान् पितॄनथ पितामहान् ॥ उद्धरत्येव संसारान्मन्त्रेणानेन पूजिता ॥ नमो भगवत्यै दशपापहरायै गङ्गायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृ-

स्तोत्रं च प्रतिपदादिदशमीपर्यन्तं दिनवृद्धिसंख्यया पठनीयमिति शिष्टाः । अत्र सर्वोऽपि विस्तरः स्तोत्रादि च मत्कृतत्रिस्थलीसेतोरवधेयः । विस्तरभीतेस्तु न लिख्यते । एवं कुर्वतः फलमुक्तं काशीखण्डे—

'एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः ।
उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते ॥
सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥' इति ।

अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या । तदुक्तं स्कान्दे सेतुमाहात्म्ये—

'ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः ।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम् ।
रामो वै स्थापयामास शिवलिङ्गमनुत्तमम् ॥' इति ।

इति दशहरा ॥

ज्येष्ठशुक्लैकादशी निर्जला । तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुम्भान्दद्यादिति निर्णयामृते उक्तम् । मदनरत्ने स्कान्दे—

'ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा ।
निर्जलं समुपोष्यात्र जलकुम्भान्सशर्करान् ॥
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ ।'

तायै विश्वरूपिण्यै नन्दिन्यै ते नमो नमः ॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम् । विधिहरिहररूपां सेन्दुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि ॥ आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं देवी कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥' इति ॥

ज्येष्ठपौर्णमास्यां सावित्रीव्रतम्। तदुक्तं स्कान्दभविष्ययोः—

'ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे।'

इत्युपक्रम्य—

'व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिरा भवेत्।'

इति अन्तेऽप्युपसंहृतम्।

'ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम्।
चीर्णं पुरा महाभागा कथितं ते मया नृप॥' इति।

दाक्षिणात्याश्चैतदेवाद्रियन्ते। एतयामावास्यायामप्युक्तं निर्णयामृते भविष्ये—

'अमायां च तथा ज्येष्ठे वटमूले महासती।
त्रिरात्रोपोषिता नारी विधिनाऽनेन पूजयेत्॥'

मदनरत्ने त्विदं वाक्यम्—'पञ्चदश्यां तथा ज्येष्ठे' इति पठित्वा ज्येष्ठपौर्णमास्यामुक्तम्।

'अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया।
अयाचितं चतुर्दश्याममायां समुपोषणम्॥' इति।

तच्च पाश्चात्या आद्रियन्ते। हेमाद्रिसमयोद्योतादिषु तु भाद्रपदपूर्णिमायामुक्तम्। तच्च नेदानीं प्रचरति।

गौडास्तु—

'मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्।
ज्येष्ठकृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः॥
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः॥'

इति पराशरोक्तेश्चतुर्दश्यां प्रदोषे व्रतम्। दिनद्वये तद्व्याप्तौ परैवेत्याहुः। तन्निर्मूलम्। अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये।

'भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा।

वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥'

इति ब्रह्मवैवर्तात् । स्कान्देऽपि—

'भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ।
वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहन ॥' इति ।

मदनरत्ने ब्रह्मवैवर्तेऽपि—

'प्रतिपत्पञ्चमी भूतसावित्री *वटपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥' इति ।

यदा त्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या ।

'पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः ।
नाड्योऽष्टादश भूतस्य स्युश्चेत्सैव परेऽहनि ॥

इति माधवः । *वस्तुतस्तु—

'भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।'

इत्यस्य मतान्तरे सायकाशरवाक्यविशेषप्रवृत्तपूर्वविद्धा-

---

*सावित्री=तद्व्रतसंबन्ध्यमावास्या । *वटपूर्णिमा=व-टव्रतसंबन्धिपूर्णिमा ॥ नन्वेवं षण्मुहूर्तपरिमितपञ्चमीवेध-त्वात् षष्ठ्यां स्कन्दव्रतमपि न स्यात् । 'नागो द्वादशनाडीभिः' इति वाक्येन षण्मुहूर्तमितपञ्चम्या दूषकत्वात् । किंच स्कन्दव्रते तिथिक्षये पूर्वेतिमाधवादिग्रन्थोऽसंगतः । त्रिमुहूर्ताऽधिकत्वाभा-वेनोत्तरदिने तादृशविद्धायास्त्रिमुहूर्तसत्त्वावश्यम्भावेन

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्तव्या यदि न स्यात्परेऽहनि ॥

इति वासिष्ठवचनाविषयत्वादित्यत आह—*वस्तुतस्त्विति ॥ 'नागो द्वादश'इत्यादेर्दूषकनाऽनुवादेन नाडीविशेषविधायकत्वं लाघ-वात् । वेधविशिष्टदूषकताविधाने गौरवात् । तथा च यत्र व्रते पञ्चमीविद्धा षष्ठी निषिद्धा तद्विषयकमेतत् । स्कन्दव्रते पञ्चमीवि-

विधायकत्ववचनेन तस्य यावदष्टादशनाडीवेधेऽपि पूर्वैवे-
त्ययं पक्षः साधुः । *अत्र पूर्णिमानुरोधेनैव यथा त्रि-
रात्रसंपत्तिर्भवति तथा त्रयोदश्यादि ग्राह्यम् । तस्याः
प्रधानत्वात् । अयं निर्णयोऽमायामपि ज्ञेयः । पारणं तु
द्धाया ग्राह्यत्वात् तत्र पञ्चमीविषयत्वादूषकत्वात् । षण्मुहूर्तपञ्चमी-
युतायामपि तत्कर्तव्यमेव तद्वत् । यत्र व्रते चतुर्दशीविद्धा निषिद्धा
तद्विषयकतया सावित्रीव्रते च—

भूतयुता तथा रम्भा सावित्री वटपैतृकी ।
कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिः ॥

इति पूर्वविद्धाविधानेन तस्या ग्राह्यत्वात्तत्र चतुर्दशीवेधो न दूषक इत्यर्थः ॥ उक्तप्रायसिद्धं च परेऽह्नि एकभक्तादिकाले मध्याह्नादौ षष्ठ्याद्यभावे सामान्यतो निषिद्धाया नागविद्धायाः प्रतिप्रसवार्थमिति स्मर्तव्यम् । ननु केवल लोपपदाः त्रिरात्रादिशब्दाः । यथा सावित्रीत्रिरात्र-बिल्वत्रिरात्र-गोत्रिरात्र-दुर्गानवरात्रादिप्रयोगाः । तानि कर्मनामधेयान्येव तद्देवतातत्कालसंबन्धयोः प्रमाणान्तरगोचरत्वेन प्रवृत्तिनिमित्तासंभवात् । ननु निरुपपदास्त्रिरात्रनवरात्रादिशब्दाः । बहुव्रीहौ समासान्तासंभवेनाव्ययकल्पनापादकत्वेन 'न त्रिरात्रमुपवसेत् नवरात्रे विशेषतः' इत्यादौ अत्यन्तसंयोगार्थकद्वितीयया सप्तम्या वा गुणविधौ संभवति लक्षणया नामधेयत्वानौचित्यात्, त्रयोदश्यादिदिवसत्रयाणि च माघे त्रिरात्रादिसामान्ये विशेषविषयः गुणविधित एव त्रिरात्रादिशब्दे रात्रिशब्दस्य दिनपरः । एवं च यत्र परमानिषिद्धत्वमेव प्रधानं तिथ्यन्तरद्वयं त्वङ्गं तत्र साङ्गप्रधानप्रयोगः । तावत्कालिक इति प्रधानतिथ्यनुरोधेनेतरनिषिद्धोऽप्युक्तः । पूर्वापरनिषिद्धत्वाद्वै चतुर्दशीप्रभृतौ तु त्रिरात्रादिव्यवहारविरहस्वनाद्देवत्वापर्यनुयोज्यत्वात् । प्रकृते तु निषिद्धद्वयं प्रधानमतः स्पष्टमित्याह—*मन्त्रेणेति । *प्रधानत्वादिति । यद्यपि निषिद्धद्वयं प्रधानं तथाऽपि इद-

पूर्णिमान्ते कार्यम् ॥

अथ व्रतविधौ विशेषः परिभाषायामुक्तः । अत्र विशेषो भविष्ये—

'गृहीत्वा वालुकां पात्रे प्रस्थमात्रे युधिष्ठिर ।
ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टितम् ॥
सावित्रीप्रतिमां कुर्यात्सौवर्णीं चापि मृन्मयीम् ।
सार्धं सत्यवता साध्वीं फलनैवेद्यदीपकैः ॥
रजन्या कण्ठसूत्रेण धूपैः कुङ्कुमकेसरैः ॥'

पूजयेदिति शेषः । रजनी=हरिद्रा । कण्ठसूत्रं=[illegible]

'सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमैः ।
रात्रौ जागरणं कृत्वा प्रभाते विमले तथा ॥
तामपि ब्रह्मणे दत्त्वा प्रणिपत्य क्षमापयेत् ॥'

स्कान्दे—

'सावित्र्यपि यथा दत्ता [illegible] महासती ।
[illegible] ब्राह्मणे प्रतिपूजिताः ॥
व्रतेनानेन राजेन्द्र [illegible] आप्नुयात्फलम् ॥' इति ॥

ज्येष्ठपौर्णमास्यां विशेष आदित्यपुराणे—

'ज्येष्ठे मासि तिलान्दत्त्वा पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥'

विष्णुरपि—

[illegible]

'ज्यैष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोति' इति ।

हेमाद्रौ ज्योतिषे—

'ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता ॥' इति ।

इयं मन्वादिरपि । सा पौर्वाह्णिकी ग्राह्या । विशेषस्तु चैत्रे उक्तः । तथाऽपरार्के वामनपुराणे—

'उदकुम्भाम्बुदानं च तालवृन्तं सचन्दनम् ।
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु ॥' इति ।

इति कमलाकरभट्टकृते निर्णयसिन्धौ ज्येष्ठमासः ॥

मिथुनसंक्रान्तौ पराः षोडश घटिकाः पुण्यकालः । रात्रौ तु प्रागेवोक्तम् । आषाढशुक्लद्वितीयायां रथोत्सवः । तदुक्तं तिथितत्त्वे स्कान्दे—

'आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं वै भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेच्च द्विजान्बहून् ॥'

तथा—

'ऋक्षाभावे तिथौ कार्या यात्राऽसा प्रीयते मम ॥'

'इहामुत्रातपत्राणां कुरु मे केशव प्रभो ।
छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया सह ॥'

छत्रमन्त्रः ।

'उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छ मे ॥'

उपानन्मन्त्रः ।

*तालवृन्तं=तालव्यजनः ॥

इति ज्येष्ठः ॥

'निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥
आभाकाद्येषु मासेषु*मिथुने माधवस्य च ।
द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः ॥'
इति भविष्योक्तेः ।

णात् पूर्णिमायां तत्तन्नक्षत्रयोगस्य प्रायिकत्वाच्च । न च तदत्यन्तायोगेऽप्यानुरूप्या योगः मानाभावात् । तस्मादिह कथंचिल्लक्षणया एकादश्यपि ग्राह्या इति । अत्राहुः—अस्तु तथा माघी सप्तमी मौष्ठपदी अष्टकेत्यादौ मघायुक्तः कालो=माघी यत्र मासे स माघः । माघस्येयं माघी सप्तम्यन्वयानुरोधात् । प्रथमतो नक्षत्राण् ततो मासाण् ततः शैषिकाण् कर्त्तव्यः । एवं मौष्ठपदीत्यत्रापि अष्टकान्वयाऽनुरोधात् । पठन्ति च ।

'नक्षत्राणं च मासाणं कृत्वा मौष्ठपदीपदम् ।
विशेष्यं चाष्टकारूपं शैषिकाणां प्रयोजयेत् ॥'इति ।

इह तु आषाढी कार्त्तिकी च अत्यन्तायोगव्याप्त्याऽऽषाढादिपुक्तिव नक्षत्राणैव अनुरोधविशेषविरहात् । पौर्णमासीत्वामात्रु

'आषाढशुक्लदशान्ते भगवान्मधुसूदनः ।
भोगिभोगे निजां मायां योगनिद्रां समाप्नुयात् ॥'

इत्युक्तेः । *मिथुने इति ॥ आषाढमासान्वापि । भगव याचात् । मद्द्वादश्यां शयनायुक्तं तन्मिथुनार्के प्रवेशये इति मयून्तः । उत्सवो=जागरः ।

'आषाढशुक्लद्वादश्यां सर्वशान्तिकरं शुभम् ।
य एतेन विधानेन ज्ञात्वा वै कर्म कारयेत् ॥
स पूजाय मण्डपेन मंसारेषु युगे युगे ॥'

तथा—

'इयं च द्वादशी देवशयनायै तु निर्मिता ।

स्वपिषा सर्वलोकानां हितार्थं शेषशायिना ॥' इति ॥
परिवर्तनेऽपि द्वादश्येव ग्राह्या । एतासु रात्रिदिनसन्ध्यादिषु अनुराधाश्रवणरेवतीनां क्रमेणादिमध्यान्तभागे प्रस्वापादि कार्यम्।

'आषाढकार्त्तिकमासेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः ॥'

इति भविष्यात्,

'मैत्राद्यपादे स्वपितीह विष्णुः
श्रुतेश्च मध्ये परिवर्तमेति ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥'

इति नारदीयाच्च ।

'निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।'

इत्युक्तेः निशादौ नक्षत्रपादयोगाभावे नक्षत्रमात्रयोगो ग्राह्यः ।

'पादयोगो यदा न स्यात् ऋक्षेणापि तदा भवेत् ।'

इति वाराहात् ।

'विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥'

इति विष्णुधर्मोत्तरात् । द्वादश्यामेकदेशेनापि नक्षत्रयोगाभावे एकादश्यां त्रयोदश्यां वा तदृक्षभाग एव निशादिकालादरेणैव प्रस्वापादि कार्यम् ।

'अप्राप्ते द्वादशीऋक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत् ॥'

इति जीमूतवाहनोदाहृतवचनात् । उत्थानशयने इति परिवर्त्तनोपलक्षणम्, अहोरात्रमिति सन्ध्यादिकलापः । एवं च द्वादश्यां निशाद्यादरे अन्यतिथौ च नक्षत्रपादयोगादरे च नियते सति यदा द्वादशीषु निशादेरन्यत्र तदृक्षभागयोगः अन्यतिथौ च तद्-

'द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आभाकासितपक्षेषु शयनावर्तनादिकम् ॥'

इति वाराहोक्तेश्च । द्वादश्यामित्यत्रापि पारणाऽह्नो मात्रं विवक्षितम् ।

'पारणाऽह्नि पूर्वरात्रे घण्टादीन्वादयन्मुहुः ।'

इति रामार्चनचन्द्रिकोक्तेः । अत्रैकादशीद्वादशीद्वैधाभेदेन व्यवस्था ।

तदन्तस्यैव योगः तदा द्वादश्यां तु संध्यायां महापूजादि कार्यं इत्याह—द्वादश्यामिति । निशादौ नक्षत्रयोगाभावे सति शयनावर्तनयोः संधिसमये=संध्यासमय एव, न तु तत् नक्षत्रभागयोगे ।

'रेवत्यन्तो यदा राशौ द्वादश्यां च समागतः ।
तदा विबुध्यते विष्णुर्दिनान्ते भारत रेवतीम् ॥'

इति वचनात् । रेवत्यन्तविशेषग्रहणं चोपलक्षणम् । न चैतस्य श्रीरामविषयत्वमस्तु तत्र तत्र विष्णोरिति श्रवणात् । अत्र मैत्राद्यादि इति नानावाक्येषु चतुर्थभागार्थकत्वादरात् अनुराधादिषु चतुर्दशी विभज्याऽऽद्यान्त्यपादयोरेव स्वापबोधौ कार्यौ श्रवणं तु त्रेधा विभज्य मध्यस्थभागे परिवर्तनं कार्यम् । [illegible] वर्षे [illegible] वर्तनीति वचनात् । पारणाह्ने इति । [illegible] पारणाह एव घण्टावादि क्रियते [illegible] । अत्र द्वादशीदिवसे [illegible] व्याचिख्यासुराह-अत्रेति । "धनदश रमा गौरी" इत्यादि [illegible]

'[illegible] च [illegible] निविशेषम् ।
[illegible] शयनावर्तनादिकम् ॥'

इति [illegible]
[illegible]

इदं च मलमासे न कार्यम् ।

'ईशानस्य बलेर्विष्णोः शयनं परिवर्तनम् ।'

इति कालादर्शे निषेधात् । यदपि—

'एकादश्यां तु गृह्णीयात्संक्रान्तौ *कर्कटस्य वा ।
आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियाम् ॥'

इति हेमाद्रौ ब्रह्मवैवर्ते, तदपि मलमासेऽसति द्रष्टव्यम् ।

*'मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥'

इति तत्रैव मोहचूलोत्तरोक्तेः ॥

'क्षीराब्धौ शेषपर्यङ्के' इत्यादि । एकादशीमारभ्य पञ्चाहमपि मत्स्या-[illegible]दि पुराणान्तरे तद्विस्तरः । *कर्कटस्येति । मत्स्यापरचतुर-[illegible]र्थेष्वस्य चातुर्मास्यव्रतस्य मिथुन एव न्याय्यत्वात्कथमेतद्विषय-[illegible]भिमानः । मलमासे मिथुनेऽधिकमासे न । तथा च हरिशयने मिथुने द्वादशीस्थाने कर्के द्वादशी लभ्यते तदुत्तरकर्तव्यचातुर्मास्य-[illegible]ते, नैव संक्रान्तौ कर्कटस्येत्यनेन कर्तव्येत्यर्थः । वस्तुतस्तु [illegible]ातुर्मास्यव्रतारम्भे चत्वारः पक्षाः । आषाढ-शुक्लैकादशी-तद्द्वा-[illegible]शी-तत्पौर्णमासी-कर्कसंक्रान्तिभेदात् । "एकादश्यान्तु शुक्लाया-[illegible]" इति वाक्यात् ।

'आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्मास्यव्रतारम्भं कुर्यात्कर्कटसंक्रमे ॥'

इति वाराहात् । *मिथुनस्थ इति ।

'माधवाद्येषु पर्यंकमासि दर्शद्वयं यदा ।
द्विराषाढः स विज्ञेयः शेते कर्कटकेऽच्युतः ॥'

इति द्विराषाढकथनं तु व्यवस्थार्थम् ।

'मेषादिमिथुनान्तेषु यदा दर्शद्वयं भवेत् ।
अब्दान्तरे तदावश्यं मिथुनार्के हरिः स्वपेत् ॥'

*अत्रैव चातुर्मास्यव्रतारम्भ उक्तो भारते—

'आषाढे तु सिते पक्षे एकादश्यामुपोषितः।
चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः॥' इति।

।अस्य नित्यत्वं तत्रैवोक्तम्—

'वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः।
व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवम्॥
असम्भवे तुलार्केऽपि कर्तव्यं तत्प्रयत्नतः॥' इति।

तेनाषाढशुक्लैकादश्यां द्वादश्यां पौर्णमास्यां वाऽऽरम्भः। समाप्तिस्तु कार्तिकशुक्लद्वादश्यामेव। तदुक्तं हेमाद्रौ भारते—

'चतुर्थो गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत्॥' इति।

अस्यारम्भः शुक्रास्तादावपि कार्यः।

'न दोषाय न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः।
स्वपत्स्वे चिन्तयेदादौ चातुर्मास्यविधौ नरः॥'

इति हेमाद्रौ वृद्धगार्ग्योक्तेः। *इदं च द्वितीयाद्यारम्भविषयम्। प्रथमारम्भस्तु न भवत्येव। आशौचमध्येऽपि द्वितीयाद्यारम्भो भवति।

'अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्।

कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत्।
अस्यान्तरे तदारब्धं विष्णुनार्के हरिः स्वपेत्॥'

इति स्कन्दोक्तेः। *अत्रैवेति। आषाढशुक्लद्वादशीदिवसादिनिरा-कारापन्वारः यथा अनुष्ठानमुक्तः। एकादश्यां द्वादश्यादिना अति-क्रान्ते द्वादश्यादयः सर्वत्रापि मनियतं स्वनारम्भ एव। 'आरब्धं पूर्वं न स्यात्' इति वाक्यात्। *आदौ=आरम्भे। *इदं चेति। निषि-द्धकालसमारम्भादन्यः मनियतदे मरणात द्वितीयाद्यारम्भविष-

व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैः ॥'

इति भार्गवार्चनदीपिकायां स्कान्दोक्तेः ।

'आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ।'

इति विष्णुवचनाच ।

यत्तु—

'*असंक्रान्तं तथा मासं दैवे पित्र्ये च कर्मणि ।
*मलमासंमशौचं च वर्जयेन्मतिमान्नरः ॥'

इति हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्यवचनं, तत् *पूर्वानुमन्त्रणमन्त्रवदसम्बद्धं मध्ये पठितमिति ज्ञेयम् । *अन्यथा विस्तरस्य पूर्वोक्तस्य विवाहादेश्च चातुर्मास्यव्रते कः प्रसङ्गः । *प्रकरणनिवेशोऽपि वा प्रथमारम्भविषयं ज्ञेयम् । केचित्तु प्रतिवर्षं चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वादाशौचादिपाते द्वितीयादिप्रयोगो न भवत्येवेत्याहुः । तत्र ।

'*प्रतिवर्षं च यः कुर्यादेवं वै संस्मरन् हरिम् ।
देहान्तेऽतिप्रदीप्तेन विमानेनार्कवर्चसा ॥'

र्थः । वस्तुतस्तु वर्णभेदेऽपि प्रतिवर्षे मानाभावात्सर्वेऽपि प्रथमारम्भा एवेति । अत एव बहुषु पुस्तकेष्विदं चेत्यादिपाठो न दृश्यते । *असंक्रान्तम्=अधिकम् । *मलमासं=क्षयमासम् । *पूर्वेति । दर्शपूर्णमासप्रकरणे 'पृणोहं देव यज्यया पशुभिर्जनिषीय' इति पूर्वानुमन्त्रणमन्त्रः पठितोऽपि स तत्र न विनियुज्यते, तत्र तद्वचनाविरहेण प्रकरणस्य दौर्बल्यात् विनियोजकरूपसामर्थ्यमनपेक्ष्य विनियोगाभावात् । अतः स पूषयागे नेतव्य इत्यर्थः ॥ प्रकरणदौर्बल्यमाह—*अन्यथेति । दैवविवाहादि चातुर्मास्यव्रते दैवमिति मत्वाह—*प्रकरणेति । *प्रतिवर्षं चेति । वस्तुतस्त्विदं फलविशेषार्थोपहितविशेषकं प्रयोगभेदपक्षे मानाभावात् । चातुर्मास्यप्र-

मोदते विष्णुलोकेऽसौ यावदाभूतसंप्लवम् ॥'
इति हेमाद्रौ भविष्यवचनादित्यास्तां विस्तरः।
इदं च शिवभक्तादिभिरपि कार्यम्।
'शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके।
कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत् ॥'
इति ब्रह्मवैवर्तात्। व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये-

*'महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥
सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदम्।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत ॥
एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः।
समीपतोऽग्रतो विष्णोः कृताञ्जलिपुटस्तथा ॥
चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥
इदं व्रतं मया देव गृहीतं पुरतस्तव।
निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ॥
गृहीतेऽस्मिन्व्रते देव पञ्चत्वं यदि मे भवेत्।
तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥
गृहीतेऽस्मिन्व्रते देव यथापूर्णो मृतो ह्यहम्।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥' इति।

तत्र भार्गवार्चनदीपिकायां नृसिंहपरिचर्यायां च भविष्ये—

'श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ॥' इति।

स्कान्देऽपि चातुर्मास्यकल्पे—

दारम्भः शयनोत्सवं कृत्वा कार्य इति सूचयितुं-महापूजामिति।

'वर्ज्यान्येतानि नित्यानि चतुराश्रमवर्णिनाम् ।
प्रथमे मासि कर्तव्यं नित्यं शाकव्रतं नरैः ॥
द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमम् ।
पयोव्रतं तृतीये तु चतुर्थेऽपि निशामय ॥
द्विदलं बहुबीजं च वृन्ताकं च विवर्जयेत् ।
नित्यान्येतानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः ॥
जम्बीरं राजमाषांश्च मूलकं रक्तमूलकम् ।
कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद् बुधः ॥'

तथा—

'विशेषाद्बदरीं धात्रीं कूष्माण्डं तिन्तिणीं त्यजेत् ।
जीर्णधात्रीफलं ग्राह्यं कथञ्चित्कायशोधनम् ॥' इति ।

तीर्थखण्डे स्कान्दे—

'वार्षिकांश्चतुरो मासान्प्रसुप्ते वै जनार्दने ।
मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ॥
अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनम् ।
पटोलं मूलकं चैव वृन्ताकं च न भक्षयेत् ॥
अभक्ष्यं वर्जयेद् दूरान्मसुरं सितसर्षपम् ।
राजमाषान्कुलित्थांश्च आशुधान्यं च सन्त्यजेत् ॥
शाकं दधि पयो माषान् श्रावणादिषु सन्त्यजेत् ॥'

अत्र त्यजेदिति वर्जनसङ्कल्परूपः पर्यु(१)दासो ज्ञेयः व्रतोपक्रमात् । अत्र केचित्—

'शाकाख्यं पत्रपुष्पादि' इत्यमरकोशस्य 'शाकपत्रेऽ

शाकव्रतं=शाकवर्जनमेकन्नः । बहुबीजमन्नं च मातपतृष्टये । राजमाषाः=चवलाः इति महाराष्ट्राः । मधु=क्षौद्रम् । परो-दनं द्रवमपि । आशुधान्यम्='आशुव्रीहिः पाटलः स्यात्' इति

(१) पर्युदासो निषेधः ।

शितुमनेनेति शाकः' इति क्षीरस्वामिना व्याख्यानात् व्यञ्जनमात्रस्य निषेधमाचक्षते। अन्ये तु शाकशब्दस्य पत्रादिदशविधशाके योगरूढत्वात् योगाद्य*रूढेर्बलीयस्त्वात् सूपादीनामपि त्यागापत्तेश्च तन्मत्याचक्षते। तेन

'*मूलपत्रकरीराग्रफलकाण्डाधिरूढकाः।
त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम्॥'

इति क्षीरस्वामिनोक्तस्य शाकस्य निषेध इति। अधिरूढकाः=अङ्कुराः। वस्तुतस्तु

*तत्तत्कालोद्भवाः शाका वर्जनीयाः प्रयत्नतः।
बहुबीजमबीजं च विकारि च विवर्जयेत्॥

इति भविष्यवचनात्तत्कालोत्पन्नानां दशविधशाकानां निषेधः। तत्र *तत्काले(१)द्भवजातीयत्वं विवक्षितम्। तेनातपादिशोषितानां वर्षान्तरोद्भवानामपि निषे-

---

कोशात्तुच्छधान्यम्। *योगाद्येति। केवलयौगिकत्वपक्षे। *मूलेति। मूलं कन्दोऽपि बोध्यः। करीरं=वंशाङ्कुरः। अग्रं=पल्लवः। काण्डो=दण्डः। कवचं=छत्राकमहराम। अङ्कुर इति सेत्रोद्भिन्नफलमूलादेः, स्वेदोद्भिन्नोऽङ्कुर इति केचित्। अत्र फलपत्र्यादेः सर्वस्य न निषेधः किंतु फलमूलादेरेव। तेषां व्यञ्जनत्वेन भूयो लोकव्यवहारादिति केचित्। तत्रान्यत्रापि तद्व्यवहारभूयस्त्वादित्यपरे। *तत्तादिति। 'यत्र काले यूतं तस्य तदन्यस्य च' इत्येवं वर्षाकाललाभात्। एतेन तत्तत्कालेति संवत्सरलाभे वर्षाकालोत्पन्नानामित्यग्रिमग्रन्थविरोधः। इतरथा वीप्सावैयर्थ्यमिति सपाहितम्। *तत्कालेति तत्तत्कालेत्यभिधातव्ये द्वितीयतच्छब्दप्रभूयानुवादः। एतच्च वर्षाकालोद्भवशाकपूर्नमित्यभिप्रायेण। शाकमात्रा-

---

(१) क्वचित् 'तत्तत्कालोद्भवजातिर्विवक्षिता' इति पाठः।

ध्यः । हरत्र कल्पतरोरुक्त्या हानि श्रीमत्पादजागरणकालोक्त-
भावो मार्गेण लिंग्य इति निष्कर्षः । चतुर्थ्यादिविहितानेक-
र्थोऽप्यमीति केचित् । इतरतत्ययापेक्षया श्रीआगमयदा यत्र
यत्कालनिरूपणे । अपीजं कदम्बादि० । वस्तुतस्तु इदं
तदादिनिःसेवमात्रस्येत्यभिप्रायेण । कालादर्शे—

'हुतनाशं च कलिङ्गं च बिल्वोदुम्बरभिःसटाः ।
उद्दं यस्य जीर्यन्ति तस्य दूरतरो हरिः ॥'

तथाऽपरार्के देवलः—

'मलवर्धं तथा क्षौद्रं मत्स्यमांसामिषवर्जनम् ।
एतद्व्रतानि चत्वारि परिहार्याणि निश्चयः ॥'

आमिषाणि चोक्तानि रामार्चनचन्द्रिकायां पाद्ये—

'प्राण्यङ्गचूर्णं चर्माम्बु जम्बीरं बीजपूरकम् ।
अयज्ञशिष्टमाषादि चक्रिण्यासनिवेदितम् ॥
दग्धमन्नं मसूरं च मांसं चेत्यष्टधाऽऽमिषम् ।
वर्ज्यं तदाहेशाल्यं सुप्ते देवे विवर्जयेत् ॥'

पाद्मे कार्तिकमाहात्म्ये—

'गोच्छागीमहिषीदुग्धादन्यद् दुग्धादि चामिषम् ।
धान्ये मसूरिकाः प्रोक्ता अन्नं पर्युषितं तथा ॥
द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ।

स्पष्टविन्यासेनाह-हरत्रयेति । ०कदम्बमिति । अतुदरा कल्पे-
तिवत् अल्पत्वर्थप्राशस्त्यर्धादाग्रकल्पमिति । भिःसटा=दग्धान्नम् ।
भीःसटेति पाठे 'भीःसटं श्लेष्मान्तकम्' इति धन्वन्तरिनिघण्टुः ॥
प्राण्यङ्गं=मौक्तिकशुक्त्यादि । द्रव्यं=हाचिकादि । धान्यं=कुस्तु-
म्बुरुः । अन्नं पर्युषितम्—

'अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥'

*'ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम् ।
*आत्मार्थं पाचितं चान्नमामिषं तत् स्मृतं बुधैः ॥'

तथा—

*'निष्पावान् राजमाषांश्च मसूरं संधितानि च ।
वृन्ताकं च कलिङ्गं च सुप्ते देवे विवर्जयेत् ॥'
संधितानि=लवणशाकादीनि ।

तत्रैव विष्णुधर्मे—

'चतुर्ष्वपीह मासेषु हविष्याशी न पापभाक् ।'

हविष्याणि तु पृथ्वीचन्द्रोदये भविष्ये—

*'हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ।
कलायकङ्गुनीवारा वास्तुकं हिलमोचिका ॥
षष्टिका कालशाकं च मूलकं केमुकेतरत् ।
कन्दः सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥

इत्याद्युक्तम् । आरनालादि च द्विजात्क्रीताः । *ताम्रेति ।

'यज्ञपात्रे तथा दोहे पाके च परिवेषणे ।
स्नानतर्पणदानेषु ताम्रे गव्यं न दुष्यति ॥'

इत्युक्तम् । *आत्मार्थमिति । 'परपाकरतश्च यः, तावुभौ पापकर्माणौ' इति निषेधेऽपि दोषाधिक्यार्थं विप्रभोजनवैश्वदेवाद्यर्थपाकहीनः परपाकनिरतः । *निष्पावा पावटे इति महाराष्ट्राः ।

'यथोत्कोचादिना प्राप्तं पतितादुपार्जितम् ।
कन्याविक्रयतो लब्धं सुप्ते देवे विवर्जयेत् ॥'

इत्यादीनि त्वतिदोषार्थानि । *हैमन्तिकं=हेमन्तोद्भवम् । सितास्विन्नम्=अनूष्मकं किंचिदग्निपाकेन जातस्वेदं स्विन्नं तद्भिन्नं तेन मुद्गादिनिषेधः । धान्यं=तण्डुलाः । कलायः=सतीनकः, मटरी इति प्रसिद्धम् । वास्तुकं बथुआ इति प्रसिद्धः शाकः । हिलमोचिका=गौरचे । कालशाकम्=तद्देशे । मूलकं स्वार्थे कः मूलानि न तु मूलशाकः

*पयोऽनुद्धृतसारं च *पनसाम्रहरीतकी ।
पिप्पली जीरकं चैव नागरङ्गं च तिन्तिणी ॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
*अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥' इति ।
मिमारिथघम=अनूष्मपक्वम् । धान्यं=तण्डुलादि* ।
कमुकं केमुकाइति प्राच्येषु प्रसिद्धः कन्दः 'कलायस्तु-
सतीनकः' इत्यमरः 'मटुरी' इति प्रसिद्धं धान्यम् ।
मदनरसेऽप्येवम् । अगस्त्यसंहितायां हैमन्तागुक्त्वा—
'नारिकेलफलं चैव कदली लवली तथा ।
आम्रमामलकं चैव पनसं च हरीतकी ॥
व्रतान्तरप्रशस्तं च हविष्यं मन्यते बुधाः ॥'
अन्यान्यपि व्रतान्युक्तानि हेमाद्रौ भविष्ये—
'स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः ।
गृह्णीयान्नियमानेतान्दन्तधावनपूर्वकान् ॥
तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक् ।
मधुरस्वरो भवेद्राजन् पुरुषो गुडवर्जनात् ॥
तैलस्य वर्जनाद्राजन् सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागाच्छत्रुनाशः प्रजायते ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।

तस्य हूते मद्विरोपमत्वात् । केमुकेत्यत्र=केमुकं केमुना इति प्राच्ये-
षु प्रसिद्धं मूलं तद्भिन्नम् इत्येऽपि च न मूलशाकः अष्टयावर्ष-
फलत्वेन एतदन्वयात् । कन्दः यद्यपि 'अर्शोघ्नः सूरणः कन्दः' इत्युक्त-
स्तथापि तस्य निषिद्धत्वात्तदन्यो ग्राह्यः ॥ *अनुद्धृतसारमि-
ति । दध्यपि बोध्यम् । *पनसेत्यादि । 'फले लुक्' । नार-
ङ्गं=नारिङ्गम् । नागराणिति पाठे शुण्ठी । *अतैलपक्वमिति
कथितहविष्याणामेव विशेषणम् ।

ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत् ।
शाकपत्राशनाद्रोगी अपक्वादोऽमलो भवेत् ॥
भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत् ।
एकान्तरोपवासेन ब्रह्मलोके महीयते ॥
धारणान्नखरोम्णां च गङ्गास्नानफलं लभेत् ।
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ॥
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ।
प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ।
अयाचितेन प्राप्नोति पुत्रान्धर्म्यान्विशेषतः ॥
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेदिति ।
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ॥
गुडवर्जी नरो दद्यात्तक्रं ताम्रभाजनम् ।
सहिरण्यं नरश्रेष्ठ लवणस्याप्ययं विधिः ॥
सुप्ते देवे तु यो विष्णोः शिवस्याङ्गणमर्चयेत् ।
पञ्चवर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा ॥
स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात् ॥'

अथैषां समाप्तौ कार्तिक्यां दानानि । 'एकभक्तव्रते* दम्पती संपूज्य धेनुर्देया, नक्ते वस्त्रयुगं, एकान्तरोपवासे गौः, भूशयने शय्या, षष्ठकालभोजने गौः, व्रीहिगोधूमादित्यागे हैमव्रीह्यादि, कृच्छ्रे गोयुग्मं, शाकाशने गौः

---

*एकभक्तव्रते इति । विहितदानानन्तरं
"चतुरो वार्षिकान् मासान्नियमो येन यः कृतः ।
कथयित्वा द्विजेभ्यस्तं दद्याद्दत्त्वा सदक्षिणाम् ॥
दत्त्वा विसर्जयेद्विप्रांस्ततो भुञ्जीत वाग्यतः ।"

गोधूमे च, दधिभृङ्गपत्रेषु वासो गौश्च, प्रातःस्नाने स्व-र्णपुष्पैः, नखकृन्तने पायसापूपं, मौने घृतकुम्भो वस्त्रयुगं घण्टा च, देवाग्रे रङ्गमालिकाकरणे धेनुर्हेमपद्मं च, दीपि-कापूर्वं दीपिका वासोयुगं च, भूमिभोजने पर्णभोजने च कांस्यपात्रं गौश्च, अनुव्रतदीपे गोप्रदानं च गोष्पदी, प्र-दक्षिणायां वस्त्रम्, *अनुक्तेषु स्वर्णं गौश्च' इत्यादि हेमाद्रौ ज्ञेयम् । तथाच भार्गवार्चनदीपिकायां पाद्मे-

'चातुर्मास्येऽभिलाषस्थे ब्राह्मणैर्भूमिमार्गकैः ।
शूद्रराजेन देवांस्तु नार्चयीत कदाचन ।'

हेमाद्रौ पाद्मे—

'आषाढादिचतुर्मासानभ्यङ्गं वर्जयेन्नरः ।
मसूरांश्च पुनर्दद्यात्तिलतैलयुतं घटम् ॥
आषाढादिचतुर्मासं वर्जयेन्नखकृन्तनम् ।
कृत्वान्ते मुकुलं चैव मधु सर्पिर्घटान्वितम् ॥
कार्तिक्यां तत्पुनर्हैमं ब्राह्मणाय निवेदयेत् ।

'अन्यान्यपि (१)केशकर्तनादिवर्जनसंकल्पानुरूपाणि पृथ्वीचन्द्रोदये ज्ञेयानि । टोडरानन्दे स्कान्दे—

'एकान्तरं त्र्यन्तरं वा कुर्यान्मासोपवासकम् ।
शाकोदनं फलाहारं नक्तव्रतमथापि वा ॥'

अत्रैव तप्तमुद्राधारणमुक्तं रामार्चनचन्द्रिकायां भ-विष्ये—

इत्युक्तेर्व्रतसमापनं कार्यम् । *घण्टामिति । सन्ध्याकाले दीपदाने सुवर्णयुतां दीपिकां दद्यात् । *अनुक्तेष्विति । चातुर्मास्यव्रतं कृत्वा 'व्रतान्ते गोष्पदः' इति वाक्याद्धेनुं वा दद्यात् । व्यासः—

---

(१) आदर्शपुस्तके 'केशकर्तनादि' इति नास्ति ।

'शाकिन्यां चैव योगिन्यां यक्षिण्यां च तथैव च ।
शङ्खचक्रनिपातेन यश्चिह्नो भवेन्नरः ॥' इति ।

(१)'अतप्ततनूर्न तदामो अश्नुते' इति ऋग्वेदात्, 'महोपाय पापानलत्वरमस्मात्पुमानात्महिताय हरिं भजेत्। सुदर्शनमोर्लिङ्गमात्मबाहूपरिमिता संदहेत्' इति यजुः-श्रुतेः, 'प्रभाहिरण्मी अब्जजनाः सुमखे जन्मास्मोभिरनवं *चर्षणीन्द्राः । मूले बाहोर्दधतं ये पुराणा लिङ्गान्यङ्गे तापकायार्पयन्ति' इति सामवेदात् ।

'योऽधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः ।
चतुरो वार्षिकान् मासान् सर्वपापैः प्रमुच्यते ॥
तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदम् ।
कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथाम् ॥
श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवाः ।
सर्वथा वर्तमाना वै न ते शोच्याः कृताकृते ॥' इति ।

नियमाः ब्रह्मचर्यहविष्याशनभूशय्यादयः । एवं सङ्कल्पपूर्वकं श्रुत्वा समाप्तौ सति सामर्थ्ये पर्वसमाप्तौ वाचकं पायसेन भोजयेत्स्वर्णं रत्नकाञ्चनगोभूगृहवस्त्रादि दद्यात् ततो द्विजान् भोजयित्वा तेभ्यो दक्षिणां दद्यादेवं सर्वपुराणश्रवणविधिरिति । *तर्तवे=तरितुम् । *चर्षणीन्द्राः=ज्ञानपूर्णाः ।

---

(१) इयं श्रुतिर्वैष्णवैः स्वमतपरतया व्याख्याता । अस्या वास्तवार्थस्तु—'तत् पवित्रं अतप्ततनूः पयोव्रतादिना असन्तप्तगात्रः आमः अपरिपक्वो नाश्नुते न व्याप्नोति' इति श्रीमत्सायणाचार्यैः ऋक्संहिताभाष्ये उक्तः । एवमन्यान्यपि श्रुतिवाक्यानि वस्तुतो भिन्नार्थानि बलात्कृत्य व्याख्यातानि सन्ति । सार्वजनीनं तु ग्रन्थकृदग्रे वक्ष्यति-'वस्तु संततशङ्खादि' इति ।

'अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम् ॥'

इति पद्मपुराणाच्चेति ।

'ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः ।
शङ्खचक्राङ्किततनुस्तुलसीमञ्जरीधरः ॥
गोपीचन्दनलिप्ताङ्गो दृष्टश्चेत्तदघं कुतः ॥'

इति काशीखण्डात् । तत्प्रकारस्तु रामार्चनचन्द्रिकातो ज्ञेयः ।

पूर्वोक्तद्रोहवाक्यस्तु —

'यस्तु संतप्तशङ्खादिलिङ्गचिह्नतनुर्नरः ।
स सर्वयातनाभोगी चण्डालो जन्मकोटिषु ॥
द्विजं तु तप्तशङ्खादिलिङ्गाङ्किततनुर्नरः ।
संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश ॥'

इति बृहन्नारदीयोक्तेः ।

शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥
शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः ॥
यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु ।
तथा चक्राङ्कितो विप्रः सर्वकर्मसु गर्हितः ॥'

तथा—

'शिवकेशवयोरङ्कान् शूलचक्रादिकान्द्विजः ।
न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः ॥'

इति विष्णवाद्यवस्थापनादिवचनात् ऋग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनां चासत्त्वाच्चक्रादिधारणं शूद्र-

---

* अन्यार्थत्वात्=तप्तादिपदस्य कृच्छ्रचान्द्रायणादिपरत्वात् ।

विषयमित्यूचुः । 'नृत्यं चोदरार्थं निषिद्धम्' इति श्रीधरस्वामी ।

यद्यपि निषेधस्य प्राप्तिसापेक्षत्वाद्विधिं विना च तद्योगानुपजीव्यविरोधेन 'न तौ पशौ करोति' इतिवद्विकल्पो युक्तस्तथापि 'एकजातेरयं धर्मः' इत्यनेन(1) सामान्यवाक्यानामुपसंहाराद्द्विजातिनिषेधो नित्यानुवाद इति तदाशयः । अत्र शिष्टाचार एव संकटपाशनिःसरणसरणिरिति संक्षेपः । आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये—

'आषाढपौर्णमास्यां तु संध्याकाले ह्युपस्थिते ।
संकल्पयेन्मासमेकं श्रावणे प्रत्यहं त्वहम् ॥
स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ।
भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् ॥'

इति ।

अस्य नक्तव्रतत्वात् *सायाह्नव्यापिनी (2)ग्राह्या । अत्रैव शिवशयनोत्सव उक्तो हेमाद्रौ वामनपुराणे—

'पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिवर्त्मना ॥'

*आषाढेति । अधिकाषाढपौर्णमास्यामारम्भः ।
'आषाढौ द्वौ यदा स्यातां कोकिलाव्रतमाचरेत् ।'
इत्युक्तेः । अधिकाषाढपौर्णमासीविरहे तु तन्निषिद्धे श्रावणमभिव्याप्य शुद्धे कार्यम् । *सायाह्नव्यापिनीति=म

(1) मुद्रितपुस्तके 'सामान्यवाक्यानाम्' इति पाठः ।

(2) आषाढौ द्वौ यदा स्यातां कोकिलाव्रतमाचरेत् । नदा वा कुरुते नारी न सा वैधव्यमाप्नुयात् ॥ शृणु देवि प्रवक्ष्यामि व्रतं हि तन्निर्दिष्टम् । मलमासे त्वभिकाले शुद्धाषाढे समाचरेत् ॥' इत्युक्त्या सन्दर्भोक्तिस्तु मलमासे प्राप्ते सति शुद्धमास एव व्रतनिर्णयः । न तु आषाढेऽधिमासे मासैव तद्व्रतकरणमित्याशयेनेति बोध्यम् ।

मदनरत्नेऽप्येवम्। इयं च *प्रदोषव्यापिनी। अत्रैव व्यासपूजोक्ता। तत्र त्रिमुहूर्ता चेत् परैवेति(१) संन्यासपद्धतौ।

'त्रिमुहूर्ताधिके ग्राह्यं पर्व क्षौरव्रणामयोः।'

इति वचनात्॥

इति श्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ आषाढः समाप्तः॥

कर्कसंक्रान्तौ पूर्वं त्रिंशद्दण्डाः पुण्यकालः। सूर्यो-

न्ध्याकालव्यापिनीति मयूखे। *प्रदोषेति। स्नापस्य प्रदोष-कालीनत्वात्। आषाढपूर्णिमायां किंचिदेवम्।

'आषाढी कार्तिकीमाघीतिथयः पुण्यसम्भवाः।
अन्नदानवतो यान्तु यस्यार्थोऽनुमतो गतः॥'

इति भरतवाक्येषूक्तेः।

'आषाढीकार्तिकीमाघीतिथयोऽतीव पावनाः।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन॥' इति,
'श्राद्धाभावे स्नानतकम्' इति च वाक्यात्।

इत्याषाढः॥

---

(१) संन्यासिनां चातुर्मास्याऽऽश्रमसंकल्पाङ्गत्वेन क्षौरव्यासपूजादिकं विहितम्। तत्रादौ क्षौरं विधाय द्वादश मृत्तिकास्नानानि प्राणायामादिविधिं च कृत्वा व्यासपूजां कुर्यात्। पूजान्ते 'वसति प्रतिबन्धे चतुरो वार्षिकान्मासानिह वसामि' इति मनसा सङ्कल्प्य—'अहं तावदिह वत्स्यामि सर्वभूतहिताय च। प्रायेण प्रावृषि प्राणिसङ्कुलं वर्त्म दृश्यते॥ अतस्तेषामहिंसार्थं पक्षान्वै श्रुतिसंश्रयान्। स्थास्यामश्चतुरो मासानत्रैवासति बाधके॥' इति वाचिकसंकल्पं कुर्यात्। ततो गृहस्थाः प्राहुः—'निवसन्तु सुखेनात्र गमिष्यामः कृतार्थताम्। यथाशक्ति च शुश्रूषां करिष्यामो वयं मुदा॥' इति। अन्योऽपि सविस्तरविधिः धर्मसिन्धुतोऽवगन्तव्यः।

दयोत्तरं संक्रमे तु परत एव पुण्यम् । रात्रौ तु निशीथात्प्राक् परतश्च संक्रमेऽपरार्कहेमाद्र्यनन्तभट्टादिमते पूर्वोत्तरदिनयोः पञ्च नाड्यः पुण्यकालः ।

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि ॥'

इति स्कान्दोक्तेः । 'पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रान्तिपरम् । वक्ष्यमाणवचोविरोधात्' इत्युक्तं मदनरत्ने । तेनायमर्थः–रात्रौ पूर्वभागे मकरे उदये पञ्च नाड्यः पुण्यकालः । रात्रावपरभागे कर्कटे दिनान्ते पञ्च नाड्यः पुण्यकालः । विषुवतोस्तु पूर्वदिने पश्चापरदिने च पञ्चेति वाक्यान्तरानुरोधात् । तेन हेमाद्रिमाधवयोः सर्ववचनानां चाविरोधः । माधवमते तु—

'अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥'

इति वृद्धगार्ग्योक्तेः ।

'मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः ।
प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः ॥'

इति भविष्योक्तेश्च पूर्वदिन एव पुण्यम् । दाक्षिणात्यास्त्वेतदेवाद्रियन्ते । अत्र रात्रावपि स्नानादि भवतीत्युक्तं प्राक् । अत्र दानोपवासादि पूर्वमुक्तम् । तथा कर्के *केशादिकर्तनं* निषिद्धम् ।

'कुम्भे कर्कटके चापि कन्यायां कार्मुके रवौ ।

---

*केशादीति । 'नखानामनुक्तत्वाच्चखण्डने न दोषः' इत्याहुः । *कर्तनमिति । वपनस्यापि न ग्रहः 'रोमखण्डनम्' इति

दीर्घपत्रहं अमृतत्वाय पितृन्स्नानाय नमः ॥'
इति सुमन्तुवचनादित्युक्तं जीवत्पितृकार्येऽपि गुरवः ॥
अथ नदीनां रजोदोषः । हेमाद्रावत्रिः—
'सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
न स्नानादीनि कर्माणि तासु कुर्वीत मानवः ॥'
इदं च धुवहरीषु ।
'सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥'
इति व्याघ्रोक्तेः । समुद्रगं लक्षणं कात्यायनोक्तमुक्तम् ।
'धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते ।
न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः ॥'
इदं च नवरात्रे । कात्यायनः—
'अनुपाकृते तु प्रथमे पश्चिमे तु दिनत्रये ।
तासु स्नानं न कुर्वीत नवरात्रं समुद्रगाः ॥'
इदं चाषाढे । रत्नमालायाम्—
'धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते ।
तासां नदीशब्दवहा गर्तास्ताः परिकीर्तिताः ॥'
महानदीषु तु भविष्ये उक्तम्—

मात्राविशेषोक्तेः । कात्यायनोक्ति वक्ष्यमाणेषु नदीत्वं । तच्च
कचाषि न्यूनत्वे ते...प्यम् । अस्य सहसाद्यः स्यात्
न्यूनत्वे दृश्यते ।
'धनुःसहस्राणि दिशो गत्वा पूर्वादौ परतस्त्रिषु ।
सर्वासामपि नदीनां तु ... ॥'
इत्यपि केचित् । तथा हिंसाः ... , ... । ...
... ... । ...
दिशा ... । ...—

'आदौ तु कर्कटे देवि महानद्यो रजस्वलाः ।
त्रिदिनं च चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी*यथा ॥'

महानद्यश्च ब्राह्मे—

'गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च वितस्ता च विन्ध्यस्योत्तरसंस्थिताः ।
द्वादशैता महानद्यो देवर्षिक्षेत्रसम्भवाः ॥'

मदनरत्ने पुराणान्तरे—

'महानद्यो देविका च कावेरी वञ्जरा तथा ।
रजसा तु प्रदुष्टाः स्युः कर्कटादौ त्र्यहं नृप ॥'

कात्यायनः—

'कर्कटादौ रजोदुष्टा गोमती वासरत्रयम् ।
चन्द्रभागा सती सिन्धुः सरयूर्नर्मदा तथा ॥'

इदं गङ्गाव्यतिरिक्तविषयम् ।

'रजोदुष्टेऽम्भसि स्नानं वर्ज्यं नद्यादिषु द्विजैः ।
कदर्थितं रजस्तेषां सन्ध्योपासनं च तर्पणम् ॥' इति ।

कदर्थितं=निन्दितम् । एतच्चादृष्टार्थकर्मसामान्यपरम् । "प्राप्य भोगो न दुष्यति" इति वचनात् । *जाह्नवीति । यथा जाह्नवी सर्वकाले शुद्धा, तथा तदन्या । त्रिदिनानन्तरमित्यर्थः । अत्र माधवीयमुक्तम्-

'स्नाने नभस्यशुद्धं स्यात् त्रिरात्रं तु नदीजलम् ।
अकाले तु द्व्यहं स्यात्सीमा नापाद्दशनिर्णयम् ॥' इति

स्नानदानोपकरणे तु त्रिरात्रं कृच्छ्रो वा दोषः ।

'गङ्गा च यमुना चैव *प्लक्षजाता सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः ॥
शोणसिन्धुहिरण्याख्याः कोकलोहितघर्घराः ।
शतद्रुश्च नदाः सप्त पावनाः* परिकीर्तिताः ॥'

इति देवलोक्तेः । यत्तु—

'प्रथमं कर्कटे देवि त्र्यहं गङ्गा रजस्वला ।'

इत्यादि वचनं तद्भागीरथीभिन्नगोदावर्यादिगङ्गान्तरपरमिति मदनरत्ने । अन्ये त्वन्तर्गतरजोविषयम् ।

'गङ्गा धर्मद्रवः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोदोषाः सर्वावस्थासु चामलाः ॥'

इति निगमोक्तेः । तीरवासिनां तु रजोदोषो नास्ति । 'न [illegible] स्तीरवासिनाम्' इति निगमोक्तेः । रजोदुष्टमपि जलं गङ्गाजलयोगे पावनम् ।

'गङ्गाम्भसा समायोगाद् दुष्टमप्यम्बु पावनम् ।'

इति मात्स्योक्तेः । नूतनकूपादौ तु योगियाज्ञवल्क्यः—

'अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
भूमेर्नवोदकं*चैव दशरात्रेण शुध्यति ॥' इति ।

क्वचिददोषमाह व्याघ्रपादः—

'अभावे कूपवापीनामनपायिपयोभृताम् ।
रजोदुष्टेऽपि पयसि ग्रामभोगी न दुष्यति ॥'

गौडास्तु—'अन्येनापि समुद्धृते' इति द्वितीयपादे पाठः ।

---

*प्लक्षजाता=कुरुक्षेत्रस्था । *पावना इति । रजोदोषहीनत्वं नदत्वमित्याशयः । 'नद्यः कृष्णा [illegible] वेणिका' इति विवेचने चतुर्थपादः ।

*नवोदकं=नवखातितकूपादुदकम् । एतच्च प्रसङ्गादुपात्तम् ।

तेनोद्धृतेन न दोषः। तथा च 'तासु स्नानं नेति प्रागुक्तम्' इत्याहुः। वसिष्ठोऽपि—

'उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥' इत्यल विस्तरेण ॥

श्रावणशुक्लतृतीया मधुस्रवाख्या गुर्जरेषु प्रसिद्धा *सा परयुता ग्राह्येति दिवोदासः। श्रावणशुक्लचतुर्थी पूर्वयुता*। 'मातृविद्धो गणेश्वरः'इत्यादिवचनात्। श्रावणशुक्लपञ्चमी नागपूजादौ परैवेति सामान्यनिर्णये उक्तम्। चमत्कारचिन्तामणौ—

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥' इति।
'श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः॥'

इति मदनरत्नेऽभिधानाच्च। तेन परैवेति। अत्र विशेषो हेमाद्रौ भविष्ये—

'श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप।
द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः॥
पूजयेद्विधिवद्वीर दधिदूर्वाङ्कुरैः कुशैः।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ॥
ये तस्यां पूजयन्तीह नागान् भक्तिपुरःसराः।
न तेषां सर्पतो वीर भयं भवति कुत्रचित्॥' इति।

---

*सेति 'अस्या मधुस्रावणिका'इत्यग्रिमवचनात्। 'इत्यस्यां वर्जयित्वा'इत्युक्तेश्च। *पूर्वयुतेति। मध्याह्नव्यापिनीति नवद्धः।

श्रावणशुक्लद्वादश्यां(१) दधिव्रतं प्रागुक्तम्। तक्रादीनां त्वनिषेधः। तत्र दधिव्यवहाराभावादिति धर्मसिन्धुः(२)।

अत्रैव विष्णोः पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये—

'श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम्॥
द्वादश्यां श्रावणे मासि पञ्चम्यामथ वा द्विज।
आनुकूल्येषु कर्तव्यं पञ्चदश्यामथापि वा॥' इति।

शिवे [redacted] अत्रैव कालोत्तरे—

'आषाढान्ते चतुर्दश्यां नभस्यनभसोस्तथा।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः समम्॥' इति।

अन्यदेवतानां तु वक्ष्यते। अधिवासनं दीपिकायाम्—

'गोदोहान्तरिते काले पूर्वेद्युर्वाऽधिवासनम्।' इति।

गौणकालो रामार्चनचन्द्रिकायाम्—

'पवित्रारोपणं विप्राच्छ्रावणे न भवेद्यदि।
कार्तिकावधि*शुक्लास्ते कर्तव्यमिति नारदः॥
हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः।

---

*शुक्लास्ते=शुक्लांशेऽपि। 'शुक्लार्के' इति पाठे शुक्लद्वादश्या-

---

(१) चातुर्मास्ये श्रावणभाद्रपदविचारे 'द्वितीये मासि कर्तव्य' दधिव्रतम्—'इत्यादिनेत्यर्थः। अस्यामेव द्वादश्यां मासं शाकस्य त्यागसंकल्पस्य साङ्गतार्थं 'ब्राह्मणाय शाकदानं करिष्ये' इति संकल्प्य ब्राह्मणं संपूज्य—'उपायनमिदं देव व्रतसंपूर्तिहेतवे। शाकं [redacted] द्विजवर्याय सहिरण्यं ददाम्यहम्॥' इत्यादिमन्त्रेण पक्वमामं वा शाकं दद्यात्। ततो—'दधि भाद्रपदे मासि वर्जयिष्ये सदा हरे।' इत्येतद्व्रतं संकल्पयेत्। इति धर्मसिन्धुः।

(२) भाद्रपदमासनिर्णये शुक्लद्वादश्यां दुग्धव्रतविचारे 'एवं दधिव्रते न तक्रादीनां निषेधः' इत्यादिनेत्यर्थः।

कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः* ॥
कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्* ।
तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ॥
ससत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतम् ।
साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥
साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ।
उत्तमं तु*शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् ॥
कनिष्ठं तु पवित्रं स्यात्षट्त्रिंशद्ग्रन्थिशोभनम् ।
षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन ॥
चतुर्विंशद्द्वादशाष्टाविति के मुनयो विदुः ॥

हेमाद्रौ विष्णुरहस्ये त्वन्यथोक्तम्—
'अष्टोत्तरशतं कुर्याच्चतुःपञ्चाशदेव वा ।
सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसम् ॥
अधमं नाभिमात्रं स्यादूरुमात्रं द्वितीयकम् ।
मलम्बतो जानुमात्रं प्रतिमायां निगद्यते ॥'

शिवपवित्रं तु तत्रैव शैवागमे—
'एकाशीत्यथवा सूत्रैस्त्रिंशता वाष्टयुक्तया ।
पञ्चाशता वा कर्तव्यं तुल्यग्रन्थ्यन्तरालकम् ॥

मित्यर्थः । *कुशैरिति ।
कन्यया वा पवित्रं स्यात्र पुंवत्स्यादिभिः कृतम् ।
इति पाठः । *शोधयेदिति । पृथक्पृथक् पञ्चगव्योदकादिना ।
'पृथक्पृथक्पञ्चगव्यैरद्भिः प्रक्षालयेत्ततः ।
मूलेनाष्टोत्तरशतं गायत्र्या रामसञ्ज्ञया ॥
शङ्खोदकेनाभिमन्त्र्य पवित्राणि विनिर्मिमेत् ।'
इत्युक्तेः । *शतग्रन्थीति । ग्रन्थिप्रमाणं तत्रैव-
'अङ्गुष्ठपर्वमात्रं तु कुर्याद्ग्रन्थिमथोत्तमे ।

द्वादशाङ्गुलमात्राणि ह्येकादशाङ्गुलानि वा।
सिद्धविस्तारमात्राणि चतुरङ्गुलकानि च॥' इति।

हेमाद्रौ कालोत्तरे युगधर्मे—

'कृते मणिमयं कार्यं त्रेतायां हेमसम्भवम्।
पट्टजं द्वापरे प्रोक्तं कार्पासं तु कलौ स्मृतम्॥'

अधिकारिणोऽपि तत्रैव विष्णुरहस्ये—

'ब्राह्मणः क्षत्रियो वैश्यस्तथा स्त्री शूद्र एव च।
स्वधर्मावस्थिताः सर्वे भक्त्या कुर्युः पवित्रकम्॥'

तथा—

'अतो देवेति मन्त्रेण द्विजो विष्णोर्निवेदयेत्।
शूद्रस्य मूलमन्त्रो वा येन वा पूजयेद्धरिम्॥'

एतच्च नित्यम्।

'न करोति विधानेन पवित्रारोपणं तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं हरेः॥'

इति तत्रैवोक्तेः। देवताविशेषे तिथयोऽपि तत्रैव—

'धनदश्च रमा गौरी गणेशः सोमराड् गुरुः।
भास्करश्चण्डिकाम्बा च वासुकिश्च तथर्षयः॥
चक्रपाणिरनङ्गश्च शिवो ब्रह्मा तथैव च।
प्रतिपत्प्रभृतिष्वेताः पूज्यास्तिथिषु देवताः॥
सर्वेषां शुक्लपक्षे तु तिथयः श्रावणस्य च॥' इति।

तथा हेमाद्रौ कालोत्तरे—

चतुर्दश्यामथाष्टम्यां सर्वेषामथवा तु तत्। इति।

तत्प्रकारस्तु रामार्चनचन्द्रिकायां यथा—

'*ततस्तानि पवित्राणि वैणवे पटले शुभे।
संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत् ॥
अरत्निसंमितां वेणीं कुर्यात्षट्त्रिंशता कुशैः।
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ॥
मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकम्।
न मे विघ्नो भवेद्देव कुरु नाथ दयां मयि।
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥
उपवासेन देव त्वां तोषयामि जगत्पते।
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ॥
अद्यप्रभृति देवेश यावद्वर्षान्तिकं दिनम्।
तावद्रक्षा त्वया कार्या सर्वस्वास्य नमोऽस्तु ते ॥'
इति देवं संप्रार्थ्य कुम्भं संस्थाप्य तत्र यथापात्रे-
'ॐ सांवत्सरस्य यागस्य पवित्रीकरणाय भो!
विष्णुलोकात्पवित्राद्य आगच्छेह नमोऽस्तु ते ॥'
अनेन मूलेन यथायोग्यमुत्तममध्यमकनिष्ठेषु विष्णुब्रह्मरुद्रान्, सत्त्वरजस्तमांसि, *देवत्रयं, वनमालायां

सदर्धेन सदर्धेन मध्यमे च कनिष्ठिके ॥' इति।

*तत इति। पवित्रेषु कुङ्कुमगोरोचनादिनाऽऽनग्नुलम-न्थया-ऽधमानां तेषां क्रमेण द्वादशाक्षरमन्त्रेण त्रिर्द्विःसकृदभिमन्त्र्य धौतं, तत इत्यर्थः। *देवत्रयं=ब्रह्म-विष्णु-रुद्रान्। वनमालालक्षणं तन्त्रे-

'आपादं मुकुटं यावद्ग्रथितैर्विरचिता शुभा।
आपादस्पर्शिनी माला वनमाला प्रकीर्तिता ॥' इति(१)।

---

(१) अन्यत्र—तुलसीकुन्दमन्दारपारिजाताम्बुजैस्तु या। पञ्चभिर्ग्रथिता माला वनमाला प्रकीर्तिता ॥' इति।

प्रकृतिं च धात्रीं त्रिगुण्यां ब्रह्मविष्णुरुद्रान् ग्रन्थिषु-क्रिया, पौरुषी, वीरा, विजया, ईशा, अपराजिता, मनोन्मनी, जया, भद्रा, मुक्तिश्चेत्याद्याश्च सम्पूज्य ।

'ॐ संवत्सरकृतार्चायाः संपूर्णफलदोऽपि यत् ।
पवित्रारोपणायैतत्कुरु कल्पय ते नमः ॥
विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥'

इति देवकरे मङ्गलसूत्रं बद्ध्वा देवं संपूज्य निमन्त्रयेत्-

'आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि संनिधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ॥',

ततः पुष्पाञ्जलिं दत्त्वा रात्रौ जागरणं कुर्यादिति अधिवासनम् । प्रातर्नित्यपूजां कृत्वा गन्धदूर्वाक्षतयुतं पवित्रमादाय—

'ॐ देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव त्वत्प्रसादान्महेश्वर ॥'

मूलसंपुटितेनानेन दत्त्वाऽङ्गदेवताभ्यो नाम्ना समर्प्य महानैवेद्यं दत्त्वा नीराज्य—'मणिविद्रुममालाभिः' इत्यादिभिर्दमनारोपणोक्तमन्त्रैः प्रार्थयित्वा गुरवे ब्राह्मणेभ्यश्च दत्त्वा स्वयं धारयेत् । तथा—

'मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।

देवे तं सूत्रसंदर्भं देशकालविवक्षया॥'
प्रकरणे तु तत्रैव—

'पवित्रारोपणं काले न करोति कथंचन।
तदाऽयुतं जपेन्मन्त्रं स्तोत्रं वाऽपि समाहितः॥'
इत्युक्तम्॥

इति पवित्रारोपः।

श्रावणशुक्लचतुर्दशी पूर्वयुता ग्राह्या। अत्र चक्रवर्त्यां विशेषश्चैत्रचतुर्दश्यामुक्तः। अथोपाकर्म*। तत्र बह्वृचानां प्रयोगपारिजाते शौनकः—

'अथातः श्रावणे मासे श्रवणर्क्षयुते दिने।
श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते॥
दिवसे विदधीतैतदुपाकर्म यथोदितम्।
अध्यायोपाकृतिं कुर्यात्तत्रौपासनवह्निना॥'

इति। अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः*। अत्र हस्तयुक्ता पञ्चम्युक्ता। कारिकाऽपि—
'तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते।'इति।

---

*उपाकर्मेति कर्मनामधेयम्। अध्यायोपाकरणमित्यादौ तु अधीयते यः सोऽध्यायो=वेदः, तस्योपाकरणम्=उपक्रम इत्यर्थः।

*हेमाद्रिरित्यस्यायं भावः। श्रावण्यामित्यस्य यजुर्वेदिपरत्वे शौनकोक्तौ तद्वैयर्थ्यं स्यात्। तस्माद्बह्वृचानां पौर्णमासीं विधत्ते इत्येव वाच्यम्। पर्वद्वये च श्रवणं निर्णायकम्। 'पर्वण्यौदयिके' इत्युपक्रम्य 'बह्वृचाः श्रावणे कुर्युः' इत्युक्तेः। तदलाभे शुक्लपञ्चम्याम्। तस्याश्च श्रवणयुक्ते दिने तद्युक्तायां पूर्णिमायामित्यनयोः पक्षयोराचाराद्व्यवस्थेति मन्यन्ते। तन्मासे इति वृत्तिपूर्वार्द्धम्। एतन्मते ये यजुषामपि यद्युक्ते हस्तपञ्चम्यायुक्ते, तेषामपि हस्तयुक्ता-

*केवलपञ्चम्यां *हस्तयुतेऽन्योस्मिन् दिने इति तु हेमाद्रिः। उपासनवह्निनेति तु—

'कर्मैतदपि केचिद्धि लौकिकाग्नौ प्रकुर्वते।'

इति कारिकोक्तलौकिकाग्निना विकल्पते। तत्र 'अध्येष्यमाणैरन्वारब्धः' इति सूत्रात् सशिष्यस्य कर्तृत्वे तदधिकारिकस्याचार्यस्याग्नौ नान्यस्याग्नावन्यो जुहुयादिति निषेधाल्लौकिक एव। तदभावे तु स्मार्ते* इति निर्णयः। यद्यपि दीपिकायाम्—

---

*अन्यैव बोध्या। अनुक्तपक्षग्रहीतृकैस्तु मांघुपदी प्रायेत्यग्रे। *केवलपञ्चम्यामिति।

स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु।

इत्यग्रिमवचनात्। *हस्तयुते इति। 'मांघुपदी हस्तेनोपाकर्म' इति गोभिलीये केवलहस्तस्याप्युपादानात्तद्विशिष्टपञ्चमीलक्षणाया मानाभावात्।

'अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु॥'

इति याज्ञवल्क्येन श्रावणीविकल्पितश्रवणयोरिव कथंचिदपि हस्तपञ्चम्योरुक्तेश्च। *अध्येष्यैरिति। चतुःपञ्चादिभेदेन भिन्नकल्पानामपि तेषामधिकारः। 'अध्यजामदग्न्यौ जामदग्न्यमामन्त्र्य कुर्यात्' इति सत्याषाढोक्तेः। 'दानृपुरोहितौ सायुज्यकामौ यजेयाताम्' इति विहितकुलाययागवत्। तत्र तुल्यकल्पानामेवाधिकार इत्यस्य अपवादाधिकरणे वसिष्ठशुनकात्रिवध्र्यश्वराजन्यानां नाराशंसो द्वितीयः प्रयाजः। तनूनपादन्येषां नाराशंसद्वितीयप्रयाजवद्राजः तनूनपाद्द्वितीयप्रयाजवत्पुरोहितस्य चोभयोरधिकार इति शाबरस्वामिनोक्तेः। *स्मार्ते

देवे तं सूत्रसंदर्भं देशकालविवक्षया ॥'

अकरणे तु तत्रैव—

'पवित्रारोपणं काले न करोति कथंचन ।
तदाऽयुतं जपेन्मन्त्रं स्तोत्रं वाऽपि समाहितः ॥'
इत्युक्तम् ॥

इति पवित्रारोपः ।

श्रावणशुक्लचतुर्दशी पूर्वयुता ग्राह्या । अत्र बह्वृचानां विशेषश्चतुर्दश्यामुक्तः । अथोपाकर्म* । तत्र बह्वृचानां प्रयोगपारिजाते शौनकः—

'अथातः श्रावणे मासे श्रवणर्क्षयुते दिने ।
श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते ॥
दिवसे विदधीतैतदुपाकर्म यथोदितम् ।
अध्यायोपाकृतिं कुर्यात्तत्रौपासनवह्निना ॥'

इति । अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः* । अत्र हस्तयुक्ता पञ्चम्युक्ता । कारिकाऽपि—

'तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ।' इति ।

---

*उपाकर्मेति कर्मनामधेयम् । अध्यायोपाकरणमित्यादेस्तु अधीयते यः सोऽध्यायो=वेदः, तस्योपाकरणम्=उपक्रम इत्यर्थः ।

*हेमाद्रिरित्यरुचेः । श्रावण्यामित्यस्य यजुर्वेदिपरत्वे शौनकोक्तौ तद्वैयर्थ्यं स्यात् । तस्माद्बह्वृचानां पौर्णमासीं विधत्ते इत्येव वाच्यम् । पर्वद्वैधे च श्रवणं निर्णायकम् । 'पर्वण्यौदयिके' इत्युपक्रम्य 'बह्वृचाः श्रावणे कुर्युः' इत्युक्तेः । तदलाभे शुक्लपञ्चम्याम् । तस्माच्छ्रवणयुक्ते दिने तद्युक्तायां पूर्णिमायामित्यनयोः पक्षयोराचाराद्व्यवस्थेति प्रतियन्ति । तन्मासे इति वृत्तिकृन्मतम् । एतन्मते ये यजुषामपि परसूत्रे हस्तपञ्चम्यामुक्ते, तेषामपि हस्तयुक्तप-

कर्मकालव्याप्तौ हस्तयुक्तेऽपराह्णे दिने इति तु हेमाद्रिः । उपाकरणविधौ तु—

'कार्यमिदं केचिद्वीविकल्पी प्रवर्तते ।'

इति कारिकोक्तगौणिककालेन विकल्पने । तत्र 'अल्पश्चेत्पूर्वोऽनल्पः परः' इति न्यायात् स्वशाखोक्तस्य कार्यत्वे तद्विधाविरुद्धान्यपक्षग्रहणस्य मान्यत्वाभावस्तो गुणवा- द्विनिर्णयस्याह्लौकिके एव । तदभावे तु स्मार्त इति निर्णयः । यदपि दीपिकायां—

त्रयेव बोध्यं । अनुकल्पपर्वणि तु औदुम्बरी प्रारभ्यते । एके- पल्लवमन्यत्रामिति ।

स्यादुपाकरणं छन्दसां श्रावण्यां तु ।

इत्यादिवचनात् । हस्तयुक्ते इति । 'औदुम्बरी हस्तेनोपाकर्म' इति गोभिलीये केवलहस्तस्याप्युपादानात् तिथिदृष्टपक्षमीलक्षणायां मानाभावात् ।

'अलाभे तानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनैवाधिभावे वा पञ्चम्यां श्रावणस्य तु ॥'

इति पारस्करेण श्रावणीविकल्पितश्रवणयोरिव पञ्च- म्यानेन हस्तपक्षस्योत्कर्षः । अल्पात्येतिरिति [illegible] यजुःसामा- वादिभेदेन भिन्नकल्पानामपि तेषामधिकारः । '[illegible]मामादन्त्यौ सामदन्यमामन्त्र्य कुर्यात्' इति सत्यापादोक्तेः [illegible] । 'दाक्षपु- रोहितौ सायुज्यकामौ यजेयाताम्' इति विधिवत्तुल्य[illegible]त्र । तत्र तुल्यकल्पानामेवाधिकार इत्यस्य अपवादाधिक[illegible] शुक्ल[illegible] त्रिवर्षपरराजन्यानां नाराशंसो द्वितीयः प्रय[illegible]कार्य[illegible]न्ये- षां नाराशंसाद्वितीयप्रयाजवत्त्वात् तनूनपाद्द्वि[illegible]तीयम् [illegible]रोहित- [illegible] योर्भयोरधिकार इति सायणस्वामि[illegible] [illegible] स्मार्ते

मुख्या* । *परेद्युः *सङ्गवाभावे *पूर्वेद्युरुदयाभावे चै-कैकसत्त्वे पूर्वेद्युश्चतुर्दशीवेधनिषेधात् *सामान्यवाक्यादौदयिकी कर्मपर्याप्ता ग्राह्या, न पूर्वा । *सङ्गवनिमित्त-पूर्वविद्धापवादाभावात् । 'नान्यदौदयिकी' इत्यस्य पूर्व-विद्धापरत्वाभावात् । तेन भाद्रादौ कालान्तरं स्यात्र

कर्मकालः । तादृशी साम(१) तेन=सङ्गवस्पर्शश्रवणेन । *मुख्येति । यथा न विहतं सङ्गवात्परतः षण्मुहूर्तकैरित्येतल्लभ्यम् । एतन्मते 'विष्णवृक्षे घटिकाद्वयं' 'सङ्गवस्पृक्' इति चानुवादः । अपराह्णोपाकर्मणो वचनात्तत्कालव्यापिनमपि पूर्वहस्तं बाधित्वोत्तरदिन एव तदनुष्ठानम् ।) अत्र 'परेद्युः सङ्गवाभावे पूर्वेद्युरुभयाभावे चैकैकसत्त्वे पूर्वेद्युश्चतुर्दशीवेधनिषेधात्सामान्यवाक्यादौदयिकी कर्मपर्याप्ता ग्राह्या, न पूर्वा । सङ्गवनिमित्तपूर्वविद्धापवादाभावात् । नान्यदौदयिकीत्यस्य पूर्वविद्धापरत्वाभावात् । तेन भाद्रादौ कालान्तरे स्यान्न तु निषिद्धे । न हि मौख्यलाभे निषिद्धमात्रग्रहणं युक्तम् । अत एव परेद्युः सङ्गवव्याप्तौ पूर्वविद्धानिषेधः, तदभावे तु नेति मूलेऽप्यग्रेऽध्य-युक्ता । विधिवैषम्यात्, मासनिषेधेऽपि तथाऽऽपत्तेश्च । पूर्वविद्धाव-चनसत्त्वे हि सा युज्यते । एवं श्रवणेऽपि ज्ञेयम् । तत्र, 'विष्णवृक्षे घटिकाद्वयम्' इति पूर्वोक्तविरोधात् । तेन सावकाशमात्रपरमिदम्' इति क्वचित्पाठः । सुदर्शनभाष्यमतं मपञ्चयति-*परेद्युरिति । *सङ्गवाभावे=सङ्गवास्पर्शे । *पूर्वेद्युरुभयाभावे=उदयसङ्गवोभ-याभावे चैकैकसत्त्वे इति यावत् । एतेन पूर्वेद्युरुदयसङ्गवोभयसत्त्वे पूर्वेति व्यञ्जितम् । तत्रापि न पूर्वा, प्रतिपद्योगाभावादिति मतान्तरं माधुक्तम् । *सामान्यवाक्यादिति । सुदर्शनभाष्यकृता सङ्गववाक्यस्यानुवादकत्वात् ।(२)(*सङ्गवेति । सङ्गवस्पर्शादिवि-

(१) इदमग्रंथस्थं प्रतिभाति । तत् सुधीभिर्विभाव्यम् ।
(२) 'कसारम्भणेन:' पाठोऽयं क्वचित्पुस्तके दृश्यते ।

तु निषिद्धे । न हि व्रीहिलाभे निषिद्धमाषग्रहणं युक्तम् । अत एव परेद्युः सङ्गवव्याप्तौ पूर्वविद्धानिषेधः । तदभावे तु नेति मूलेऽन्वयव्यतिरेकाभ्यामुक्तम्, विधिवैयर्थ्यात् । माषनिषेधेऽपि तथात्वं च । *पूर्वविद्धावचनसत्त्वे हि सा युज्यते । एवं श्रवणेऽपि ज्ञेयम् । तन्न । 'विष्णुनक्षत्रे घटिकाद्वयम्' इति पूर्वोक्तविरोधात् । तेन प्राशस्त्यमात्रपरमिदम् । तत्त्वं तु एतच्छुद्धाधिकपरम् । तेन यथाग्निहोत्रादौ सायंप्रातःकालबाधे सामान्ये जीवनावच्छिन्नकाले *दर्शादौ वाऽनुष्ठानम्, यथा वा व्रीह्यवयवाद्यभावे यागाक्षिप्तनिषिद्धवर्जद्रव्येण, तथाऽत्र सङ्गवाभावे निषिद्धवर्जकर्मपर्याप्तौदयिके कालान्तरे वाऽनुष्ठानं न तु कदापि निषिद्धे । अपवादाभावे

(वित्तक्षो यस्तदपवादः पूर्वविद्धाप्राप्यत्ववादः, तस्याभावादित्यर्थः ।) विधिवैयर्थ्यं विवृणोति—*पूर्वविद्धावचनेति । इदं तु चिन्त्यम् ।

'अतो भूतादिने तस्मिन्नोपाकरणमिष्यते ।'

इति न निषेधः । हेतुपूर्वमेव 'नेष्यते' इत्यभिधानात् ।

तस्मात्सङ्गवव्याप्तौ परा, अन्यथा पूर्वेति मतं सम्यक् । अत्र "तत्त्वं त्वेतच्छुद्धाधिकपरम् । तेन यथाऽग्निहोत्रादौ सायंप्रातःकालबाधे सामान्ये जीवनावच्छिन्नकाले दर्शादौ वाऽनुष्ठानम्, यथा वा व्रीह्यवयवाद्यभावे यागाक्षिप्तनिषिद्धवर्जद्रव्येण, तथाऽत्र सङ्गवाभावे निषिद्धवर्जकर्मपर्याप्तौदयिके कालान्तरे वाऽनुष्ठानं, न तु कदापि निषिद्धे । अपवादाभावे उत्सर्गस्यैव प्राप्तेः" इति क्वचित् पाठः । 'पूर्वकर्मपर्याप्तं चेत् परमेव' इति सुदर्शनभाष्यम् । एतन्मते सङ्गवो न नियामक इत्याशयः । अत्रापि 'अतो भूतादिने' इत्यस्य न निषेधत्वमिति स्मर्तव्यम् । 'तैत्तिरीया' इति पदोपादानफलं स्पष्टयति—*दर्शादाविति । यदि सामान्यकालेऽपि प्रतिबन्ध-

मुख्या* । *परेद्युः *सङ्गवाभावे *पूर्वेद्युरुदयाभावे चै
कैकसत्त्वे पूर्वेद्युश्चतुर्दशीवेधनिषेधात्*सामान्यवाक्या
दपिकी कर्मपर्याप्ता प्राप्ता, न पूर्वा । *सङ्गवनिमित्त
पूर्वविद्धापवादाभावात् । 'नान्यदौदयिकी' इत्यस्य पूर्व
विद्धापरत्वाभावात् । तेन श्राद्धादौ कालान्तरं स्या

कर्मकालः । तादृशी साध(१) तेन=सङ्गवस्पर्शाभावेन । *मुख्येति । यथा न विशते सङ्गवान्तरतः षण्मुहूर्तव्यापिनीत्युभयम् । [illegible] 'त्रिमार्गी घटिकाद्वयं' 'सङ्गवस्पृक्' इति वानुवादः । अपराह्णव्यापित्व[illegible] वचनात्तत्कालव्यापिनमपि पूर्वदिनं व्याप्तिरित्याह [illegible] ष्ठानम् ।) अत्र 'परेद्युः सङ्गवाभावे पूर्वेद्युरुदयाभावे चैकैकसत्त्वे पूर्वेद्युश्चतुर्दशीवेधनिषेधात्सामान्यवाक्यादौदयिकी कर्मपर्याप्ता प्राप्ता', न पूर्वा । सङ्गवनिमित्तपूर्वविद्धापवादाभावात् । नान्यदौदयिकीत्यस्य पूर्वविद्धापरत्वाभावात् । तेन श्राद्धादौ कालान्तरं स्यात् तु निषिद्धं न हि [illegible] निषिद्धमाचरणं युक्तम् । अत एव परेद्युः सङ्गवाभावे पूर्वविद्धानिषेधः, तदभावे तु नेति [illegible] युक्ता । [illegible], मतनिषेधेऽपि तथाऽऽपत्तेः । पूर्वा [illegible] [illegible] हि सा युज्यते । [illegible] ज्ञेयम् । तथा, 'त्रिमार्गी घटिकाद्वयम्' इति पूर्वोक्तविरोधात् । तेन [illegible] [illegible] । मुहूर्तान्तरव्यापिनं [illegible]-*परेद्युरिति । *सङ्गवाभावे=सङ्गवास्पर्शे । *पूर्वेद्युरुदयाभावे=उदयकाले [illegible] इति यावत् । [illegible] पूर्वेद्युरुदयाभाव[illegible] [illegible] । तथापि न पूर्वा, [illegible] [illegible] । *सामान्यवाक्यादिति । मुहूर्तान्तर[illegible] [illegible] (२) । *सङ्गवेति । [illegible]

(१) [illegible]
(२) [illegible]

पाकर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टे वा औदयिकपर्व-
विधौ वाक्यभेदापत्तेः । तस्मात्तैत्तिरीयकपदाविव-
क्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तम् । तन्न । न
तावत्परिशिष्टे बह्वृचानामयं विधिः ।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।'

इत्यादितदनुशासने एव परिशिष्टे वेदान्तरधर्मविधीनां
दर्शनात् । नाप्यनुवादोऽयं कालिकापुराणादिवद्बह्वृचादी-
नामपि तदापत्तेः । कुर्युरित्यस्य विधित्वेन तदर्थवादा-
दर्शनेन तथात्वानुवादित्वाच्च । न च तैत्तिरीयकाणां गृह्ये
तद्विधिरस्ति, येनानुवादः स्यात् । न च वाक्यभेदः ।
तैत्तिरीयकमात्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन
#हविरादिवत्, 'अष्टवर्षं ब्राह्मणमुपनयीत' इतिवद्ब्राह्म-
णवा विशिष्टस्योद्देश्यत्वात् । #अन्यथा तत्तरार्थे बह्वृचपद-
स्याप्यविवक्षापत्त्या श्रवणस्य सर्वसाधारण्यापत्तेः ।
#तस्मात् हेमाद्रिमतमेव युक्तमिति दिक् । इदं च नि-
त्यानध्यायवत आवसथ्येऽग्नौ, अनध्यायपतो नाधिकार
इति कर्कः । श्रावण्यामपि ग्रहणादिदुष्टायां कालीयमिष्टैः

तल्लाभे पुनस्तदुपादानमिति शेषः । #हविरिति । हविरादित्यादे-
रुद्देश्यत्वरूपानन्तःप्रवेश उद्देश्यत्वस्यायोगात् । 'तैत्तिरीयकमात्रस्य'
इत्यत्राष्टवर्षमिति दृष्टान्तः । ब्राह्मणमात्रस्योद्देश्यत्वायोगात् । 'कर्म-
मात्रस्य' इत्यत्र हविरिति दृष्टान्तः । आर्तिमात्रस्योद्देश्यत्वायोगात् ।

नन्वेवं वाक्यभेदपरिहारेऽपि तुल्यकक्षाणामेव समभिव्याहा-
राद्यानुषसामान्यं लभ्यते । न हि क्षत्रियैरिदं कर्म कर्तव्यं वैश्यै-
रिदं कठैरिदमिति भवति, भवति तु ब्राह्मणैरिदमितीत्यत आह—
#अन्यथेति । समभिव्याहारस्य तैत्तिरीयकपदार्थत्वेन तस्यैवा-
विवक्षायां बह्वृचपदस्याप्यविवक्षापत्तिरिति भावः । #तस्मादि-

*प्रौष्ठपद्यां कार्यम्। तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः॥(१)(इदं च सूत्रोक्तकालपरत्वाद्बह्वृचपरमपि। माध्यन्दिनैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्।) यत्तु बौधायनः–'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्यूचे, तत् प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं, *तच्छाखीयविषयं वा।

सामगास्तु श्रावणे हस्ते कुर्युः।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः।'

इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः।

ति। 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः। दिगर्थस्तु कालिकापुराणमपि तैत्तिरीयकपरमेवेति। विवेचने तु हेमाद्रिमतं त्यक्तम्। *प्रौष्ठपद्यामिति। 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः। परं तु येषां गृह्ये श्रावणसम्भवे श्रावणहस्तपञ्चम्यावुक्ते तैस्तत्र कार्यम्। तयोरप्यसम्भवे भाद्रपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम्, येषां गृह्ये तेनोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति।

अत्राहुः–अत्र वाजसनेयिभिरेवेति नार्थः। बह्वृचानां पञ्चम्यनापत्तेः। किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता तेषां पर्वदोषे पञ्चमी, अन्येषां तु प्रौष्ठपदीति। एवं च मैत्रायणीयानां पौर्णमास्येव न। तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम्। *तच्छाखीयेति। बौधायनैर्वार्षिकसमाख्यां बाधित्वाऽऽषाढी ग्राह्येत्यर्थः। एवं च—

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रर्क्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'

इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—

'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णेऽविपरे यदि ।
छन्दोगा विहिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।

अविपरे=ग्रहादिदोषहीने । विपरीतादिति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे पूर्वाह्णे उत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम षण्मासेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्–'षण्मासानधीयीत' इति । एवं च यथासूत्रमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिनिषिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं मतम् ॥'

इति कल्पत्रयमपि बौधायनपरमेवेति भावः । *अविपरे=ग्रस्तास्तादिदोषहीने । विपरीतादिति पाठोऽज्ञानकृतः । *शुक्लपक्षे इति । सिंहे रवाविति वर्तते । *हस्तेनेति । 'प्रौष्ठपदीं हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्था हस्तयुक्ता कापि न तिथिं मान्येति सम एवार्थः । *पुष्यर्क्षे इति । एतेन हस्ता-

(१) कोष्ठान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

*प्रौष्ठपद्यां कार्यम्। तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः।(१)(इदं च सूत्रोक्तकालपरत्वाद्बह्वृचपरमपि। मध्यंदिनानां तु कात्यायनैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्।) यत्तु बौधायनः-'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्यूचे, तत् प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं, *तच्छाखीयविषयं वा।

सामगास्तु श्रावणे हस्ते कुर्युः।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः।'

इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः।

ति। 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः। दिगर्थस्तु कालिकापुराणमपि तैत्तिरीयपरमेवेति। विवेचने तु हेमाद्रिमतं त्यक्तम्। *प्रौष्ठपद्यामिति। 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः। परं तु येषां सूत्रे श्रावणसम्भवे श्रावणहस्तपञ्चम्याद्युक्ते तैस्तत्र कार्यम्। तयोरसम्भवे भाद्रपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम्, येषां सूत्रे नोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति।

अत्राहुः-अत्र वाजसनेयिभिरेवेति नार्थः। बह्वृचानां व्यापनापत्तेः। किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता ते पर्वदोषे पञ्चमीं, अन्येषां तु प्रौष्ठपदीमिति। एवं च मैत्रायणीयानां पौर्णमास्येव न। तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम्। *तच्छाखीयेति। बौधायनैर्वार्षिकसमाख्या वार्षिक्याऽऽषाढी ग्राह्येत्यर्थः। एवं च—

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'

इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—

'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे*ऽविवरे बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
*शुक्लपक्षे तु *हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।

अविवरे=ग्रहादिदोषहीने । विवरे इति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे*पूर्वाह्णे उत्सर्गः । आपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम पक्षद्वयेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्—'षण्मासानधीयीत' इति । एवं च यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च षड् वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं मतम् ॥'

इति कमवाक्यमपि बौधायनपरमेवेति भावः । *अविवरे=ग्रहसङ्क्रान्त्यादिदोषहीने । विवरे इति पाठोऽज्ञानकृतः । *शुक्लपक्षे त्विति । सिंहे रवाविति वर्तते । *हस्तेनेति । 'प्रौष्ठपदी हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्था हस्तयुक्ता का च न तिथिं प्राप्येति तत्र एवार्थः । *पुष्यर्क्षे इति । एतेन हस्ता-

---

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

*प्रौष्ठपद्यां कार्यम्। तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः।(१)(इदं च सूत्रोक्तकालपरत्वाद्बह्वृचपरमपि। माध्यन्दिनीयैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्।) यत्तु बौधायनः—'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्यूचे, तत् प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं, *तच्छाखीयविषयं वा।

सामगास्तु श्रावणे हस्ते कुर्युः।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः।'

इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः।

ति। 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः। दिगर्थस्तु कालिकापुराणमपि तैत्तिरीयकपरमेवेति। विवेचने तु हेमाद्रिमतं स्पष्टम्। *प्रौष्ठपद्यामिति। 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः। परं तु येषां सूत्रे श्रावण्यसम्भवे श्रावणहस्तपञ्चम्यावुक्ते तैस्तत्र कार्यम्। तयोरप्यसम्भवे भाद्रपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम्, येषां सूत्रे तन्नोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति।

अत्राहुः—अत्र वाजसनेयिभिरेवेति नार्थः। बह्वृचानां पञ्चम्यनापत्तेः। किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता तेषां पर्वदोषे पञ्चमी, अन्येषां तु प्रौष्ठपदीति। एवं च मैत्रायणीयानां पौर्णमास्येव न। तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम्। *तच्छाखीयेति। बौधायनैर्वार्षिकसमाख्यां बाधित्वाऽऽषाढी ग्राह्येत्यर्थः। एवं च—

---

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रमाक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'

इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—

'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे*ऽविघरे यदि ।
छन्दोगा विहिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
*शुक्लपक्षे तु *हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।

अविघरे=ग्रहादिदोषहीने । विघरेदिति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे*पूर्वाह्णे उत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम पक्षद्वयेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्—'षण्मासानधीयीत' इति । एवं च यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च षड् वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं मतम् ॥'

इति क्रमवाक्यमपि बौधायनपरमेवेति भावः । *अविघरे=सङ्क्रान्त्यादिदोषहीने । विघरेदिति पाठोऽज्ञानकृतः । *शुक्लपक्षे तिथाविति । सिंहे रवाविति वर्तते । *हस्तेनेति । 'प्रौष्ठपदी हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्थां हस्तयुक्तां काञ्चन तिथिं प्राप्येति सम एवार्थः । *पुष्यर्क्षे इति । एतेन हस्ता-

---

(१) कोष्ठान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

*प्रौष्ठपद्यां कार्यम्। तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः(१)(इदं च सूत्रोक्तकालपरत्वाद्बह्वृचपरमपि। हिरण्यकेशिहिरण्यायनैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्।) यत्तु बौधायनः-'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्यूचे, तत् प्रौष्ठपद्यामपि दोषे आपाद्य कार्यमित्येवमर्थं, *तच्छाखीयविषयं वा।

सामगास्तु श्रावणे हस्ते कुर्युः।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः।'

इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः।

ति। 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः। दिग्यर्थस्तु कालिकापुराणमपि तैत्तिरीयपरमेवेति। विवेचने तु हेमाद्रिमतं त्यक्तम्। *प्रौष्ठपद्यामिति। 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः। परं तु येषां सूत्रे भाद्रपदासम्भवे श्रावणहस्तपञ्चम्यावुक्ते तैस्तत्र कार्यम्। तयोरसम्भवे भाद्रपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम्, येषां सूत्रे नोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति।

अत्राहुः-अत्र वाजसनेयिभिरेवेति नार्थः। बह्वृचानां बह्वृचापत्तेः। किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता तेषां पर्वदोषे पञ्चमी, अन्येषां तु प्रौष्ठपदीति। एवं च मैत्रायणीयानां पौर्णमास्येव न। तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम्। *तच्छाखीयेति। बौधायनैर्वार्षिकमासाणां शाखित्वाऽऽषाढी ग्राह्येत्यर्थः। एवं च—

---

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

'अनिष्टाग्निष्टयुक्तं स्याद्धस्तसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'

इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—

'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णेऽविपरे बहिः ।
छन्दोगा मिलिताः कुर्युस्त्सर्गं स्वस्वछन्दसाम् ॥
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।

अविपरे=ग्रहादिदोषहीने । विपरेदिति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे पूर्वाह्णे उत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम पक्षद्वयेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्–'षण्मासानधीयीत' इति । एवं च यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च षट् वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं मतम् ॥'

इति क्रमप्राप्त्यमपि बौधायनपरमेवेति भावः । अविपरे=सङ्क्रान्त्यादिदोषहीने । विपरेदिति पाठोऽज्ञानकृतः । शुक्लपक्षे इत्यपि । सिंहे रवाविति वर्तते । हस्तेनेति । 'प्रौष्ठपदीं हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्थां हस्तयुक्तां काञ्च न तिथिं प्राप्येति सम एवार्थः । पुष्यर्क्षे इति । एतेन हस्ता-

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

*प्रौष्ठपद्यां कार्यम्। तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः।(१)(इदं च सूत्रोक्तकालपरत्वाद्बह्वृचपरमपि। आश्वलायनैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्।) यत्तु बौधायनः—'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्यूचे, तत् प्रौष्ठपद्यामपि दोषे ... कार्यमित्येवमर्थं, *तच्छाखीयविषयं वा।

सामगास्तु श्रावणे हस्ते कुर्युः।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः।'

इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः।

ति। 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः। द्विगर्थस्तु कालिकापुराणमपि तैत्तिरीयकपरमेवेति। विवेचने तु हेमाद्रिमतं त्यक्तम्। *प्रौष्ठपद्यामिति। 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः। एवं तु येषां गृह्ये श्रावण्यसम्भवे श्रावणहस्तपञ्चम्यादुक्ते तैस्तत्र कार्यम्। तयोरप्यसम्भवे भाद्रपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम्, येषां गृह्ये तु नोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति।

अत्राहुः—अत्र वाजसनेयिभिरेवेति नार्थः। बह्वृचानां पञ्चम्यनापत्तेः। किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता तेषां पर्वदोषे पञ्चमी, अन्येषां तु प्रौष्ठपदीति। एवं च मैत्रायणीयानां पौर्णमास्येव न। तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम्। *तच्छाखीयेति। बौधायनैर्वार्षिकसमाख्यां बाधित्वाऽऽपाढी ग्राह्येत्यर्थः। एवं च—

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रर्क्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'

इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—

'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे*ऽविपरे यदि ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
*शुक्लपक्षे तु *हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।

अविपरे=ग्रहादिदोषहीने । विपरीतादिति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे*पूर्वाह्णे उत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम पक्षद्वयेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्–'षण्मासानधीयीत' इति । एवं च यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च षड् वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यदाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं स्मृतम् ॥'

इति क्रमवाक्यमपि बौधायनपरमेवेति भावः । *अविपरे=सङ्क्रान्त्यादिदोषहीने । विपरेदिति पाठोऽज्ञानकृतः । *शुक्लपक्षे तिथाविति । सिंहे रवाविति वर्तते । *हस्तेनेति । 'प्रौष्ठपदीं हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्थां हस्तयुक्तां काञ्च न तिथिं प्राप्येति स एवार्थः । *पुष्यर्क्षे इति । एतेन हस्ता-

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ॥' इ

अन्यस्तु *विशेषः पूर्वमर्थाक्तः ।

गोभिलः—

'*उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ।

*धारणाध्ययनाङ्गत्वाद् गृहिणां ब्रह्मचारिणाम् ॥

उत्सर्जनं च वेदानामुपाकरणकर्म च ।

रपूर्वैः पुण्यो लभ्यते ।

*विशेषः=नलमासे सामगानां प्रथमोपाकर्मनिषेध इत्यादि

'उपाकृत्याधीयीत' इति सूत्रादुपाकरणं ग्रहणाध्ययनाङ्गम् । त

धिकारिणश्च ब्रह्मचारिणः अनधाप्रस्नातका गृहिणोऽपि । 'वे

समावृत्तो ब्रह्मचारिकल्पेन' इत्यापस्तम्बवचनेन

'वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।'

इति व्रतमात्रानुष्ठानेन स्नानं वदता योगीश्वरेण च ग्र

णाध्ययनध्वननात् । अतो धारणाध्ययनार्थत्वमप्याह-*उ

पाकर्मेति । ग्रहणधारणब्रह्मयज्ञपारायणादिकरणहेतुकर्मविशेषः=

उपाकर्म । तत्त्यागहेतुकर्मविशेषः=उत्सर्जनम् । हेत्वन्तं च परिवा

यकम् । तत्रोपाकर्मानन्तरं यावदुत्सर्जनं स्मृतिसिद्धानध्यायानि

ना पक्षद्वये वेदोऽध्येतव्यः, अनध्यायेष्वङ्गानि । उत्सर्जनानन्तरं

तु शुक्लपक्ष एव वेदः ।

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।

विरमेत्पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ।

वेदाङ्गानि रहस्यं च कृष्णपक्षेषु सम्पठेत् ॥'

इति मनुवाक्यात् । एतच्च धारणाध्ययनं न तु ग्रहणाध्ययनम् । 'उपाकृत्याधीयीत' इत्युक्तेः । उत्तरायणे आरण्यकाध्ययनं तूपाकर्मदिनस्योत्सर्जनकालत्वमादायोपपाद्यम् । *धारणेति ।

अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥'

सर्वथा लोपे तु कृच्छ्र उपवासश्च । 'वेदोदितानां नित्यानाम्' इति मनुनाऽभोजनोक्तेः । एवमुत्सर्गेऽपि ।

अथ प्रसङ्गादत्रैवोत्सर्जनमुच्यते । तच्च पौषमासे रोहिण्यां तत्कृष्णाष्टम्यां वा कार्यम् ।

'पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥'

इति याज्ञवल्क्योक्तेः । *श्रावण्यां प्रौष्ठपद्यां वोपाकृत्य क्रमेण पौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि वा का-

---

'अध्येष्यमाणोऽप्यपर्वस्वारब्धः' इति । अध्येष्यमाण = अध्यापयिष्यमाणः । अध्यापयितृत्वाभिव्याहारात् । अध्यापनमृणमारणात्पवनहृत्यमिति तेनैव करणे स्वरेणाकर्षे सति दोषित्वप्रतीतिः । वेदजप्येनेत्यपि धारणाध्ययनाङ्गत्वमुक्तम् । एवं च सामर्थ्यवत्वोपाधीनाऽप्युपाकर्मादि आवश्यकम् । उपाकृतानां चोत्सर्गः । तदध्यायनोर्नित्यत्वात्तल्लोपे प्रायश्चित्तं सर्वथा इति कृच्छ्रः । याज्ञवल्क्ये कृच्छ्रविधानात् ।

'वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥' इति ।

*अथवापि चेति ।

'जलान्ते छन्दसां कुर्यादुत्सर्जनं द्विजः ।'

इत्युत्तरार्धे प्रायाद्धादिरित्यर्थः । *श्रावण्यामिति ।

'पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥'

इति मानवात् । पुष्येऽन्त्येऽपि भानि । एतच्चाहिताग्न्यपेक्षया । यदा श्रावण्यामुपाकर्म तदा पौषशुक्लप्रतिपदि, यदा भाद्र्यां तदा-

र्यम् । '*अर्धपञ्चमान्मासानधीयीत' इति तैत्तैर्वोक्ते अर्धः पञ्चमो येषु सार्धचतुर इत्यर्थः । यत्तु हारीतः-अर्धपञ्चमान्मासानधीत्योदर्शमुत्सृजेत, पञ्चा*र्धषष्ठान् इति; तदाषाढ्युपाकर्मविषयम् । बौधायनास्तु पौष्यां माघ्यां वा कुर्युः । 'पौष्यां माघ्यां चोत्सृजेत्' इति तत्सूत्रात् । तैत्तिरीयैस्तु तैष्यां कार्यम् । 'तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत्' इति तत्सूत्रात् । बह्वृचैस्तु माघ्यां कार्यम् ।

'अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते' इति कारिकोक्तेः । कातीयास्तु भाद्रपदे कुर्युः ।

'उत्सर्गश्चेत्तदा तिष्यातिष्यां प्रौष्ठपदेऽपि वा ।' इति कात्यायनोक्तेः । सामगास्तु सिंहार्के पुनः कुर्युः तथा च 'सिंहे रवौ तु' इति गार्ग्यवचनं पूर्वमुक्तम् । *सर्वैरुपाकर्मदिने वा कार्यम् ।

मापत्ऋवतिरद्दीत्यर्थः । *अर्धेति । अर्धः पञ्चमो येषु [illegible] विग्रहः । सार्धचतुर इत्यर्थः ।

'श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ॥'

इत्यत्र तथैव मनोः । एतेषां पञ्चानां [illegible] विज्ञानेश्वरस्तु पौषे पूर्वोक्तमासान्वयः, न तु [illegible] 'अर्धपञ्चमान्मासानधीयीत' इत्यादौ अर्धपदं [illegible] न [illegible] वर्षं [illegible] । [illegible] इत्याह—*अर्धषष्ठानिति । अर्धः षष्ठो येषां [illegible] पञ्चेत्यर्थः ।

*सर्वैरिति । अत्रापि [illegible] [illegible] दिनः कार्यः, तेषां [illegible] पूर्वोक्तत्वात् । ननु सिंहे रवौ

वा पारणायाम्' इत्यादिदर्शनादन्तापेक्षायामुभयान्तो मुख्यः । तिथिरष्टगुणामिति वचनात् । अन्यतरान्तस्तु गौणः । 'भान्ते कुर्यात्तिथेर्वापि'इति वचनात् अथ वा यदि चोभयान्तोऽन्यतरान्तो वा रात्रौ तदाऽप्यपरेऽह्न्येव दिवैव तिथ्यृक्षयोरिति वचनात् । तत्रार्धरात्रशब्दस्य रात्र्यर्थकत्वात् । तत्रापि यत्रार्धरात्रात्प्रागुभयान्तस्तत्रार्धरात्रवारणाय तथैव व्याख्येयत्वात् । सर्वेष्विति प्रतीकपारणं तेनान्यविषयमित्यस्य दर्शितश्लोकान्तर्गतम् 'व्रते यानुसपारणम्' इत्येतदेतदुपवास विषयं किन्तु केवलरोहिण्युपवासविषयमित्यर्थः । मुख्येति यत्रान्यतरान्ते गौणकाले दिवा उभयान्तो मुख्यकालस्तु रात्रौ तत्रान्यतरान्ते गौणकाले एकवाक्यताद्वारा मुख्यत्वमत्ययार्थमित्यर्थः । तथं तिथ्यादि तु मतान्तरमिति *तिथ्यन्ते=अन्यतरान्ते । *उत्सवान्ते=जागरान्ते । एकतराविगमेऽपि श्रीपतिविरोधापाधिवारणाय । एतदेव

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ॥'

इति गीयते माधवाचार्यैः । उत्सवान्तस्यैव प्रातस्त्वात् यामत्रयेत्यशक्तेर्विवरणाय । एतन्निर्मूलमेवेति ॥ विवेचने ।
*तत इति पूर्वेद्युर्नियमाश्च

सुदेशे शोभनं कुर्याद्देवक्याः *सूतिकागृहम्॥
तन्मध्ये*प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता।

'सप्तम्यां लघुभुक्कुर्याद्दन्तधावनपूर्वकम्।
उपवासस्य नियमं रात्रौ कृत्वा जितेन्द्रियः॥'

इत्यादयः। परेद्युः कृतनित्यक्रियः

'सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा।
पवनो दिक्पतिर्भूमिराकाशं खचरा नगाः॥
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम्॥'

इति पठेत्। एतदेव सूर्यादिदेवताभ्यो व्रतनिवेदनं गीयते। तत आचम्य प्राणानायम्य प्राङ्मुख उदङ्मुखो वा दर्भपाणिः फलपुष्पाक्षतं वारिपूर्णं ताम्रपात्रमादाय मासाद्युल्लिख्य श्रीकृष्णप्रीतये पापक्षयार्थं वा जन्माष्टमीव्रतमहं करिष्ये इति सङ्कल्पयेत्। सङ्कल्पेऽधिकरणतिथेरुल्लेखः। ततः श्लोकचतुष्टयं पठेत्—

'वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम्॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम्।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि॥
एनसो मोक्षकामोऽस्मि यद्गोविन्दत्रियोनिजम्।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे॥
आजन्म मरणं यावद् यन्मया दुष्कृतं कृतम्।
तत्प्रणाशय गोविन्द प्रसीद परमेश्वर॥' इति।

ततः पात्रस्थं जलं क्षिपेत्। तत आह—*ततोऽष्टम्यामिति। तिलस्नानं मध्याह्ने प्रातःस्नानस्य कृतत्वात्। *सूतिकागृहम्= षष्ठ्या देव्या अधिष्ठितं गृहम्। *प्रतिमेति। प्रतिमायामग्न्युत्तारणसंस्कारं कुर्यात्। स च ऋग्वेदे—'अग्निः सप्तिं वाजम्भरं ददाति' इति सूक्तमग्निपदहीनं पठित्वा अग्निपदसहितं पठन् सं-

काञ्चनी राजती ताम्री पैत्तली मृन्मयी तथा ॥
वार्क्षी मणिमयी चैव वर्णकैर्लिखिताऽथवा ।
सर्वलक्षणसंपूर्णा पर्यङ्के च पटावृते ॥
देवकी तत्र चैकस्मिन्प्रदेशे सूतिकागृहे ।

न्तर्तां जलधारां पातयेदिति । प्रतिमापूजनं चाकृतप्राणप्रतिष्ठाया-स्तस्याः प्राणप्रतिष्ठां कृत्वा कार्यम् ।

'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्या देवस्य वा हरेः ॥
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथापूर्वं तथा भावः स्वर्णादीनां न देवता ॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ।
प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्धये ॥
वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा प्राज्ञ मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत् ।
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ॥
अस्यै देवत्वसङ्ख्यायै स्वाहेति यजुरीरयेत् ।
अङ्गमन्त्रैराङ्गमन्त्रैर्वैदिकैरित्यनेन च ॥
प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत् ।'

बीजेन=मूलमन्त्रेण ।

'प्रणवादिनमोऽन्तं च चतुर्थ्यन्तं च सत्तम ।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्तितः ॥'

इति तल्लक्षणम् । यदा स्वहृदये पूजा क्रियते तदा हृदयेऽङ्गुष्ठं द-त्त्वा मन्त्राः पठनीयाः । प्रतिमायां तु कपोलौ स्पृष्ट्वेति विशेषः । एतच्च श्रीकृष्णमभिप्रेत्य देवक्यादिप्रतिमासु अमन्त्रकत्वात्तत्तन्मूलमन्त्रान् वैदिकमन्त्रांश्च पठेत् । अर्घ्यदानस्य स्थाने चतु-

*प्रसुप्तां च प्रसूतां च स्थापयेन्मञ्चकोपरि ॥
*मां तत्र बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे ॥
तद्वच्च कल्पयेत्पार्थ प्रसूतवरकन्यकाम् ।
कश्यपो वसुदेवोऽयमदितिश्चैव देवकी ॥
शेषो वै बलभद्रोऽयं यशोदा क्षितिरन्वभूत् ।
नन्दः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः ॥
*गौर्धेनुः कुञ्जरश्चैव दानवाः शस्त्रपाणयः ।
लेखनीयाश्च तत्रैव कालियो यमुनाह्रदे ॥
*इत्येवमादि यत्किंचिच्छक्यते चरितं मम ।
लेखयित्वा प्रयत्नेन*पूजयेद्भक्तितत्परः ॥
मन्त्रेणानेन कौन्तेय देवकीं पूजयेन्नरः ।

र्यन्तं तत्तद्देवतानामयुक्तं स्वाहान्तं मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् । प्रसूतां=देवकीम् । *प्रसुप्तां=संजातक्षीराम् । *मां तत्रेति । ध्याने उपयोगः ।

*गौरिति । एते च मोहितास्तत्र लेख्याः ।

'तत्र कंसनियुक्ताश्च मोहिता योगनिद्रया ।'

इति वाक्यशेषात् । गोपादयस्त्वप्रामोहिता लेख्या इत्यर्थः । केरलस्य काश्चन्यादिप्रतिमाभिर्विकल्पते प्रतिमात्वात् । पूर्वोक्तस्यावा-न्यत्कल्पमाह-*इत्येवमिति । *पूजयेदिति । पूजा च प्राणप्र-तिष्ठोत्तरं कार्या । ताम्बूलदक्षिणा च पूजासाद्गुण्याय विनोद्यापन-द्रव्यात्संनिवेदयेत् । उद्यापनं तु परेऽह्नि कार्यम् । तत्र देवकीं वसु-देवं यशोदां नन्दं सुभद्रां कृष्णं बलदेवं चण्डिकां च पृथक्नाममन्त्रेण पर्यङ्कादेः पश्चिमादेशावस्थौ कक्षेषु प्रतानपृष्ठेषु वा पूजयेत् ।

'कुर्यात्पूजां विधिज्ञस्य सर्वपापानुत्तमे ।
देवक्यै वसुदेवाय वासुदेवाय चैव हि ॥

गाथावाद्यैः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः
भृङ्गारादर्शकुम्भप्रवरकृतकरैः किङ्करैः सेव्यमाना ।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते,
सा देवी देवमाता जयति सुवदना देवकी कान्तरूपा ॥
पादौ संवाहयन्ती श्रीर्देवक्याश्चरणान्तिके ।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रियै इति ॥

बलदेवाय नन्दाय यशोदायै पृथक् पृथक् ॥'

इति भविष्योत्तरात् । श्रियं च 'नमो देव्यै श्रियै' इति मन्त्रेण । अन्येषां तु विशिष्टमन्त्रानुक्तावपि 'गर्गाद्यावाहितदेवताभ्यो नमः' इति मन्त्रेणापि । उपचारान्तराणि स्थाने । भविष्ये एकैक-मन्त्रा दर्शिताः ।

'विश्वस्तामपीच्छन्ति केचिदत्रैव सूरयः' ।

इत्युक्त्वा

'योगेश्वराय देवाय योगानां पतये विभो ।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः ॥'

इति स्नाने,

'यज्ञेश्वराय यज्ञाय तथा यज्ञोद्भवाय च ।
यज्ञानां पतये नाथ गोविन्दाय नमो नमः ॥'

इति धूपादौ,

'विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः ॥'

इति नैवेद्ये, माधवे तु 'यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः' इत्यर्घ्ये 'धर्माय धर्मेश्वराय धर्मपतये धर्मसम्भवाय गोविन्दाय नमो नमः' इति स्वाहान्तादितहोमे, 'सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय नमोनमः' इति चन्द्र-

*अर्धरात्रे वसोर्धारां पातयेद् गुडसर्पिषा ।
*नाडीवर्धापनं षष्ठी नामादेः करणं मम ॥
*ततो मन्त्रेण वै दद्याचन्द्रायार्घ्यं समाहितः ।
शङ्खे तोयं समादाय सपुष्पकुशचन्दनम् ॥
जानुभ्यां धरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥
क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥
ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते ।
नमस्ते रोहिणीकान्त अर्घ्यं नः प्रतिगृह्यताम् ॥
यथा पुत्रं हरिं लब्ध्वा प्राप्ता मे निर्वृतिः परा ।
तामेव निर्वृतिं देहि सुपुत्रं दर्शयस्व मे ॥'

इति देवक्यर्घ्यः ।

'ततः पुष्पाञ्जलिं दत्त्वा यामे यामे प्रपूजयेत् ।
प्रभाते ब्राह्मणान् शक्त्या भोजयेद्भक्तिमान्नरः ॥'
'ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत् ॥'

इदं प्रतिमासकृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे

पूजायां मन्त्रा उक्ताः । *अर्धरात्रे इति । ततो गव्यघृतेनाग्नौ वसोर्धारां कुर्यात् । क्वचिद्गुडसर्पिषेति पाठः । *नाडीति । जातकर्मनालच्छेदनषष्ठीपूजानामकर्मादीनि संक्षेपेण । *तत इति । चन्द्रोदये प्रतिपादितो रोहिणीसहितं चन्द्रं सम्पूज्य 'जानुभ्यां धरणीं गत्वा' शङ्खे तोयमित्यादिचन्द्रार्घ्योत्तरं च

'ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते ॥
नमो मण्डलदीपाय शिरोरत्नाय धूर्जटेः ।

कलाभिर्वर्धमानाय नमश्चन्द्राय चारवे' ॥
इति मन्त्राभ्यां प्रणमेत्, देववद्योश्चरं देवकीं च प्रणमे-
देववद्यो नावश्यक इति केचित् । ततः—
'अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं कृष्णमनघं चापराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारणम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ॥
प्रपद्येऽहं सदा देवं सर्वकामार्थसिद्धये ।
प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ॥
इति मन्त्रैः स्वनामकीर्तनपूर्वकं प्रणम्य
त्राहि मां सर्वलोकेश हरे संसारसागरात् ।
त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो ॥
सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ।
देवकीनन्दन श्रीश हरे संसारसागरात् ॥
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे ।
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ॥
सोऽहं देवातिदुर्वृत्त त्राहि मां शोकसागरात् ।
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे ॥
त्राहि मां देव देवेश त्वत्तो नान्योऽस्ति रक्षिता ।
यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके ।

तत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध ॥'

इति प्रार्थ्य रात्रिशेषं स्तोत्रपुराणश्रवणादिभिरतिवाहयेत् । ततः परदिने प्रातः स्नानादिनित्यकृत्यं कृत्वा पुनः सपरिवारं श्रीकृष्णं यथाविभवं संपूज्य यथाविभवं चण्डिकामहोत्सवं कृत्वा यथाशक्ति ब्राह्मणान्संपूज्य भोजयित्वा तेभ्यः सुवर्णमेदिनीधेनुवस्त्रादि यद्यदिष्टं तत्कृष्णो मे प्रीयतामिति दत्वा मां प्रति

यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥
ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

शान्तिरस्तु शिवं चास्तु इत्युक्त्वा ब्राह्मणान् विसृज्य इष्टैः सह स्वयं पारणं कुर्यादित्यर्थः । सुजन्म वासुदेवायेति पाठान्तरम् । अङ्गदेवताविसर्जनं कार्यम् । श्रीकृष्णप्रतिमादिदानं तु विसर्जनमफलैव । एवं श्रीकृष्णप्रतिमाया अभावेऽपि 'ॐ कृष्णाय नमः' इति मन्त्रेण 'ॐ वासुदेवाय' इति मन्त्रेण वा तद्विसर्जनमपि । उद्यापनं तु नैतस्यानुक्तत्वात् ।

'यदि चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत् ।'

इत्यादिनानुक्तत्वादुद्यापनमावश्यकमिति स्मार्ताः । अतमङ्गसूक्तमथवा सम्पूर्णतानुष्ठानं कार्यम् । युधिष्ठिर उवाच—

संपूर्णतामनुष्ठानं व्रतानां च जनार्दन ।
कृत्स्नसारं गुह्यार्थमेतन्मे वक्तुमर्हसि ॥

श्रीकृष्ण उवाच—

साधु साधु महाबाहो कुरुराज युधिष्ठिर ।
रहस्यानां रहस्यं ते कथयामि व्रतं तव ॥
छिद्रिद्रव्यं मयादेन यद् व्रतं व्रतिनां व्रतम् ।
तत्संपूर्णं भवेत्सर्वं कृतेनानेन पाण्डव ॥

*प्रतिमासं च ते पूजामष्टम्यां यः करिष्यति ।
विप्रहस्ते प्रयच्छेत दाता चैवोत्तरामुखः ॥
मन्त्रेणानेन कौन्तेय सोपवासः प्रयत्नतः ।
इदं व्रतं मया खण्डं कृतमासीत्पुरा द्विज ॥
तत्सर्वं पूर्णमेवास्तु तव मूर्तिप्रदानतः ।
वाक्यं पूर्णमतो ब्रूयाद् व्रतेनानेन ते पुरा ॥
सम्पूर्णं स्यात्प्रसादेन तव पूर्णा मनोरथाः ।
ब्राह्मणा यत्प्रभाषन्ते तन्मन्यन्ते दिवौकसः ॥
सर्वदेवमया विप्रा न तद्वचनमन्यथा ।
जलधिः क्षारतां नीतः पावकः सर्वभक्षताम् ॥
सहस्रनेत्रः शक्रोऽपि कृतो विप्रैर्महात्मभिः ।
ब्राह्मणानां तु वचनाद् ब्रह्महत्या विनश्यति ॥
अश्वमेधफलं साग्रं लभन्ते नात्र संशयः ।
व्यासवाल्मीकिवचनात्पराशरवसिष्ठयोः ॥
गर्गगौतमधौम्यात्रिकश्यपाङ्गिरसस्तथा ।
वचनान्नारदादीनां पूर्णं भवतु मे व्रतम् ॥
एवं विधिविधानेन गृहीत्वा ब्राह्मणो व्रजेत् ।
दाता तस्यैवमेतत्तु ब्राह्मणस्य गृहं स्वयम् ॥
ततः पञ्चमहायज्ञान्निर्वर्त्य भोजनादिकम् ।
एवं यः कुरुते भक्त्या व्रतमेतन्नरोत्तम ॥
तस्य सम्पूर्णतां याति यद्व्रतं यत्पुरा कृतम् ।
खण्डं सम्पूर्णतां याति प्रसादे व्रतदेवते ॥
भग्नानि यानि मदमोहवशाद् गृहीत्वा
जन्मान्तरेष्वपि नरेण समत्सरेण ।
सम्पूर्णपूजनपरस्य पुरो भवन्ति
सर्वव्रतानि परिपूर्णफलप्रदानि ॥' इति ।

*प्रतिमासं चेति । चन्द्रिकां मति श्रीकृष्णवाक्यम् । आर॰

काञ्चनं रूप्यकं वाऽथ शिल्पिना तु घटापयेत् ।
अप्रमत्तस्य यो देवस्तत्स्वरूपं विनिर्मितम् ॥
द्विभुजं पङ्कजारूढं सौम्यं सहसिताननम् ।
द्विभुजमिति चतुर्भुजादेरुपलक्षणम् ॥
निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः ।
तन्मासे तु पुनः मासे ब्राह्मणो विधिना गृहे ॥
स्नापयेत्पयसा दध्ना घृतक्षौद्ररसाम्बुभिः ।
गन्धचन्दनपुष्पैश्च पूजां कुर्यात्समाहितः ॥
पूजा चाग्न्युत्तारणप्राणप्रतिष्ठानन्तरं कार्येत्युक्तम् ।
अर्घ्यं प्रदद्यात्तन्नाम्ना मन्त्रेणानेन पाण्डव ।
शरणं वः प्रपन्नोऽस्मि कुरुष्वाद्य दयां पुनः ॥
प्रसन्नो भवभीतस्य भिन्नचर्यव्रतस्य च ।
कुरु प्रसादं सम्पूर्णं व्रतं संजायतां मम ॥
व्रतच्छिद्रं जपच्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
तत्सर्वं त्वत्प्रसादेन संपूर्णं जायतां मम ॥
पूर्वदक्षिणपश्चात्तु उत्तरे च बलिं हरेत् ।
उपर्यधस्तात्सर्वेभ्यो दिक्पालेभ्यो नमो नमः ॥
इदमर्घ्यमिदं पाद्यं तेभ्यस्तेभ्यो नमो नमः ।
पादौ च जानुनी चैव कटिं शीर्षं च वक्षसि ॥
कुक्षिं तु हृदयं पृष्ठं बाहुकण्ठं शिरोरुहान् ।
पूजयित्वाऽस्य देवस्य ततः पश्चात् समापयेत् ॥
पूजितस्त्वं यथाशक्त्या व्रतस्तेऽस्तु सुरोत्तम ।
ऐहिकामुष्मिकीं देव कार्यसिद्धिं दिशस्व मे ॥
एवं समापयित्वा तु देवं ब्राह्मणमानयेत् ।
तन्मूर्तिं चापि विप्राय विधिवत् प्रतिपादयेत् ॥
स्थित्वा पूर्वमुखो विप्रो गृह्णीयाद्दर्भपाणिना ।
दर्भयुक्तेन पाणिनेत्यर्थः ।

इति माधवोक्तेः। चतुर्थीयुक्तायां फलाधिक्यम्॥
माधवीये आपस्तम्बः—

'चतुर्थीसहिता या तु सा तृतीया फलप्रदा।
अवैधव्यकरा स्त्रीणां पुत्रपौत्रप्रवर्धिनी॥'

द्वितीयायोगे प्रत्यवायमाह स एव—

'द्वितीयाशेषसंयुक्तां या करोति विमोहिता।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः॥' इति।
'आद्या मधुस्रावणिका कज्जली हरितालिका।
चतुर्थीमिश्रिता स्त्रीभिः दिवानक्ते विधीयते॥'
तृतीया नभसः शुक्ला मधुस्रावणिका स्मृता।
भाद्रस्य कज्जली कृष्णा, शुक्ला च हरितालिका॥'

इति दिवोदासोदाहृतवचनाच्च॥

*भाद्रशुक्लचतुर्थी मध्याह्नव्यापिनी ग्राह्या।
'प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप।'

इति हेमाद्रौ भविष्ये तत्रैव पूजोक्तेः। मदनरत्नेऽप्येवम्-

अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपावसेत्॥'

इति ब्रह्मवैवर्तात्। आद्या=वरेण्युदीपिका, मधुस्रावणिकेत्यत्र दन्त्यः सकारो न तु तालव्यः शकारः। मधुस्रवाख्यपर्वयुक्ते। दिवानक्ते=अहोरात्राख्ये व्रते। *भाद्रस्येति 'नभसः कज्जली कृष्णा' इति दिवोदासपाठान्तरे कृष्णतृतीया कज्जलीति कृत्यरत्नावली।

परदेति।

'सुरासुरानाप्नुवतो गणेशं बुद्धिपूर्वकम्।
तस्यां भाद्राद्दरे यस्मात्तस्माद्भद्रचतुर्थिका॥'

इति पुराणान्तरे तद्विवरणात्।

*अंशेनेति। पूर्वेद्युरेकदेशव्याप्तौ परेद्युरधिकव्याप्ताविति के-

म् । परदिने पूर्वांशेन*साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षेषु पूर्वा ग्राह्या। तथा च बृहस्पतिः—

'चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ॥' इति ।
'मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ॥'

इति माधवीये स्मृत्यन्तराच्च । तत्र गणेशरूपं स्कान्दे—

'एकदन्तं शूर्पकर्णं नागयज्ञोपवीतिनम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिवि(१)नायकम् ॥'इति।

इयं रविभौमयोरतिप्रशस्ता ।

'भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता ।
महती साऽत्र विघ्नेशमर्चित्वेष्टं लभेन्नरः ॥'

इति निर्णयामृते वाराहोक्तेः ।

अत्र चन्द्रदर्शनं निषिद्धम्। तथा चापरार्के मार्कण्डेयः-

'*सिंहादित्ये शुक्लपक्षे *चतुर्थ्यां चन्द्रदर्शनम् ।

चित् । या तु पूर्वेद्युः किंचिन्मध्याह्नं व्याप्य परेद्युः कृत्स्नं मध्याह्नं व्याप्नोति सा परा; संपूर्णकर्मकालव्याप्तेः । संदिग्धे हि 'मातृविद्धा प्रशस्यते' 'मातृविद्धा प्रशस्ता स्यात्' इत्यादीनि प्रवर्तन्ते । *सिंहादित्ये इति । कन्यादित्यसिंहादित्यशब्दयोः चान्द्रो भाद्रपद इत्यर्थः । *चतुर्थ्यामिति । अत एव कृत्यरत्नाक-

---

(१) अत्र 'मृन्मयादिमूर्तौ प्राणप्रतिष्ठापूर्वकं विनायकं षोडशोपचारैः संपूज्यैकमोदकेन नैवेद्यं दत्त्वा सगन्धा एकविंशतिदूर्वा गृहीत्वा-'गणाधिपायोमापुत्रायाघनाशनाय विनायकायेशपुत्राय सर्वसिद्धिप्रदायैकदन्ताय मूषकवाहनाय कुमारगुरवे' इति दशनामभिर्द्वे द्वे समर्प्यावशिष्टामेकां दूर्वां पुनर्दशनामभिः समर्पयेत् । दश मोदकान् निधाय दत्त्वा दश स्वयं भुञ्जीत' इति संप्रदायः पूर्वार्धनिर्णयसिन्धावुक्तः । विस्तरस्तु मन्त्रादिग्रन्थेभ्योऽवगन्तव्यः ।

मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ॥'
चतुर्थ्यां न पश्येदित्यन्वयः । प्रधानक्रियान्वयलाभात् । तेन चतुर्थ्यामुदितस्य पञ्चम्यां न निषेधः । गौडा अप्येवमाहुः । पराशरोऽपि—

'कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ॥
तद्दोषशान्त्यै सिंहः प्रसेनमिति वै पठेत्' । इति ।

श्लोकस्तु विष्णुपुराणे—

'सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः ।
सुकुमारक मा रोदीस्तव ह्येषः स्यमन्तकः ॥' इति ॥

भाद्रपदशुक्लपञ्चमी=ऋषिपञ्चमी । सा मध्याह्नव्यापिनी ग्राह्या ।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'

इति माधवीये हारीतोक्तेः । दिनद्वये तत्त्वे *हेमाद्रिमते परा । 'सिता परयुता स्यात्पञ्चमी' इति दीपि-

---

क्याम्—

'पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'

इति निषेधवाक्यं चतुर्थ्यां नेक्षितव्य इति सम्बन्ध इति व्याख्यातम् । दिवादर्शने च न दोषः । सकृत्पाठेऽपि तत्सिद्धिः । पाठश्च प्राङ्मुखेनोदङ्मुखेन वा कार्यः । तथा च पुराणान्तरम्—

'ततश्चतुर्थ्यां रात्र्यां वै प्रमादाद्वीक्ष्य मानवः ।
पठेत्पौराणिकं वाक्यं प्राङ्मुखो वाऽप्युदङ्मुखः ॥' इति ।

सिंहः प्रसेनमिति मन्त्रेणाभिमन्त्रितं जलं पिबेत्, स्यमन्तकोपाख्यानं च श्रोतव्यमाचारादिति स्मार्ताः ।

*हेमाद्रीति । तत्त्वं तु सामान्यनिर्णये दर्शितम् । वस्तुत-

कोक्तेः। माधवमते पूर्वा। 'सर्वत्र पञ्चमी पूर्वा' इत्युक्तेः। युग्मवाक्यान्निर्णयस्तु युक्तः। ऋषिपञ्चमी षष्ठीयुतैवेति दिवोदासः। *अत्र ऋषीन्प्रतिमासु पूजयित्वाऽकृष्टभू-

---

स्तु मध्याह्नव्यापिनी ग्राह्या।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः।'

इतिवचनात् मनुष्यदैवत्यत्वाच्च। मध्याह्नव्याप्त्या निर्णयाभावे तु पूर्वविद्धा ग्राह्या युग्मवाक्यात्। *अत्रेति।

'नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी।
नद्यादिषु तदा स्नानं कृत्वा नियममेव च॥
विधाय नित्यकर्मादि गत्वा द्वारवतीमृषीन्।
(द्वारवती=अग्निहोत्रशाला धूमनिर्गमनद्वारैर्बहुभिर्युतत्वात्।)
स्नापयेद्विधिवत्तत्र पञ्चामृतरसैः शुभैः॥
चन्दनागरुकर्पूरैर्विलिप्य च सुगन्धिभिः।
पूजयेद्विविधैः पुष्पैर्गन्धधूपादिदीपकैः॥
समाच्छाद्य तथा वस्त्रैः सोपवीतैर्यथाविधि।
ततो नैवेद्यसंपन्नमर्घ्यं दद्याच्छुभैः फलैः॥
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः।
जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः॥
गृह्णीतार्घ्यं मया दत्तं तुष्टा भवत सर्वदा।' इति।
'अकृष्टपृथिवीजातशाकाहारं प्रकल्पयेत्।
शयीत ब्रह्मचर्येण ऋषीन् ध्यात्वा समाहितः॥
अनेन विधिना सप्त वर्षाणि व्रतमाचरेत्॥'

इति च ब्राह्मात्। अत्र ब्राह्मण्यादीनां सर्वासामधिकारः।

'ब्राह्मणी क्षत्रिया वैश्या शूद्रा वाऽपि वरानने'।

इति ब्राह्मात्।

भाद्रशुक्लषष्ठी=सूर्यषष्ठी। सा परयुता, युग्मवाक्यात्।

मिजशाकेन पारणम् । एवं सप्तवर्षाणि कृत्वा सप्तकुम्भेषु प्रतिमाः सम्पूज्य परेऽह्नि तत्तन्मन्त्रैर्गाष्टोत्तरशतं तिलाञ्जुहुत्वा सप्त ब्राह्मणान्भोजयेत्' इति निर्णयामृते ॥

भाद्रशुक्लषष्ठी=सूर्यषष्ठी । सा सप्तमीयुतैवेति दिवोदासः ।

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधफलाधिकम् ॥'

इति वचनात् । कल्पतरौ भविष्ये—

'येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधशताधिकम् ॥'

भविष्ये—

'येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।
योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ।'

गाङ्गेयं=स्वामिकार्तिकम् ।

इयमेव भौमवारे विशाखावैधृतियोगे चम्पाषष्ठी । तदुक्तं स्कान्दे—

'षष्ठी भाद्रपदे शुक्ला वैधृतेन समन्विता ।
विशाखाभौमवाराभ्यां सा चम्पेतीह कीर्तिता ॥
पञ्चम्यामेकभक्ताशी चैव षष्ठ्यामुपोषितः ।
रथे दलद्वादशके पूजयेत्सूर्यदेवताम् ॥
आदित्यस्तपनः पूषा भानुमान् भानुरर्यमा ।
विश्वकर्मोऽंशुमान् देवः सहस्रांशुर्विनायकः ॥
सूरः सूर्यः खगः कर्णोमार्तण्डः प्राग् दलादिषु ।
तपनादींश्च संपूज्य सप्तम्यां जुहुयात्तिलान् ॥' इति ।

देव इति विशेषणम् । रोगनिवृत्त्यर्थमिदं व्रतमिति मदीयः ।

योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ॥'
गाङ्गेयः=स्वामिकार्तिकेयः ॥

भाद्रपदशुक्लसप्तम्यां=मुक्ताभरणव्रतम्। तत्र सप्तमी पूर्वयुता ग्राह्या। 'षण्मुन्योः' इति युग्मवाक्यात्।

भाद्रपदशुक्लाष्टमी=दूर्वाष्टमी। सा पूर्वा ग्राह्या।
'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ॥
*पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'
इति हेमाद्रौ बृहद्यमोक्तेः।
'शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत्।
दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयते ॥'
इति पुराणसमुच्चयाच्च। *यत्तु—
'मुहूर्ते रौहिणेऽष्टम्यां पूर्वा वा यदि वा परा।
दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेत् ॥'
इति तत्रैवापरार्के उक्तम्, तत् पूर्वदिने* ज्येष्ठादियोगे द्रष्टव्यम्।
'दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता।'

---

*पूर्वेति। 'शुक्लपक्षेऽष्टमी चैव' इत्यस्यापवादः। हुताशनी=होला, वह्निव्रततिथिर्वा; रम्भा तृतीयेत्यन्ये। दूर्वाव्रते भाद्रशुक्लाष्टमी पूर्वा ग्राह्येत्युक्तं तत्रैव। भाद्रशुक्लाष्टमी ज्येष्ठामूलशून्यरौहिणमुहूर्तव्यापिनी ग्राह्येति दर्शयति—*यत्तु मुहूर्ते इति। विवेचनकृतस्तु दूर्वाव्रतं ज्येष्ठामूलयोगरहितायां सिंहस्थे सूर्येऽगस्त्येऽनुदिते मध्याह्नव्यापिन्यां कार्यमित्याहुः। *पूर्वदिने इति। रौहिणे मुहूर्ते इति शेषः। यत्र दिनद्वये रौहिणे मुहूर्तेऽष्टमी पूर्वदिने च ज्येष्ठादियोगस्तत्रेति यावत्। दिनद्वये रौहिणे ज्येष्ठादियोगे पूर्वैव 'श्रावणी दुर्गनवमी' इति वचनात्। एवं परदिने

तथा—

'ऐन्द्रर्क्षे पूजिता दूर्वा हन्त्यपत्यानि नान्यथा ।
भर्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेत् ॥'

इति तत्रैव तन्निषेधात् । इदमगस्त्योदये कन्यार्के च न कार्यम् ।

'शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाऽष्टमी ।
सिंहार्क एव कर्तव्या न कन्यार्के कदाचन ॥
सिंहस्थे सोत्तमा सूर्येऽनुदिते मुनिसत्तम ॥'

कर्मकालस्पर्शाभावे ज्येष्ठादियोगेऽपि पूर्वेव । कर्मकालशास्त्रादिति भावः । 'कन्यार्के च'इति निषेधो व्यर्थः । "न कन्यार्के कदाचन'इति तु 'नान्तरिक्षे न दिवि'इतिवत् । यथा कन्यार्के न कदाचन तथा सिंहार्केऽपि अगस्त्योदयानन्तरं नेति वाऽर्थः । लौगाक्षिस्त्वन्यत्राप्याह—

'उद्यानिकाशिवपवित्रकमेघपूजा-
दूर्वाष्टमीव्रतविरूढकजागराणि ।
स्त्रीणां व्रतानि निखिलान्यपि वार्षिकाणि
कुर्यादगस्त्य उदिते न शुभानि लिप्सुः ॥'इति ।

अस्यार्थः—उद्यानिका=उद्याने स्वेष्टदेवतापूजादि, पृथ्वीस्यर्थं ब्राह्मणभोजनादिरूपव्रतविशेषः । शिवपवित्रकम्=आषाढ-श्रावण-भाद्रपदान्यतमचतुर्दशीविहितं शिवपवित्रारोपणम् । मेघपूजा=व्रतविशेषः । दूर्वाष्टमी=भाद्रशुक्लाष्टमी । व्रतविरूढकं=भाद्रशुक्लचतुर्दशीविहितं पालीसंज्ञं कदलीव्रतम् । जागरम्=आश्विनपूर्णिमाविहितं कोजागरम्, कार्तिकशुक्लचतुर्दशीविहितं जागरं वा । अत्रोभयत्रापि अगस्त्योदयस्यावश्यवचा विध्यनन्तकालाद्यपेक्षितविकल्पः । वार्षिकाणि=वर्षासु भवन्ति, न तु वर्षासु भवानि इति । शरदादि-ग्रीष्मान्तमगस्त्योदयानुवृत्तेस्तत्र स्त्रीव्रतानामनारम्भापत्तेर्विध्यन-

इति तन्त्रेणोक्तेः । *अस्यापवादः—

'यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः ।
तस्मिन्नहविष्यं पूजा च न्यूना चेत्पूर्ववासरे ॥'इति ।

*इदं केवलतिथौ नक्षत्रे चोक्तम् । तत्राद्यं केवल-तिथौ कार्यम् । अन्त्यं केवलर्क्षे । तदुक्तं मात्स्ये-

'प्रत्याब्दिकं तिथावुक्तं यज्ज्येष्ठादेवतव्रतम् ।
प्रतिज्येष्ठाव्रतं यच्च विहितं केवलोडुनि ॥
तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षतः ॥' इति ।

अत एव मदन रत्ने भविष्ये नक्षत्रमात्रे उक्तम्-

'मासि भाद्रपदे पक्षे शुक्ले*ज्येष्ठा यदा भवेत् ।
रात्रौ जागरणं कृत्वा एभिर्मन्त्रैश्च पूजयेत् ॥' इति ।

दाक्षिणात्यास्त्वृक्ष एव कुर्वन्ति । हेमाद्रौ स्कान्देऽपि-

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुते ।
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥'इति

प्रमाणं रात्रीति । सामान्यवाक्यापवादः । *अस्य=रात्रियोगस्य ।

'तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च ।
नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी ॥'

इति तु स्तावकम् । एतच्च तिथिसापेक्षमेव व्रतं ज्येष्ठादिवशेन पूर्वं परं वा भवतीति माधवः । स्वसम्मतं मतमाह-*इदमिति । *ज्येष्ठा यदेति । अष्टमीसम्बन्धव्युदासः । परम्—

'मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ।
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥' इति ।
'कृतस्नानो नरः कुर्यात्तस्यामन्यत्र वा दिने ।
भक्तियुक्तः शुचिर्भूत्वा ज्येष्ठायाः परिपूजनम् ॥'

इति च । अत्र नाष्टमीसम्बन्धः । नक्षत्रमात्रापेक्षे 'यस्मिन् कस्मिन् दिने' 'तस्यामन्यत्र वा दिने' इत्यस्य यस्यां कस्यां तिथियाविरुद्ध-

यथा—

'ॐमंत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ।
मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमम् ॥' इति ।

मन्त्रस्तु—

'एह्येहि त्वं महाभागे सुरासुरनमस्कृते ।
ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भव ॥

(इत्यावाह्य 'तामाग्निवर्णाम्' इति संपूज्य)

ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ॥
शर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नमः ।
ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि ॥
एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वति ॥'

इत्यर्घः ॥

भाद्रपदशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् । 'आभाकासितपक्षेषु' इति दिवोदासोदाहृतवचनात् ।

'उपोष्यैकादशीं मोहात्पारणं श्रवणे यदि ।

र्यात् । तत्र नक्षत्रस्य खण्डत्वेऽष्टमीभानुवारयुक् तदन्यतरयुग्वा नक्षत्रं ग्राह्यम् ।

"तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च ।
नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी ॥"

इति स्कान्दात् । नीलज्येष्ठेति नक्षत्रनामैव । न च 'नीलज्येष्ठेति सा' इति गुणभूताष्टमीपरामर्शः, तस्या एवाधेयव्याप्यत्वेन प्राधान्यात्सा वैश्वदेवीतिवदिति वाच्यम् । तत्र देवताऽन्वयद्वारैव प्राधान्यं न त्विह तथेति वैषम्यात् । अन्यतरयोगस्याप्यभावे मध्याह्नादूर्ध्वमनुवर्तमानं ग्राह्यम् । "यस्मिन्दिने भवेत् ज्येष्ठा" इति वचनादिति । ॐमंत्रेणेति । निर्णीतपूजादिनात् पूर्वेद्युरनुराधायामावाहनमुच्यते-

करोति हन्ति तत्पुण्यं द्वादशद्वादशीभवम् ॥'

इति तत्रैव स्कान्दाच्च । अत्र सर्वत्र प्रतिप्रसवः मार्कण्डेयः—

'विशेषेण महीपाल श्रवणं वर्धते यदि ।
*तिथिक्षयेन नोपोष्यं *द्वादशीं लङ्घयेन्न हि ॥' इति

*केचित्तु—

'यदा स्वल्पद्वादश्यां योगस्तदा श्रवणनक्षत्रे त्रेधावि भक्ते मध्यमविंशतिघटिकात्मकं त्यक्त्वा पारणं का र्यम् । तदुक्तं *विष्णुधर्मे—

श्रुतेश्च मध्ये परिवर्तमेति
सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् । इति ।

केचिच्चतुर्धा विभज्य मध्यपादद्वयं वर्ज्यमाहुः । अत्र मूलं चिन्त्यम् ॥

अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात् । सन्ध्यायां विष्णुं सम्पूज्य प्रार्थयेत् । मन्त्रस्तु तिथितत्त्वे उक्तः—

'ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ॥' इति ।

अत्रैव शक्रध्वजोत्थापनमुक्तमपरार्के गर्गेण—

'द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥'

युश्च मूले विसर्जनमित्यर्थः ।

*तिथिक्षये=एकादशीक्षये । अत्र हेतुमाह—

*द्वादशीमिति । विवेचनमतमाह—*केचित्त्विति । वस्तुत 'आभाकामित' इति 'मैत्राद्यपादे स्वपितीह' इति च निर्मूलम् । तदाऽप्युपोष्यैकादशीमित्यादि बोध्यम् । *विष्ण्विति । "श्रुतेश्च मध्ये परिवर्तमेति" इति "सन्ध्यायां परिवर्तनम्" इति चोक्तेः ।

इयमेव श्रवणद्वादशी* । तत्रैकादश्यां द्वादशीश्रवणयोगे सैवोपोष्या ।

'एकादशी द्वादशी च वैष्णवमपि तत्र चेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ॥'

इति विष्णुधर्मोक्तेः । नारदीयेऽपि—

'संस्पृश्यैकादशीं राजन्द्वादशीं यदि संस्पृशेत् ।
श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥
द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि ।
स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः* ॥'

इति हेमाद्रौ मात्स्योक्तेश्च । *दिनद्वये द्वादशीश्रवणयोगेऽपि पूर्वा । निर्णयामृते त्वस्य पूर्वार्धमन्यथा पठितम्—

'द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि ।' इति ।

तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेऽपि तद्युक्तद्वादशीयोगमात्रेण विष्णुशृङ्खलं भवति । निर्णया-

---

*श्रवणद्वादशीति । अस्यां पारणाश्रवणयोगेऽपि दधि-विष्णूपवासादि कार्यम् ।

'द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः' ।

इति मात्स्यात् । तत्र एकस्मिन्नेव दिने श्रवणयोगवती शुद्धाधिका विद्धाधिका वा, तत्र न सन्देहः । *एकादश्यामित्यादि योगे इत्यन्तम् । एकादशीदिन एव एकादशीद्वादशीश्रवणयोगे इत्यर्थः । *संज्ञित इति ।

'उपोष्य तस्मिन्नहनि नरः संक्षीणकिल्बिषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥' इति,

तत्र एकादशीद्वादशीप्रयुक्तोपवासद्वयं तन्त्रेण भवति । *दिनद्वय एवेति । विद्धाधिकाया दिनद्वये श्रवणयोगे एकादशीयुता ग्राह्येत्यर्थः । 'द्वादशी श्रवणस्पृष्टा' इत्युक्तेरिति भावः । अथो-

सूतमते तु-'श्रवणस्यैकादशीद्वादशीभ्यां योग एव विष्णुशृङ्खलं नान्यथेति। यदा निशीथानन्तरं सूर्योदयावधि त्रिकलामात्रमपि श्रवणर्क्षं भवति तदाऽपि पूर्वैव। तदुक्तं तत्रैव नारदीये इमां प्रकृत्य—

'तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप।
त्रिकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः॥' इति।

योगः शिवरात्र्यादौ शिवयोग आदिः।

'द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः।
न तु सा तेन संयुक्ता तावत्येव प्रशस्यते॥'

इति मदनरत्ने मात्स्याच्च। दिवोदासीये तु—

'द्वादश्याः प्रथमपादे यच्छ्रवणं हरिवासरे।
तदा पूर्वामुपवसेत्प्रातर्नान्ते च पारणम्॥'

इत्युक्तम्। इदं तु निर्मूलत्वात्पूर्ववचोविरोधाच्चोपेक्ष्यम्। इयं बुधवारेऽतिप्रशस्ता।

'बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत्।
अत्यन्तमहती सा स्याद्दत्तं भवति चाक्षयम्॥'

इति हेमाद्रौ स्कान्दात्। यानि तु पठन्ति—

[illegible] कादशीद्वादशीयुक्तश्रवणयोग [illegible] । [illegible] निवति । [illegible] । [illegible] । [illegible] अथवा निशीथेति । [illegible] । [illegible] । [illegible] । [illegible] , [illegible] द्वादशीति । [illegible] ।

[illegible]

[illegible]

*'उत्तराषाढसंयुक्ता श्रोणामध्याद्गताऽपि वा ।
आसुरी सैव तारा स्याद्धन्ति पुण्यं पुराकृतम् ॥
उदयव्यापिनी ग्राह्या श्रोणा द्वादशिकायुता ।
विष्णुर्क्षसंयुता सा च नैवोपोष्या शुभेप्सुभिः ॥'

इत्यादीनि विष्णुधर्मस्कान्दभविष्यादिवचनानि तानि निर्मूलानि । यदपि स्मृत्यर्थसारे 'उदयव्यापिनी ग्राह्या' इत्युक्तम्, यच्च बृहन्नारदीये—

'उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते ।' इति,

तद्यदा शुद्धाधिका द्वादशी परदिन एवोदये श्रवणयोगः, पूर्वेह्नि च तद्दिने काले योगस्तत्परम् । दिनद्वये उदययोगे पूर्वैव बहुकर्मकालव्याप्तेरित्युक्तं मदनरत्ने । यदा त्वेकादश्येव श्रवणयुता न द्वादशी तदापि पूर्वैव । श्रवणद्वादशीव्रतं तु द्वादश्याः श्रवणयुक्ताया अलाभे एकादश्याश्च तद्युक्ताया लाभे तत्रैव कार्यम् ।

*'यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
एकादशी तदोपोष्या पापघ्नी श्रवणान्विता ॥'

इति मदनरत्ने नारदीयोक्तेः । यदा परैवर्क्षयुता तदा परा । तत्र शक्तेनोपवासद्वयं कार्यम् ।

'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।

लिकं तदेव स्यात् । इह तु श्रवणसंबन्धेन पूर्वापरयोरपि कालत्वादुपवासादि गुरुतरमित्यर्थः । *उत्तराषाढेति । उक्तस्थले पूर्वेत्युक्तमसङ्गतम्, उत्तराया औचित्यादित्यभिमानः । *यदा नेति । श्रवणद्वादशीप्रयुक्तमुपवासादि सर्वमप्येकादश्यां कार्यमित्यर्थः । विद्धाधिकाया अपि परदिने श्रवणयोगाभावे श्रवणयोगवती विद्धाऽपि मान्या(१) ।

---

(१) 'ग्राह्या' इति कपुस्तके पाठः ।

इति नारदीयोक्तेः। पारणं तूभयान्तेऽन्यतरान्ते वा कुर्यात्।

'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम्।'

इति स्कान्दात्।

'तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्।
पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः॥'

इति नारदीयादिति हेमाद्रिः। यद्यप्यत्र नक्षत्रमात्रान्तेऽपि पारणं प्रतिभाति, तथापि तिथिमात्रान्ते ज्ञेयम्, न त्वृक्षान्ते। तिथिमध्येऽपि—

'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः।
ऋक्षान्ते पारणं कुर्याद्विना श्रवणरोहिणीम्॥'

इति विष्णुधर्मे श्रवणान्तमात्रे पारणानिषेधात्। रोहिण्यां तु—'भान्ते कुर्यात्तिथेर्वापि' इति वह्निपुराणात् [illegible] न त्वथैवमस्तीति न भान्तोऽनुकल्प इति। मदनरत्ने [illegible] तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम्।
यामत्रयोर्ध्ववर्तिन्यां प्रातरेव हि पारणा॥'

इति ज्ञेयम्। यत्तु मदनरत्ने—'द्वादश्यां [illegible] श्रवणर्क्षं वा श्रवणान्त एव पारणं कुर्यात्।

'पारणं तिथिवृद्धौ तु द्वादशाक्षरसंख्यया।
वृद्धौ कुर्यान्मध्यदिवसे तत्र दोषो न विद्यते॥'

इति वह्निपुराणादिस्मृतम्। तत्सहकारणान्तरा [illegible]

[illegible]

श्रवणयुक्तैकादश्यां *विहितविजयैकादशीव्रतपरं *न तु श्रवणद्वादशीपरमिति मदनरत्ने । गौडास्तु श्रवणद्वादशीपरमाहुः । अत्र विधिर्मदनरत्ने विष्णुधर्मे—

*'तस्मिन्दिने तथा स्नानं यत्र क्वचन संगमे ।'

श्रमध्यपातिश्रवणद्वादशीव्रतं तु मासाङ्गं पशुपुरोडाशवदिति, तन्नु ष्टम् । न्यायादपि वचनस्य बलवत्त्वात् । मदनरत्ने इत्यरुचिः । सा । विना श्रवणरोहिणीमिति पर्युदासः रोहिणीनिमित्तके इव श्रवणनिमित्तकेऽप्युपवासे उभयान्तपक्षस्य मुख्यत्वार्थः । एवं चो-पवासेऽप्यन्यतरपक्षो गौण इति सिध्यति । अन्यथा रोहिण्यामु-ान्तपारणस्य सर्वथा निषेधुमशक्यतया वैरूप्यापत्तेरिति । श्वासम्भवे तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम् ।'

इति पाठं कल्पयन्ति केचित् । उदुरद्वाविति पाठः । वृद्धौ-कुर्यादिति पाठे वृद्धावुदुवृद्धाविरयेवार्थः । *विहितेति । 'एकादशी दा सा स्यात्' इत्यग्रिमवचनात् । *नास्तीति । तत्र तिथ्यन्तपक्ष-स्यापि सत्त्वात् । वस्तुतस्तु विजयैकादशीव्रतं भिन्नमिति ममादाव द्वादश्यास्ते विधिः'इत्यादिना पूजाप्रकारभेदस्य एषा व्युष्टिः इत्या-दिना तत्प्रयुक्तफलभेदस्यैव चाभिधानात् ।तस्मात् पारणानिषेधवद्धा-विरयेतद्विष्णुशृङ्खलं पारणापरमिति । *तस्मिन्निति । भविष्ये—

'मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता ।
सर्वकामप्रदा पुण्या उपवासो महाफलः ॥
श्रवणे सङ्गमाः सर्वे परव्युष्टिप्रदाः स्मृताः ।
विशेषा द्वादशीयुक्ते बुधयुक्ते विशेषतः ॥
सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः ।
समग्रं समवाप्नोति द्वादशद्वादशीफलम् ॥'

तथा—

'दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे।
वस्त्रसंवेष्टितं दत्त्वा छत्रोपानद्युगं च ॥
न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति ।'

मन्त्रस्तु भविष्ये घटे जनार्दनपूजामभिधाय-

'नमो नमस्ते गोविन्द बुधश्रवणसंज्ञक।
अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥
प्रीयतां देवदेवेशो मम संशयनाशनः ॥' इति ॥

वामनावतारनिमित्तोपवासस्तु व्रतहेमाद्रौ भविष्ये-

'द्वादश्यास्ते विधिः प्रोक्तः श्रवणेन युधिष्ठिर।
सर्वपापप्रशमनः सर्वसौख्यप्रदायकः ॥
एकादशी यदा सा स्याच्छ्रवणेन समन्विता।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥'

इत्युपक्रम्य—

'अथ काले बहुतिथे गते सा गुर्विणी भवेत्।
सुषुवे नवमे मासि पुत्रं सा वामनं हरिम् ॥'

इत्युक्त्वा—

'एतत्सर्वं समभवदेकादश्यां युधिष्ठिर।

वरुणासङ्गमे स्नानमुक्तं लैङ्गे—

'अतः परं तु संसेव्यं गङ्गावरुणसङ्गमम् ।' इति ।

भविष्ये—

'सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीम् ।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत् ॥
अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः ।
पादमूले तु दद्याद्वै मन्त्रेणानेन पाण्डव ॥
क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते ।

(ततो विधिवत्संपूज्य)

हिरण्मयेन पात्रेण दद्यादर्घ्यं प्रयत्नतः ।
नमस्ते पद्मनाभाय नमस्ते जलशायिने ॥
तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ।
नमः कमलकिञ्जल्कपीतनिर्मलवाससे ॥
महाहरिवपुस्कन्धघृष्टस्कन्धाय चक्रिणे ।
नमः शार्ङ्गासिबाणपाणये वामनाय च ॥
यज्ञभुक्फलदात्रे च वामनाय नमो नमः ।
देवेश्वराय देवाय देवसंभूतिकारिणे ।
प्रभवे सर्वदेवानां वामनाय नमो नमः ॥
एवं संपूजयित्वा तं द्वादश्यामुदये रवेः ।
शृङ्गारसहितं तं तु ब्राह्मणाय निवेदयेत् ॥
वामनः प्रतिगृह्णाति वामनोऽहं ददामि ते ।
वामनं सर्वतोभद्रं द्विजाय प्रतिपादयेत् ॥' इति ।

अनन्तभट्टोऽप्याह–'श्रवणद्वादश्यां जनार्दननामा विष्णुः पूज्यते।श्रवणैकादश्यां वामनावतारः' इति । श्रवणयुतशुद्धैकादश्यलाभे तु दशमीविद्धाऽपि श्रवणर्क्षयुता कार्या ।

'*दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा चेत्स्यात्सर्वकामदा ॥'

इति वह्निपुराणादित्युक्तं मदनरत्ने । पूजा च मध्याह्ने कार्या । 'अह्नो मध्ये वामनो रामरामौ' इति पूर्वोक्तवचनात् ॥

अत्रैव दुग्धव्रतं संकल्पयेत् । तदुक्तम्—'दुग्धमाश्व-

---

*दशमीति । विजयैकादशीव्रतस्य भिन्नत्वमते परेद्युः श्रवणयोगाभावे वस्यमेव न तु परेऽप्युपवास इति भावः । भागवतात्

युजे मासि' इति। अत्रेदं चिन्त्यते—दुग्धव्रते पायसादि वर्ज्यं न वेति। नेति केचित्। न हि प्रकृतिवर्जने विकारवर्जनं युक्तम्। दधिघृतादीनामपि वर्जनापत्तेः। न च यत्र प्रकृतिरसोपलम्भस्तद्वर्जनमिति वाच्यम्। मांसविकारस्यौष्ट्रदध्यादेश्चावर्जनापत्तेः। तस्माद्दध्यादिवत्पायसादि भक्ष्यमिति। अत्र ब्रूमः—यत्र विकारे प्रकृतिरसोपलम्भस्तत्प्रत्यभिज्ञा वा तत्र विकारस्यापि निषेधः। अस्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वानपायात्। यत्तु—औष्ट्रदध्यादेरनिषेधापत्तिरिति, तन्न। औष्ट्रमिति विकारतद्धितेन निषेधात्। तथा च विज्ञानेश्वरः—

'औष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकम्।'

इत्यत्र 'औष्ट्रमिति विकारतद्धितात्तक्रकूर्चिकादीनामपि निषेधः' इत्याह। नन्वेवं

'सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत्।'

इति सन्धिन्यादिक्षीरनिषेधेऽपि दध्यादिभक्षणं स्यात्। इष्टं चासम्। वचनेन परं निषेधः। तदाहापरार्के शङ्खः—

"क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः।
सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः॥" इति।

व्रतं=गोमूत्रयावकम्। तस्मात्पायसे दुग्धरसोपलम्भाद्वर्जनम्। अत एवाऽऽमिक्षायां दधिसम्बन्धेऽपि प्रत्यभिज्ञाबलात्पयोरूपत्वमुक्तं मीमांसकैः। तदुक्तम्—

'दध्न एव घनीभूतमामिक्षेत्यभिधीयते'। इति।

'दान्दिनगनीऽन्वयः' इतीत्यादि। अत्रैव ब्रह्मवैवर्तवचनम्।

"द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदेऽपि वा।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे॥"

'दध्यादिषु तु तदभावादवर्जनम्' इति ।

एवं-दध्यादिमते न तक्रादीनां निषेधः । उक्तोहेत्वभावादिति केचित् । पूर्वोक्तशङ्खवचनात्सर्ववि निषेध इति युक्तं प्रतीमः ॥ इति सुगन्धव्रतम् ॥

भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतम् । तत्र *त्रिमुहूर्त्यौदयिकी ग्राह्येति माधवः । तदुक्तम्—

'उदये त्रिमुहूर्तापि ग्राह्याऽनन्तव्रते तिथिः ।' इति

*'मध्याह्ने भोज्यवेलायाम्' इति कथायां श्रवण 'उपरि हि देवेभ्यो धारयति' इतिवद्विधिकल्पनात् ।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'

इति माधवीये वचनात् मध्याह्नव्यापिनी ग्राह्येति दिवोदासः । प्रतापमार्तण्डेऽप्येवम् । इदमेव च युक्तम् । निर्णयामृते तु घटिकामात्राऽप्यौदयिकीत्युक्तम् ।

'तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।
पौर्णमास्याः समायोगे व्रतं चानन्तकं चरेत् ॥'

इति भविष्योक्तेः ।

"मुहूर्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी ।
सम्पूर्णां तां विजानीयात् पूजयेद्विष्णुमव्ययम् ॥"

इति स्कान्दाच्चेति । *अत्र मूलं चिन्त्यम् । *अग्रेऽप्यौ

*त्रिमुहूर्तापीति । अविस्पष्टार्थः । पूजा तु म[illegible] । [illegible] । [illegible] 'उपरि हि [illegible]' [illegible] इति [illegible] । [illegible] । *अत्र मूलं चिन्त्यमिति । [illegible] । *अग्रेऽप्यौदयिकी

दर्शितत्वे पूर्वैवास्त्विति युक्तम् । (तत्त्वं तु विध्यर्थवा-दयोर्भिन्नार्थत्वे एकवाक्यत्वायोगात् 'भिन्नार्थेषु एकवा-क्यत्वात्' इति न्यायेन पूर्वा परा वा मध्याह्नव्यापिन्येव मुख्या । माधवस्तु सामान्यवाक्यान्निर्णयं कुर्वन् भ्रान्त एव । अनन्तभट्टस्य पुराणान्तरेष्वभावाद्ग्रन्थान्तरेष्व-भावाच्च वचनं निर्मूलमेवेति ॥)

अथागस्त्यार्घ्यः । तत्कालो व्रतहेमाद्रौ भविष्ये—

"कन्यायामागते सूर्ये अर्वाग्वा सप्तमे दिने ।
कन्यायां समनुप्राप्ते अर्घकालो निवर्तते ॥"

तेन उदयोत्तरमपि सप्तदिनमध्ये इत्यर्थः । यत् पाद्मे—

"आ सप्तरात्रादुदयान्वितस्य दानक्रमेतत्सफलं नरेषु ।
पापस्समाः सप्तदशाऽथ वा स्युरर्घ्यमप्यत्र वदन्ति केचित् ॥"

यमस्य=अगस्त्यस्य । उदयकालश्च दिवोदासीये उक्तः—

"उदेति याम्यां हरिसंक्रमाद्वै-
रेकाधिके विंशतिमे ह्यगस्त्यः ॥
स सप्तमेऽस्तं वृषसंक्रमाच्च
प्रयाति गर्गादिभिरभ्यधायि ॥"

अथ विधिर्विष्णुरहस्ये—

"काशपुष्पमयीं रम्यां कृत्वा मूर्तिं तु वारुणेः ।
प्रदोषे विन्यसेत्तां तु पूर्णकुम्भे स्वलङ्कृताम् ॥
कुम्भस्थां पूजयेत्तां तु पुष्पधूपविलेपनैः ।
दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरम् ॥"

पूजा च वक्ष्यमाणार्घ्यमन्त्रेण कार्या—

"प्रभाते तां समादाय यायात्पुण्यं जलाशयम् ।"

इति । यत्र परेऽह्नि न त्रिमुहूर्ता तत्र विद्धापि पूर्वा बोध्या ।

निशावसाने तां पश्यन् जलान्ते प्रतिमां मुनेः ॥
अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः ।"
मात्स्ये तु—
"अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमत्यायतबाहुदण्डम्।"
पूर्वं काशमयीत्यत्राक्तौ—
"चतुर्भुजं कुम्भमुखे निधाय धान्यानि सप्ताङ्कुरसंयुतानि।
सकाशपुष्पाक्षतशुक्तियुक्तं मन्त्रेण दद्याद्द्विजपुङ्गवाय'
धेनुं च दुग्धक्षीरवतीं च दद्यात्सवस्त्रघण्टाभरणां द्विजाय'
भविष्ये—
"विरूढैः सप्तधान्यैश्च वंशपात्रे निधापितैः ।
सौवर्णरूप्यपात्रेण ताम्रवंशमयेन वा ॥
मूर्ध्नि स्थितेन मन्त्रेण जानुभ्यां धरणीं गतः ।"
विष्णुरहस्ये—
*"अगस्त्यः खनमानेति पठन्मन्त्रमिमं मुनेः ।
अर्घ्यं दद्यादगस्त्याय, शूद्रे मन्त्रविधिस्त्वयम् ॥
काशपुष्पप्रतीकाश वह्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥
विन्ध्यवृद्धिक्षयकर मेघतोयविषापह ।
रत्नवल्लभ देवेश लङ्कावास नमोऽस्तु ते ॥
वातापी भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान्योऽसौ तस्मै नमो नमः ॥
येनोदितेन पापानि विलयं यान्ति व्याधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ॥
अगस्त्यः खनमानेति विप्रोऽर्घ्यं विनिवेदयेत् ।
राजपुत्रि महाभागे ऋषिपत्नि वरानने ॥

---

*अगस्त्य इति । "अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं

लोपामुद्रे नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ।
दत्त्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जयेत् ॥
अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्य महर्षये ।
ऐहिकामुष्मिकीं दत्त्वा कार्यसिद्धिं व्रजस्व मे ॥
विसर्जयित्वाऽगस्त्यं तं विप्राय प्रतिपादयेत् ।
अगस्त्यो मे मनस्योऽस्तु अगस्त्योऽस्मिन्घटे स्थितः ॥
अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः ।"

दानमन्त्रः—

"अगस्त्यः सप्तजन्माद्यं नाशयत्वाघशोरपम् ।
अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने ॥"

प्रतिग्रहमन्त्रो विष्णुरहस्ये—

"त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसम् ।
होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलम् ॥"

होमश्चार्घ्यमन्त्रेणाज्येन । भविष्ये—

"दत्त्वाऽर्घ्यं सप्तवर्षाणि क्रमेणानेन पाण्डव ।
ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः ॥
वैश्यो धान्यधनी स्याच्छूद्रो धनमवाप्नुयात् ॥"

बहुविस्तरमानः । तमी वर्णाद्यविदग्नः पुत्रोव सम्या देवेभ्यानिमीपां ज-
गाम"इति मन्त्रः । (१)वर्जयेन्मानवः फलमिति । अगस्त्या-
र्घ्यदानं कार्यं न कुर्यादित्यर्थः । अविक्षयत्वमोऽनागन्तव्यम् ।

१—मर्व मन्त्रो ध्रुवरसाहलार्थी द्वितीयाएके चतुर्थोध्याये । ध-
स्यायथा च भीमासापत्यावर्षेण—"अथमगस्त्यो मरुगुदा खनि-
त्रैःप्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम" इति । अथ पुत्रा-
दिकं बलं चेच्छमानः सन्, यद्वा प्रजां-भूत्यादिरूपां चेच्छन् ध्रु-
तिमतीं-द्वयहृदा महानुभावः अगस्त्यनृषा संसारं अपारदुस्तरम्
तस्मिन्तुभौ वर्णौ=वर्णाभ्यासकारौ कामं च तपश्च पुपोष । सत्या आशि-
षो देवेषु-देवेभ्यो जगाम=प्राप्तवान् । यतोऽयं महानुभावस्ततोऽस्मादस्मै
प्रदातव्यमर्घ्यः इति ।

चैत्रे च धान्यनिष्पत्तिः शूद्रश्च धनवान्भवेत् ।
पाचदायुश्च यः कुर्यात्स परं ब्रह्म गच्छति ॥"

इत्यगस्त्यार्घ्यः ॥

*भाद्रपौर्णमास्यां प्रपितामहात्परांस्त्रीनुद्दिश्य श्राद्धं कार्यम् । तदुक्तं हेमाद्रौ ब्राह्मणमार्कण्डेययोः—

*"नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्तव्यं वराहवचनं यथा ॥" इति ।
नान्दीमुखत्वं चोक्तं ब्राह्मे—
"पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ॥
तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः ।
ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ॥"

एतच्च प्रत्यब्दमित्युक्तेः पक्षश्राद्धपक्षे सकृन्महाल-

---

*भाद्रेति । भाद्री कन्यार्कयोगाभावे तद्युक्तापाभावेऽन्यां पूर्णिमायां कार्यमिति तु रामचन्द्रः, तदसत् । पर्नीपिता प्रौष्ठपदीमिति भाद्या एव पर्युदासात्कन्यार्कयोगः स्तावक इति । तदलाभेऽपि भाद्र्या एवाग्राह्यत्वात् । प्रौष्ठपदीने श्राद्धमिति शिष्टव्यवहाराच्च । अत्र पूरिश्लोचने विश्वेदेवौ कन्यानिमित्तत्वात् । *नान्दीमुखानामिति । इयं च नान्दीमुखसंज्ञा विश्वेदेवव्यापारा । वृद्धिश्राद्धीयानां तु तत्साधारणी ऊर्ध्वतनकपितृणामेव ।

'ऊर्ध्वतनास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ॥'

इत्युक्तेः ।

"नान्दीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनम् ।
पितृभ्यस्तन्मुखेभ्यश्चाऽप्रदक्षिणमिति स्थितिः ॥"

इति पराशराच्च । यथोपेत नसवमुखसंज्ञाऽप्यविदा ।

'नसवमुखसंज्ञास्तु पठन्तीया पतन्तु ते' ।

पक्षे चावश्यकमिति प्रयोगपारिजाते । *अत्र माता-
मह्या अपि कार्याः ।

"पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।"

इति धौम्योक्तेः । पितृशब्दस्य च जनकपरत्वे बहु-
वचनाविरोधेन पितृभार्यापरत्वात् । पार्विके तु वच-
नान्निवृत्तिः । तच्च जीवत्पितृकस्यान्वष्टकायां मातृश्राद्धे
तदापत्तिः । इष्टापत्तेः । अत एव स उक्तश्राद्धेषु स्वमातृ-
मातामह्योर्देयादिति मदनरत्नकालादर्शौ । एतच्च जी-
वत्पितृकश्राद्धे वक्ष्यामः । केचित्तु अजहल्लक्षणया पि-
त्रादयो यत्र तत्र मातामहास्तेनात्र नेत्याहुः । न चात्र
नाम्ना नान्दीश्राद्धधर्मातिदेशः । वैष्णवादिशब्दवद्देव-
तापरस्य कर्मनामत्वाभावात् । नापि नान्दीमुखत्वं पि-
तृविशेषणं पारिभाषिकत्वादिति दिक् । तथा निर्णय-
दीपे नारदः—

"पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ।
वर्जयित्वा प्रौष्ठपदीं यथा दर्शस्तथैव सा ॥" इति ॥

इति श्रीमीमांसकरामकृष्णभट्टात्मजभट्टकमलाकरकृते
निर्णयसिन्धौ भाद्रपदमासः समाप्तः ॥

इति वचनात् वृद्धिश्राद्धस्य नान्दीमुखश्राद्धमिति नामधेयं
च । एतेनात्र नाम्ना नान्दीश्राद्धधर्मातिदेशः प्रत्युक्तः । वि-
ष्ण्वादिशब्दवदस्य देवतापरत्वेन कर्मनामत्वाभावाच्च । नापि
पित्रादेर्नान्दीमुखत्वम् । अश्रुमुखत्वात् । अन्यच्च पारिभाषि-
कत्वाच्च । 'पूर्ववत्' इति बहुवचनात् सपत्नीकत्वादिपार्वण-
विधानं च बोध्यम् । अविरोधात् । केषाञ्चिन्मतमाह—
*अत्रेति । दिगर्थस्तु पित्रादिपितृसमुदाये पितृशब्दलक्षणास्वीका-
रापत्तिमपेक्ष्य उक्तार्थस्यासिद्धमिति अत्रेदं दूषणम् । अतोऽत्र·

मातामहा न कार्याः मापकाभावात् । न च 'पितरो यत्र पूज्यन्ते' इति वाक्यं मापकम् । तत्र हि पितृशब्दो न सपिण्डीकरणान्तश्राद्धजन्यपितृभावापन्नपरः । तथा सति—

"कर्पूसमन्वितं मुक्त्वा तत्राद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥"

इति परिशिष्टे षोडशश्राद्धपर्युदासानुपपत्तेः । तत्र भवत्रीत्या मातामहाप्राप्तेः, किन्तु जनकादिसमुदायपरः । लिङ्गसमवायन्यायात् । 'प्राणभृदुपदधाति' इति बहुवचनान्तप्राणभृच्छब्दस्य प्राणभृदप्राणभृत्समुदायार्थकत्ववत् । न चैवं तथापि षोडशश्राद्धपर्युदासानुपपत्तिः । पितृणामुद्देश्यत्वेन तद्गतसंख्याया अविवक्षितत्वात् । नापि चतुर्दश्यां मातामहप्राप्तिः । 'श्राद्धं शस्त्रहतस्यैव' इत्येवकारेण तथा दृष्टेः । न च 'पितरो यत्र' इत्यादिना तदप्राप्तावपि सर्वश्राद्धानां दर्शविकृतित्वात् "मातामहानामप्येवम्" इति वाक्याद्वा तत्प्राप्तिरिति वाच्यम् । वैकृतदेवतान्तरविधिना प्राकृतदेवताबाधात् । यत्र हि सङ्क्रान्त्यादिश्राद्धे न देवतादेशस्तत्रैव प्राकृतदेवताप्राप्तिर्न तु प्रौष्ठपद्यादिश्राद्धे इति । एवम्—

"अन्वष्टक्यं मघायां सत्यां यच्च मृतेऽहनि ।
मातुः श्राद्धं पुनः कुर्यात्पितर्यपि च जीवति ॥"

इति जीवत्पितृकस्यान्वष्टक्यश्राद्धे मातुः सपिण्डनान्तश्राद्धजन्यपितृत्वेऽपि न मातामहाः कार्याः । पितरो यत्रेत्योदरमापकत्वस्याविदितत्वादिति । विष्णुधर्मे—

'गोदाने प्रौष्ठपद्यां च पौर्णमास्यां महाफलम् ।'

मदनरत्ने मात्स्ये—

"यद्यधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ।

कन्यासंक्रमे पराः षोडश घटिकाः पुण्याः, शेषं प्राग्वत् ।
अथ महालयः । तत्र पूर्णिमाचन्द्रोदये वृद्धमनुः—
*"आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः ।
काङ्क्षन्ति पितरः क्लिष्टा अन्नमप्यन्वहं जलम् ॥"

पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदम् ॥
अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम् ।" इति ॥

ननु 'आश्विने श्राद्धं कुर्यात्' इत्यादौ आश्विनः सौर एव ।
"कन्यागते सवितरि पितृराजानुशासनात् ।
भवेत् प्रेतपुरी शून्या यावद् वृश्चिकदर्शनम् ॥"
इति कन्यासम्बन्धेन श्राद्धविधानात् । एवं नभस्योऽपि सौर एव 'मीनमेषयोर्मेषवृषयोर्वसन्तः' इति सर्वमासानां द्वैविध्येन कन्यायां भाद्रस्यापि सम्भवात् ।
"मासः कन्यागते भानावसंक्रान्तो भवेद्यदि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयम् ॥"
इति वचनादनुकल्पत्वेन तुलोक्तेश्चेत्यत्राह-*आषाढीमिति । इदं पक्षपदम् 'आश्वयुक्कृष्णपक्षे तु' इति पक्षपदं चाश्विनादेश्चान्द्रत्वे लिङ्गम् । 'मासः कन्यागते भानौ' इति तु न महालयपरमित्युक्तं प्राक् । महालयश्राद्धं च नित्यं काम्यं च ।
'आषाढ्याः पञ्चमे पक्षे यः श्राद्धं न करिष्यति ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपैष्यति ॥'
इति नागरखण्डात् ।
"शक्रध्वजनिपाताद्धो यः स्यात्पक्षस्तु पञ्चमः ।
स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते ॥
पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा ।
प्राप्नोति पञ्चमं दत्त्वा श्राद्धकामांस्तु पुष्कलान् ॥"
इति कार्ष्णाजिन्युक्तेः ।

कन्यायोगे पुण्यतमत्वमाह शाट्यायनिः—

"कन्यास्थार्कान्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते" इति ।

अत्र विशेषमाह वृद्धमनुः—

*"मध्ये वा यदि वाऽप्यन्ते यत्र कन्यां व्रजेद्रविः ।
स पक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति ॥"

तथा ब्रह्माण्डमार्कण्डेययोः—

"कन्यागते सवितरि*दिनानि दश पञ्च च ।
पार्वणेनेह विधिना श्राद्धं तत्र विधीयते ॥"

तथा च तत्रैव षोडशदिनान्युक्तानि—

"कन्यागते सवितरि यान्यहानि तु षोडश ।
क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत् ॥"

अत्र हेमाद्रिः षोडशत्वं द्वेधा व्याचख्यौ । तिथिवृद्ध्या पक्षस्य षोडशदिनात्मकत्वे श्राद्धवृद्ध्यर्थमेका पक्षे,

---

*मध्ये वेति ।

"आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पञ्चमः ।
श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा ॥"

इति आदित्यपुराणे । 'पूर्वः पक्षोपक्रमे' इति चेत्तदन्तरेऽपि पक्षस्य कन्यायोगो नापेक्षित इत्यर्थः । कन्यायोगनैयत्येन यथाश्रुतासङ्गतेः । *दिनानीति । दिनपदं चान्द्रदिनपरतया तिथिपरम् ।

'तिथिरेकेन दिवसश्चान्द्रमाने प्रकीर्तितः ।'

इति विष्णुधर्मात् । एवम् 'अहानि' इत्यत्राहःपदमपि तिथिपरम् ।

'आश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने ।'

इति वचनेऽपि दिनपदस्य तिथिपरतया व्याख्यानात् ।

भाद्रपदपूर्णिमया सहेति द्वितीयः, आश्विनशुक्लप्रतिपदा सहेति तृतीयः। *अन्त्य एव तु युक्तः।

"अहःषोडशकं यत्तु शुक्लप्रतिपदा सह।
*चन्द्रक्षयाविशेषेण सापि दर्शात्मिका स्मृता॥"

इति देवलोक्तेः। तत्र पञ्च पक्षाः। तदुक्तं हेमाद्रौ ब्राह्मे—

*"आश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं *दिनेदिने।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा॥"

दिने दिने इति पक्षपर्यन्तत्वमुक्तम्। त्रिभागहीनमिति पञ्चम्यादिपक्षः,

'षौजङ्गीं तिथिमारभ्य यावच्चन्द्रार्कसङ्गमम्।'

इति वाक्यात्। अर्धमित्यष्टम्यादिपक्षः। त्रिभागमिति दशम्यादिपक्षः। त्रिभागहीनमिति चतुर्दशीसहितप्रति-

---

अत्र तिथिहृद्धयेति पक्षो न युक्तः षोडशत्वस्य नित्यवच्छ्रवणविरोधात्। नापि पूर्णिमामाद्विक्षयेनेति पक्षः। अवरपक्षश्रुतिविरोधादत आह-*अन्त्य एवेति। *चन्द्रेति। न दृश्यते चन्द्रोऽस्यामिति व्युत्पत्त्या धात्वर्थोपस्थानार्थकतया तल्लभ्यपदार्थत्वेन शुक्लप्रतिपदोऽप्येकीकारांशापरपक्षत्वविरोध इत्यर्थः। पञ्चसु पक्षेषु षोडशतिथिपक्षः पञ्चदशतिथिपक्षयोरुक्तौ, तेषाम् दर्शयितुमाह—*आश्वयुगिति। दिनपदं तिथिपरमित्युक्तं न तु—

'अहोरात्रेण चैकेन सावनो दिवसः स्मृतः।'

इति सावनदिनपरः पक्षोपक्रमात्। नन्वेवं पक्षस्य चतुर्दशाद्यात्मकत्वे षोडशदशात्मकत्वे वा कथं पञ्चदशैव श्राद्धानीत्यत आह-*दिनेदिने इति। ह्रासे तिथिद्वयमयुक्तप्रयोगद्वयस्य तन्त्रं वृद्धौ च मध्ये एकदिनच्छेद एव प्राप्नोति गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् सकृत्करणादेव पञ्चदशश्राद्धसिद्धेः तथाऽपि 'अहरहस्त्वन्नं गच्छत्' इति वाक्याद्विच्छेदेनानुष्ठानलाभापावादाद्वैकतिथियुक्तं श्राद्-

पदादिचतुष्टयवर्जनाभिप्रायेणेति कल्पतरुः। *अत्र दि
पदं तिथिपरं वीप्सया तत्पक्षीयतिथित्वं श्राद्धप्राप
तावच्छेदकम्। तेन पञ्चदशतिथिव्यापि श्राद्धं सिद्धमि
तेन चतुर्दशीनिषेधोऽन्यकृष्णपक्षपर इति गौडाः। तन
'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये।'
इत्यादिविरोधात्। यच्च कश्चित्पूरणप्रत्ययलोपेन तृ
तीयभागहीन पष्ठ्यादिपक्षं तृतीयभागमेकादश्यादि
तदर्धं त्रयोदश्यादि, *उत्तरोत्तरं लघुकालोक्तेरिति
तन्न। *गौतमादिवचनेन मूलकल्पनालाघवात् पच
मित्यनन्वयापत्तेश्च।

मावर्तनीयम्। तथापि यस्यां तिथौ कर्मकालव्याप्तिर्दिनद्वये तत्प्र
कृतस्य श्राद्धस्याङ्गमिः एवमग्रिमपक्षेष्वपि पञ्चम्यादीति त्रिभागस्तृ
तीयो भागः पक्षस्य पञ्चदशतिथयस्तेन हीनमित्यर्थात्। एवमर्धं
पक्षस्यैव। उक्तपक्षयोः पक्षस्यैव विशेषत्वादत्रापि तदन्वयात्। पं
तृतीयो भागो दशम्यादिः। एषु पक्षेषु चतुर्दशी वर्ज्या। मतिपदा
दिवसयोरेव तद्ग्रहणेनान्यत्र तद्वर्जनप्रतीतेः। ननु नन्दादिभद्राप
हानियत्क्षान दिने दिने इत्यस्य सकृत्पक्षाभिप्रायकत्वं यद्वा
गौडानां मतमाह-*अत्रेति। *उत्तरेति।
"*नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने।
नैव नन्दादिवर्ज्यं स्यान्नैव वर्ज्या चतुर्दशी॥
[illegible]
[illegible]
[illegible]"
इति नागरखण्डादिवचनं ज्ञेयः। *गौतमादीति। अत्रि
[illegible]। एवं च [illegible] पञ्चम्यादिपक्षः, [illegible]
[illegible] *तेनैवदशम्यादिरित्यर्थः। [illegible]-

*'पञ्चम्यूर्ध्वं च तत्रापि दशम्यूर्ध्वं ततोऽप्यति ।'
इति विष्णुधर्मोक्तेः । षष्ठ्याद्येकादश्यादिपक्षावपि ज्ञेयाविति तत्त्वम् । कालादर्शेऽपि—

"पञ्चम्यादि च दर्शान्तं पञ्चम्यादि दिगादि च ।
अष्टम्यादि यथाशक्ति कुर्यादापरपक्षिकम् ॥"

पक्षादिः=प्रतिपत्, दिक्=दशमी, दर्शान्तमिति सर्वत्र । गौतमोऽपि—'अथापरपक्षे श्राद्धं पितृभ्यो दद्यात् पञ्चम्यादि दर्शान्तमष्टम्यादि दशम्यादि सर्वस्मिंश्च' इति । तथैकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखण्डे—

"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे ॥
तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवम् ।" इति ।

अत्र शक्ताशक्तपरा व्यवस्थेति प्राञ्चः । तन्न । तत्राचकपदाभावात् । *त्रयोदश्यादिपक्ष एव नित्यः । तस्यैव निन्दाश्रुतेः । प्राक्ते एवकारेण तस्यैव पञ्चमपक्षावान्तरव्यवच्छेदोक्तिः इति गौडाः । तन्न । एकस्मिन्नपीति *विरोधात् । तेन फलभूमार्थिनाऽन्यानि कार्याणीति तत्त्वम् । तत्र चतुर्दशीश्राद्धाभावे पञ्चम्यादिदशम्यादिपक्षौ । तदशक्तौ षष्ठ्याद्येकादश्यादिकौ । एवं चतुर्दश्यभावे द्वादश्यादिः । तदशक्तौ त्रयोदश्यादिरिति व्यवस्था ॥

विधवायास्तु विशेषः । स्मृतिसंग्रहे—

---

*पञ्चम्यूर्ध्वमिति । तथा च विष्णुधर्मोक्तवाक्ये स्पष्टमुक्ताः प्रतिपत्पञ्चमीषष्ठीअष्टमीदशमीएकादशीप्रभृति षट् पक्षाः, एकैकावयवतया वाक्यान्तरे योज्यमिति बोध्यम् । गौडमतमाह—*त्रयोदश्यादीति । *एवकारेण=अर्थदर्शेत्येवकारेण । *अविरोधा-

*"चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि।
स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥
ततो मातामहानां च श्राद्धदानमुपक्रमेत्।"

तथा—

'श्वश्रूणां च विशेषेण मातामह्यास्तथैव च।' इति।

अशक्तौ तु स्मृतिरत्नावल्याम्—

"स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च।
विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता॥"

विधवा स्वयं संकल्पं कृत्वाऽन्यब्राह्मणद्वारा कारयेदित्युक्तं प्रयोगपारिजाते।

दिति। सकृत्पक्ष एव नियमो नान्य इति भावः। *चत्वार इति। विधवायाः पार्वणचतुष्टयं पार्वणषट्कं पार्वणद्वयमिति पक्षत्रयम्। पक्षत्रयेऽपि आद्यान्येकोद्दिष्टानि भवन्ति। पार्वण एव तन्नियमात्। अत्रेदं बोध्यम्। विधवाया दर्शश्राद्धे पुत्राभावे तद्देवेऽधिकारः।

'अपुत्रा पुत्रवत्पत्नी पुत्रकर्म समाचरेत्।'

इति वचनात् पुत्रवदिति वतिना प्रकरणानुरोधात् श्राद्धक्रियातुल्यतोक्त्या पुत्रकर्तृकश्राद्धवदेव देवताः, उद्देश्यत्वं तु पित्रादीनां भर्तृत्वादिना तन्मातामहानां च पितृत्वादिना। यं प्रति येन रूपेण सम्बन्धिता तं प्रति तेनैव रूपेणोद्देश्यत्वात्। अत एव स्मृतिदर्पणे 'स्वभर्तृप्रभृतित्रिभ्यः' इत्यादि। भर्तृपित्रोश्च यथायोग्यं सपत्नीकत्वमपि। इदं षड्दैवत्यं दर्शश्राद्ध एव। स्वपितरि जीवति तु द्वारलोपात्पार्वणलोपः। तीर्थमहालयादिश्राद्धे तु मृतश्वशुरादेः स्वश्वश्र्वादिपार्वणमपीति नवदैवत्यम्। तच्च कृताकृतमित्येके। केचिन्मृतमातृकायाः स्वमात्रादिपार्वणमपीति द्वादशदैवत्यमाहुः। अपरे स्वमातामहपार्वणेन पञ्चदशदैवत्यमाहुः। अन्ये स्वमातामह्यादिपार्वणेन अष्टादशदैवत्यमाहुः। अत्र सर्वत्राप्यजीवने द्वारलोपः। एवं

*सकृन्महालये च वर्ज्यतिथ्याद्युक्तं पृथ्वीचन्द्रोदयप्रयोगपारिजातादिषु । वसिष्ठः—

"नन्दायां भार्गवदिने *चतुर्दश्यां त्रिजन्मसु ।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥"

*जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि । वृद्धगार्ग्यः—

"प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा ।

च चत्वारः पार्वणा इति । इत्थं च विशेषवचनानि च निर्मूलं प्रतिभाति । एकोद्दिष्टानि न तीर्थमहालयादौ स्वतन्त्रवचनाभावात् पुत्रवदन्त्येव । यत्तु—

"भर्तुः श्राद्धे तु या नारी मोहात्पार्वणमाचरेत् ।
न तेन तृप्यते भर्ता स्वयं च नरकं व्रजेत् ॥" इति,

तत्स्वाहे एकोद्दिष्टपक्षप्रशंसार्थं न तु सर्वथा पार्वणनिषेधार्थमिति । *सकृन्महालये इति । कृष्णपक्षमात्राव्यापिनिमित्तकश्राद्धं हेमाद्रिमते आवृत्त्या, विवेचनकारादिमते तु सकृत् । यत्र यद्यपि काम्ये श्राद्धे याज्ञवल्क्येन चतुर्दशी वर्जिता तथाऽपि नित्येऽपि तत्र 'नभस्यस्यापरे पक्षे' इति कार्ष्णाजिनिना भाद्रपदापरपक्षे चतुर्दशीवर्जननिषेधादन्यत्र प्रतिपदादिपक्षे तद्वर्जनावगमात् । दशम्यादिपक्षे च—

"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥"

इति मनुवचनात् सुतरां च पञ्चम्यादिप्रतिपदादिपक्षयोस्तद्वर्जनावगमात्र कृष्णपक्षसामान्य एव तद्वर्जनं नन्दादिके च तद्वर्ज्यम् । इदं च चतुर्दशीनन्दादिवर्जनं भाद्रपदकृष्णपक्षेऽपि तद्त्करणपक्षे तदप्रवृत्तेर्निर्बीजत्वात् । पक्षान्तरेषु तु न नन्दादि वर्ज्यं संख्यापूरणाभावात्, षोडशपञ्चदशपक्षयोस्तु न चतुर्दश्यन्तरेः । *चतुर्दश्यामिति । त्रयोदश्यामिति विवेचने । *जन्मत्रयेति ।

यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति ॥"

प्राजापत्यं=रोहिणी, पौष्णं=रेवती, पित्र्यं=मघा। अन्यान्यपि प्रत्यरादीनि तत्रैव ज्ञेयानि। केचित्तु—

"नन्दाश्वकामरव्यारभृग्वग्निपितृकालभे ।
गण्डे वैधृति*पाते च पिण्डास्त्याज्याः सुतेप्सुभिः॥"

इति सङ्ग्रहात्। नन्दाः=प्रतिपत्षष्ठ्येकादश्यः, अश्वाः=सप्तमी, कामः=त्रयोदशी, आरो=भौमः, भृगुः=शुक्रः, अग्निभं=कृत्तिका, पितृभं=मघा, कालभं=भरणी, अत्र पिण्डास्त्याज्या इत्याहुः। तत्र*मूलं मृग्यम्। एतच्च सकृन्महालयविषयम्।

"सकृन्महालये काम्ये पुनः श्राद्धेऽखिलेषु च।
अतीतविषये चैव सर्वमेतद्विचिन्तयेत् ॥"

इति पृथिवीचन्द्रोदये नारदोक्तेः।

अस्यापवादो हेमाद्रौ पृथ्वीचन्द्रोदये च—

आत्मभार्यापुत्राणां जन्मभानीति। जन्मदशमैकोनविंशतिभानीति रघुनाथः। एवञ्च—

"भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥"

इति स्मृत्यन्तरे पिण्डदानपदं श्राद्धोपलक्षणं बोध्यम्। अन्ये पिण्डदाने कालविशेषनिषेधास्तु प्रेतकृत्यविषया इति विवेचने। मत्स्यराद्रीयादिना त्रिपादादयः। एतत्प्रेतकृत्यविषयमित्यन्ये। *पाते इति। पातमरण्यादावपि सकृन्महालये पिण्डदानं कार्यम्। पातादिनिमित्तकश्राद्ध एव नाष्टिषेधात्। 'अपापाते भरण्यां च' इत्यग्रिमवचनादिति बोध्यम्। *मूलं मृग्यमिति। सप्तमीरविभौमभरणीगण्डवैधृतिव्यतिपातेष्विति मयूखः। पुनःश्राद्धे=भाद्रस्यापरपक्षे क्रियमाणे श्राद्धे। *अखिलेषु=नान्दीमुखादिश्राद्धेषु। तत्र फाल्गुन्व

'अमापाते भरण्यां च द्वादश्यां पक्षमध्यके ।
तथा तिथिं च नक्षत्रं वारं च न विचारयेत् ॥'

पराशरमाधवीये मदनपारिजातादिषु चैवम् । निर्णयदीपिकायां तु–*'पितृमृताहे निषिद्धदिनेऽपि सकृन्महालयः कार्यः' इत्युक्तम् ।

'आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः ॥
तस्य संवत्सरं यावत्सन्तुष्टाः पितरो ध्रुवम् ॥'

इति नागरखण्डोक्तेः ।

'या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते ।
सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः ॥
तिथिच्छेदो न कर्तव्यो विनाऽशौचं यदृच्छया ।
पिण्डश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत् ॥
अशक्तः पक्षमध्ये तु करोत्येकदिने यदा ।
निषिद्धेऽपि दिने कुर्यात्पिण्डदानं यथाविधि ॥'

इति कात्यायनोक्तेश्च । *अत्र मूलं चिन्त्यम् ।

तथा पक्षश्राद्धकरणेऽपि न नन्दादिषु पिण्डनिषेध इत्याह पराशरमाधवीये कार्ष्णाजिनिः—

'नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने ।
नैव नन्दादि वर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ॥'इति।

अत्र श्राद्धमित्येकवचनात् *दिने दिने इति वीप्साव-

रसम्भवात् । *पितृमृताह इति । शिष्टाचारसिद्धोऽयं पक्ष इति रघुनाथः। नन्वेवं 'नैव निन्द्या चतुर्दशी' इति चतुर्दशीग्रहणं वर्जयित्वा चतुर्दशीमिति तन्निषेधश्चेति विकल्पः स्यादित्यत आह–*अत्रेति । एकेति । प्रकरणानामिति च्युत्पत्त्या अत्यन्तसंयोगार्थक-

शाच सोमयागवदेकस्याभ्यासेन*कप्रयोगपरमिदम्। अत

द्वितीयातश्च एकत्वविशिष्टश्राद्धस्य भाद्रपदापरपक्षीयतिथित्वनियमो लभ्यते। ततश्चतुर्दशीलाभाचद्वर्जनं पक्षान्तरम्। न च—

'स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति।'

इति दर्शनात्संख्यया श्राद्धानां भेदो दुर्वारः। तत्र च काभ्यासः?। 'नैव निन्द्या चतुर्दशी' इति च चतुर्दशीग्रहणार्थमिति वाच्यम्। संख्याया अनुत्पत्तिवाक्यगतत्वात्। वचनस्यैकदेशकन्यासम्बन्धमात्रेण सकलपक्षपूज्यत्वमात्रप्रतिपादकत्वेनोत्पत्तिविधित्वासम्भवात्। श्राद्धषोडशकमिति द्वितीयानिमित्तभूतकर्मप्रवचनीयप्रतियोगेन श्राद्धानामुद्देश्यत्वप्रतीतेश्च पक्षरूपकालविधौ तत्सम्बन्धित्वेनोपादेयानामपि कर्मणामनुवाद्यत्वे बाधकाभावात्। 'यदि ब्राह्मणो यजेत' इत्यादौ हि स्वरूपेण यागस्योपादेयतयाऽनुवाद्यत्वं दूषितमतो न तद्विरोधः। तस्मात् 'नभस्यस्यापरे पक्षे' इति श्राद्धोत्पत्तिविधौ सुख्यायुक्ततिथिसमुच्चयेन यावत्तिथिसिद्धानामभ्यासानां श्राद्धषोडशमिति संख्येत्यर्थः। यद्यपि पक्षस्य पञ्चदशतिथ्यात्मकत्वात् कृष्णपक्षसामान्येऽपि प्रतितिथि श्राद्धावृत्तिः प्राप्नोति न तु सकृत्करणम्, तथापि तत्र पक्षस्याखण्डस्यैवायोगव्यापृत्वाऽङ्गत्वम्, अयनर्तुमासादिविधिवत्, न तु स्वरूपेण तिथीनाम्। अत एवेदं कर्मास्मिन्नयनेऽस्मिन्नृतावस्मिन्मासेऽस्मिन्पक्षे इति सम एव व्यपदेशः तस्य सकृत्करणेऽप्याहतः। महालयापरपक्षे तु यावन्निध्यभ्यास इति विशेषे बीजमाह—*दिने दिने इति।*एकप्रयोगेति। यत्तत्र हेमाद्रेरन्यदिने दक्षिणादानं तदशाच्च पात्रिकमिति मतं, तदयुक्तम्। निमन्त्रणादिविसर्जनान्तश्राद्धप्रयोगस्यैवावृत्तेः कालस्य प्रयोगानुबन्धत्वेन तत्समुच्चयवशात्प्रयोगावृत्तेरेवौचित्यात्। किञ्च दक्षिणादानमात्रस्यैव कुतः सकृत्करणं प्रधानमात्राभ्यासोपगमे सर्वेषामपि प्रधानपूर्वोत्तरभाविनामङ्गानां प्राधान्यस्यैवानां चाभ्यासस्यैवौचित्यात्।

'प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम्' ।'
इति याज्ञवल्कीयं प्रयोगभेदपरं न तु पञ्चम्यादिपक्ष-
विषयम् । 'प्रतिपत्प्रभृतिषु' इति विशिष्योक्तेः । निर्णय-

र्वे निमन्त्रणादिविसर्जनान्तश्राद्धप्रयोगस्य भेदे यदि ब्राह्मणा-
भस्तदाऽस्तु तैरेव ब्राह्मणैः सः ।

'कुशा दर्भोदयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः ।
न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः ॥'

इति ब्राह्मणानां विनियुक्तविनियोगाविरोधात् । वरणमरणकरे तु
मन्त्रणदक्षिणादाने प्रतिश्राद्धमावर्तनं भिन्नं पदार्थानुष्ठाने । अत एव
सधाद्धार्थे ब्राह्मणैः सह सकृदेवोपसंवादेऽपि तेषामार्त्विज्येऽन्या-
न्तरं स्यागोऽन्येषामुपादानम् ।

'निमन्त्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य च ।
देहे पितृषु तिष्ठन्सु नाशौचं विद्यते क्वचित् ॥'

इति वाक्यस्य श्राद्धोपनिमन्त्रणावच्छेदेनावगतेः । प्रयोगभेदश्च-
च सम्पूर्णफलजनकत्वं सापेक्षादिदोषवत् । 'प्रतिपदि महा-
लयापरपक्षश्राद्धं करिष्ये' 'द्वितीयायां महालयापरपक्षश्राद्धं करिष्ये'
तृतीयायां महालयापरपक्षश्राद्धं करिष्ये' इत्यादिवनिर्दिश्य सङ्क-
ल्पभेदादेव वाक्यभेदाच्चान्तरा प्रतिपन्नाविभवेन केनचिद्व्यवधानसं-
ऽपि महालयश्राद्धं पञ्चन्तरा श्राद्धकर्तुस्तत्कालीनवशात्, यद्वा 'श्राद्धे
कपरिक्रिया' इत्युक्तयुक्त्यमारम्भाभावान्नाद्वन्वाधावाच्च 'श्राद्धे
ध्रुवकं नास्ति' इत्यवगमनेनानन्तराभावात् प्रायः श्राद्धयोगः
स्यानुष्ठानः । न चैवं गायत्र्यादिदोषपर्यवसानमन्तरायोर्वयानं यात्र-
विद्योपदर्शितंपरतोगर्भव्ययोऽनुष्ठानं न स्यादिति वाच्यम् । तद-
'वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनाः ।'
इत्यधिकारार्थविषयत्वात्तदनुष्ठानोपपत्तेः । न च यथा कृच्छ्रे
[illegible]

-दीपे मदनपारिजाते चैवम्। *अन्यकृष्णपक्षपरं या
ल्कीयम्। एतत्परत्वे नैवनिन्द्याचतुर्दशीविरोधात्
गौडाः। तन्न—

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये।'

इति विरोधात्। तत्त्वं तु—

मेव दर्शानुष्ठानम्। तथा प्रकृते वृद्धिपर्यन्तश्राद्धप्रयोगाणामव
पातात्पूर्वमेवानुष्ठानं स्यादिति वाच्यम्। तत्राग्निहोत्रहोमदर्शे
र्वाचनिकत्वादिह वचनाभावात्। आशौचमध्ये श्राद्धप्रयोगाण
करणे च कृतानां प्रयोगाणां न फलम्। सहकार्यन्तराभावात् ए
देशादेव फलस्य कल्पयितुमशक्यत्वाच्च। एवंविधस्थले चाश
चापगमे—

ध्यम्।

दिति अभ्यासमात्रेण दृष्टान्तः। तत्र प्रधानस्वरूपानुबन्धभूतदेवत
समुच्चयवशात् प्रधानस्यैवावृत्तेः। प्रधानमात्रावृत्तिश्च देवतादिसमु
च्चयकृता सोमयागग्रहयज्ञादिषु, उत्पन्नगतसंख्याकृता वा एकाद
शप्रयाजलक्षहोमकोटिहोमादिषु; प्रकृते तु तयोरेकविधाऽपि न सा
किन्तु कालवशात्प्रयोगावृत्तिरेव। सायंप्रातरग्निहोत्रहोमदर्शपौर्णमा
सिकामेयादीनामिवेति विशेषः। याज्ञवल्कीयं पञ्चम्यादिपक्षविषय
मिति पाठः। यद्यपि याज्ञवल्कीयं काम्यश्राद्धपरमित्यग्रे स्पष्टम्,
तथापि 'नैव निन्द्या चतुर्दशी' इति कार्ष्णाजिनिज्ञापितं तत्मदर्श
तच्छब्देन ग्राह्यम्। तत्पञ्चम्यादिपक्षविषयमित्यर्थः। याज्ञवल्कीयं
प्रयोगभेदपरम्, न तु पञ्चम्यादिपक्षविषयम्। प्रतिपत्प्रभृतिष्विति
विशिष्योक्तेरिति पाठान्तरम्। काम्यश्राद्धप्रकरणस्थं याज्ञवल्कीयं
कृष्णपक्षश्राद्धस्य सकृत्कर्तव्यपरं न तु महालयस्य पञ्चम्यादिपक्षपर-
मिति तदर्थः। आश्विनापरपक्षे कस्मिन्नपि पक्षे चतुर्दशीवर्जनं नास्ति
इति मतं निरस्यति-*अन्यकृष्णपक्षपरमिति। केचित्तु—

*'तिथिनक्षत्रवारादिनिषेधो न तदाश्रयः।
न श्राद्धे नाशितव्यं स्यात्तत्तदनुपद्रुते पार्वो ॥'

इति दिवोदासीये पृथ्वीचन्द्रोदयधृतसंग्रहान्तरे

'कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्।'

इति मनूक्तचतुर्दशीवर्जनं दशम्यादिपक्षे। अन्यथा महालयश्राद्धगताः षोडशसंख्या व्याहन्येत। अत एव 'नैव निन्द्या चतुर्दशी' इत्यस्यापि संगतिरित्याहुः। वस्तुतस्तु—

'शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते।'

इति वचनादेकवाक्यतया शस्त्रहतानां देवतात्वविधानाच्चतुर्दश्यां लुप्यते। यथाऽभ्युदयेष्टौ मरुद्देवत्ययागादेवतान्तरविधानाल्लोपो-पपादनः। मानवकारणोक्तिर्निर्णये अपि शस्त्रहतपितृकं प्रत्येव तदुच्छेदेन। मानवे दशम्यादावित्यादिपदेन पक्षान्तराणामपि ग्रहणम्। जीवत्पितृकाणामेकोद्दिष्टकाऽपावाद्यत्वात् सपिण्डितदुर्मरणमृतपित्रादि-ष्विव शस्त्राद्यहतपितृकस्यापि मातामहादिकश्राद्धेन श्राद्धगता षोडशसंख्योपपद्यते। अतो देवताविरहेण चतुर्दशीश्राद्धं लुप्यत एवेति युक्तमुत्पश्यामि। तत्र स्थिति कश्चित्पाठः। *तिथीति। तिथ्यादौ पिण्डदानादिनिषेधो 'नन्दायां भार्गवदिने' इत्यादिकः। तन्निमित्ते=नन्दादिनिमित्तके। अनुपद्रुते=नन्दादिसम्बन्धेन कृते महालयादौ नेत्यन्वयः। यद्वा नन्दादेर्निमित्त इत्येवार्थः। 'नन्दायां भार्गवदिने' इत्यादिपुत्रवद्गृहिणो निषेधो नन्दादिनिमित्तक एव न तु नन्दादौ पञ्चम्यादिपक्षेण क्रियमाणे महालये इत्यर्थः। *पक्षान्तरे इति। कृष्णपक्षान्तरे इत्यर्थः।

'न नन्दासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु।
रेवत्यां च मघायां च कुर्यादापरपाक्षिकम् ॥'

इति नारदसंहितावचनात्। एतच्च नन्दास्वकामेष्वपि आपरपाक्षिकपरमेव प्रकरणत्वात्। नन्वेवं सकृन्महालयेऽपि 'नन्दादि-

च ज्ञेयः। *सकृन्महालये तु वचनान्निषेधः। अन्यत्र *न कोऽपि निषेधः कार्ष्णाजिनिस्मृतेरिति। *अतो *नन्दादौ सपिण्डकश्राद्धे पुत्रवतोऽप्यधिकारः। अत्रिरपि—

'महालये क्षयाहे च दर्शे पुत्रस्य जन्मनि।
तीर्थेऽपि निर्वपेत्पिण्डान् रविवारादिकेष्वपि॥'

*पूर्वोक्तनन्दानिषेधस्तु *मृताहातिक्रमे सकृन्महालये*पौर्णमास्यादिमृतश्राद्धे तन्निमित्ते च ज्ञेयः। यत्तु स्मृत्यर्थसारे—

'विवाहव्रतचूडासु वर्षमर्धं तदर्धकम्।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥' इति।

तस्यात्रापवादो दिवोदासीये बृहस्पतिः—

'तीर्थे संवत्सरे प्रेते पितृयागे महालये।

निषेधो न स्यात्तस्य नन्दाद्यनिमित्तकत्वादत आह—*सकृदिति। *अन्यत्र=पञ्चम्यादिप्रभृतिपक्षेषु। *न कोपीति। पञ्चदशषोडशपक्षयोरेव चतुर्दशीग्रहात्तदन्यपक्षे तन्निषेधः स्मर्तव्यः। एतावता प्रथममतमुपपादितम्। इदानीं निर्णयदीपमनुरुध्याह—*अत इति। *नन्दादाविति। पुत्रगृहिणो निषेधस्य नन्दादिनिमित्तश्राद्ध एव मासिमहालयनिमित्तके तदभावादित्यर्थः। सकृन्महालयेऽपीति शेषः। एतेन 'तिथिच्छेदो न कर्तव्यः' इति युक्तिर्दत्ता। महालये इति सामान्येन उपादानात्सकृन्महालयेऽपि प्रवृत्तेरिति भावः। एवं सति सकृन्महालये इत्यस्य को विषय इत्यत्राह—*पूर्वोक्तेति। *मृताहेति। केन चिद्धेतुना मृताहस्य सकृन्महालयकालस्यातिक्रमे इत्यर्थः। *पौर्णमास्यादीति। पौर्णमास्यां मृतस्य महालये तिथिर्नास्ति अतः तस्य सकृन्महालयः नन्दादिनिषिद्धकालं विहाय कस्याञ्चित्तिथौ कार्य इत्यर्थः। आदिना चतुर्दशीग्रहः।

पिण्डदानं प्रकुर्वीत*युगादिभरणीमघे ॥
महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सदा ॥' इति ।

निर्णयदीपे तु नन्दादिनिषेधः प्रत्यहं भिन्नश्राद्धविषयः । षोडशाहव्यापिश्राद्धप्रयोगकरणे तु प्रत्यहं पिण्डदानं कार्यमेवेत्युक्तम् । तदयमर्थः सम्पन्नः—षोडशाहव्यापिश्राद्धविषये न पिण्डनिषेधः । मृताहे सकृन्महालयेऽपि तथेति केचित् ; तथापि निषेधस्तु युक्तः, प्रत्यहं श्राद्धभेदेऽपि व्यतीपातादौ यथा । अन्यत्र *मृताहातिक्रमे महालये च पिण्डनिषेध इति ।

संन्यासिनां तु द्वादश्यां श्राद्धं कार्यम् ।
*'यतीनां च वनस्थानां वैष्णवानां विशेषतः ।
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः ॥'
इति पृथ्वीचन्द्रोदये वृद्धहारीतोक्तेः ।

अत्र पक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः—
'हंसे कन्यास्थे वर्षासु शाकेनापि गृहे वसन् ।
पञ्चम्योरन्तरं दद्यादुभयोरपि पक्षयोः ॥'

आश्विनकृष्णशुक्लपञ्चम्योर्मध्य इत्यर्थः । *तत्राप्यसम्भवे भविष्ये—

तस्मिन्निमित्ते=महालयनिमित्ते । पितृयागे=पित्र्येष्ट्याम् । *युगादीति । सति सप्तमी, मृताहे इत्यधिकरणसप्तमी, तथा च न पिण्डनिषेधः । 'अमावास्ये' इत्युक्तेः । एवं च श्राद्धभेदे कदाचित्सपिण्डं कदाचिद्पिण्डमित्यशेषाविरोधो ध्येयः । *अन्यत्र=अपरपक्षे पार्वणमात्रादिप्रतश्राद्धे वा । *मृताहेति । सकृन्महालये इति शेषः । *यतीनां चेति । सकृन्महालये नियमः । तेन तेषां पक्षान्तराण्यपि भवन्त्येव । *तत्राप्यसम्भवे इति । आश्विनशुक्लपञ्चम्यनन्तरं कस्मिंश्चिद्दिने

'येयं दीपान्विता राजन्ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालये ॥'

*तत्राप्यसम्भवे भारते—

श्राद्धस्याकरणे तुलासंक्रान्तिं यावत् कस्मिंश्चिद्दिने, तत्राप्यसम्भवे वृश्चिकसंक्रान्तिं यावत् ।

"न ददाति नरः श्राद्धं पितॄणां चन्द्रसंक्षये ।
क्षपिताशाः परीताङ्गाः पितरस्तस्य दूषिताः ॥
प्रेतपक्षं प्रतीक्षन्ते गुरुणाच्छासमन्विताः ।
कर्षकाः जलदं यद्वद्दिवानक्तमतन्द्रिताः ॥
प्रेतपक्षेऽप्यतिक्रान्ते यावत्कन्यागतो रविः ।
तावच्छ्राद्धं प्रयाऽछन्ति दत्तं वै पितरः सुतैः ॥
ततस्तुलागतेऽप्यर्के सूर्ये वाञ्छन्ति पार्थिव ।
श्राद्धं स्ववंशजैर्देयं क्षुत्पिपासासमाकुलाः ॥
तस्मिन्नपि व्यतिक्रान्ते काले वृश्चिकगे रवौ ।
निराशाः पितरो दीनास्ततो यान्ति निजालयम् ॥
मासद्वयं प्रतीक्षन्ते गृहद्वारं समाश्रिताः ।
वायुभूताः पिपासार्ताः क्षुत्क्षामाः पितरो नृणाम् ।
यावत् कन्यागतः सूर्यस्तुलास्थश्च प्रतीक्षते ॥

इति नागरखण्डे कन्याया[illegible] तुलायाः स्फुटमनुकल्पत्वोक्तेः । तत्र दीपावल्यां [illegible] । पञ्चदशी=दर्शितामावास्या । तत्र 'दीपमाला न कर्तव्या' इति चतुर्दीपदानविधानात्, न तु प्रा[illegible] । तत्र दीपदानविधानेऽपि [illegible] अमावास्यायां [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible]=[illegible], यथा दीपावलि[illegible] ।

'यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः ।
शून्यं प्रेतपुरं तावद्वृश्चिकं यावदागतः ॥'

ब्राह्मे—

'वृश्चिके *समतिक्रान्ते पितरो दैवतैः सह ।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम् ॥'

यत्तु जातूकर्ण्यः—

'आकाङ्क्षन्ति स्म पितरः पञ्चमं पक्षमाश्रिताः ।
तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम् ॥'

इति, तत्फलातिशयप्राप्तिपरम् । 'कन्यां गच्छतु वा न वा' इति तुरीयपादे वा पाठः । तेन कन्यायोगो प्राशस्त्यमात्रम् । अतः श्राद्धविवेकोक्तं श्राद्धद्वयं ज्ञेयम् । इदं च श्राद्धमन्नेनैव कार्यं नाऽमाद्यादिना ।

'सूनार्द्धं च सपिण्डं च मघाश्राद्धं महालयम् ।
आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ॥'

इति स्मृतिदर्पणे गालवोक्तेः ।

अथात्र देवताः । सङ्ग्रहे—

'ताताम्बात्रितयं, सपत्नजननी, मातामहादित्रयं सस्त्रि, स्त्रीतनयादि, तात-जननी-स्व-भ्रातरः सस्त्रियः । ताताम्बात्मभगिन्यपत्यधवयुक्, जायापिता, सद्गुरुः,

---

†मङ्गत्तरतुलादीनां तदनुकल्पत्वात् । *दिवाकर इति ।

'तावच्छ्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तदा ।'

इत्युत्तरार्द्धे ब्राह्मपाठानुसारेण रवेः कन्यातुलयोः क्रमावस्थानात् क्रमाच्छ्राद्धस्य कालः स्यादित्यर्थः । *समतिक्रान्ते=गते वृश्चिके महालयश्राद्धं लुप्यते मोहादिना तत्करणेऽपि कर्तुः प्रत्यवायानुसाराद् इत्यत्र तात्पर्यम् ।

शिष्यास्ताः पितरो महालयविधौ, तीर्थे, तथा ऽतर्पणे।

ऽतर्पणे इति । तर्पणस्य मध्याह्न एव मुख्यः कालः कात्यायनादिसूत्रे माध्याह्निकादिकर्मसु तत्पाठात् ।

"स्नानं माध्याह्निकं कृत्वा सन्ध्याकर्म निरर्सं च ।
ब्रह्मयज्ञं विधायाथ गृहमेत्याचरेत्परान् ॥"

इति आत्रेयवाक्ये मध्याह्ने तदुक्तेश्च । ब्रह्मयज्ञाङ्गं च तर्पणम् ।

'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।'

इति वाक्यात् मध्याह्नसंध्यानन्तरं कार्यम् ।

"उपास्य विधिवत्संध्यामुपस्थाय च भास्करम् ।
गायत्रीं शक्तितो जप्त्वा तर्पयेद्देवताः पितॄन् ॥"

इति वृद्धपराशरोक्तेश्च, इति अन्यत्र विस्तरः ।

यत्तु तर्पणं प्रकृत्य—

"तस्मात्स्नात्वैव कर्तव्य[illegible] ।
पुष्यते ब्राह्मणः कुर्वन् विश्व[illegible] च ॥" इति,

तत्र सदाचारस्य [illegible] ।

"अहरागमनादौ पितॄः पुत्रो दद्यात् जलाञ्जलीन् ।
द्वितीये तु यथो देव तृतीये जलमेव च ॥"

इति [illegible] ।

यत्तु '[illegible] स्नानोदकात् [illegible] तर्पणं कुर्यात् तत्र मध्याह्ने स्नानाऽकरणेऽपि पुनस्तर्पणं कार्यम् । [illegible] [illegible] । [illegible] प्रातः स्नाने तु तर्पणं कृत्वा पुनस्तत्र कार्यम् । [illegible] । मध्याह्नस्नानस्य [illegible] पुनः कार्यम्'इति, तन्न । [illegible] [illegible] । [illegible] मानाभावात् । [illegible] । [illegible]—

"[illegible] तर्पणं तु [illegible] ॥"

अस्यार्थः—मातृत्रयी=पितृत्रयी । अम्बात्रयी च । स्मृत्यर्थसारेऽपि—'महालये मातृश्राद्धं *पृथक् प्रशस्तम्' इति । अत्र विशेषः स्मृतिदर्पणे गालवः—

*'अनेका मातरो यस्य श्राद्धे चापरपाक्षिके ।
अर्घ्यदानं पृथक्कुर्यात्पिण्डमेकं तु निर्वपेत् ॥'

जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्व-

वर्णानामिति न कर्मषष्ठी । सवर्णेभ्यो जलं दद्यात् । 'सवर्णेभ्य एव च' इति पौराणयाज्ञवल्क्यात् । एतच्च मातापितृभ्यतिरेकेणेति माधवः । जीवत्पितृकस्यापि तर्पणं भवत्येव । 'जीवत्पितृकोऽप्येता-न्' इति कात्यायनोक्तेः । एतान्=देवर्षिदिव्यपितृसनकादि-मनुष्यान् । पितुर्जीवनेन तर्पणाधिकारात् ।

संन्यस्तपितृकादौ—

"येभ्य एव पिता दद्यात्तेभ्य एव प्रदापयेत् ।"

इति वचनात् तस्य । तीर्थेऽप्येतत् जीवत्पितृकश्राद्धवत् । मातृमरणेऽपि न तर्पणम्, उद्धार इत्यादिवत् प्रतिप्रसवाभावात् 'स-पितुः पितृकृत्येषु' इति निषेधाच्च । कौस्तुभमिति ।

"अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा ।
महालये गयायां च सपिण्डीकरणात्पुरा ॥
मातुः श्राद्धं सुतः कुर्यादन्यत्र पतिना सह ।"

इति वाक्यात् 'नवदैवतमत्रहम्' इति वचनाच्च । *अनेका-मातर इति । सापत्नमातुर्मात्रा सह तन्त्रेण द्विपितृकश्राद्धवदित्य-र्थः । इदमप्ययुक्तम् । यत इदं वचनमन्वष्टक्य एव परत्वं न तु तद्भिन्ने महालयादावपि सद्भावे मातृश्राद्धानन्तरं सापत्नमातुरुक्तेः । जीवदजीवन्मातृकयोः प्रकारभेदानौचित्याच्च । अस्माकं तु प्रथ-माऽपि सापत्नमातुरेकोद्दिष्टमेवेति तत्पक्षेदात् । अविभक्तत्वेऽप्यन्त-

णम् । श्राद्धदीप*कलिकायां तु पार्वणमुक्तम् ।

'अन्वष्टक्यं च यन्मातुर्गयाश्राद्धं महालयम् ।
पितृपत्नीषु च श्राद्धं कार्यं पार्वणवत्स्वयम् ॥'

इति वृद्धमनूक्तेः । सपत्नीति मातामहानां सपत्नीकत्वेपि विभवे सति मातामहीनां पृथक्कार्यम् ।

'महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
ज्ञेयं द्वादशदैवत्यं तीर्थे प्रोष्ठे मघासु च ॥'

इति निगमोक्तेः । हेमाद्रिमते त्वत्र नवदैवत्यमेव ।

'महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
नवदैवत्यमत्रेष्टं शेषं षाट्पौरुषं विदुः ॥'

इति विष्णुधर्मोक्तेः । तातभ्राता=पितृव्यः, जननीभ्राता=मातुलः, तत्स्त्रियः=पितृव्यस्त्रीमातुलानीभ्रातृजायाः ।, पितृष्वसृमातृष्वसृस्वभगिन्योऽपत्यभर्तृयुक्ताः । तेन सापत्यायै सधवायै इति प्रयोगो ज्ञेयः । एतासु सर्वासु न तत्पत्यादेर्दानम् । द्वारलोपात् । जायापिता=श्वशुरः ।

षम् । *कलिकायां त्विति । तुनाऽरुचिः

"सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।
पितृव्यभ्रातृमातॄणामेकोद्दिष्टं न पार्वणम् ॥"

इत्यनेन विरोधात् । तस्मात् 'पितृपत्नीषु च' इत्यत्रान्वष्टक्यादेर्नान्वयः किं तु श्राद्धमित्यस्याऽऽब्दिकं श्राद्धमित्यर्थात् । तच्च ज्येष्ठापरम् । आब्दिकं प्रकृत्य—

'पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्वणं भवेत् ।'

इति वचनात् । यद्वा कलिकामते सर्वासामेवाब्दिकं पार्वणमिति । वस्तुतस्तु कलिकावचनं निर्मूलमिति । 'प्रोष्ठे' इत्यादिसविसर्ग्यौ तत्र षड्दैवत्यस्यैव भावात् ।

मते त्विति तुनाऽरुचिः । विभवे द्वादशदैवत्यन्तदभावे ष

रूप्यत्रोपलक्षणा । अत्र *मूलं स्मृतिचन्द्रिकायां ज्ञे-
। अत्र पार्वणैकोद्दिष्टयोर्व्यवस्थोक्ता हेमाद्रौ पुरा-
न्तरे—

*'उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः ।
श्वशुरभ्रातृनप्तृपुत्रर्त्विक्शिष्यपोषकाः ॥
भगिनीस्वामिदुहितृजामातृभगिनीसुताः ।
पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा ॥

त्वयाविति व्यवस्थासम्भवात् । 'सस्त्रियः' इतिपाठः 'नस्त्रियः'
पाठो न युक्तः, पितृव्यादेः सपत्नीकत्वस्यैवौचित्यात् पितृव्य-
नां सधवात्ववत् । सापत्नत्वं तु पूरणीयम् । सतीषु=विद्यमाना-
*मूलमिति ।
"आदौ पिता ततो माता सापत्नजननी तथा ।
मातामहाः सपत्नीकाः स्वपत्नी तदनन्तरम् ॥
सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्नयः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥
पितृष्वसा मातृष्वसा श्वशुरो गुरुरर्थिनः ।" इति ।
अस्यार्थः—सुतान्तानां क्रमो विवक्षितः । ततः तदनन्तरपद-
त् । ततो दुहितैव सापत्न्या सधवा । संबन्धासत्त्वेः दौहित्रभागु-
दितत्र विशेषणत्वम् । सुते पत्नीपुत्रयोरिव ।
'सुतस्तत्सुतदुहितृदौहित्रा भातुकः स्नुषा ।'
ति वचनान्तरेऽपि मध्ये । गयायां तु केचित् पृथगपि कुर्वन्ति ।
व्यमातुलयोरन्ते भ्राता पितृष्वस्रोरन्ते भगिनी सम्बन्धासत्त्वे-
। *उपाध्यायेति । श्वशुरः सपत्नीकः, न तु पृथक् श्वश्रूः,
श्वश्च । नापि श्वशुरं जीवति सा । भ्राता सापत्न्यो न तु पृथ
तृपुत्रः, सपत्नीकश्च । भगिनीदुहितरौ सधवे सापत्ये न तु भ-
नीसुतः तत्स्वामी जामाता च पृथक् । 'पितरौ पितृपत्नीनाम्'

सखिन्यदशिष्याचार्यास्तीर्थे चैव महालये ।
*एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः ॥' इति ।

इतरेषां पित्रादीनां पार्वणमर्थसिद्धम् । अत्र क्रमान्यत्वेप्याचाराद्व्यवस्था । अशक्तौ तु पृथिवीचन्द्रोदये चतुर्विंशतिमते-

'एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत् ।
*दश द्वादश वा पिण्डान्दद्यादकरणं न तु ॥'

एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः-

'एकोद्दिष्टं देवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥' इति ।

इति सापत्नमातामही । तत्राचारविसंवादे आचारपक्षे सापत्नभ्राता' मपूर्वः पित्रादिस्वस्रोः सापत्यसंभवात्वं बोध्यम् 'शिष्यपोषकाः' 'शिष्याद्यपोषकाः' इति पाठौ पोषकद्रव्यदावान्तरभेदमालम्ब्य 'शिष्यपोषकम्' इत्येकं वा, विद्याकुलाभेदेन शिष्यौ वा, पोषकादीनामत्राभावः । आद्यपदेन सतीर्थ्यः । *एकोद्दिष्टेति ।

"तेन प्रदानं यत्र स्यात्सपिण्डीकरणात्परम् ।
तत्र पार्वणवत् कुर्यादेकोद्दिष्टं त्यजेद् बुधः ॥"

इति गालवं बाध्यते इति सूचितम् । अत्र प्रत्येकोद्दिष्टं ब्राह्मणभेदः । *दशेति । पत्नीप्रसूतिगुर्वन्ता दश आचार्यान्वास्तु द्वादशेत्यर्थः । वक्ष्यति च—

"सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते ।
भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ॥
मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् ॥'

हेमाद्रौ—

"सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।
पितृव्यभ्रातृमातॄणामेकोद्दिष्टं न पार्वणम् ॥" इति ।

अथैकपाको वैश्वदेवतन्त्रं पिण्डं पृथक् च एक-
मिति स्मृत्यर्थसारे उक्तम् । अत्र पाणिहोमः पिण्ड-
मात्रं त्रिजान्तिक इत्याह प्रयोगपारिजाते आश्वलायनः—

'काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् ।
चतुर्थेषु करे होमः पिण्डमात्रं त्रिजान्तिके ॥' इति ।

पार्वणैकोद्दिष्टयोः समानतन्त्रत्वे अग्निसमीप एव । अत्र धुरिलोचनौ वैश्वदेवौ ।

पार्वणैकोद्दिष्टयोः क्रममाह मरीचिः—

"यद्येकत्र भवेत्स्यानमेकोद्दिष्टं च पार्वणम् ।
पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समारभेत् ॥" इति ।

एकपाकमिति एका शाला । अधिकमत्र । एकपाक इति ।

"महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्प्रयत्नतः ॥"

इति पौलस्त्यात् । वैश्वदेवेति । 'यद्येकत्र भवेत्स्यानम्' इति वाक्यपाठादस्य पार्वणपूर्वकत्वादसञ्जातविरोधितयो-पक्रमप्राबल्यादेव वैश्वदेवसिद्धेः 'देवहीनम्' इति निषेधो न प्रवर्तते । एकमिति । 'एकत्र भवेत् स्थानम्' इत्यस्यान्यथाऽनुपपत्तेः । प्रधानानुरोधेन गुणावृत्तिश्च तत्र तत्र तां विना न प्रधानसिद्धिरिति । पाणिहोम इति । पार्वणे इत्यादिः न त्वेकोद्दिष्ट इत्यर्थः । पिण्डश्चेति । पिण्डपितृयज्ञकल्पाभावात् । पार्वणैकोद्दिष्टयोः समानतन्त्रत्वे त्वग्निसमीप एवेति पाठः । तत्र प्रामाण्ये प्रयाग्रहः वस्तुतः श्राद्धप्रकरणे(१) (कथं चित्पाठोऽयः । यद्वा बह्वृचगृह्यभाष्यकारैरेकोद्दिष्टे पाणिहोमाङ्गीकारात्तत्र तन्मते तन्निषेधो न प्रवर्तते इत्याशयेन) एकोद्दिष्टमिति । आन्वष्टक्यातिदेशेन यस्यां कस्यां चित्तिथौ श्रा-

---

(१) कंसान्तर्गतो ग्रन्थः क्वचित् पुस्तके नास्ति ।

'अपि *कन्यागते सूर्ये काम्ये च धुरिलोचनौ।'

इति हेमाद्रावादित्यपुराणात्। *अत्र *प्रति दि भिन्नप्रयोगत्वाद्दक्षिणाभेदो वा *प्रयोगैक्यादन्ते या दक्षिणेति हेमाद्रौ उक्तम्। एतच्च संन्यस्तपितृकादि जीवत्पितृकेणापि कार्यम्।

द्वे पितृयज्ञकल्पमन्वाषत्स्वर्थायेति वचनादग्नौ होमः अग्निसम पिण्डदानमिति पाठान्तरं नेयम्। *कन्यागते=कन्यागत र्येनिमित्तके भाद्रपदापरपक्षश्राद्धे इत्यर्थः। कन्यासंक्रान्तिनिमित्त के श्राद्धे इति वर्णयतां मते तु पुरूरवार्द्रवौ, तच्चिन्त्यम्। धर्मि सूर्यस्य श्राद्धनिमित्तत्वमुपेक्ष्य तद्धर्मस्य संक्रमणस्य अश्राद्धनि मित्तताया आश्रयणासम्भवात्। हेमाद्रिमतमाह-*अत्रेति *प्रतिदिनमिति।

"आदौ मध्येऽवसाने वा यत्र कन्यां रविर्व्रजेत्।
सपक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति॥"

इति कार्ष्णाजिनिवाक्यात्कर्मभेदः "तिस्र आहुतीर्जुहोति" इतिवत्। यदि वाक्यान्तरवशेनैकं श्राद्धमनूद्य तिथिसमुच्चयो विधी येत तदा न भेदः स्यात्। प्रकृते तु न तथा। तेन ब्राह्मणभेदे दक्षिणानां भेदेऽपि न दोषः। अमावास्यात्वेन प्रतिपद एका काराभिप्रायेण पक्षपदम्। तेन न षोडशत्वबाधः। *प्रयोगै क्यादिति।

"नभस्यस्यापरे पक्षे तिथिषोडशकं तु यत्।
कन्यास्थार्कान्वितः श्रेष्ठः काल: श्राद्धकर्मणि॥"

इति शाट्यायनिवचने 'संख्यायुक्तेषु समुच्चयः स्यात्' इति न्यायेन तिथीनां श्राद्धे समुच्चयावगमात् तस्य श्राद्धावृत्तिं विना ऽनुपपत्तेरेकस्यैव श्राद्धस्य सायंप्रातरग्निहोत्रहोमस्येवावृत्तिः। तत्रानेकदिनसाध्य एक एव श्राद्धप्रयोगः। अतो ब्राह्मणदेशदक्षिणाना

'वृद्धौ तीर्थे च *संन्यस्ते ताते च पतिते सति ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥'

इति कात्यायनोक्तेः । यत्तु कौण्डिन्यः—

'दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च ॥' इति,

तत्संन्यस्तापिद्याद्यतिरिक्तविषयम् *काम्यश्राद्धपरं वा । *अत्र यत्तु वक्तव्यं श्रीपितृकृतजीवत्पितृकनिर्णये ज्ञेयम् । एतच्च जीवत्पितृकेण पिण्डरहितं कार्यम् ।

*'मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।

पैत्र्यमिति । अत्रेदमकाचिद्बीजम् । शाखान्तरनिवापस्योत्पत्तिपरत्वया क्वोत्पत्तिः क्व गुणविधिरिति विनिगमनाविरहात् समुच्चितानेकतिथिविशिष्टश्राद्धविधौ 'यद्वाऽऽग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यत्रेव समुच्चितानेककालविशिष्टकर्मविधिकृतभेदवदिहाऽपि श्राद्धभेदस्यावश्यकत्वात् । *संन्यस्ते इति । पितृपक्षे होमान्तमनारम्भो वेति पक्षद्वयम् । आरम्भपक्षे होमान्तः पित्रादिदेवतानां वा पिण्डदानमित्यग्रे स्फुटम् । सर्वस्मिन्नपि पक्षे संन्यस्तादिपितृकस्यामावास्याश्राद्धं स्मृत्युक्तं भवति स्मृतीनां सर्वसाधारण्यात् । *काम्येति । नित्यनिषेधबाधेन काम्यस्य प्रवृत्तेः । ननु वृद्धौ चेति सर्वश्राद्धप्रतिप्रसवस्यापरपक्षिकनिषेधो बाधकोऽस्त्वित्यत आह—*अत्रेति । सामान्यतः—

'सपितुः पितृकृत्येषु अधिकारो न विद्यते ।'

इति सामान्यतोऽपरपक्षे श्राद्धनिषेधे सिद्धे कौण्डिन्यनिषेधस्य वैयर्थ्यवारणाय कृष्णपक्षान्तर्गतपञ्चदशकाश्राद्धं पिण्डपितृयज्ञकल्पेन न कार्यमिति व्याख्येयम् । न चानेन तदुपसंहारः । तथा सत्येतदन्यसर्वश्राद्धप्राप्तौ जीवत्पितृकस्य प्रतिप्रसवान्तरवैयर्थ्यात् । *मुण्डनमिति । वस्तुतस्तु एतस्य निर्मूलत्वात्तात्पर्यं भवत्येव ।

न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च ॥'

इति दक्षेण तस्य पिण्डनिषेधात् । अन्वष्टक्यमातृवार्षिकादौ तु वचनाद्भवतीति वक्ष्यामः । तथा छागलेयः-

'पिण्डो यत्र निवर्तेत मघादिषु कथंचन ।
सांकल्पं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः ॥'

सांकल्परूपं च वक्ष्यते ।

अत्र श्राद्धाङ्गतर्पणं पक्षश्राद्धे प्रतिदिनं श्राद्धोत्तरम् । सकृन्महालये तु परेऽह्नि कार्यम् ।

तदुक्तं नारदीये—

'पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ।
सकृन्महालये चैव परेहनि तिलोदकम् ॥'

गर्गोऽपि-

'पक्षश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकम् ॥' इति ।

तथा प्रयोगपारिजाते गर्गः—

'कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ।
पितॄणां प्रत्यहं कार्यं निषिद्धाहेऽपि तर्पणम् ॥
सकृन्महालये इष्टः स्यादष्टकास्वन्त एव हि ॥'

इदं निषिद्धदिनेऽपि कार्यम् ।

'निषिद्धार्थविशेषेषु कार्यं प्रेते च सर्वदा ।'

इति स्मृत्यर्थसारोक्तेः ।

'तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥'

इति स्मृतिरत्नावल्यां वचनाच्च ॥

एतच्च श्राद्धं मलमासे न कार्यम् । तदाह भृगुः—

'वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते ॥' इति ।

हेमाद्रौ नागरखण्डे—

*'नभो वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥'

एतच्च पित्रोर्मरणे प्रथमाब्दे *कृताकृतमिति शिष्टाः।

इदं च नित्यं काम्यं च।

'पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांश्च पुष्कलान्॥'

इति(१) जाबालयुक्तेः।

'वृश्चिके समतिक्रान्ते पितरो दैवतैः सह।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम्॥'

इति कार्ष्णाजिनिवचनाच्च। मदनरत्ने प्रायश्चित्त-मुक्तावलिविधाने—

(२)'पुरो अस्माकं' मन्त्रं च दशवारं [illegible]।

---

*नभो वेति। नन्वत्र यदाऽऽश्विनोऽधिकमासस्तदा कथं कन्यार्कस्थत्वात् श्राद्धपक्षः। अत्र नव्याः—

'यावुभावाश्विनौ मासौ कन्यार्के जायते यदा।
दैवं पित्र्यं तदा कर्म उत्तरे मासि युज्यते॥'

इति वचनात् तुलार्के कार्यमित्याहुः। *कृताकृतमिति। इ-

(१) 'जाबालवचनात्' इति पुस्तकान्तरे पाठः।

(२) स मन्त्रो ऋग्वेदसंहितायां प्रथमाष्टके चतुर्थाध्याये—'पुरो अस्माकं पुर इन्द्र [illegible] पुरां बहूनां [illegible]। [illegible] [illegible] इति। अस्य व्याख्या—'हे इन्द्र, त्वम् अस्माकं पुरो [illegible], तथा [illegible] पुरो [illegible], तथा यज्ञस्य [illegible] पुरो [illegible]। [illegible] [illegible] पतिः [illegible]। [illegible]। [illegible]। [illegible] [illegible]

महालयं यदा न्यूनं तदा संपूर्णमिति तत् ॥' इति। द्विमासयोः कन्यातुलयोर्महालयश्राद्धं यदा हीनमित्यर्थः अत्र भरण्यां श्राद्धमतिप्रशस्तम्। तदुक्तं पृथिवीचन्द्रोदये मात्स्ये—

*'भरणी पितृपक्षे तु महती परिकीर्तिता।
अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् ॥'

पृथिवीचन्द्रोदये श्रीधरीये बृहस्पतिः—

'नभस्यापरपक्षस्य द्वितीया यदि याम्यभे।
तृतीया चाश्वितारामिः सहिता प्रीतिदा पितुः ॥'

एतत्पक्षे षष्ठी योगविशेषेण कपिलासंज्ञा। तदुक्तं वाराहे—

'नभस्यकृष्णपक्षे तु रोहिणीपातभूसुतैः।
युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता ॥
व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्।
कपिलां च द्विजाग्र्याय दत्त्वा क्रतुफलं लभेत् ॥'

पुराणसमुच्चये—

'भाद्रे मास्यसिते पक्षे भानौ चैव करे स्थिते।
पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् ॥'

अत्र दर्शान्तत्वेन महालयो भाद्रपदकृष्णपक्षो

तेऽभ्युदयः, अकृते तु न दोषः। द्विमासयोर्महालयं यदा न्यूनमिति सम्बन्धः। *भरणीति। इदं च पिण्डरहितं कार्यम्।

दिवसा यस्मिन् स तथोक्तः। अकामकर्शनः कामान् कर्शयति नाशयतीति कामकर्शनः न कामकर्शनः अकामकर्शनः हविर्दत्तवतां यजमानानां कामानभिमतफलप्रदानेन पूरयसीत्यर्थः। सखिभ्यः समानाख्यानेभ्य ऋत्विग्भ्यः सखा सखियदस्यन्तं प्रियः, एवंभूतो य इन्द्रस्तं प्रति इदं स्तोत्रलक्षणं वचः गृणीमसि ब्रूमहे।' इति श्रीमत्सायणाचार्याणाम्।

शेष इत्युक्तं निर्णयामृते, हेमाद्रौ च। *हस्तार्कस्तु फलातिशयार्थः।

'संयोगे तु चतुर्णां वै निर्दिष्टा परमेष्ठिना।'

इति तत्रैवोक्तेः। अत्र विशेषो हेमाद्रौ स्कान्दे—

*'देवदारु तथोशीरं कुङ्कुमैलामनःशिलाम्।
पद्मकं पद्मकं यष्टि मधु गन्धेन पेषयेत्॥
क्षीरेणालोड्य कल्केन स्नानं कुर्यात्समन्त्रकम्।
आपस्त्वमसि देवेश ज्योतिषां पतिरेव च॥
पापं नाशय मे देव वाङ्मनःकायकर्मजम्।
पञ्चगव्यकृतस्नानः पञ्चभङ्गैस्तु मार्जयेत्॥'

पञ्चभङ्गैः=पञ्चपल्लवैः। तथा—

'रत्नैर्नानाविधैर्युक्तं सौवर्णं कारयेद्रविम्।
शक्तितस्तु पलादूर्ध्वं तदर्धं कर्षतोऽपि वा॥
सौवर्णमरुणं कुर्यात्सोमं चैव तथा रथम्॥'

तथा—

'अल्पवित्तोऽपि यः कश्चित्सोऽपि कुर्यादिमं विधिम्।'

प्रभासखण्डे—

'स्थापयेद्व्रणं कुम्भं चन्दनोदकपूरितम्।
रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतम्॥

"अयनद्वितये श्राद्धं विषुवद्द्वितये तथा।
भरणीषु च सर्वासु पिण्डनिर्वपणं न हि॥"

इति पुलस्त्यनिषेधात्। 'युगादिभरणीमघे' इति योक्तं तु सति सप्तम्या व्याख्यातम्। 'तिथिनक्षत्रवारादि' इति वचनात्। ननु वारादे योगचतुष्टयं पुराणसमुच्चये च तत्पञ्चकमिति कथं कपिलाषष्ठीत्यपि तत्राह—*हस्तार्केति। इयं च षष्ठी योगविशेषेण पूर्वा वा परा वा ग्राह्या। *देवदार्विति।

रथो रौक्मपलस्यैव एकचक्रः सुचित्रितः ।
सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कारयेत् ॥'

ततः सूर्यं कपिलां च षोडशोपचारैः संपूज्य दद्यात् ।

'दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः ।
कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ॥
यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी ।
प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव ॥' इति ।

विशेषान्तरं तत्रैव ज्ञेयमिति दिक् ॥

इयमेव चन्द्रषष्ठी । सा चन्द्रोदयव्यापिनी ग्राह्या । उभयत्र तथात्वे पूर्वा । तदुक्तं भविष्ये—

'तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे ।
चन्द्रषष्ठीव्रतं कुर्यात्पूर्ववेधः प्रशस्यते ॥
चन्द्रोदये यदा षष्ठी पूर्वाह्णे चापरेऽहनि ।
चन्द्रषष्ठ्यसिते पक्षे सैवोपोष्या प्रयत्नतः ॥' इति ।

अष्टम्यामाश्वलायनेन मघावर्षसंज्ञं श्राद्धमुक्तम् ॥

'एतेन माघ्यावर्षं प्रोष्ठपद्या अपरपक्षे' इति । ॥१

"पञ्चम्यामेकभक्तं तु कुर्वीतत्र विचक्षणः ।
षष्ठ्यां प्रातः समुत्थाय कृत्वाऽऽदौ दन्तधावनम् ॥"

दन्तधावनमिति नित्यकर्मोपलक्षणम् । दन्तधावनं च काष्ठं विनेति स्मर्तव्यम् ।

"जलपूर्णाऽञ्जलिं कृत्वा इमं मन्त्रमुदीरयेत् ।
निराहारोऽद्य देवेश त्वद्भक्तस्त्वत्परायणः ॥
पुत्रमिच्छाम्यहं भक्त्या शरणं भव भास्कर ।
अर्घ्यं दत्त्वाऽथ सङ्कल्पं कृत्वा स्नात्वा शुचिस्थितः ॥"

इत्यनन्तरं विदध्यात् । मध्येन=क्षीरेण । कपिलां=गाम् । विशेषान्तरं करिष्यमाणार्घ्यप्रदानादि । ०इदमिति । अष्टका=मन्वष्टका, पूर्णिमाश्च

सप्तम्यादिषु चित्रवहःसु कार्यम्' इति नारायणवृत्तिः । हरदत्तस्तु मघायुक्तवर्षासु मघं त्रयोदशीश्राद्धमिति व्याचख्यौ । पृथ्वीचन्द्रोदये ब्राह्मे—

'आषाढ्याः पञ्चमे पक्षे मघा माघ्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया गयातुल्या तु पैतृके ॥

आश्विनकृष्णाष्टम्यां *महालक्ष्मीव्रतम् । तत्र निर्णयामृते पुराणसमुच्चये—

'श्रियोऽर्चनं भाद्रपदे सिताष्टमीं
प्रारभ्य *कन्यामगते च सूर्ये ।
समापयेत्तत्र तिथौ च यावत्
सूर्यस्तु पूर्वार्धगतो युवत्याः ॥' इति ।

तत्रैव—

'कन्यागतेऽर्के प्रारभ्य कर्तव्यं न श्रियोऽर्चनम् ।
हस्तमान्मदलस्थेऽर्के तद्व्रतं न समापयेत् ॥
पूजनीया गृहस्थानामष्टमी प्रावृषि श्रियः ।
दोषैश्चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः ॥'

तथा—

न्युक्ता एतेनेत्युक्तः । माघ्यावर्षाविति पठित्वा मघे वर्षासु भवमिति केचिदाहुः । *महालक्ष्मीव्रतमिति । तदनुरोधेन पूर्वाणि पञ्चदश दिनानि प्राप्नोतीति भावः । अत्र भाद्रशुक्लाष्टमीमारभ्याश्विनकृष्णाष्टमीपर्यन्तं षोडशदिनेषु महालक्ष्मीयात्रा कार्या ।

((१)'महालक्ष्म्यष्टमीं प्राप्य तत्र यात्रा कृता नृणाम् ।
संपूजितेह विधिवद् यथा स च न मुञ्चति ॥'

इति काशीखण्डात् । महालक्ष्म्यष्टमी=भाद्रशुक्लाष्टमी । तत्र ज्येष्ठापूजामत्वाष्टां प्रारभ्य महालक्ष्म्यष्टमी=आश्विनकृष्णा-

---

(१) कंसान्तर्गतो ग्रन्थः क्वचित्पुस्तके नास्ति ।

'पुत्रसौभाग्यराज्यायुर्नाशिनी सा प्रकीर्तिता।
तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ॥
विशेषेण परित्याज्या नवमीदूषिता यदि॥'
इति दोषचतुष्टयं तत्रैवोक्तम्।
'त्रिदिने चावमे चैव अष्टमीं नोपवासयेत्।
पुत्रहा नवमीविद्धा स्वर्गी हस्तार्धगे रवौ॥' इति
त्रिदिनावमदिनलक्षणं च रत्नमालायाम्—
'यत्रैकः स्पृशति तिथिद्वयावसानं
वारश्चेदवमदिनं तदुक्तमार्यैः।
यः स्पर्शाद्भवति तिथित्रयस्य चाह्नां
त्रिद्युस्पृक्कथितमिदं द्वयं च नेष्टम्॥'
एते च सर्वे निषेधाः प्रथमारम्भविषयाः। मध्ये तु
सति सम्भवे ज्ञेयाः। व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये
त्यागायोगात्। *इयं चन्द्रोदयव्यापिनी ग्राह्या। तत्रैव
पूजाद्युक्तेः। परदिने चन्द्रोदयादूर्ध्वं त्रिमुहूर्तव्यापित्वे
परैव कार्या, अन्यथा*पूर्वैव।

ष्टमी तां प्राप्य तावत्पर्यन्तमित्यर्थः। *कन्यामगते चेति।
कन्यामगते सिंहस्थे सूर्ये प्रारम्भः। पुनरयाः=कन्यायाः पूर्वार्धे
सूर्येऽवस्थिते सति समाप्तिरित्यर्थः। इदं च वाक्यं, षोडशदिनानां
समप्राधान्येन व्रताङ्गत्वार्थम्।
'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठायुताष्टमी।
प्रारब्धव्यं व्रतं तत्र महालक्ष्मी यतात्मभिः॥'
इति वचनाच्च। तत्र समाप्तिदिननिर्णयमाह—*इयमिति।
पूजादीत्यादिना चन्द्रार्घ्यदानग्रहः।
'चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता।'
इति स्मृतेः। *पूर्वैवेति।)

'पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा।
त्रिमुहूर्ताऽपि सा पूज्या परतश्चोर्ध्वगामिनी॥'

इति मदनरत्ने निर्णयामृते च सङ्ग्रहोक्तेः।

'अर्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा॥'

इति वचनाच्चेति सङ्क्षेपः॥ इति महालक्ष्मीव्रतनिर्णयः॥

अथ नवम्यामन्वष्टकाश्राद्धम्। तत्र कात्यायनः—

*'अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम्।
पित्रादिमातृमध्यं च ततो मातामहान्तकम्॥'

पृथ्वीचन्द्रोदये ब्रह्माण्डे—

'पितॄणां प्रथमं दद्यान्मातॄणां तदनन्तरम्।
ततो मातामहानां च अन्वष्टक्ये क्रमः स्मृतः॥'

श्राद्धहेमाद्रौ छागलेयः—

'केवलास्तु क्षये कार्या वृद्धावादौ प्रकीर्तिताः।
अन्वष्टकासु मध्यस्था नान्यास्तु कार्यास्तु मातरः॥'

"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित्॥"

इत्युक्तेः। अत्र अष्टम्याः श्राद्धं गयाश्राद्धसमफलम्।

"आषाढ्याः पञ्चमे पक्षे गयायाश्चाष्टमी स्मृता।
त्रयोदशी मघायुक्ता गयातुल्या तु पैतृके॥"

इत्युक्तेः। भाद्रकृष्णनवम्यामन्वष्टकाश्राद्धं मातृश्राद्धं च। तथा-ऽपभिप्रेत्याह—*अन्वष्टकास्विति। हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका अपरेद्युरन्वष्टक्यमिति चतस्रोऽन्वष्टकाः भाद्रकृष्णाष्टम्युत्तरा चान्वष्टका, पञ्चमी 'प्रौष्ठपद्युत्तराभूयः' इति वचनात्। अथवा आश्वलायनानां माघ्यावर्षोत्तरनवम्यामन्वष्टकागतत्वं कर्मेति। तत्रायं देवताक्रमः। अयमेवोपरन्वष्टक्ये ग्राह्यः।

दीपिकायां तु मातृश्राद्धमादौ कार्यमित्युक्तम् । मा-
तृपूजनं त्वन्वष्टकास्वादित इति हेमाद्रौ । ब्राह्मेऽपि—

*'अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यते ।' इति

अत्र *शाखाभेदेन व्यवस्थेति पृथ्वीचन्द्रोदयः
*जीवत्पितृकाविषयमिति निर्णयदीपः । इदं च जीव-
त्पितृकेणापि कार्यम् । तदुक्तं निर्णयामृते मैत्रायणी-
यपरिशिष्टे—

'अन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि ।
मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति ॥' इति

*यद्यपि जीवत्पितृकस्य पञ्चाप्यन्वष्टका अवश्यं
कर्तव्याः, *तथाप्यशक्तस्यैषैवावश्यकी ।

'प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति ।'

इति हेमाद्रौ पाद्मोक्तेः ।

*'सर्वासामेव मातृणां श्राद्धं कन्यागते रवौ ।
नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा यतः ॥'

इति मूलेनावश्यकत्वोक्तेश्च । अत्र *'सर्वासाम्'
इत्युक्तेः स्वमातरि जीवन्त्यामपि सपत्नमातृभ्यो दद्या-
त् । तन्मरणे सति तस्यै ताभ्यश्च दद्यादित्युक्तं जीव-

---

*शाखेति । बह्वृचानां पितृपूर्वम् । तदन्ये तथोक्तेः । अन्येषां मातृपू-
र्वम् । *जीवदिति । तस्य पितृतर्पणाभावात् । अत्र क्रमानुपपत्तेरु-
क्तिः । अन्वष्टक्यं=भाद्रकृष्णनवमी । श्राद्धमात्रविधायकेन शङ्क-
*यद्यपीति । तदेवाह्य समाधत्ते—*तथापीति । अन्वष्टकाश्रा-
द्धोत्तरश्राद्धमन्वष्टक्यम् । 'अपरेद्युरन्वष्टक्यम्' इत्युक्तेरिति भट्टाचा-
र्यस्य ग्रन्थान्तरे कृते । द्वितीये जीवत्पितृकस्य मृतमातृकस्य तावदिति ।
*सर्वासामिति । अत्र ब्रह्मकृष्णेऽपि मातामहाः न कार्याः । मुख्-
देवतैवाशानिषेधः । अत्र इदमुक्तं निर्णयाह- *अथेति ।

दिपनृकनिर्णये गुरुभिः । अत्र सर्वासां नामनिर्देशेनैको ब्राह्मणोऽर्घ्यः पिण्डश्च । नामैक्ये तु *द्विवचनादिप्रयोग इत्युक्तं नारायणवृत्तौ । अन्वष्टकाश्राद्धं *तथा-त्र गोभिलीयानां मध्यमायामेव, न सर्वासु* ।

'अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ ।'

इति छन्दोगपरिशिष्टात् । अत्र भर्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति केचिदाहुः । पठन्ति च—

'श्राद्धं नवम्यां कुर्यात्तन्मृते भर्तरि लुप्यते ।' इति ।

तदेतन्निर्मूलत्वान्मूर्खप्रतारणमात्रम् । श्राद्धदीपकलिकायां ब्राह्मे—

*'पितृमातृकुलोत्पन्ना याः काश्चित्तु मृताः स्त्रियः ।
श्राद्धार्हा मातरो ज्ञेयाः श्राद्धं तत्र प्रदीयते ॥' इति ।

*अत्र देशाचाराद्व्यवस्था ।

मान्वष्टक्यमपि कार्यमेवेयं वाचिः मातृश्राद्धेऽप्यालम्बनीया बाधकाभावात् । तत्र ब्राह्मणभेदेऽर्घ्यदानभेदश्चावश्यं व्यर्थमित्यत उक्तम्—*एक इति । *अर्घ्य इति । अर्घ्यदानं तु पृथक् । 'अनेका मातरो यस्य' इत्युक्तगालववचनात् । *द्विवचनादीति । एकशेषोपचारादित्यादि । नामभेदे द्वन्द्वोत्तरम् । द्विवचनादेः सत्त्वात् । एतच्च सधवाया एव मातुर्मरणे अविधवानवमीसमाख्यानात् इत्येके । 'अविशेषाद्विधवाया अपि' इति मयूखः । तथागो=मातृयागः । न सर्वासु=न पूर्वपरयोः 'स्त्रीशूद्रौ नाधीयाताम्' इतिवद्विशेषतः प्राप्ततरनिषेधात् । *पित्रिति । यस्याश्चिद्विशेषपरिचयायेदम् । याः काश्चिदिति दर्शनात् । तेनापुत्रपत्न्यादेरपि श्राद्धसिद्धिः । पितृष्वस्रादेः श्राद्धपरमिति वदतां मते त्वाह—*अत्रेति । यस्तु जीवत्यां मातरि पितृष्वस्रादिभिः पालितः तद्-नप्ताऽसौ वा तत्परमिति तु मदीयः । अत्र भार्याविरहितः=अविवाहि-

इदं चानुपनीतेनापि कार्यम् । तदुक्तं श्राद्धशूल पाणौ मात्स्ये—

'अमावास्याष्टकाकृष्णपक्षपञ्चदशीषु च ।'

इत्यभिधाय—

'एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु ।
श्राद्धं साधारणं नाम सर्वकामफलप्रदम् ॥
भार्याविरहितोप्येतत् *प्रवासस्थोपि नित्यशः ।
शूद्रोप्यमन्त्रवत् कुर्यादनेन विधिना बुधः ॥' इति

तेन* साग्नेरेवेदमिति *परास्तम् । *अन्वष्टकात पृथगेवेदं मातुः श्राद्धमित्यपि परास्तम् । *लाघवेन *मू लैक्यादष्टकापवादाविशेषाच ।तेनान्यत्रान्वष्टकाश्राद्ध

तः, मृतभार्यश्च । *प्रवासस्थ इति । पत्न्यभावाभिप्रायम् । तेन भार्याविरहितायुक्त्या । *साग्नेरेवेति । अन्वष्टकायां पिण्डपितृय ज्ञकल्पसत्त्वात् तस्य साग्निकमात्रविषयत्वात् । *परास्तमिति निरग्न्यादेस्तु पाणिहोमः । आपस्तम्बीयानां तु लौकिकाग्नौ होम इति स्मर्तव्यम् । नन्वत्र सर्वेषां साग्न्यनग्निजीवदजीवत्पितृका णामधिकारे 'मातुः श्राद्धं सुतः कुर्यात्'इति कुत इत्यत्र केषां चि त्समाधानमुत्थापयति–*अन्वष्टकात इति । *लाघवेनेति । अन्वष्टकाश्राद्धे नवदैवत्यं च मृतपितृकमत्स्यैव संभवतीयतस्तदन्त र्गतमातृश्राद्धे एव जीवत्पितृकस्याधिकारो 'मातुः श्राद्धं सुतः कुर्या त्'इत्यनेन बोध्यते । इतोऽपि च न मातामहचर्चाऽपि । तदेतदुक्तम्- *मूलैक्यादिति । अयं भावः–भवद्रीत्या श्राद्धद्वये भिन्नैव श्रुतिः कल्प्या स्यात् । मम तु सर्वाधिकारिकं श्राद्धं मूलभूतश्रुत्या बो ध्यम् । तत्र मृतपितृकस्य प्रधानत्रयम् । जीवत्पितृकस्य त्वेकं प्रधा नमिति विशेषव्युत्पादकं 'मातुः श्राद्धं सुतः कुर्यात्'इति वचनम् ।

"पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।"

*अङ्गस्याप्येकप्रधानत्वं वचनात् । *(१)अवेष्टेरिव राजसूयान्तर्गताया 'एतयान्नाद्यकामं याजयेत्' इति फलार्थ-

---

इति बहुवचनवशेन पितृपदस्य जनकपरत्वादिह तदभावादपि न मातामहानां प्रसक्तिरिति भावः । *अङ्गस्येति । तावताऽपि तदन्तर्गतमातृश्राद्धे स्वप्रधानान्यप्रसक्तेस्तस्याप्याह । वस्तुतस्तु 'अमावास्याष्टका' इति विधिः साधिकार एव । अन्वष्टक्यस्य पितृयज्ञकल्प नियतत्वात् । अनुपनीतादीनां च तत्करणासम्भवेनाप्राप्तमेव श्राद्धमन्वष्टक्यातिदेशेन विधीयते इति एतमुपपादयति—तेनेति । मूलत्वादिति । यानि कल्पसूत्राणि पुराणानि च तेषां सर्वेषां एकैव श्रुतिमूलत्वेन कल्प्यते । साग्निनिरग्निभेदेन पितृयज्ञभावाभावौ तु प्रयोगविधेरेव भेदकौ नोत्पत्तिविधेरिति भावः । ननु कथम प्रयोगः पितृयज्ञकल्पेन कश्चित् तं विनापीति कथमुत्पत्तिविधेर्न भेद इत्यत आह—अष्टकेति । न चाप्यभ्यासः । अन्यपरपुनःश्रवणं हि अभ्यासः । न चान्यपरतेति भावः । मूलेऽपि प्रयोगभेदं स्पष्टमुक्त्वा व्युत्पादयति—तेनेति । *अन्वक्=साग्निप्रयोगे । *अत्र=निरग्निप्रयोगे । वचनात्=एतच्चानुपनीतोऽपीति वाक्यात् । वस्तुतस्तु

"अष्टकान्वष्टकानित्यास्तथैव च नृपोत्तम ।
एतास्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥"

इति वाक्यभेदेन निर्देशादन्वष्टकाश्राद्धं स्वतन्त्रमेव न च क-स्यापहं न च बृहस्पतिमतवदस्यापि प्रयोगबहिर्भूतगतत्वम् बृहस्पतिमतस्य पृथक् निर्देशाभावेन विरोधादिति ।

नन्वेवं कथं तत्पद पाठितमित्याह—*अवेष्टेरिवेति । राजसू-

---

(१) अवेष्टिः- राजसूयान्तर्गतेष्टिः ।

कारिकराजसूयान्तर्गततया अवेष्टेरप्राप्तौ "यदि ब्राह्मणो यजे ।श१५। याम्नायकामं याजयेत्"इति एतच्छन्देनोपादानं तद्वत् मृतपितृकाधि कारिकान्वष्टक्यान्तर्गतस्य मातृश्राद्धस्याप्राप्तौ एतन्वेत्येतच्छन्देनो पादानमित्यर्थः । एवमवेष्टौ त्रिषो राजा त्वाधिकारिणा मातृश्राद्धे ऽपि जीवदजीवत्पितृकौ तथैव तुल्यमेवेत्युभयत्राप्युत्पत्तिविधिर्न . स इत्यपि बोध्यम् । ननु जीवत्पितृकस्य 'सपितुः' इतिनिषेधेनाधिकारे प्राप्ते

"मातुः श्राद्धं सुतः कुर्यात् पितर्यपि च जीवति ।"

इति तत्प्राप्तिफलकोऽयमपूर्वविधिरेव स्यात् । ब्राह्मणस्य 'राजाधिकारिकराजसूयाप्राप्तौ 'यदि ब्राह्मणो यजेत'इति विधिवत् 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति ज्ञानार्थतया काम्ये संन्यासे सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारादतथाभूतस्यातुरस्याधिकाराप्राप्तौ 'यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्' इति तत्प्राप्तिफलकविधिवदिति चेन्न । यदि ब्राह्मणो यजेतेत्याद्यवेष्टिप्रयोगविधायकवाक्ये तस्या राजसूयान्तर्गतत्वेनेतरसापेक्षत्वे व साधनत्वावगमाद्राजसूयसाध्यत्वेनावगतस्य ।१२७। साध्यत्वेनोपस्थानासम्भवाद्विश्वजिदादिन्यायेन ५९ 'एतयान्नाद्यकामम' इत्येतेन फलं समर्प्यते आतुरवाक्ये तु ति संन्यासस्य निरपेक्षसाधनत्वावगमात्प्रागेव तत्साध्यत्वेनावगतस्य ज्ञानस्याप्रत्यूहमुपस्थित्या फलान्तरोपस्थापकापेक्षैव नास्तीति प्रकृतज्ञानमेव फलमन्वेति तद्वदष्टकान्तर्गतस्य मातृश्राद्धस्येतरसापेक्षत्वेन साधनतया तत्साध्यत्वेनावगतस्य प्रत्यवायानुत्पादस्यैव जीवत्पितृकाधिकारिकमातृश्राद्धेऽपि फलत्वं न तु स्वर्गस्यान्यस्य वा कस्यचित् । यथा यावज्जीवादिवाक्यस्य उपस्थितमपि स्वर्गं विहाय निष्कामं प्रति प्रयोगनिर्वाहार्थं पापक्षयार्थत्ववत् । न चाङ्गत्वे फलसम्भवात्पर्णतादिवदिति प्राधान्यं नापि प्रत्यवा-

व्यम् । *अन्वष्टका=अन्वष्टक्या *पूर्वानुरोधात् । तथा-त्रिपुराणे–

'अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि ।
अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह ॥'

आपस्तम्बानां तु 'अष्टकासु च वृद्धौ च' इति शाखकारैः पाठादष्टकानां मातृश्राद्धम् *(१)छन्दोगैस्त्वत्र मातृणामपृथक्श्राद्धं न कार्यं किन्तु त्रिपुरुषमेव।

'न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते ।
(२)कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ॥
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥'

इति छन्दोगपरिशिष्टात् । 'अन्वष्टकासु तेषां कर्षूविधानात्' इति शूलपाणिः । यत्तु—

'*तमिस्रपक्षे नवमी पुण्या भाद्रपदे हि या ।
चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिः ॥'

इति, तद्देशाचारतो व्यवस्थितं ज्ञेयम् । इदं जीवत्पि-

पातुरुत्पादस्य फलत्वम् क्षेमस्त्वादिति विशेषणमभिप्रेत्य दार्ष्टान्तिके प्रधानत्वं, दृष्टान्ते च फलार्थत्वमित्येवोक्तम् । अन्यथा दार्ष्टान्तिके फलार्थत्वं ब्रूयात् । एतावताऽयमधिकारविधिविशेषमात्रं नोत्पत्तिविधिभेद इति भावः । एवं यथाऽऽतुरस्य मनसा वाचा वेत्युक्त्या कथंचित्प्रधानमात्रेण फलसिद्धिः । तथा जीवत्पितृकस्य मातृश्राद्धमात्रेणेति न कोऽपि दोषः । ननु अमावास्याष्टकेति अष्टकायामेवानुपनीतादेरधिकारः स्यादित्यत्राह—*अत्रेति । *पूर्वेति । मौष्ठपद्यष्टकेत्यर्थः । *छन्दोगैरिति । वृद्धमातृकैरधीत्यादि । *तमिस्रेति

---

(१) छन्दोगाः सामवेदिनः ।

(२) कर्षूप्रकारस्तृतीयपरिच्छेदोत्तरार्धे द्रष्टव्यः ।

[illegible]

[illegible]

'[illegible] इति ।

हेमाद्रौ पितामहः—

'अमावास्या व्यतीपातपौर्णमास्यष्टकासु च ।

[illegible]

(१) धर्मसिन्धौ तु—'अत्र [illegible] ।
[illegible]
[illegible] इत्युक्तम् ।

विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते॥'
प्रकरणे च प्रायश्चित्तमुक्तं स्मृतिविधाने—
'एभि(१)र्द्युभिर्जपेन्मन्त्रं शतवारं तु तद्दिने ।
आन्दष्टपक्षं यदा न्यूनं संपूर्णं याति सर्वथा ॥' इति।
एतत्पक्षे द्वादश्यां विशेषः पृथ्वीचन्द्रोदये वायवीये—
'संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि ।
महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं तु तत् ॥' इति

ल्पनाद्यकरणार्थम् । एतदेव मातुराब्दिकादिसपत्नश्राद्धे सुवासिनीप्रापकम् । भोजनं=भोज्यमपि । सहदारैरेति । एतच्च सहदारभावः मातुराब्दिकादाविव नवमीश्राद्धे सुवासिनीप्रापकं नवमीश्राद्धेऽपि प्रापयति । चरसम्=आर्द्रतृणम्, कक्षं=शुष्कतृणम् । उपोषेत्=दहेत् । अयं च—

अग्निना वा दहेत्कक्षं श्राद्धकाले उपागते ।
तृणानि वा गवे दद्यात्पिण्डान्वाऽप्यप्सु निर्वपेत् ॥

इत्यग्रे वचनात्सर्वश्राद्धानुकल्पः । 'अष्टकासु च' इति चकारादन्वष्टकाग्रहः । अस्यामेव नवम्यां बिल्वशाखायां देवीबोधनं वक्ष्यति । द्वादश्यामिति । तत्करणपक्षे वानप्रस्थादेरपि उक्तं

---

(१)—तत्र पूर्वं समागच्छदाकारत्वप्रतिभाववाधपरिहारार्थं द्यवसायैभिर्द्युभिः सुमना इति मन्त्रजपे कर्त्तव्ये इति सकलस्य तदर्थं कुर्वीत । मन्त्रस्तु—"एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना । इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥" इति । ऋ० सं० अ० १अ० ४ । अस्य—'हे इन्द्र, एभिरस्माभिर्दीयमानैर्द्युभिर्दीप्तैर्यवपुरोडाशादिभिः एभिरिन्दुभिः पुरोवर्तिभिस्सुवद्भिः सोमैश्च प्रीतस्त्वं अस्माकममतिं दारिद्र्यं गोभिरश्वैश्च दत्तैः चतुर्भिरश्विना ऽस्मत्पुत्रेण धनेन च निरुन्धानो निवर्तयन् सुमनाः शोभनमना भव । वयमिन्दुभिरस्माभिर्दत्तैः सोमैः प्रीतेनेन्द्रेण दस्युं कर्मक्षयितारं शत्रुं दरयन्तः हिंसन्तः अत एव युतद्वेषसः पृथग्भूतशत्रुकाः भूत्वा इन्द्रदत्तेनान्नेन संरभेमहि संरब्धा भवेम । संगच्छेमहीत्यर्थः' इति सायणाचार्यकृता व्याख्या ।

अथ त्रयोदशीश्राद्धम् । तत्र चन्द्रिका—

*'त्रयोदशी भाद्रपदी कृष्णा *मुख्या पितृप्रिया ।
तृप्यन्ति पितरस्तस्यां स्वयं पञ्चशतं समाः ॥
मघायुतायां तस्यां तु जलाद्यैरपि तर्पिताः ।
तृप्यन्ति पितरस्तद्वद्वर्षाणामयुतायुतम् ॥'

प्रयोगपारिजाते शङ्खः—

'प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च ॥
प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा ।
नृणां श्राद्धे सदा प्रीताः प्रयच्छन्ति पितामहाः ॥'

एतन्नित्यमपि । पृथ्वीचन्द्रोदये विष्णुधर्मे—

'प्रौष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी ।

प्राक् । अत्र—

यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥

इति मानवे मघासु चेति पृथक् चकारात् ▪ २ द्वमघाश्राद्धयोर्भेदः । "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति" इत्यत्र चकारादाग्नेयभेदवत् । तेन दिनान्तरगासु मघासु मघाश्राद्धं भवति । एवं च मघात्रयोदश्योर्योगे फलाधिक्यं दर्शयति—*त्रयोदशीति । अत्र

"आषाढ्याः पञ्चमे पक्षे गयामध्याष्टमी स्मृता ।
त्रयोदशीगजच्छाया गयातुल्ये तु पैतृके ॥"

इत्यादितोऽपरपक्षनिमित्तकत्वेन सकृत्पक्षाभिन्नेन पक्षेण महालयत्रयोदश्यां क्रियमाणं श्राद्धं त्रयोदशीश्राद्धमिति प्रतीयते । अतः महालयत्रयोदशीश्राद्धस्य अपरपक्षश्राद्धाद्भेदं व्युत्पादयति—त्रयोदशीति । *मुख्या पितृप्रियेति । मघायुक्तां त्रयोदशीं प्राप्येति तथा कृष्णा त्रयोदशीति चोक्तेः अपरपक्षश्राद्धस्य

इत्युक्त्वा—

'एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥'

इत्युक्तेः । एवमविभक्तैरपि पृथक्कार्यम् । तथा च हेमाद्रौ—

'विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥' इति ।

अपरार्के वायवीये—

*'हंसे हस्तास्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वैवस्वती नाम सा छाया कुञ्जरस्य तु ॥'

*अत्र च—

त्यभिज्ञानाच्च महालयत्रयोदशीश्राद्धमपरपक्षश्राद्धाद्भिन्नम् । अत एव तद्विशेषान्महालयश्राद्धादपि भिन्नम् । एतत्त्रयोदश्याः कृष्णपक्षाविनाभूतत्वेऽपि न त्रयोदशीश्राद्धं कृष्णपक्षश्राद्धाविनाभूतं सकृत्करणपक्षे त्रयोदश्यां तदभावात् । अस्य नित्यत्वाच्च काम्यकृष्णपक्षश्राद्धादपि भेदः । युगादिश्राद्धात्तु त्रयोदशीश्राद्धं न भिद्यते, त्रयोदशीविशेषस्य युगादित्वाविनाभावात् । युगादिश्राद्धं विधाय त्रयोदशीश्राद्धविधानं तु अयनादिश्राद्धविधानवद्रात्रिप्रकरणार्थम्, फलाविशेषार्थं च । *हंसे इति । पारिभाषिकी गजच्छाया । उक्तवचनेषु क्वचिन्मघायोगः स्मर्यते क्वचित्तु नेत्यतो विचारमारभते—*अत्र चेति । केवलमघात्रयाणां केवलत्रयोदशीवाचकानां चार्थवादत्वोपरागादर्थवादानां विधिशेषत्वेन तदनुरोधेन नेयत्वादिति भावः । अत्रेदमस्मत्प्रतिभातम्— लापत्रमात्रेणैकवाक्यत्वविकल्पनास्वीकारे गजच्छायारूपयोगयुक्तायामेव त्रयोदश्यां कुञ्जरच्छाये एव श्राद्धं स्यान्नान्यत्रेति । अत्र च केवलापि त्रयोदशी कालः तद्रूपे त्रयोदशीशब्दस्य पर्याप्तश्रवार्थकत्वेनैवोपपत्तेर्मघायुक्तत्वपरत्वे मानाभावात् ।

'अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम्।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥'

इति विष्णुमनुवचने केवलत्रयोदशीश्रुतेर्मघा गुणफलेति कल्पतरुः । शूलपाणिस्तु—'केवलवाक्यानामर्थवादत्वाद्विधौ च मघायोगश्रुतेर्विधिलाघवाद्विशिष्टमेव(१)

"अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
प्रावृट्कालेऽसिते पक्षे त्रयोदश्यां समाहितः ॥
मधुप्लुतेन यः श्राद्धं पायसेन समाचरेत् ।
कार्तिकं सकलं वाऽपि प्राक्छाये कुञ्जरस्य च ॥"

इति मत्स्यादिस्मृतौ त्रयोदशीमात्रसंसनात् । कार्तिके सकलं वापीति च पृथगेव मंत्रसामेया । सकलकार्तिकव्यापिना मधुप्लुतपायसद्रव्यकस्य श्राद्धस्य विधिः । प्राक्छाये कुञ्जरस्य चेति च पृथगेव आपराह्णिकहस्तिच्छायाकालेश्राद्धस्य । अत एव महाभारते—

"अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम् ।
मघासु सर्पिषा युक्तं पायसं दक्षिणायने ॥
अजेन सर्वलोहेन मघासु च यतव्रतः ।
हस्तिच्छायासु च तथा कर्णव्यजनवीजितम्" ॥ इति ।
"परमान्नं तु यो दद्यात्पितृणां मधुना सह ।
छायायां कुञ्जरेन्द्रस्य पूर्वस्यां दक्षिणामुखः ॥"

इति विष्णुधर्मोक्तश्च । एवं महालयप्रकरणोक्तान्यप्यत्रापि दृष्टान्ताः । 'मघास्विति' इति वचने

यत् किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥"

इति मानवे च पृथक् मघानां नाति चकाराभ्यां । मधु च व्रतो-

---

(१) [illegible]

...मितम्' इत्याह । वस्तुतस्तु—

'मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एष नो दास्यति श्राद्धं वर्षासु च मघासु च ॥'

इति वसिष्ठवचने केवलमघाश्रुतेर्विनिगमकाभाव...
...ं भिन्नं निमित्तं, पूर्वोक्तवचनाच्च योगाधिक्ये फला...
...म् । अत एव याज्ञवल्क्यः ।

...था वर्षात्रयोदश्यां मघासु च विशेषतः ।' इति ।
...योदशीश्राद्धं नित्यम् । अन्यत्काम्यम् ।
...त्र 'त्रयोदश्यां बहुपुत्रा पुष्टिमानिणस्तु भवन्ति'

...ाद्धे मांसं तथा मधु' इति वाक्यात् इत्यभिप्रेत्याह—वच...
...वति । तस्य परस्परनिरपेक्षाक्रियान्वयलक्षणतद्वयार्थ...
...त एव न गुणः । आश्वयुजापरपक्षत्रयोदश्यां मघा...
... । मघयोरिवाति । स्पर्द्धितपक्षत्रयाभिप्रायेण । वासवतु...
...त्तुमभिप्रेत्य—

... वार्षिकान्मासान् यो मांसं परिवर्जयेत् ।
... चतुरश्चाप्नोति कीर्तिमायुर्यशो बलम् ॥"

...चनात् । एतच्च त्रयोदश्यादिविशेषणम् ।
...संङाप्तिते पक्षे त्रयोदश्याम्" "तथा वर्षात्रयोदश्याम्"
... । योगाधिक्ये मघात्रयोदश्युभययोगे—
...मघात्रयोदश्योः कुञ्जरच्छायसंज्ञितः ।
... सिंहे च वृश्चिकार्के करे स्थिताः ॥"
...मरस्थवयोगे माघसप्तामित्वात् । अत्र सं...
...योदश्यां श्राद्धेऽधिकृतादिकमर्थं कल्पयेत आह ।
...त्रयोदश्यां तु पक्षमासाभ्यां भिन्नं पुत्रादिप्राप्ति...
...श्राद्धेऽपक्षादिकमिति सिद्धे ब...
...—वक्ष्यति । कृष्णत्रयोदश्यां श्राद्ध...
...दश्यादिविशेषान्वयोक्तेः । इमादिबहुधा...

इत्यापस्तम्बोक्तेर्युवमारित्वमपत्यदोषं सहिष्णोरपत्यमात्रार्थिनः स्मृत्यन्तरोक्तधनार्थिनो वाधिकार इति कल्पतरुः। *अपत्यनिन्दया तदर्थिनोऽनधिकारात् फलान्तरकामस्यैवाधिकार इति हलायुधः। ... कार्यम्।

'मघायुक्तत्रयोदश्यां पिण्डनिर्वपणं द्विजः।
ससंतानो नैव कुर्यान्नित्यं तं कश्यपो विदुः॥'

इतिवृद्धपराशरोक्तेः। इदं मलमासेपि कार्यम्।

'मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम्।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे॥'

इत्याद्यग्रिमग्रन्थस्तु महालयत्रयोदशीश्राद्धपरः। तत्र निषेधोपपादकनिन्दामाह—*याद्दिति। युवानः समनन्तरजनिष्यमाणापेक्षया पूर्वोत्पन्ना इति यावत्। ते म्रियन्ते इति श्रुत्यर्थया पुत्रबहुत्वेच्छोर्न्यबहुपुत्रलाभार्थं तच्छ्राद्धनिषेधोपपत्। अत एवैतत्सामान्यनिषेधमूलक एव शिष्टानामेकमात्रपुत्रतो बहुपुत्रकामनया पुत्रार्थविहितहरिवंशश्रवणादिकर्मानाचारः सङ्गच्छते। अत एव संतानरहितस्य तद्वतोऽपि वा तदतिरिक्तमोक्षादिफलार्थिनः न त्रयोदशीमात्रप्रयुक्तश्राद्धनिषेधः।

"यो वाञ्छति नरो मुक्तिं पितृभिः सह चात्मनः।
असन्तानश्च यस्तस्य श्राद्धे योक्ता त्रयोदशी॥"

इत्यादिस्कान्दात्। चकारः असन्तानस्याधिकारान्तरार्थः। तदेवाह—*अपत्येति। तस्यायमर्थः। सामान्यत्रयोदशीश्राद्धमेव पुत्रवता बहुपुत्रेच्छया न कर्तव्यम्। महालयत्रयोदशीश्राद्धं च पितृवर्गमात्रस्य न कर्तव्यं किन्तु मातामहवर्गस्यापि। तत्रापि पिण्डदानं न कर्तव्यं, किन्तु मधुघृतपायसादिना ब्राह्मणभोजनमात्रमिति। पूर्वोत्तरग्रन्थस्तु सुमतिनिर्णीताः... वर्षीत्यादिपञ्चीकाभ्यां केवलमघाश्राद्धं केवलत्रयोदशीश्राद्धं च

इति काठकगृह्योक्तेः । यानि तु अङ्गिराः—

'त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः ।
पञ्चत्वं तस्य जानीयात्*ज्येष्ठपुत्रस्य निश्चितम् ॥'

वामनपुराणे—

'त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान् गृही ।'

इत्यादीनि वचनानि तानि*पुत्रवद्विषयाणि वा, (१)*(महालयव्यतिरिक्तत्रयोदशीविषयाणि वा, *काम्यश्राद्धविषयाणि वा,) *सपिण्डकश्राद्धविषयाणि वेति केचित् । हेमाद्रिप्रमुखास्त्वेकवर्गश्राद्धविषयाणि ।

विशिष्टनिमित्तकत्वेन सगोत्रकत्वेन च शुद्धपक्ष एव कार्यं न मले इति सूचितम् । *ज्येष्ठपुत्रस्येति । समनन्तरजनिष्यमाणापेक्षया पूर्वोत्पन्नो ज्येष्ठ इति केचित् ।

"ऋणं पित्र्यप्रदानं तु ज्येष्ठपुत्रो विवर्जयेत्" ॥

इति वचनं ज्येष्ठ एवेत्यन्ये । *पुत्रवदिति । पुत्रवत्पदश्रवणात् । *महालयेति । गजच्छायायाः श्राद्धकालत्वात् । *काम्येति । नित्यस्य निषेद्धुमशक्यत्वात् । *सपिण्डकेति । उक्तवचने कृष्णपक्षत्रयोदशीमात्रमतीतावपि—

"कन्यां चैव यदा चन्द्रो हंसश्चैव करे स्थितः ।
त्रयोदशी तु सा छाया विज्ञेया कुञ्जराभिधा ॥
श्राद्धेऽत्रातिप्रशस्ता सा पितॄणां तृप्तिकारिणी ।
अतो मयात्रयोदश्यामेवैतैरेव हि साधनैः ॥
करोति श्रद्धया श्राद्धं तत्प्रभावमनुस्मरन् ।
तस्य तद्वचनं श्रुत्वा ये चान्येऽपि जना भुवि ॥
नभस्यस्य त्रयोदश्यां श्राद्धं चक्रुर्मुदान्विताः ॥ इति ।
अद्यप्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति ।
कन्यासंस्थे सहस्रांशौ तस्य स्याद्वंशसंक्षयः ॥

---

[१] कंसान्तर्गतो ग्रन्थः आदर्शपुस्तके नास्ति ।

'श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत् ।
न तृप्तास्तत्र ये यस्य प्रजां हिंसन्ति तस्य ते ॥'
इति कार्ष्णाजिनिस्मृतेः । यद्यपि

इति मध्ये महालये त्रयोदशीपरामर्शादुपक्रमेऽप्यविरोधं तत्परत्वात्तत्रापि श्राद्धं प्रतीयते । तस्य बहुफलार्थित्वम् विहितत्वात्यन्तं निषेधायोगात् षोडशिग्रहणवद्विकल्पासंभवं निषेधे कर्तव्यत्रिद्विविषये वाच्ये सपिण्डकत्वं विषय उपेयते ।

अतः श्राद्धं विना देयं तद्दिने मधुपायसम् ।
खड्गमांसं कालशाकं मांसं वार्ध्रीणसस्य तु ॥
तस्याभावेऽपि दातव्यं क्षीरोदनमनुत्तमम् ।
तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये नृप ॥
तस्याभावेऽपि दातव्यं जले तिलविमिश्रितम् ।

इति नागरखण्डात् । अत्र श्राद्धं पिण्डदानम् । अग्रे ब्राह्मणभोजनस्योक्तत्वेन तन्निषेधासंभवादिति भावः । न च—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
युगादिषु च सर्वासु पिण्डनिर्वपणादृते ॥"

इति सामान्यतो युगादिश्राद्धत्वात् पिण्डदाननिषेधे सिद्धे विशेषतस्तन्निषेधो व्यर्थ इति वाच्यम् । प्रागुक्तवचनैरेतत्त्रयोदशीश्राद्धस्यात्यावश्यकत्वात् सर्वपितृतृप्तिहेतुत्वश्रवणात् । पिण्डदानस्य चात्यन्ततृप्तिहेतुत्वात्सत्यपि युगादिश्राद्धत्वे सामान्यनिषेधबाधेन पिण्डदानं भविष्यतीति शङ्कानिवृत्त्यर्थत्वात् ।

असन्तानस्तु यः श्राद्धे तस्य भोक्ता त्रयोदशी ।
सन्तानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेत् ॥"

इत्यनेन असन्तानस्याधिकारो न बोध्यते किन्तु यथायुक्तत्रयोदश्यामित्यावश्यकत्वावगतया ससन्तानस्य पिण्डवर्जनम् । असन्तानेत्यर्धं तु स्तावकम् । तस्मादिमानि सर्वाण्यपि पुत्रवद्गृहस्थस्य सपिण्डकश्राद्धविषयाणीति मयूखः । एकवर्गस्य=पितृपिताम-

'पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।'

इति धौम्योक्तेर्न केवलपितृवर्गस्य प्राप्तिस्तथापि क्षयाहमोहादिप्राप्तनिषेधोऽयमिंस्त्याज्यः । यत्तु पद्मपा-नः—पुत्रवद्विषयाण्येवेति ।

'असंतानस्तु यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ।
संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेत् ॥'

इति हेमाद्रौ नागरखण्डोक्तेः । पूर्ववाक्यमप्यसंता-नपरत्व । *आहुरिति । येषां सूत्रे मातामहा नाम्नातास्तन्म-ति सामान्यत एकपार्वणमेव प्राप्नोति

"यावत्किञ्चित्स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥"

इति वचनात्, तन्निषेधार्थत्वमन्यत्राप्यामोहानुसरणं व्यर्थम् । यत्तु उभयवर्गप्राप्तनिषेधं वचोवैयर्थ्यापत्त्या जीवन्मातृमातामहवर्गकं प्रसक्तं निषेधतस्तदेकवर्गप्राप्तिरिति, तन्न वृथा इत्यादौ परापेक्षार्थवादा-संगतेरिति । वस्तुतस्तु दर्शश्राद्ध एव मातामहानावश्यकत्वस्य मि-ताक्षरायां दर्शनात्त्रयोदश्यामेकवर्गश्राद्धप्रसक्तौ तन्निषेधो युज्यते । एवं वृद्धिश्राद्धादौ

पद्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ।

इति मातामहश्राद्धपुनर्वचनवदिति । प्रवेशादि (१)महालयश्रा-द्धकरणे तु तेन त्रयोदश्यादिश्राद्धानां प्रसङ्गसिद्धिः । बहुदैवत्यस-पिण्डत्वादिभिर्विशेषग्रहणात् । तेन महालयश्राद्धस्य तन्त्रतोऽक्षिय नादेया । तत्राऽपत्नीकस्य पित्रादेः, त्रयोदश्यादौ तु सपत्नीकस्य तस्येति दैवतभेदे तु न प्रसङ्गसिद्धिरपीति ।

---

(१) षड्दैवत्यान्महालयप्रकरणे तु महालये पितृव्यादेरपि-त्वस्यापि सत्त्वादष्टदैवत्यत्वे, श्राद्धत्रयदैवत्यमहालये तु अष्टाधिकविश्वा-देदैवतात्वं, त्रयोदश्यादौ तु सपत्नीकस्येति भेदे न प्रसङ्गोऽपि तु पृथक् ।

नस्यैवैकयगौनिषेधकमिति । अत्र मघात्रयोदशीमहालय-युगादिश्राद्धानां तन्त्रेण (१) प्रयोगे न तु प्रसङ्गसिद्धिरित्यन्यत्र विस्तरः ॥

अथ चतुर्दशी । पृथ्वीचन्द्रोदये प्रचेताः—

*'वृक्षारोहणलोहाद्यैर्विद्युज्जलविषाग्निभिः ।
नखिदंष्ट्रिविपन्ना ये तेषां शस्ता चतुर्दशी ॥'

ब्राह्मे—

* 'युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ।
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥'

नागरखण्डे—

'अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ।
श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ॥'

एतच्च प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैर्मृत

यद्यपि कन्यां कन्याविदितश्चेति काम्यकृष्णपक्षश्राद्धे—
"प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ॥"
इति याज्ञवल्क्येन सर्वकृष्णपक्षचतुर्दशीमुक्तं, तथापि—
'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये ।'
इति कालादर्शोक्तमहालयचतुर्दश्यामपवादकम् । तत्र शस्त्रहतानां येषामुक्तमपि, तानाह—*वृक्षेत्यादि । अपमृत्युः=अपमृत्युः, तानाह—*युवान इति । अपमृत्युहतानां चतुर्दश्यां [illegible] प्रत्युः ।

---

(१) [illegible] तन्त्रेण [illegible] ।

ताविति गौतमोक्तदुर्मरणोपलक्षणम्। एकयोगनिर्देशात्

'सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तत्समं ज्ञेयमेकरूपा हि ते स्मृताः ॥

इत्युदानसोक्तेश्च । तत्र कृताक्रियाणामेवेति वक्ष्यामः । मरीचः—

'विषशस्त्रापदाहिनिर्यङ्मब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रियाः कार्या अन्येषां तु विगर्हिताः ॥'

अत्र श्रब्राह्मणघाती तेन हतो न तु ब्रह्महा, तस्य पतितत्वादिति शूलपाणिः । अत्रोद्देशगर्भवेदापदनस्याविवक्षितत्वात्स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यं (१)(न पार्वणमिति)श्रीदत्तोपाध्यायाः। इदं विषादिहतानामेव न प्रसवादिमृतानामिति वाचस्पतिः । यत्तु शाकटायनः—

'जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि ।
श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीम् ॥' इति,

तत्श्रप्रायश्चित्तार्थजलादिमृतविषयमित्याकरे उक्तम् ।

"उपसर्गमृतानां च विषमृत्युमुपेयुषाम् ।
श्राद्धं तेषां मकर्तव्यं चतुर्दश्यां नराधिप ॥"

इति वचनात् । श्रब्राह्मणेनेति । विषादिभिर्घातो येषामिति विग्रहः । एतच्च मार्योनागकण्ठग्राहविषोदकोद्बन्धनमपतनैर्विच्छन्नामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात् ।

"सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥"

इत्युदानसोक्तेः । इच्छयेत्युक्तेः प्रसवादिमृतानां नैतत् । श्रप्रायश्चित्तेति । सर्पादेः साहचर्याज्जलाग्न्यादयोऽप्यनुद्धावा एव

[१] कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

नस्यैवैकवर्गनिषेधकमिति । अत्र [१]

युगादिश्राद्धानां तन्त्रेण (?) प्रयोगे न तु प्रसङ्गसिद्धि-रित्यन्यत्र विस्तरः ॥

अथ चतुर्दशी । पृथ्वीचन्द्रोदये प्रचेताः—

*'वृक्षारोहणलोहाद्यैर्विद्युज्जलविषाग्निभिः।
नखिदंष्ट्रिविपन्ना ये तेषां शस्ता चतुर्दशी ॥'

ब्राह्मे—

* 'युवानः पितरो यस्य मृताः शस्त्रेण वा हताः।
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥'

नागरखण्डे—

'अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ।
श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ॥'

एतच्च प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैर्मृत्व

यद्यपि कन्यां कन्यावेदिनश्चेति काम्यकृष्णपक्षश्राद्धे—

"प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ॥"

इति याज्ञवल्क्येन सर्वकृष्णपक्षचतुर्दशीमुक्तं, तथापि—

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये ।'

इति कालादर्शान्महालयचतुर्दश्यामप्यावश्यकम् । तत्र शस्त्र-हतपदं येषामुपलक्षणं, तानाह—*वृक्षेत्यादि । अपमृत्युः=अका-लमृत्युः, तदाह—*युवान इति । अपमृत्युरुपसर्गमृत्युर्दृष्टव्यः। उपसर्गो ग्रहभूताद्यावेशस्तेन मृत्युः ।

---

[१] अङ्गानामैक्यं प्रधानमात्रभेदस्तन्त्रम् । तेन विश्वेदेवपाकाद्यङ्गा-नामैक्यं विप्रार्घ्यपिण्डादेर्भेद एव । प्रसङ्गसिद्धिस्थले तु प्रधानमपि न भिद्यते इति । त्रयोदशीश्राद्धेऽपरपक्षत्वाद् धूरिलोचना विश्वेदेवाः स्मार्ते उक्ता इति धर्मसिन्धुः ।

तामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात्

'सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तत्समं ज्ञेयमेकरूपा हि ते स्मृताः ॥'

इत्युशनसोक्तेश्च । तच्च कृताक्रियाणामेवेति वक्ष्यामः । मरीचिः—

'विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रियाः कार्या अन्येषां तु विगर्हिताः ॥'

अत्र *ब्राह्मणघाती तेन हतो न तु ब्रह्महा, तस्य पतितत्वादिति शूलपाणिः । अत्रोद्देश्यविशेषणस्याविवक्षितत्वात्स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यं (१)(न पार्वणमिति) श्रीदत्तोपाध्यायः । इदं विषादिहतानामेव न प्रसवादिमृतानामिति वाचस्पतिः । यत्तु कात्यायनः—

'जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि ।
श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीम् ॥' इति,

तत्*प्रायश्चित्तार्थजलादिमृतविषयमित्याकरे उक्तम् ।

"उपसर्गमृतानां च विषमृत्युमुपेयुषाम् ।
श्राद्धं तेषां मकर्तव्यं चतुर्दश्यां नराधिप ॥"

इति वाक्यात् । *ब्राह्मणेति । विषादिभिर्घातो येषामिति विग्रहः । एतच्च मार्योनाशकव्याघ्रादिविषोदकोद्बन्धनपतनैर्मृतानामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात् ।

"सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तत्रैवैकार्यमेकरूपा हि ते स्मृताः ॥"

इत्युशनसोक्तेः । इच्छयेत्युक्तेः प्रसवादिमृतानां नैतत् । *प्रायश्चित्तेति । यथोदः साहचर्याज्जलाग्न्यादयोऽनुष्ठाता एव

[१] कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

अत एव वैधत्वात्सहगमनेऽपि न कार्यमिति हेमाद्रिः एतच्च दैवयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते-

'प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टं विधानतः।
दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत्॥
तच्छ्राद्धं दैवहीनं चेत्पुत्रदारधनक्षयः।
एकोद्दिष्टं दैवयुक्तमित्येव मनुरब्रवीत्॥'

भविष्येऽपि—

'समत्वमागतस्यापि पितुः शस्त्रहतस्य च।
चतुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये॥
चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः॥'इति।

संवत्सरप्रदीपे हारीतः—

'विश्वेदेवांश्च तत्रापि पूजयित्वा दितोऽमरान्।
ये वै शस्त्रहतास्तेषां श्राद्धं कुर्यादतन्द्रितः॥'

अत्रैकोद्दिष्टवचनानां निर्मूलत्वं, समूलत्वेऽपि पार्वणशास्त्रपराणि। *विष्ण्वादिवचनैः प्रकरणात् कृष्णपक्षीयपार्वणावगतेरिति शूलपाणिः। तन्न। *वाक्येन प्र-

---

प्राशाः। अतः असाध्यव्याध्यादिपीडितानां जलाग्न्यादिप्रवेशेन मरणनिमित्तकाग्निप्रवेशेन च मृतानां नेदं श्राद्धमित्यर्थः। युद्धसृतौ प्रायोनाशके च वैधत्वेऽपि वचनाद्भवतीति बोध्यम्। एवं च—

"ज्ञातिश्रेष्ठं त्रयोदश्यां चतुर्दश्यां तु सुप्रजाः।
प्रीयन्ते पितरश्चास्य ये वै शस्त्रहता रणे॥"

इत्यादिकं त्ववैधमृतिविषयम्। पितरित्यादि पितृमृतपदं श्राद्धदेवता तदधिकारिपरम्। *विष्ण्वादीति। कृष्णपक्षप्रकरणे "संभूते पार्वणं कुर्यात्"इत्यादीत्यर्थः। *वाक्येनेति। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थ-

रणस्य बाधात्। पित्रादीनां पार्वणं भ्रात्रादीनामेकोद्दि-
ष्टमिति गौडाचार्याः। तन्न, पितुरित्यनेन विरोधाद् अवि-
शेषवाक्यवैयर्थ्यापत्तेश्च। अथ शस्त्रहतस्यैव चतुर्दश्या-
ाति नियमो न तु चतुर्दश्यामेव शस्त्रहतस्येति।

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये।'

इति कालादर्शात् वार्षिकादीनामकरणापत्तेश्च।
र महालये एव दिनान्तरे पार्वणं मातामहादितृप्त्यर्थं

मकर्षादिति बलाबलाधिकरणगुणम्। दर्शपूर्णमासप्रकरणे 'इ-
द्यावापृथिवी भद्रमभूत्' इति सूक्तवाकनिगदे "इन्द्राग्नी इदं हवि-
रजुषेतामवीवृधेतां महो ज्यायोऽक्राताम्, अग्नीषोमाविदं हविरजुषे-
तामवीवृधेतां महो ज्यायोऽक्राताम्" इत्येवमादिकं श्रूयते। तत्र पौ-
र्णमास्याम् इन्द्राग्नी न देवते इति तत्पदमपनीयते असमवेतार्थत्वात्।
ं च येन सह यदेकवाक्यतापन्नं तेनैव सह तदपनयनौचित्या-
चारत्वेन 'अवीवृधेताम्' इत्यादीन्यप्यपनेयानि। अथासमवेता-
र्थया देवतापादानेऽपि 'अवीवृधेताम्' इत्यादेरविकृते-
ताकाङ्क्षारूपप्रकरणाद् प्रयोगो दुर्वार इति चेत्। न, यतः प्रक-
रणस्य विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्य न विनियोजकत्वम्।
अत एव दर्शपूर्णमासप्रकरणपठितोऽपि 'पूष्णोऽहं देवयज्यया' इति
ानुमन्त्रणमन्त्रस्तद्देवताविरहिणोस्तयोर्न प्रवर्तते। एवं लिङ्ग एव
स्योपसदो द्वादशाहीनस्येति प्रकरणसाध्यसोमयागरूपे साह्ने
दशोपसदां न बोधयति सा पुनर्नानादिनसाध्यसोमयागरूपा-
हीने नीयते तत्प्रकरणेनाकाङ्क्षावशात् संबन्धं कल्पयित्वा ते-
न क्रमेण कल्पिताभ्यां सामर्थ्यश्रुतिभ्यां चतुर्थकाले विनियोगो
भवेत्। अतः प्रागेव च वाक्येन सामर्थ्यं कल्पयित्वा श्रुतिः
कल्प्येति तृतीयकाले विनियोग इति बलीयसा वाक्येन प्रकरणं
बाध्यते। एवं च लिङ्गेन यथा—'इन्द्राग्नियागोऽग्नीषोमे' इत्यादा-

कार्यमेव । पितामहोऽपि-शस्त्रहतश्चेदेकोद्दिष्टत्रयं कार्यं तदुक्तं हेमाद्रौ स्मृत्यन्तरे-'एकस्मिन्द्वयोर्वैकोद्दिष्टम्' इ त्रिषु शस्त्रहतेषु पार्वणमेव कार्यम् ।

यत्तु देवस्वामिनोक्तं त्रिष्वपि शस्त्रहतेषु पृथ को*द्दिष्टत्रयं कार्यं न तु पार्वणमाहत्यवचनाभावादि तदयुक्तम् ।

*'पित्रादयस्त्रयो यस्य शस्त्रैर्याताः स्वनुक्रमात् ।
स भूते पार्वणं कुर्यादाब्दिकानि पृथक् पृथक् ॥'

इति वृद्धपराशरोक्तेः

पयेन तच्छेषभागः, तत्र पदानां संबन्धस्य प्रत्यक्षसिद्धत्वात् प्रकृते च 'समत्वमागतस्य' इति वाक्यस्य झटिति प्रकृतेन [illegible] प्रशमकरणं बाध्यते इत्यर्थः । *पित्रोरेवेति ।

"सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।

वाक्यानां वैयर्थ्यमित्यर्थः ।

*एकोद्दिष्टत्रयमिति । 'एकस्मिन् द्वयोः' इत्येतद्यथाश्रुते वाक्यभेदभयेन तद्योरङ्गत्वात् शस्त्रहनने निमित्ते एकोद्दिष्टविधिमात्रपरम् 'एकस्मिन्, द्वयोः' इति तु 'एकं वृणीते, द्वौ वृणीते' इत्यादिवदनुवाद इत्यर्थः । एकोद्दिष्टत्रयादिकं तन्त्रेणेति बोध्यम् । *पित्रादय इति । 'शस्त्रेण तु हता ये वै' इति वचनान्तरस्य नियमपरत्वाद् [illegible] द्वयोर्वा शस्त्रादिमरणेऽप्यनुपपत्त्या [illegible] एकोद्दिष्टम् एकस्मिन् इत्यादिनाऽनूद्यते न तु विधीयते । एवं [illegible] सिद्धेः 'पितृपक्षे [illegible]' इत्यादिरनुवादः । एवं [illegible] । एकोद्दिष्टस्य विधाने हि [illegible], न तिस्रः तथा । एवं च त्रिषु हतेषु 'कार्ये [illegible]

'एकस्मिन्वा द्वयोर्वापि त्रिशुच्छस्त्रेण वा हते।
एकोद्दिष्टं सुतः कुर्यादष्टम्यां दर्शवत्त्रिवम्॥'

इति स्मृत्यन्तरादपीति पृथ्वीचन्द्रोदये उक्तम्। अपरार्के हेमाद्रौ चैवम्। यत्तु अत्रैव शस्त्रादिना हतस्तस्य पार्विकमेव पार्वणमेव*कोद्दिष्टं वा कार्यं न तु श्राद्धद्वयं *प्रसङ्गसिद्धेरिति पृथ्वीचन्द्रोदये। अत्र*श्राद्धाकरणेऽप्रिमापरपक्षे दिनान्तरे*पार्वणेनैव कार्यमिति तत्रैवोक्तम्। यदपि—

'शस्त्रविषहतानां च दंष्ट्रिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत्॥'

र्वणवत्कुर्यात्' इति सपिण्डनोत्तरभावित्वेन सामान्यवाक्यप्राप्तपार्वणस्याबाधात् पार्वणमेव भवति। तथा च मैक्तवाक्यानां निर्मूलत्वं वदतामपि नैकोद्दिष्टसिद्धिरिति तु वस्तुगतिः। *एकोद्दिष्टं चेति। यथाचारमिति शेषः। *प्रसङ्गसिद्धेरिति। चतुर्दशीश्राद्धे न भवतीति भावः। संक्रान्तिव्यतीपातादिनिमित्तकं तु चतुर्दश्यां पार्वणमेव। चतुर्दशीनिमित्तकं तु पृथक् कार्यं सपिण्डकत्वरूपविरुद्धधर्मत्वात्। *श्राद्धाकरणे इति। यदि महालयं चतुर्दशीश्राद्धं न कृतं तदा वृश्चिकदर्शनपर्यन्तं कस्मिंश्चिद्दिने कार्यमित्यर्थः। *पार्वणेनैवेति।

"संक्रान्तावुपरागे च पर्वोत्सवमहालये।
निर्वपेद्त्र पिण्डांस्त्रीनिति माह प्रजापतिः॥"

इतिवाक्यस्य शस्त्रहतानां दिनान्तरे पार्वणप्रापकत्वादिति मयूखभावः। एकोद्दिष्टविधिनैव अन्तरितं कार्यम्। यथाप्राप्त एव गौणकालविधानात् न तु पार्वणं देवताविरहादिति तत्त्वम्। चतुर्दश्यां पार्वणे प्राप्ते देवताभूतपित्रादिदुर्मरणनिमित्तक एकोद्दिष्टेतिकर्तव्यताकः प्रयोगो विधीयते न त्विदं कर्मान्तरं पार्वणस्यादग्रे पार्वणं का-

इति छागलेयाद्यैः शस्त्रादिहतानां श्राद्धं निषिद्धं तथापि प्रमादमृतानां श्राद्धार्हत्वात्कार्यं, ... द्विपूर्वमृतानां तु न कार्यम्। यत्तु-

'चतुर्दश्यां तर्पणीया लुप्तपिण्डोदकक्रियाः।'

इति ब्राह्मे, तद्गौ*णमिति शूलपाणिः। ... मानाभावात्।

*'पतितेनापि कर्तव्यं कर्तव्यं*पतितस्य च॥'

इति गयादिविशेषविधिबलात्पतितानामपि कार्यमिति नव्यगौडाः। तत्त्वं तु*समत्वमागतस्येत्यादिवशात्कृतक्रियाणां कार्यं नान्यथामिति वयं प्रतीमः। यत्तु मनुः-

'न पैतृयज्ञियो होमो लौकिकाग्नौ विधीयते।
न दर्शेन विना श्राद्धमाहिताग्नेर्विधीयते॥' इति,

अत्र पूर्वार्धं *हेतुत्वेनोक्तम्। *तद्यथाश्रुतमेव मन्यामि...

र्यमित्यर्थ इत्यन्ये। *गौणमिति। श्राद्धं निषिद्धमतस्तदभावे तर्पणमेव कार्यमित्यर्थः। *लक्षणापरामिति। लुप्तपदस्य निषिद्ध इत्यादिः। यथाश्रुतार्थत्वे तु शस्त्रादिहतानां श्राद्धं मुख्यं तर्पणमनुकल्प इति लभ्यते इत्यर्थः। *पतितेनापीति। अपतितस्येति शेषः। *पतितस्येति। 'अपतितेनापी'ति शेषः। *समत्वमिति। दुर्मरणमृतानामौर्ध्वदेहिकं वर्षोर्ध्वे तत्काले वा कार्यम्। तत्र यावदौर्ध्वदेहिकं न कृतं तावत्पर्यन्तमिदं न कार्यम्। कृतक्रियाणां तु कार्यं 'समत्वमागतस्य' इति विशेषणादित्यर्थः। इतिरच्छागलेयवचनं तु दुर्मरणमृतानां प्रायश्चित्तं विना तत्काल और्ध्वदेहिकं न कार्यमित्येतदर्थकम्। *हेतुत्वेनेति। 'न दर्शेन' इति वाक्यं कृष्णपक्षश्राद्धविषयम्। आहिताग्निना सर्वाधानिना श्राद्धरूपपितृयज्ञाङ्गभूतो होमः 'कर्मपात्रं विवाहाग्नौ' इति विहितः औपासने दुष्करः। लौकिके तु स न विधीयते। अग्नेः प्रविनिय...

भावात् । यत्तु

"साग्निरप्यवनग्निस्तु द्विजपाणावथाप्सु वा ।
कुर्यादग्नौ क्रियां नित्यं लौकिकेनेति निश्चितम् ॥"

इति स्मृत्या तत्र निषेधः । नाप्यनाग्निकविहिते पाण्यादौ साग्नित्वात् । तस्मात् परिशेषाच्छ्रेताग्नावेव कार्यः । तत्रापि दाक्षिणाग्नावेव पिण्डकर्माधिकरणत्वेन दृष्टत्वात् "अयं पितॄणामग्निः" इत्यादिमन्त्रवर्णाच्च । स च दर्शान्यदिने न लभ्यते । यदि हि श्राद्धीयहोमेऽपि स्वार्थतया तस्य विहरणमाहरणं वा प्रयुञ्जीत ततस्तत्रापि स लभ्येत । स च तदा तत्प्रयुञ्जीत यदि कापि तत्प्रयुक्तिं विना तत्र लभेत । शक्नोति तु दर्शे तां विनापि दर्शयागार्थं विहरणादेरेव तं लब्धुम् । तस्मात्सर्वाधानाहिताग्निना दर्श एव कृष्णपक्षश्राद्धं कार्यं नान्यदिने इति । अत्रेदमस्वरसबीजम् । साक्षाद्वचनं विना श्राद्धीयहोमः श्रौताग्नौ कर्तुमशक्यः । तथा हि श्रौतानामग्नीनां प्रयोजनाकाङ्क्षया स्वार्थे कर्मणि विनियोगः । असंयुक्तोत्पन्नानामपि तेषां वाचनिकैर्होमादिभिरेव प्रयोजनाकाङ्क्षाशान्तेः । 'कुर्वाग्नौ पितृयज्ञवत्' इति च अग्निपदं न श्रौताग्निपरं 'गृह्याणि वक्ष्यामः' इति प्रतिज्ञा नागृह्यगतस्याग्निपदस्य 'कर्म स्मार्तं विवाहाग्नौ' इत्युक्तेः । स्मृतिगतस्य च तस्यौपासनाग्निपरत्वात् ।

नापि पितृयज्ञवदित्यतिदेशाद्दक्षिणाग्निप्राप्तिः । अग्नेरुपदेशसिद्धत्वेनातिदेशस्य तद्भिन्नधर्मविषयत्वात् । अन्यथा 'अग्नौ' इत्यस्य वैयर्थ्यात् । न च तस्य दक्षिणाग्निपरत्वं तथात्वेऽतिदेशाद्दक्षिणाग्निरेव माप्नुयादिति तत्सिद्ध्यर्थं तस्यौपासनाग्निपरत्वात् । एकस्यैवाग्निशब्दस्य गृह्याग्निपरत्वं प्रति तत्परत्वं सर्वाधानिनं प्रति दक्षिणाग्निपरत्वं च कथं स्यात् ? तस्माद् गृह्येषु स्मृतिषु चाग्निपदेन गृह्याग्नेरेव ग्रहणात्तदभावे निरग्नेरिव चन्द्राग्नेव श्राद्धीयो होम [illegible] ।

*अन्ते पूर्ववाचनं रणादूणः आहिताग्नेः पिण्डपि[illegible] न श्राद्धानिषेधार्थमिदं वचनं तु साग्निकपरं [illegible]

'अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्' ।

इति मनुवचनात् । अत एव होमस्याग्निकरणाख्यस्य पाणिप्रतिपत्तिरप्यपि न वाचनिकेन पाणिनैवाग्न्याहुतिः संभवात् यदि च—

'आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः' ।

इत्यादि वक्ष्यमाणवचनमेव सर्वाधानिनामाहिताग्नेः दक्षिणाग्निमात्रकमिति मन्यते तदा [illegible] नापि तस्य विहरणादिप्रयुक्तिसंभवात् दर्शान्यदिनेऽपि दक्षि सुलभ एव स्यात् । तस्मान्न दर्शेनेत्यत्र न पैतृयज्ञिय इत्यस्य हेतुत्वेन व्याख्यानमसंगतमेवेति गुरुचरणमाह—*अत इति । अयं भावः—द्वयोरप्याहिताग्न्योः 'न दर्शेन विना श्राद्धम्' इति वाचनिक एवार्थः । 'न पैतृयज्ञिय' इति वाक्यं तु पृथगेव

"आहृत्य दक्षिणाग्निन्तु होमार्थं वै प्रयत्नतः ।
अग्न्यर्थं लौकिकं वाऽपि जुहुयात्कर्मसिद्धये ॥"

इति पुराणोक्तलौकिकनिषेधार्थम् । निषिध्यते च [illegible] कमप्यन्तरेण यद्गृह्यते द्विजातीनामितिवत् । न च वायुपुराणे—'अग्न्यर्थं दक्षिणाग्निकार्यार्थं लौकिकं गृह्यम्' इत्युक्त्याऽग्नौकरणहोमे दक्षिणाग्निर्मुख्यस्तदभावे गृह्याग्निरित्येवास्त्विति वाच्यम् । स्ववाक्यगतमकृतपरामर्शस्य सर्वनाम्नः तत्तद्विशेषशब्देनैवा दृष्टत्वात्सामान्यवाचिनाऽग्निशब्देन दक्षिणाग्निपरामर्शानुपपत्तेरिति । *इदानीमिति । न दर्शेत्यस्य यथाश्रुतार्थो न ग्राह्यः तथा सति मृतपितृकेऽप्यान्वष्टक्याद्यकरणप्रसङ्गात्, किंतु अग्निसाध्येषु दर्शं विना पिण्डपितृयज्ञकल्पं विना साग्निको नाधिकारीत्यर्थः । अग्निसाध्येष्वित्यध्याहारफलमाह—*न त्विति ।

वः । ०कृष्णपक्षश्राद्धमन्यदिनेषु मासमाहिताग्नेर्दर्शे नि-
षम्यत इति तु पथम् । ०दर्शेन पार्वणेन विना श्राद्धं न ।
तेन क्वापि पार्विकादावेकोद्दिष्टं नेति हरिहरः ॥

इति चतुर्दशी ॥

अमायां विशेषमाह पराशरः–

०"हंसे करस्थिते या तु अमावास्या ०करान्विता ।

अत्र दर्शपदे लक्षणापत्तिविरोधसाध्यानापत्तविनाऽपानां च संके-
तानुवादत्वे पर्यवसाने वाक्यभेदः । सिद्धान्तयति—०कृष्णपक्षे-
ति । न दर्शेनेति वाक्यं नाहिताग्नेर्दर्शश्राद्धातिरिक्तश्राद्धनिषे-
धार्थं मलिनासहितादेरकरणप्रसङ्गात्, दर्शपदे श्राद्धलक्षणा-
पातात्, नियमपरत्वे सम्भवति अपूर्वविधिपरत्वे गौरवात्,
किन्तु कृष्णपक्षश्राद्धे पक्षौ कार्यौ विविधौ कर्तव्ये दर्शकाले-
यमार्थम् । एवं महालयापरपक्षश्राद्धमपि सकृत्पक्षे दर्शे प्रकारद्वये-
ऽपि । मासि सामान्यतः सकृत्त्वे तत्र कालविशेषनियमपरत्वे
लाघवेन तथैव पक्षे पूर्ववचनमहत्त्वेः । पक्षान्तराऽपदर्शादिकालेऽपि
शेषवत्त्वेव, यथा महालयश्राद्धस्य सकृत्करणपक्षे ऽन्यदिने च-
तुर्दशिषियौ कर्तव्यं द्वादशीकालो नियम्यते तत्र महालये पक्षा-
न्तराणि भवन्त्येव, तद्वदिति । एतेनाहिताग्नेर्दर्शश्राद्धमेव नियतं नेव
विनाऽन्यश्राद्धं तु न तत्र नियतमिति नित्यवदाऽपाकरोति
ऽपरातिथिविधानं मातृके, वार्षिकादेरविकल्पत्वात् । ०दर्शेने-
ति । सपत्नमासादेरेकोद्दिष्टविधिना पार्वणाकरणापत्तिरत्रलः ।
०हंसे इति । हंसो हरिः । हरौ-हृदिस्थसवर्णत्वेऽपि तारक-
सार्थे । गजच्छाया द्विविधा—लौकिकी शास्त्रीया च । तत्र लक्षणा
"यदेन्दुः पितृदैवत्यो हंसश्चैव करे स्थितः ।
तिथिर्वैवस्वती या च गजच्छाया प्रकीर्तिता ॥"
इति स्कान्दोक्तापि सैव । पितृदैवत्ये मघा, वैवस्वती तिथिः

सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ॥
*वनस्पतिगते सोमे छाया या प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता*तस्यां श्राद्धं प्रकल्पयेत् ॥

भारते-

*"अजेन सर्वलोहेन *वर्षासु निपतत्वनः ।
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितम् ॥"
श्राद्धं दद्यादिति शेषः ॥

आश्विनशुक्लप्रतिपदि दौहित्रस्य मातामहश्राद्धमुक्तम् । हेमाद्रौ संग्रहे च-

*"जातमात्रोऽपि दौहित्रो विद्यमानेऽपि मातुले ।
कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ॥" इति ।

त्रयोदशी । तथा च रवौ हस्तगे द्वादश्यां मघासत्त्वे ग्रन्थोक्ता, त्रयोदश्यां मघासत्त्वे चेयमिति फलितम् । इदं कालाङ्गकम् । यौगिकीमाह-*वनस्पतीति । अपराह्णोपलक्षणम् । हस्तिनइति शेषः । *तस्यामिति । अपराह्णे गजच्छायायामित्यर्थः । इदं च देशाङ्कमिति विशेषः । *अजेनेति । *वर्षास्विति त्रयोदशीश्राद्धपरम् । मघास्विति पाठान्तरं माशुक्तम् । हस्तीति देशाङ्गस्वलाभः । कर्णव्युपादानात् कर्णो मुखावयवविशेषः । अथ वानस्पतिरश्वस्य सोमवारः तथा च सोमवासरयुक्तामावास्यायां प्राङ्मुखयामश्वस्य छायायां श्राद्धं कुर्यादित्यर्थः । कर्णः पल्लव इति । आपराह्णिकं गजच्छायाकदेशाङ्कं चेदम् । कर्णशब्दस्य यथाश्रुतार्थकत्वात् ।

*जातमात्र इति । जातमात्रोऽपीत्यविवक्षितार्थम् । अपिपदोपादानात् । एवं च

"गर्भच्युतोऽपि दौहित्रः कुर्यात्पितरि जीवति ।
श्राद्धं मातामहादीनां पक्षान्तादपरेऽहनि ॥" इति,

परन्तु गर्भच्युतोऽपीत्यसत्तन्य एव । कस्याचित्कारिकायामपि—

इयं संगवव्यापिनी ग्राह्या इति निर्णयदीपे उक्तम् ।

"प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम् ।
श्राद्धं मातामहं कुर्यात्सपिता संगवे सदा ॥
जातमात्रोऽपि दौहित्रो जीवत्यपि च मातुले ।
प्रातः संगवयोर्मध्ये*आर्धस्य प्रतिपन्नवेत् ॥"

इति वचनात् । अत्र*समूलत्वं विमृश्यम् । *इदं च मलमासे न कार्यम् ।

'स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ।'

इति निषेधात् । इदं च*जीवत्पितृकेणैव कार्यमिति

"पुत्रः स्वोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात् ।
पितरं नान्दिकाचौलात्तैवृमेधेन कर्मणा ॥"

इति वचनात्प्रथमवर्षचूडाया असत्त्वे यथा पितृश्राद्धेऽनधिकारस्तथाऽस्मिन्मातामहश्राद्धेऽपीति प्रतिभाति । मयूखकृतस्तु जातमात्र इति अधिकारी जात इत्येवार्थः । तस्मादुपनयनोत्तरमेवाधिकारो न ततः प्राक् इत्याहुः । *आर्धस्य=मातामहस्य । अत्र सपत्नीकानामेव देवतात्वम् । अमाश्राद्धान्तर्गतमातामहपार्वण इवेहापि सत्यपि पितृपारणाविकृतित्वे सपत्नीकत्वगुणलम्भकप्रमाणस्य

'स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ।'

इति वचसः प्रतिबन्धासम्भवात् । *समूलत्वमिति । सङ्गवव्यापिनीग्राह्यत्वविधायकवचनस्य निर्मूलत्वात् पार्वणत्वादपराह्णव्यापिनी ग्राह्येत्यर्थः । *इदञ्चेति । मातामहश्राद्धस्य कन्योपलक्षितापरपक्षनिमित्तकत्वात्कन्यायामधिमासे तदुत्तरमासेव कन्यायुक्तायामपरपक्षव्यवधानेनैव कार्यमिति भावः । तत्र कथंचिदन्तराये तु शुक्लपक्षम्यादिगौणगौणोत्तरकाले कार्यम् । एवमेव जीवत्पितृकस्य मातृनवमीश्राद्धान्तरायेऽपीति । *जीवत्पितृकेणैवेति । ननु सपितेत्युक्ते शिष्टा इति किमेतत् ? शृणु ।

शिष्टाः। इदं च शिष्टाचारात्सपिण्डकं कार्यमिति कौ-त्। पिण्डरहितं तु युक्तम्। जीवत्पितृकस्य-

"मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः।
न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च ॥"

इति दक्षेण पिण्डनिषेधात्। अन्वष्टक्यवद्विशेषवचनाभावाच्चेति संक्षेपः ॥ इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ महालयनिर्णयः ॥

अथाश्विनशुक्लप्रतिपदि नवरात्रारम्भः। तन्निर्णयः तत्र भार्गवार्चनदीपिकायां देवीपुराणे। सुमेधा उवाच

"शृणु राजन् प्रवक्ष्यामि चण्डिकापूजनक्रमम्।

"कन्यागते सवितरि पितरो यान्ति वै सुतान्।
शून्या प्रेतपुरी तावत् यावद्वृश्चिकदर्शनम् ॥"

इत्यर्थवादेनैषां श्राद्धे ये अधिकारिणस्तेषां कन्योपलक्षितापरपक्षश्राद्धं कर्तव्यमिति विधिः कल्प्यते। पितृसुतपदं श्राद्धे देवतातदधिकार्यर्थकम्।

"ततस्तुलागतेऽप्येके सूर्ये वाञ्छन्ति पार्थिव।
श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः ॥"

इति सामान्येन नागरखण्डाभिधानात्। तत्र मृतपितृकस्य पितृश्राद्धेन सहैव मातामहश्राद्धं, जीवत्पितृकस्य तु तेन विनेति, प्रतिपदि तत्करणं तु केवलमाचारात्। कल्पितेनोक्तविधिना च

"दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकम्।
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ॥"

इति जीवत्पितृकस्यापरपक्षकसामान्यनिषेधो बाध्यते, एवं मातृनवमीश्राद्धेऽपि तद्बाध इति क्रमेण सपितेति सिद्धेरिति। 'मुण्डनम्' इति वाक्यस्य निर्मूलत्वं वदतां मते तु सपिण्डमिति।

इति महालयनिर्णयः ॥

आश्विनस्य सिते पक्षे प्रतिपत्सुशुभे दिने ॥"

इत्युपक्रम्योक्तम्।

*"शुद्धे तिथौ प्रकर्तव्यं*प्रतिपच्चोर्ध्वगामिनी।
आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा ॥
अपराह्णे च कर्तव्यं शुद्धसंततिकाङ्क्षिभिः ॥"

इदं*चापराह्णगामिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदोऽभावे ज्ञेयम्। तथा तत्रैव देवीपुराणे डामरतन्त्रे च देवीवचः—

*"अमायुक्ता न कर्तव्या प्रतिपत् पूजने मम।
मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ॥
*आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः।
कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवम् ॥"

मार्कण्डेयदेवीपुराणयोः—

"पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी।
नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ॥
देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते ॥
नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम् ॥" इति।

स्कान्देपि—

"प्रतिपद्याश्विने मासि सा शुद्धा शुभदा भवेत्।
भाद्रपञ्चदशी कृष्णा तया युक्ता न शस्यते ॥
विरुद्धफलदा सा हि पुत्रदारभयावहा ॥" इति।

*शुद्धे=अमास्पर्शरहिते। अमास्पर्शे त्वाह—*प्रतिपच्चेति। ऊर्ध्वगामिनी अग्रेऽर्ध्वगा। *इदञ्चेति। एतावताऽमायुतायाः सप्रद्विभ्यां क्रमेण प्राशस्त्याप्राशस्त्ये दर्शिते, तदनुरोधेन स्फुटममायुक्तां निषेधांस्तद्विधींश्च व्यवस्थापयितुं वक्ष्यमाणानाह—*अमायुक्तेति। *आद्या इति। परेद्युः प्रतिपदः द्वौ१ एतदेव स्पष्टयति—

तथा-

"वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव ।
द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा ॥"

तथा देवीपुराणे-

"यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम्
प्रतिपच्छारदीं ज्ञात्वा सोऽश्नुते सुखमव्ययम् ॥
यदि कुर्यादमायुक्तां प्रतिपत्स्थापने मम ।
तस्य शापायुतं दत्त्वा भस्मशेषं करोम्यहम् ॥
आमहात्कुरुते यस्तु कलशस्थापनं मम ।
तस्य संपद्विनाशः स्याज्ज्येष्ठः पुत्रो विनश्यति ॥
अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने ।
धनार्थिभिर्विशेषेण वंशहानिश्च जायते ॥
न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने
उदये द्विमुहूर्तापि ग्राह्या सोदयगामिनी ॥" इति

देवीपुराणे-

"या चाश्वयुजि मासे स्यात्प्रतिपद्भद्रयान्विता ।
शुद्धा ममार्चनं तस्यां शतयज्ञफलप्रदम् ॥"

रुद्रयामले-

"अमायुक्ता सदा चैव प्रतिपत्सर्वनिन्दिता मता ।
तत्र चेत्स्थापयेत्कुम्भं दुर्भिक्षं जायते ध्रुवम् ॥
प्रतिपत्सद्वितीया तु कुम्भारोपणकर्मणि ॥" इति

यद्यपि रुद्रयामलं द्वापरे च निर्मूलं तथाप्यविरो-
धान्न बहुधाराद‍रश्च तद्वचनानि लिख्यन्ते । निर्णयामृते दे-
पुराणेऽपि-

'प्रतिपद्द्वितीया तु कुम्भारोपणकर्मणि ।' इति ।

"*प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत्॥"

तत्रैव—

*"शरत्काले महापूजा क्रियते या च वार्षिकी।
सा कार्योदयगामिन्यां*न तत्र तिथि(१)युग्मता॥"

तथा—

"कुहूकाढोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिम्।
राज्यनाशाय सा प्रोक्ता*निन्दिता*ऽऽद्यपूजने॥" इति।

एषु वचनेषु कलशस्थापनग्रहणात्तदेव प्रथमदिने निषिध्यते, न तूपवासादि। तत्र 'प्रतिपद्यप्यमावास्या' इति युग्मवाक्यात्, 'शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतः' इति दीपिकोक्तेः,'शुक्लपक्षे दर्शविद्धा' इति माधवोक्तेश्च पूर्वदिने प्राप्तस्य बाधे मानाभावादिति केचित्। वस्तुतस्तु पूर्वोक्तवाक्येषु चण्डिकार्चनपूजाग्रहणादुपवासादेश्चा*ङ्गत्वात्

प्रतिपत्प्रद्वितीया वेधदाहनकालावमाह—*प्रातरिति। यद्यपीदं पत्रपूजाविषयमेव, तथापि देवीपूजामात्रेऽपि योजितं बाधकाभावात्। एवञ्च प्रातस्तदभावे पूजा न, किन्तु तल्लाभ एवेत्यर्थोऽप्यापुक्ताऽऽशाभिः। *शरत्काल इति। वार्षिकी वर्षादौ संवत्सरादौ चैत्रशुक्लप्रतिपदमुपक्रम्य नवरूपन्त्वा पूजा विधीयते। शरद्वसन्तयोस्तुल्य एव दुर्गोत्सवः कार्य इत्यर्थः। *न तत्र तिथियुग्मेति। युग्मवाक्यानुरोधेन दुर्गापूजायां न निर्णय इत्यर्थः। *निन्दिता चेति। लोहाभिसारिकाभिप्रायम्। यद्वा अग्रपूजनम् आश्विनमासीयदेवीपूजनं, रेवन्तनाम्रा देवानामग्रः अग्रपीडाशान्त्यर्थक्रियमाणं तत्पूजनं वा। *अङ्गत्वादिति।

'आश्विनस्य सिते पक्षे नवरात्रमुपोषितः।

(१)युग्मवाक्यानुसारमत्र नेष्टमित्यर्थः।

प्रधानदेवीपूजादावपि परेति युक्तम् । कलशस्थापनग्रहणं तूपलक्षणम् । अत एव देवलः—

"व्रतोपवासनियमे घटिकैकापि या भवेत् ।
सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके ॥" इति ।

अत्र घटिका मुहूर्त इति गौडाः । यदा तु पूर्वदिने संपूर्णा शुद्धा च भूत्वा परदिने वर्धते तदा संपूर्णत्वादमायोगाभावाच्च पूर्वैव । यानि च*द्वितीयायोगनिषेधकानि वचनानि केचित्पठन्ति तान्यपि शुद्धाधिकानिषेधपराणि । परदिने प्रतिपदोऽत्यन्तासत्त्वे तु दर्शयुताऽपि पूर्वैव ग्राह्या । तदाह लल्लः—

तिथिः शरीरं तिथिरेव कारणं
तिथिः प्रमाणं तिथिरेव साधनम् । इति ।

यानि तु*'अमायुक्ता न कर्तव्या' इत्यादीनि नृसिंहप्रसादे वचनानि तानि समूलत्वे सत्येतद्विषयाणि । अत्रेदं तत्त्वम्-पूर्वोक्तवाक्यानां सर्वेषां हेमाद्र्याद्यलिखितत्वेन निर्मूलत्वात्तैश्चान्यनिर्णयस्यानुक्तेः *सामान्यनिर्णयात्पूर्व-

---

पुरन्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवाम्' ॥
इति देवीपुराणे । गौडा इत्यरुचिः, अनुपदं तद्बीजं स्फुटम् । *द्वितीयेति ।

'द्वितीयाशेषसंयुक्ता प्रतिपच्चण्डिकार्चने ।
मोहादयोपदेशाच्चेत्कुर्यात्पुत्रविनाशनम् ॥'

इत्यादीनीत्यर्थः । इदानीममायुक्तविधीन्व्यवस्थापयति-*यानि त्विति । *अमेति ।

"अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने
न ग्राह्या परसंयुक्ता ...
इत्यादीनीत्यर्थः । *सामान्य...

यामावपि सोदयनिषेधेषु*विशेषनिर्णयादौदयिकी ग्राह्या। यद्यपि पादिकैकैकस्य त्रिमुहूर्तस्तुतिस्तथैकांकत्रिमुहूर्तो ग्राह्या। (१)'उदिते दैवतं भानौ' इत्यत्र 'त्रिमुहूर्ते त्रिरह्नश्च' इति औदयिकत्वाय त्रिमुहूर्तत्वनियमात्। तेन*'उदये त्रिमुहूर्तापि' इत्याद्यनुसारेणापि 'मुहूर्तमात्रा कर्तव्या' इति त्रिमुहूर्तस्तुतिः। अन्यथा त्रिमुहूर्तविधिवैयर्थ्यात्। केचित्तु मुहूर्तमात्रेति वचनात्सतां न्यूनत्वे परा नेत्याहुः।

---

*विशेषनिर्णयात् 'सा कार्योदयगामिन्याम्' इति देवीपुराणात्। *उदये इति।

'उदये त्रिमुहूर्तोऽपि ग्राह्या सोदयगामिनी।'

इत्यर्थः। *नीचा अपीति।

'मुक्तावलिलतांशेन पूर्वाह्णे पूजयेच्छिवाम्'।

इत्युक्तवचनात्पूर्वाह्णः कर्मकालः। कर्मकालव्याप्त्यर्थं पूर्वाह्णव्यापिनी अविग्राह्या।

'शरत्काले महापूजा क्रियते या च वार्षिकी।'

'सा कार्योदयगामिन्याम्' इत्यादि वचनमुदयव्यापित्वं पूर्वाह्णव्यापित्वं पर्यन्तं तत्रैव तात्पर्यं न तु त्रिमुहूर्तव्यापित्वे। 'मातृकावाहयेद्देवीम्' इति वाक्यमन्येऽपि पूर्वाह्णपर एव।

'सम्यक्पूजोदिता पूर्वा यदि कर्तुं न शक्नुयात्।
उपचारैस्तथा दातुं, पञ्चभिरर्चयेद् ॥'
गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च।
अभावे पुष्पतोयाभ्यां तदभावे तु भक्तितः॥'

इति संक्षेपपूजोपदर्शनात्, विस्तारपूजायाः पूर्वाह्णं विना मु-

---

(१)वत्सराजने तु—

'उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ।
त्रिमुहूर्ते त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः' इति।

प्रधानदेवीपूजादावपि परेति युक्तम् । कलशस्थापनग्रहणं तूपलक्षणम् । अत एव देवलः—

"व्रतोपवासनियमे घटिकैकापि या भवेत् ।

सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके ॥" इति ।

अत्र घटिका मुहूर्त इति गौडाः । यदा तु पूर्वदिने संपूर्णा शुद्धा च भूत्वा परदिने वर्धते तदा संपूर्णत्वादमायोगाभावाच्च पूर्वैव । यानि च*द्वितीयायोगनिषेधकानि वचनानि केचित्पठन्ति तान्यपि शुद्धाधिकानिषेधपराणि । परदिने प्रतिपदोऽत्यन्तासत्त्वे तु दर्शयुताऽपि पूर्वैव ग्राह्या । तदाह लल्लः—

तिथिः शरीरं तिथिरेव कारणं

तिथिः प्रमाणं तिथिरेव साधनम् । इति ।

यानि तु*'अमायुक्ता प्रकर्तव्या' इत्यादीनि नृसिंहप्रसादे वचनानि तानि समूलत्वे सत्येतद्विषयाणि । अत्रेदं तत्त्वम्-पूर्वोक्तवाक्यानां सर्वेषां हेमाद्र्याद्यलिखितत्वेन निर्मूलत्वात्तैश्चान्यनिर्णयस्यानुक्तेः *सामान्यनिर्णयात्पूर्व-

---

सुस्नातस्तिलतैलेन पूर्वार्द्धे पूजयेच्छिवाम्' ॥

इति देवीपुराणे । गौडा इत्यरुचिः, अनुपदं तद्बीजं स्फुटम् । *द्वितीयेति ।

'द्वितीयाशेषसंयुक्ता प्रतिपच्चण्डिकार्चने ।

मोहादथोपदेशाद्वेत्कुर्यात्पुत्रविनाशनम् ॥'

इत्यादीनीत्यर्थः । इदानीममायुक्तविधीन्व्यवस्थापयति-*यानि त्विति । *अमेति ।

"अमायुक्ता प्रकर्तव्या प्रतिपच्चण्डिकार्चने ।

न ग्राह्या परसंयुक्ता शुद्धसन्ततिकाङ्क्षिभिः ॥"

इत्यादीनीत्यर्थः । *सामान्यनिर्णयात् युग्मादिवाक्यात् ।

प्राप्तावपि गौडनिबन्धेषु*अविशेषनिर्णयादौदयिकी ग्राह्या । तत्रापि घटिकेत्यस्य त्रिमुहूर्तस्तुतिस्त्वोक्तत्रिमुहूर्ता ग्राह्या । (१)'उदिते दैवतं भानौ' इत्यत्र 'त्रिमुहूर्ते ।त्रिरह्नश्च' इति औदयिक्या त्रिमुहूर्तस्वनियमात् । तेन*'उदये त्रिमुहूर्तापि' इत्याद्यनुसारोपि 'मुहूर्तमात्रा कर्तव्या' इति त्रिमुहूर्तस्तुतिः । अन्यथा त्रिमुहूर्तविधिवैयर्थ्यात् । केचित्तु मुहूर्तमात्रेति वचनात्सत्तो न्यूनत्वे परा नेत्याहुः ।

*अविशेषनिर्णयात् 'सा कार्योदयगामिन्याम्' इति देवीपुराणात् । *उदये इति ।

'उदये त्रिमुहूर्ताऽपि ग्राह्या सोदयगामिनी ।

इत्यर्थः । *गौडा अपीति ।

'सुस्नातास्तिलतैलेन पूर्वाह्णे पूजयेच्छिवाम्' ।

इत्युक्तवचनात्पूर्वाह्णः कर्मकालः । कर्मकालशास्त्राच्च पूर्वाह्णव्यापिनी मतिप्राप्ता ।

'शरत्काले महापूजा क्रियते या च वार्षिकी ।'

'सा कार्योदयगामिन्याम्' इत्यादि समस्तमुदयव्यापित्वं पूर्वाह्णव्यापित्व एवेति तत्रैव तात्पर्यं न तु त्रिमुहूर्तव्यापित्वे । 'प्रातरावाहयेद्देवीम्' इति प्रातःशब्दोऽपि पूर्वाह्णपर एव ।

'सम्यक्कल्पोदितां पूजां यदि कर्तुं न शक्नुयात् ।
उपचारांस्तथा दातुं, पञ्चैतान्नित्यशस्तदा ॥"
गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च ।
अभावे पुष्पतोयाभ्यां तदभावे तु भक्तितः ॥"

इति संक्षेपपूजोपदर्शनात् विस्तारपूजायाः पूर्वाह्णं विना दु-

(१)एतद्वचनं तु—

'उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
त्रिमुहूर्ते त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥'इति ।

*गौडा अप्येवम् । अत्र *देवीपूजैव प्रधानम्, उपवासादि त्वङ्गम् ।

*'अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ।
पूजयित्वाऽऽश्विने मासि विशोको जायते नरः ॥'

इति हेमाद्रौ भविष्ये तस्या एव फलसंबन्धात्,

'नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।'

इति तत्रैव देवीपुराणात्,

'शरत्काले महापूजा क्रियते या च वार्षिकी ।'

इति मार्कण्डेयपुराणाच्च । पूर्ववचनादष्टमीनवमीपूजैव प्रधानमन्यत्सर्वमङ्गमिति गौडाः । एकाहपक्षोऽपि(१) कालिकापुराणे—

---

*उपवासादिति नव्यगौडास्तदनुयायिनो दाक्षिणात्याश्च । *देवीपूजैवेति । एवकारेण 'पञ्च बिल्वशाखिन्याम्' इत्याद्युक्तिप्राप्तेनोपवासादिनाऽकर्माभिधानात्तेषां प्राधान्यमिति शङ्कानिरासः । *अष्टम्यामिति ।

"आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् ।
देवीं संपूजयित्वाऽपि अर्द्धरात्रेऽष्टमीषु च ॥
क्रीडन्ति विविधैर्भोगैर्देवलोकेषु पूजिताः ।
नावशो ... न च दुःखभयं भवेत् ॥"

इति स्कान्दे नवरात्रपूजाया अपि फलसंबन्धश्रवणाद्विरोधि इत्यत आह । यद्वा कुलाचारभेदेनाष्टम्यां वा पूजयित्वा पूजां समाप्येत्यर्थात् अङ्गत्वश्रुतिः । नवम्यामित्यादि च न प्राधान्यबोधकं, किन्तु पूजादिरहितविधायकमिति तु वस्तुगतिः । गौडा इत्यर्थः । एवञ्च विल्वशाखिन्यादिवाक्यादिना नवरात्रपूजाया एव मुख्यत्वात् नवरात्रव्रतमुख्यादिरनुवादो भवति । तदनुवादो वैकल्पिकः ।

---

(१) 'एकाहपूजायां' इति पाठान्तरम् ।

'यस्त्वेकस्यामथाष्टम्यां नवम्यामथ साधकः ।
पूजयेद्वरदां देवीं महाविभवविस्तरैः ॥' इति ।

अत्रचं च राजसूयेऽन्ययागैः समप्रधानायाः सहिताया अप्यष्टेः "एतयाऽन्नाद्यकामं याजयेत्" इत्येकत्वान्मध्ये विधानाच्च यथा फलार्थो बहिःप्रयोगस्तथा नवरात्रमध्यस्थाया अष्टम्या नवम्या वा फलार्थः पृथक्प्रयोगः । रूपनारायणधृतदेवीपुराणे—

'महानवम्यां पूजेयं सर्वकामप्रदायिका ।
सर्वेषु चैव वर्णेषु तव भक्त्या प्रकीर्तिता ॥
कृत्वाप्नोति यशो राज्यं पुत्रायुर्धनसंपदः ॥'

सा च काम्या नित्या च ।

'एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनम् ।
विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम् ॥' इति,
'यो मोहादथवाऽऽलस्याद्देवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाऽप्यथ भैरवि ॥
क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै ॥'

इति कालिकापुराणे फलनिन्दाश्रुतेः

'वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनम् ।'

इति तिथितत्त्वे देवीपुराणाच्च ।

---

*अष्टम्यां नवम्यामिति । चतुर्थ्यादिपक्षस्तु पञ्चपूजायामेव । *तत्त्वनिर्णति । इदन्तु चिन्त्यम् । एतयेति सर्वनाम्ना प्रकृतपरामर्शयुक्तोऽवेष्टेरेव बहिः प्रयोगः, न त्विह तथा परामर्शकं किञ्चिदस्ति अष्टमीनवम्योः पृथगग्रे पूजाविधानादेतद्वचनस्य तदेकवाक्यता सम्भवति ।

'शरत्काले महापूजा क्रियते या च वार्षिकी' ।
इति मार्कण्डेयन्तु न नित्यत्वप्रज्ञापकं वीप्साभावात् ।

अत्रोपवासादिकमुक्तं हेमाद्रौ भाविष्ये—
एवं च *विन्ध्यवासिन्यां नवरात्रोपवासतः।
एकभक्तेन,नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे।
गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ॥
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥' इ
यत्तु रूपनारायणीये भविष्ये—
'एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिः।'
इति, तत्ता*मसपूजापरम्।
'विना मन्त्रैस्तामसी स्या*त्किरातानां तु संमता
इति तत्रैवोक्तेः। मदनरत्ने देवीपुराणेऽपि—
*'कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम्
अयाची ह्यथवैकाशी नक्ताशी (१)वाथवाम्बुदः।
भूमौ शयीत चामन्त्र्य कुमारीर्भोजयेन्मुदा।

*विन्ध्यवासिन्यामिति सम्प्रदायाभिप्रायम्।एकभक्तादय
योऽनुक्रमस्य व्युत्क्रमेणोक्ताः। स्नातैरिति। पूजाधिकारिणः। स्था
स्थाने ब्राह्मणैः,पुरे पुरे क्षत्रियैः नृपैः,गृहे गृहे वैश्यैः,ग्रामे ग्रामे शू
वने वने म्लेच्छैः। अथवा स्थानादौ सर्वत्र ब्राह्मणादिभिरित्यर्थः।
अन्यैः प्रतिलोमानुलोमैः। *तामसपूजेति। पूजा त्रिविधा भविष्ये
[राजसी] सा पूजयार्चिजपयज्ञैर्विना तु या।
विना मन्त्रैस्तामसी स्यात्किरातानान्तु सम्मता।' इति।
तत्र सात्त्विक्यां ब्राह्मणस्यैवाधिकारो राजस्यां क्षत्रियादी
स्येति द्रष्टव्यं। *किरातानामिति। म्लेच्छाद्युपलक्षणं मा
त्वात्। पूजामाह—*कन्यासंस्थे रवाविति। सम्प्रदायाभिप्राय

(१) 'अथ वाम्बुदः' इति पाठान्तरम्।

वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरम् ॥
*बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
•त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥' इति ।
नन्दिका प्रतिपत्तिथिरिति मैथिलाः, षष्ठीति गौडाः ॥

तच्च पूजनं रात्रौ कार्यम् ।

'आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् ।
निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् ॥'

इति देवीपुराणात् । संग्रहेऽपि—

'आश्विने मासि मेघान्ते प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् ॥
रात्रिरूपा यतो देवी दिवारूपो महेश्वरः ।
रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम् ॥
सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणम् ।
रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यतेष्यते ॥
नक्तव्रतमिदं यस्मादन्यथा नरके गतिः ॥'

इत्यादिवचनाच्च । रात्रिव्रतमेवाभिप्रेत्य माधवेनोक्तम्—

नन्दिका प्रतिपत्प्रथमोपस्थितत्वात् । तथा च आश्विनशुक्लप्रतिपदमारभ्याश्विननवमीपर्यन्तं देवीपूजनं कार्यमित्यर्थः । तत्रैव—

'महानवम्यां पूजेयं स्वर्गमोक्षप्रदायिनी ।'

इत्युत्तरसंदर्भात् । अयमेव मुख्यकल्पः । षष्ठ्यादिपूजाकल्पानामप्र बाध्यत्वात्

'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।'

इत्यग्निपुराणे नवरात्रपूजोक्तेश्च । परन्तु तत्रैव तन्मते नक्तपदं पाक्षिकोपवासादेरुपलक्षणम् । *बलिमिति । मांसादि ब्राह्मणान्यपरम् । •त्रिकालमिति ।

'प्रातःस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः ।'

'तस्य नक्तव्रतस्याविरुद्धत्वात्(?), न तु उरात्रिभोजनात्' इति [illegible]

'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः ॥
नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम् ।
आरम्भे नवरात्रस्य'

इत्यादिस्कान्दात् [illegible] नक्तमेव प्रधान[illegible] [illegible]म् । [illegible], 'नवरात्रोपवासतः' इत्यादिस्तुपपत्तेः । [illegible] [illegible]कान्नुचारोऽयम् । नित्यानित्यसंयोग[illegible] [illegible] । न [illegible] [illegible] [illegible] 'पूर्वाह्न शुद्धे[illegible]' (१)[illegible] [illegible] परस्ते, (२)[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । ननु रात्रेः कर्मकाल[illegible] [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]

या निशीथे समीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणी-

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।'

इति वाक्यात् 'कर्मणो यस्य यः कालः' इति कर्मकालसाम्याच्च । अन्यथा तत्र पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वा, अमायुक्ताविधानाद् द्वितीयायुक्तानिषेधाच्च । दिनद्वये तद्व्याप्तौ तत्स्पर्शे वा परा, द्वितीयायुता-विधानादमायुतानिषेधाच्च । अत एव दिनद्वये तदव्याप्तावपि परैव

'अन्यथा तु परत्र स्यादस्तादर्वाग्गतो हि सा ।' इति ।

"प्रदोषव्यापिनी न स्याद्दिवानक्तं विधीयते ।

तत्सर्वं नक्तमित्याहुर्न नक्तं निशि भोजनम् ॥"

इति च सायाह्नरूपगौणकालव्याप्तिसत्त्वात् । भोजनं तु रात्रावेव 'सायाह्ने तु भुजिक्रियाम्' इतिवदिह विशेषवचनाभावेनाव-श्यकरात्रिसम्बन्धस्यापि मानाभावात् । न चात्र पूर्वोक्तयुक्त्या 'सकालादुत्तरः कालः' इति रीत्या गौणकाललाभात् पूजाद्युपक्रमस्य विष्वक्‌स्पर्शोऽपि प्रदोषे 'तिथ्यादौ च भवेद्यावान्' इत्याद्यापादितसाकल्यस्याभावाचेति वाच्यम् । एवं विशेषस्य माधवादिग्रन्थेऽदर्शनेन सर्वस्यापि नक्तनिर्णयस्य तदनियतत्वात् द्वितीयायुताविधानादमायुक्तानिषेधाच्च । त्रिमुहूर्तापीत्यपिशब्दे कैमुत्यन्यायोपन्यासात्कलादिग्रन्था अप्यविरुद्धाः । न च—

'आद्यास्तु नाडिकास्त्यक्त्वाः षोडश द्वादशापि वा ।'

इत्यादिषोडशादिनाडीत्यागानुपपत्तिः, प्रदोष एव पूजोपक्रमविधानादिति वाच्यम् । तस्य कुलाचारविशेषमात्रकलशस्थापनमात्रपरत्वात् ।

'आद्याः षोडशनाडीस्तु लब्ध्वा यः कुरुते नरः ।

कलशस्थापनम्' इति वचनात्कलशस्थापनं चामायुक्तप्रतिपदि न कार्यम् ।

"अमायुक्ता सदा चैव प्रतिपच्चण्डिका तथा ।

युक्ता परैवेति माधवेनोक्तम्, तथाऽत्रापि । *वस्तुतस्तु. रात्रेः कर्मकालत्ववचसां हेमाद्र्याद्यलिखनात्समूलत्वं वि· मृश्यमेव, 'त्रिकालं पूजयेत्' इत्यादिपूर्वविरोधाच । मा· धवोक्तिस्तु पाक्षिकनक्तानुवाद इत्युक्तम् । तस्मात्सर्वपक्षे· षु परैव प्रतिपदिति सिद्धम् । अत्र केचित् *नवरात्र· शब्दो नवाहोरात्रपरः ।

'वृद्धौ समाप्तिरष्टम्यां ह्रासे वा प्रतिपत्तिथिः ।
प्रारम्भो नवचण्ड्यास्तु नवरात्रमतोऽर्थवत् ॥'

इति देवीपुराणादित्याहुः । तन्न ।*अतिह्रासवृद्ध्यो·

तत्र चेत्स्थापयेत्कुम्भं दुर्भिक्षं जायते ध्रुवम् ॥
प्रतिपत्सद्वितीया तु कुम्भारोपणकर्मणि ।'

इति रुद्रयामलात् । एवं पूर्वदिने चित्रावैधृतिपातसत्त्वेऽपि न दोषः । 'त्वाष्ट्रवैधृतियुक्ता चेत्' इति वाक्ये 'कलशारोपणं प· रे' इत्युक्तेः । एतच्च माधवाद्यनुसारेण । वस्तुतः परदिने द्विमुहूर्ता· ग्राह्येत्युक्तिस्तदनुसारेणाह-*वस्तुतस्त्विति । पूर्वाह्णव्यापिनी· ग्राह्येत्यत्र तु या पूर्वदिने पूर्णा सती परेद्युर्द्वेधा त्रिमुहूर्ता, सा पूर्वैव ग्राह्या । सम्पूर्णत्वात् ।

'आदित्योदयवेलायामारभ्य षष्टिनाडिकाः ।
तिथिस्तु सा हि शुद्धा स्यात्सार्वतिथ्यो यथं विधिः ॥'

इति वचनात् । तच्च प्रतिपत् पूर्वाह्णव्यापिनी द्वितीयाविद्धैव ग्राह्या ।

'या चाश्वयुजि मासे स्यात्सा प्रतिपद्याम्यभिगा ।'

इत्युक्तत्वाच्चपूर्वविद्धानिषेधाप्रतिपन्ना । एतन्मते 'त्रिष्टु च पूर्वदेवीम्' इत्युक्तावपि प्रातःपूर्वैव प्रधानं 'आवशाखवेदिका' इति पूर्वोक्तवचनात् । पूजाद्वयं प्रधानमिति तु युक्तम् । सा च त्रि· कालं, नक्तं त्रिरात्रेण पौरश्रावणादेः छत्रचामरादिनीराजनादिभि· श्च । *नवरात्रशब्दः नवाहोरात्रपर इत्यादौ । *अतिह्रास·

न्यूनाधिकत्वापत्तेः अत्र मूलाभावाच्च । तेन तिथिवाच्येवापम् । तदुक्तम्—

"तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ।
*अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षये ॥" इति ।

स च नवरात्रशब्दः क्वचिल्लक्षणया कर्मवाची । यथा 'प्रारम्भो नवरात्रस्य' इत्यत्रेति दिक् ॥

प्रतिपदि च वैधृत्यादियोगनिषेधो मार्गवाचैनदीपिकायां देवीपुराणे—

स्त्रोरिति । अमावास्याराश्रौ प्रतिपत्त्वेनाभावेऽपि प्रतिपत्त्वभूत्यैवास्यत्नावयवेनाऽष्टरात्रप्रतिष्ठ्याऽष्टम्यहोरात्रस्पर्शिनी नवमीं गृहीत्वा दशरात्रे निषिद्धाविति तदुपायमाह—*अष्टरात्रे इति । रात्रिशब्दस्य तिथिवाचित्वादिति भावः । *लक्षणयेति । 'रथन्तरसाम्ना सोमः' इत्यादौ सोमादिपदवत् । दिनार्थस्तु 'नवरात्राभिधं कर्म' इत्यादौ अभिधापदं न समर्थकम् । 'द्युता वै वाजिने द्युता सोमः' इति नामातिदेशोक्तिवत् संज्ञासंज्ञिसम्बन्धस्य प्रापमेयत्वाभावात् तदुपक्रमस्य साधनाधिकरणादेरभावयोग- ...र पूजाद्यन्य- ...", दिनन्यूनतायां तन्त्रेण, तदाधिक्ये तु प्रतमयोगस्य सकलतिथिव्याप्त्यपाद- ...रिति । अत एव भविष्ये—

'व्रती सम्पूजयेद्देवीं सप्तम्यादिदिनत्रये ।
द्वाभ्यां चतुर्दशीभिर्वा द्वासप्तद्विरात्रयोः ॥"

इत्युक्तम् । न चैवं ह्रासे वृद्धौ वा उपवासादिकर्मणो नवरात्रनियमभङ्गप्रसङ्ग इति वाच्यम्, इष्टत्वात् । यथा एकदिने क्रियमाणे षोडशमहाश्राद्धे प्रधानानामेकदेशकालकर्तृत्वाद्दैवतसंख्यानुष्ठाने सत्यपि सम्पूर्णविधेरेकानुष्ठानं भवेद् न, ज्यायोऽधिकदर्शनवत्त्व-

*"त्वाष्ट्रवैधृतियुक्ता चेत्प्रतिपच्चण्डिकाऽर्चने ।
तयोरन्ते विधातव्यं कलशारोपणं गृहे ॥" इति ।
चित्रावैधृतियुक्तापि द्वितीयायुता चेत्सैव प्राशस्त्युक्ता

दुर्गोत्सवे—
"भद्रान्विता चेत्प्रतिपत्तु लभ्यते
विरुद्धयोगैरपि संगता सती ।
सैवापराह्णे विबुधैर्विधेया
श्रीपुत्रराज्यादिविवृद्धिहेतुः ॥" इति ।
यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदा
तत्रैव कात्यायनेन-
'प्रतिपद्याश्विने मासि भवेद्वैधृतिचित्रयोः ।
आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम् ॥'इति।
भविष्येऽपि—
"चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप ।
त्याज्या अंशास्त्रयस्त्वाद्यास्तुरीयांशे तु पूजनम्॥"इति
रुद्रयामलेऽपि-
"वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनम् ।
तस्मान्न स्थापयेत्कुम्भं चित्रायां वैधृतौ तथा ॥
संपूर्णा प्रतिपच्चेव चित्रायुक्ता यदा भवेत् ।
वैधृत्या वापि युक्ता स्यात्तदा मध्यंदिने रवौ ॥
अभिजित्तु मुहूर्तं यत्तत्र स्थापनमिष्यते ॥" इति ।
चित्रादिनिषेधे मूलं चिन्त्यम् । इदं कलशस्थापनं रात्रौ न कार्यम् ।

संख्यायथवत्वात् । 'नवरात्रेवागमः'इत्यादेरेव निमित्तत्वा- प्रत्यादिति ।
*त्वाष्ट्रेति । देवीपूजनादौ कलशस्थापनमात्रे न निषेधः

'न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनम्।'
इति मात्स्योक्तेः।

*"भास्करोदयमारभ्य यावत्तु दश नाडिकाः।
प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु॥"
इति विष्णुधर्मोक्तेश्च। रुद्रयामले—

*"स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत्।
शुद्धाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम्॥
यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान्।
तत्र संस्थापयेत्कुम्भं विधिना मन्त्रपूर्वकम्॥
सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वा॥" इति॥

अथ पूजाविधिः—सा च जयन्तीमन्त्रेण नवाक्षरेण वा कार्या। तदुक्तं दुर्गाभक्तितरङ्गिण्यां देवीपुराणे—

"कुर्याद्देव्यास्तु मन्त्रेण पूजां क्षीरघृतादिभिः।
(इत्युपक्रम्य-)
जयन्ती मङ्गला काली भद्रकाली कपालिनी॥
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते।
अनेनैव तु मन्त्रेण जपहोमौ तु कारयेत्॥" इति।

*'ॐदुर्गे दुर्गे रक्षिणि स्वाहा' इति*नवाक्षरः।

ति मतभेदः। *भास्करोदयमिति। पूर्वाह्णस्य कर्मकालत्वपक्षे एतदप्यनुकूलम्; एतत्परिभाषावशात् 'प्रातरावाहयेद्देवीम्' इत्यादौ प्रातःकालः पूर्वाह्णः। कलशस्थापनं च सति सम्भवे सावित्र्या आ- यनादीपादद्वकं त्यक्त्वा कार्यम्। 'आद्याः षोडशनाडीस्तु' इति मा- युक्तवचनात्। *स्नानमिति। तच्च 'सुस्नातस्तिलतैलेन' इत्युक्तेः तिलतैलेन कार्यम्।

*दुर्गे दुर्गे इति द्विरुक्तं, प्रणवस्तु नवाक्षरानन्तर्गत इति बो- ध्यम्। *नवाक्षर इति।

'तल्लिङ्गैः पूजयेन्मन्त्रैः सर्वदेवान्समाहितः' ।

इत्याग्नेयात् । यथा-एनद्वाक्यपाद्गौलिङ्गक आगमक एवमादि
तथैव वैदिकोऽपि 'जातवेदसे सुनवाम सोमम्' इत्यादिस्त्वाद्य
ग्राह्यः। प्रणवादिचतुर्थ्यन्तं नमोऽन्तं नाम वा 'नाम्ना सर्वं समापये
इति वाक्यात् । पूजा च कुम्भस्थप्रतिमायां कार्या । 'पूज
मण्डलकुम्भस्था' इति वचनात् सर्वतोभद्रमण्डलदेवतावाहनम
कार्यम्। तत्र स्थापयितुमशक्या मृन्मयादिका तु प्रतिमा पश्चादास
स्थाप्या । आचार्याद्वेदिकोणेषु चत्वारः कलशा विधिना स्थाप्याः

"चतुरः कलशान् यस्तु दद्याद्देवगृहे नरः ।
चतुःसमुद्रवलयां स तु भुङ्क्ते वसुंधराम् ॥"

इति विष्णुधर्मोत्तरात् । सर्वतोभद्रं स्कान्दे-

"प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः ।
खण्डेन्दुस्त्रिपदः कोणः शृङ्खलाः पञ्चभिः पदैः ॥
एकादशपदा वल्ली भद्रन्तु नवभिः पदैः ।
चतुर्विंशत्पदा वाऽपि चतुर्विंशतिभिः पदैः ॥
मध्ये षोडशभिः कोष्ठैः पद्ममण्डलं स्मृतम् ।
श्वेतेन्दुः शृङ्खला कृष्णा वल्ली नीलेन पूरयेत् ॥
भद्रारुणा सिता वापि परिधिः पीतवर्णकः ।
बाह्यान्तरदले श्वेता कर्णिका पीतवर्णिका ॥
परिध्या वेष्टितं पद्म बाह्ये सत्त्वं रजस्तमः ।
तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरानिति ॥
आवाह्य मध्ये ब्रह्माणं लोकपालानुदग् यजेत् ।
सोम ईशान इन्द्रोऽथ वह्निर्यमश्च निर्ऋतिः ॥
वरुणश्चापि वायुश्च लोकपालाः क्रमान्मताः ।
वायुसोमान्तरे सप्त रुद्राः सोमेशमध्यगाः ॥
ईशेन्द्रान्तरयादिशा महेन्द्राग्न्यन्तराश्विनौ ।

तत्र प्रतिपदि *प्रातरभ्यङ्गं कृत्वा देशकालौ संकीर्त्य मो

यथाऽग्न्यन्तः सपितृकान् विश्वान्देवान्यजेद्बुधः ॥
यमनिर्ऋतिमध्ये तु सप्तयक्षानथो यजेत् ।
रक्षोवरुणयोर्मध्ये भूतनाथानथो यजेत् ॥
गन्धर्वाप्सरसो देवान्मध्ये वरुणवाय्वोः ।
स्कन्दनन्दीश्वरौ शूलमहाकाली च सोमतः ॥
प्रजापः सप्तयक्षादीनीशानादिन्द्रतो यजेत् ।
(यमसोममध्ये ईशानसोममध्ये इत्यादिरर्थः ।)
दुर्गाविष्णू स्वधामध्ये वर्षादि मृत्युरोगकान् ॥
निर्ऋतेः श्रीगणपतिं वरुणादप एव च ।
वायुतो मरुतश्चैव प्रजापादे धरां यजेत् ॥
कर्णिकायां तथैव नदीर्गङ्गादिका यजेत् ।
तत्रैव सागरान्सप्त पूजयेद्वरुणान्वयात् ॥
(प्रजापादमूले कर्णिकायाः पूर्वां नदीः सागरांश्च यजेदित्यर्थः ।
दन्तो वैदिको वा नाममन्त्रो वा पूजादौ मन्त्रः ।)
तस्योपरि सुवेदं च मण्डलाद्दक्षिणोऽप्युदक् ।
(उदीचीक्रमेण सोमादि क्रमेणेति यावत् ।)
गौतमश्च भरद्वाजो विश्वामित्रश्च कश्यपः ॥
जमदग्निर्वसिष्ठोऽत्रिररुन्धत्या च नित्यशः ।
पूर्वादितश्च तत्रापि ऐन्द्री कौमारिकाऽपि ॥
ब्राह्मी तथा च वाराही चामुण्डा वैष्णवी तथा ।
ाहेश्वरीवैनायकगजवक्त्रशक्तीः समर्चयेत् ॥" इति ।
"सोमादेरायुधानीह क्रमेण स्थापयेद्बुधः ।
ाशूले वज्रशक्ती दण्डखड्गौ तथैव च ॥
ाङ्कुशौ च तत्रापि क्रमेणाथ यजेदपि ।"
ानिति । * प्रातःकालीननवरात्रिसंकल्पस्तु पान.[illegible]

जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्वि
लधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्ति
लाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रति
दि विहितकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्
इति*संकल्प्य 'मही द्यौः' इति भूमिं स्पृष्ट्वा 'ओषधयः स
म्' इति यवान्निक्षिप्य 'आकलशेषु' इति कुम्भं संस्थाप
'इमं मे गङ्गे' इति जलेनापूर्य 'गन्धद्वाराम्' इति गन्धं 'य
ओषधीः' इति *सर्वौषधीः, 'काण्डात् काण्डात्' इति दूर्वा
'अश्वत्थेव' इति *पञ्चपल्लवान् 'स्योना पृथिवी' इति *सप्त
दः 'याः फलिनीः' इति फलं 'स हि रत्नानि' इति *पञ्चरत्न
नि हिरण्यं क्षिप्त्वा 'युवा सुवासाः' इति वस्त्रेणावेष्ट

कृत्वैव कार्यः।

'प्रातःसन्ध्यां बुधः कृत्वा संकल्पं तत आचरेत्।'

इति वचनात्। *संकल्प्येति। कदलीस्तम्भवस्त्रादिमण्डि
गृहे चतुर्हस्तवेदिकोपरि सर्वतोभद्रदेवता आवाह्य गणेशकलशं सं
स्थाप्य दुर्गाकलशं संस्थापयेदिति। तत्र दुर्गाकलशस्थापनमाह
'महीद्यौः' इत्यादिना। *सर्वौषधीः—

"कुष्टं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम्।
वचा चम्पकमुस्ता च सर्वौषध्यो दश स्मृताः"॥

इत्युक्ताः। *पञ्चपल्लवान्—

"अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः।
पंचभङ्गा इति प्रोक्ताः सर्वकर्मसु शोभनाः॥"

इत्युक्तान्। सप्तमृदः—

"गजाश्वरथ्यावल्मीकसङ्गमह्रदगोकुलात्।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत्॥"

इत्युक्ताः। *पञ्चरत्नानि आदित्यपुराणे—

'पूर्णा दर्वि' इति पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां नूतनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत् । तद्यथा—*पूर्वोक्तं मन्त्रमुक्त्वा—

"आगच्छ वरदे देवि दैत्यदर्पनिषूदनि ।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ।
इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥
दुर्गे देवि समागच्छ सांनिध्यमिह कल्पय ।
बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥"

इत्यावाह्य पूर्वोक्तमन्त्रेण षोडशोपचारैः पूजयित्वा साधभक्तबलिं कूष्माण्डादिबलिं वा निवेदयेत् ।

"सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम् ।
पञ्चरत्नं समाख्यातं पावनं पावनेषु तत् ॥"

कालिकापुराणे—

"कनकं हीरकं नीलं पद्मरागं च मौक्तिकम् ।
एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः ॥"

जीर्णा प्रतिमाश्च कुम्भे ततः पश्चात् स्थाप्य नूतनायां तु धातुमय्यामभ्युचारणं कार्यम् । ततः प्राणप्रतिष्ठा कार्या । मृदादिमय्यां च केवलप्राणप्रतिष्ठैव नाभ्युचारणमिति विशेषः । *पूर्वोक्तं 'जयन्ती मङ्गला काली' इति, नवाक्षरं वा । 'आगच्छ' इत्यादि अयं घटे दुर्गावाहनप्रकारः । प्रतिमायां तु—

"एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ।
आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥
अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु ।
रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते ॥"

'भगवति दुर्गे इहागच्छ इह तिष्ठ इह सन्निधेहि स्थिरा भव सु-

मसन्ना भव" इत्यावाह्य पूर्वोक्तमन्त्रेण वैदिकेन वा प्रणवादिनमोन्तनाम्ना वा षोडशोपचारैश्छत्रचामरादिराजोपचारैश्च संपूज्य प्रणम्य महिषघ्नीत्यादिवक्ष्यमाणमन्त्रैः प्रार्थयेत्। यदि षष्ठ्यादिपक्षस्तदा प्रतिमास्थापनं प्रतिपदि न कार्यं किन्तु षष्ठ्यामेवेति। स्कान्दे—

"दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम्।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम्॥
अनेनैव तु मन्त्रेण जपहोमादि कारयेत्॥"

इत्युक्तम्। गौडास्तु प्रतिमापुरः अष्टपत्रे कमले अष्टशक्तिस्थापनादिकं कुर्वन्ति। ताश्च—

"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपाऽतिचण्डिका॥" इति।

तत्र पूर्वपत्रे उग्रचण्डा अष्टादशभुजा। तद्ध्यानं यथा—

"उग्रचण्डां धूम्रवर्णामष्टादशभुजैर्युताम्।
खेटकं कार्मुकं घण्टां दर्पणं तर्जनीं ध्वजम्॥
कपालमङ्कुशं चर्म बिभ्रती वामबाहुषु।
दक्षेषु धारिणीं खड्गं बाणं शूलं गदां तथा॥
शङ्खं डमरुकं चक्रं मुसलं पट्टिशं तथा।"

इति ध्यात्वा 'ॐउग्रचण्डे इहागच्छ'इत्यावाह्य 'ॐह्रीं श्रीं उग्रचण्डायै नमः' इति यथाशक्त्युपचारैः संपूज्य प्रणमेत्—

ॐ"उग्रचण्डे नमस्तुभ्यं चण्डवैरिविनाशिनि।
सर्वपापहरे देवि वरदा भव सर्वदा॥" इति।

ततोऽग्निपत्रे प्रचण्डा षोडशभुजा। तद्ध्यानं यथा—

"रुद्रचण्डां नीलवर्णां बाहुषोडशशालिनीम्।
खेटकं कार्मुकं घण्टां दर्पणं तर्जनीं ध्वजम्॥
कपालमङ्कुशं वामे दक्षिणे धारिणीमसिम्।

चापं शूलं गदां शङ्खं डमरुं चक्रमुत्तमम् ॥"

इति ध्यात्वा प्रचण्डां पूर्ववदावाह्य 'ॐ ह्रीं श्रीं प्रचण्डायै नमः' इति मन्त्रेण पूर्ववत् पूजयेत् प्रणमेच्च—

"प्रचण्डे पुत्रदे नित्यं प्रचण्डगणसंस्थिते ।
सर्वानन्दकरे देवि तुभ्यं नित्यं नमो नमः ॥" इति ।

प्रणवः ह्रीं श्रीं सर्वत्र तत्तच्छक्तिनाम चतुर्थ्यन्तं तत्र तत्र बोध्यम् । ततो वारुणपत्रे चतुर्दशभुजा चण्डोग्रा । तद्ध्यानम् ।

"चामुण्डां घोररूपाभां चतुर्दशभुजान्विताम् ।
खेटकं कार्मुकं घण्टां कपालं फलकं ध्वजम् ॥
दर्पणं वामतो दक्षे पाशिणीं खड्गशूलके ।
बाणं शङ्खं डमरुकं चक्रं मुसलमेव च ॥"

इति ध्यात्वा चण्डोग्रामावाह्य संपूज्य प्रणमेत्—

धात्री त्वं सर्वभूतानां सर्वभूतभयंकरी ।
देवि त्वं सर्वकार्येषु वरदा भव सर्वदा ॥" इति ।

निर्ऋतिपत्रे द्वादशभुजा चण्डनायिकाध्यानम्—

"ॐचण्डनायिकां कृष्णां भुजैर्द्वादशभिर्युताम् ।
खेटकं कार्मुकं घण्टां कपालं फलकं ध्वजम् ॥
वामेषु पाशिणीं दक्षे खड्गं बाणं त्रिशूलकम् ।
शङ्खं च मुसलं चक्रं सर्वशत्रुविनाशिनीम् ॥

चण्डनायिकाऽऽवाहनादि कृत्वा प्रणमेत्—

"या सिद्धिरिति नाम्ना च देवेप्सवरदायिनी ।
कालिकल्मषनाशाय नमामि चण्डनायिकाम् ॥" इति ।

वारुणपत्रे दशभुजा चण्डाध्यानम्—

"तमालाभां चण्डरूपां दशहस्तां च खेटकम् ।
कार्मुकं फलकं घण्टां कपालं वामबाहुषु ॥
दक्षिणे खड्गशूले च चक्रं डमरुमुसले ॥"

इत्यावाहनादि प्रणमेत्-

"देवि चण्डात्मिके चण्डे चण्डारिविजयप्रदे ।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव ॥" इति ।

वायव्यपत्रे अष्टभुजां चण्डवतीं ध्यायेत्-

चण्डवतीं घनश्यामामष्टबाहुं च खेटकम् ।
कार्मुकं च कपालं च ध्वजं वामेषु धारिणीम् ॥
दक्षे खड्गं च त्रिशूलं च बाणं चक्रं च मुद्गरम् ।

ततश्चण्डवतीं मावाह्यप्रणमेत्-

"या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ।
या परा शक्तयस्तस्यै चण्डवत्यै नमो नमः ॥" इति ।

सौम्यपत्रे षड्भुजाचण्डरूपाध्यानम्—

"षड्भुजा चण्डमथिनी कपालं खेटकं धनुः ।
वामेन बिभ्रती दक्षे खड्गं बाणं त्रिशूलकम् ॥"

आवाहनं पूजनं च कृत्वा प्रणमेत्—

"चण्डरूपात्मिके चण्डे चण्डनायकनायिके ।
सर्वसिद्धिप्रदे देवि नित्यं तुभ्यं नमो नमः ॥" इति ।

ईशानपत्रे चतुर्भुजाऽतिचण्डाध्यानम्—

"चण्डासुरस्य मथिनी कृष्णवर्णा चतुर्भुजाम् ।
पाशं कपालं वामे वै दक्षिणे शूलमायके ॥"

अतिचण्डिकामावाह्य संपूज्य प्रणमेत्—

"चण्डाट्टहासनेत्रा या सर्वदा भक्तवत्सला ।
चण्डासुरस्य मथिनी वरदा त्वतिचण्डिका ॥" इति ।

केचित् कुण्डे कुम्भस्थापनं बलिदानादि नास्ति तैरप्य कार्यम् । दुर्गां अन्तिका दक्षिणमूर्त्यादि साधना अतिमात्रा अभावे तत्राप्यु नैवम् ।

ततः कुमारीपूजा । तदुक्तं हेमाद्रौ स्कान्दे–

*"एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ।
त्रिगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं तु वा ॥"

तथा–

"नवभिर्लभते भूमिमैश्वर्यं त्रिगुणेन तु ।
एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत् ॥
एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"

तेन*द्विवर्षामारभ्य दशवर्षापर्यन्ता एव पूज्या न स्वन्याः । तासां च क्रमेण—कुमारिका, त्रिमूर्तिः, कल्याणी, रोहिणी, काली, चण्डिका, शाम्भवी, दुर्गा, सुभद्रा इति नामभिः पूजा कार्या । आसां च प्रत्येकं पूजामन्त्राः फलविशेषाश्च तत्रैव ज्ञेयाः ।

---

*एकैकामिति पञ्च पक्षाः । देव्युपासकस्तु शुक्लाष्टम्यादावपि कुमारीं भोजयेत् ।

"शुक्लाष्टमीचतुर्दश्योर्नवम्यां च विशेषतः ।
कृष्णपक्षे विशेषेण भोजयेत्तु कुमारिकाम् ॥"

इति देवीपुराणात् । *द्विवर्षामिति ।

"द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात् ।
कुमारिका द्विवर्षा च त्रिवर्षा च त्रिमूर्तिनी ॥
चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी ।
षड्वर्षा तु भवेत्काली सप्तवर्षा तु चण्डिका ॥
अष्टवर्षा शाम्भवी तु (१)कन्या तु नवभिः स्मृता ।
दशवर्षा सुभद्रेति नामभिः परिकीर्तिता ॥"

---

(१)यद्यप्यत्र सर्वेष्वादर्शपुस्तकेषु 'कन्या' इत्येव पाठो दृश्यते तथाऽपि मूले, पूजामन्त्रेषु चात्र दुर्गाया एव दर्शनात् 'दुर्गा तु नवभिः स्मृता' इत्येव पाठोऽपेक्ष्यते इति बोध्यम् ।

इत्यावाहनादि प्रणमेत्-

"देवि चण्डाम्बिके चण्डे चण्डारिविजयप्रदे ।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव ॥" इति ।

वायव्यपत्रे अष्टभुजां चण्डवतीं ध्यायेत्-

चण्डवतीं घनश्यामामष्टबाहुं च खेटकम् ।
कार्मुकं च कपालं च ध्वजं वामेषु धारिणीम् ॥
दक्षे खड्गं च त्रिशूलं च बाणं चक्रं च मुद्गरम् ।

तथा चण्डवतीं नाम्ना प्रणमेत्-

"या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ।
या परा शक्तिरूपा तस्यै चण्डवत्यै नमो नमः ॥" इति ।

सौम्यपत्रे षड्भुजां चण्डरूपाध्यानम्—

"षड्भुजां चण्डमर्दिनीं कपालं खेटकं धनुः ।
वामेन बिभ्रती दक्षे खड्गं बाणं त्रिशूलकम् ॥"

आवाहनं पूजनं च कृत्वा प्रणमेत्—

"चण्डरूपात्मिके चण्डे चण्डनायकनायिके ।
सर्वसिद्धिप्रदे देवि नित्यं तुभ्यं नमो नमः ॥" इति ।

ईशानपत्रे चतुर्भुजामतिचण्डिकाध्यानम्—

"चण्डासुरस्य मथिनीं कृष्णवर्णां चतुर्भुजाम् ।
[illegible] कपालं वामे वै दक्षिणे शूलपाशके ॥"

अतिचण्डिकायावाहनं संपूज्य प्रणमेत्—

"या [illegible] या महेशी [illegible] ।
चण्डासुरस्य मथिनी [illegible] ॥" इति ।

[illegible]

नवरात्रनिरूपणम् ।

ततः कुमारीपूजा । तदुक्तं हेमाद्रौ स्कान्दे–

*"एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ।

द्विगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं तु वा ॥"

था–

"नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु ।

एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत् ॥

एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत् ।

गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"

तेन *द्विवर्षामारभ्य दशवर्षापर्यन्ता एव पूज्या न त्वन्याः । तासां च क्रमेण—कुमारिका, त्रिमूर्तिः, कल्याणी, रोहिणी, काली, चण्डिका, शाम्भवी, दुर्गा, सुभद्रा इति नामभिः पूजा कार्या । आसां च प्रत्येकं पूजामन्त्राः फलविशेषाश्च तत्रैव ज्ञेयाः ।

---

*एकैकामिति पक्ष पक्षः । देव्युपासकस्तु शुक्लाष्टम्यादावपि कुमारीं भोजयेत् ।

"शुक्लाष्टमीचतुर्दश्योर्नवम्यां च विशेषतः ।

कृष्णपक्षे विशेषेण भोजयेत् कुमारिकाम् ॥"

इति देवीपुराणात् । *द्विवर्षामिति ।

"द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात् ।

कुमारिका द्विवर्षा च त्रिवर्षा च त्रिमूर्तिनी ॥

चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी ।

षड्वर्षा तु भद्रकाली सप्तवर्षा तु चण्डिका ॥

अष्टवर्षा शाम्भवी तु (१)कन्या तु नवभिः स्मृता ।

दशवर्षा सुभद्रेति नामभिः परिकीर्तिता ॥"

---

(१)यद्यप्यत्र सर्वेष्वादर्शपुस्तकेषु 'कन्या' इत्येव पाठो दृश्यते तथा-
[illegible]सं, पूजामन्त्रेषु चात्र दुर्गाया एव दर्शनात् 'दुर्गा तु नवभिः
' इत्येव पाठोऽपेक्ष्यते इति बोध्यम् ।

इत्यावाहनादि प्रणमेत्-

"देवि चण्डाम्बिके चण्डे चण्डारिविजयप्रदे ।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव ॥" इति ।

वायव्यपत्रे अष्टभुजां चण्डवतीं ध्यायेत्-

चण्डवतीं घनश्यामामष्टबाहुं च खेटकम् ।
कार्मुकं च कपालं च ध्वजं वामेषु धारिणीम् ॥
दक्षे खड्गं च त्रिशूलं च बाणं चक्रं च मुद्गरम् ।

ततश्चण्डवतीं मावाह्यप्रणमेत्-

"या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ।
या पराः शक्तयस्तस्यै चण्डवत्यै नमो नमः ॥" इति ।

सौम्यपत्रे षड्भुजाचण्डरूपाध्यानम्—

"षड्भुजां चण्डमथिनीं कपालं खेटकं धनुः ।
वामेन बिभ्रती दक्षे खड्गं बाणं त्रिशूलकम् ॥"

आवाहनं पूजनं च कृत्वा प्रणमेत्—

"चण्डरूपात्मिके चण्डे चण्डनायकनायिके ।
सर्वसिद्धिप्रदे देवि नित्यं तुभ्यं नमो नमः ॥" इति ।

ईशानपत्रे चतुर्भुजाऽतिचण्डाध्यानम्—

"चण्डाऽसुरस्य मथिनीं कृष्णवर्णां चतुर्भुजाम् ।
चापं कपालं वामे वै दक्षिणे शूलसायके ॥"

अतिचण्डिकामावाह्य संपूज्य प्रणमेत्—

"बालार्कारुणनेत्रा या सर्वदा भक्तवत्सला ।
चण्डाऽसुरस्य मथिनी वरदा त्वतिचण्डिका ॥" इति ।

येषां कुले कुम्भस्थापनं बलिदानादि नास्ति तैस्तत्र दुर्गा प्रतिमा महिषघ्नीत्यादि प्रार्थना प्रतिमाया अभावे प्रकाशोऽप्यः ।

ततः कुमारीपूजा। तदुक्तं हेमाद्रौ स्कान्दे—

*"एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च।
द्विगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं तु वा॥"

तथा—

"नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु।
एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत्॥
एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत्।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते॥"

तेन*द्विवर्षामारभ्य दशवर्षापर्यन्ता एव पूज्या न स्वन्याः। तासां च क्रमेण—कुमारिका, त्रिमूर्तिः, कल्याणी, रोहिणी, काली, चण्डिका, शाम्भवी, दुर्गा, सुभद्रा इति नामभिः पूजा कार्या। आसां च प्रत्येकं पूजामन्त्राः फलविशेषाश्च तत्रैव ज्ञेयाः।

---

*एकैकामिति पञ्च पक्षाः। देव्युपासकस्तु शुक्लाष्टम्यादावपि कुमारीं भोजयेत्।

"शुक्लाष्टमीचतुर्दश्योर्नवम्यां च विशेषतः।
कृष्णपक्षे विशेषेण भोजयेत्तु कुमारिकाम्॥"

इति देवीपुराणात्। *द्विवर्षामिति।

"द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात्।
कुमारिका द्विवर्षा च त्रिवर्षा च त्रिमूर्तिनी॥
चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी।
षड्वर्षा तु भवेत्काली सप्तवर्षा तु चण्डिका॥
अष्टवर्षा शाम्भवी तु (१)कन्या तु नवभिः स्मृता।
दशवर्षा सुभद्रेति नामभिः परिकीर्तिता॥"

---

(१)यद्यप्यत्र सर्वेष्वाद्दर्शपुस्तकेषु 'कन्या' इत्येव पाठो दृश्यते तथाऽपि मूले, पूर्वग्रन्थेषु चात्र दुर्गाया एव दर्शनात् 'दुर्गा तु नवभिः स्मृता' इत्येव पाठोऽपेक्ष्यत इति बोध्यम्।

"जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥"

इति कुमार्याः पूजामन्त्रः ।

"त्रिपुरां त्रिपुराधारां ज्ञानमार्गस्वरूपिणीम् ।
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥"

इति (१)त्रिमूर्त्याः ।

"कालातीतां कालमूर्तिं करुणाहृदयां शिवाम् ।
कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् ॥"

इति कल्याण्याः ।

"अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥"

इति रोहिण्याः ।

"कामचारीं कालरात्रिं कालचक्रस्वरूपिणीम् ।
कामदां करुणाधारां कालीं संपूजयाम्यहम् ॥"

इति काल्याः ।

"चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥"

इति चण्डिकायाः ।

"सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ॥"

इति शाम्भव्याः ।

"दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥"

इति दुर्गायाः ।

"सुन्दरीं स्वर्णवर्णाभां सर्वसौभाग्यदायिनीम् ।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥"

---

(१) [illegible]

इति सुभद्रायाः। अथ पूजाफलानि।

"आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः।
आयुष्कामस्त्रिमूर्तिन्तु त्रिवर्गस्य फलाप्तये॥
अपमृत्युव्याधिपीडादुःखानामपनुत्तये।
सौख्यधान्यधनारोग्यपुत्रपौत्रादिवृद्धये॥
कल्याणीं पूजयेद्धीमान्नित्यं कल्याणसिद्धये।
आरोग्यसुखकामी च जयकामी तथैव च॥
यशःकामो नरो नित्यं रोहिणीं परिपूजयेत्।
विद्यार्थी विजयार्थी च राज्यार्थी च विशेषतः॥
शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः।
ऐश्वर्यसुखकामी च स्वर्गकामी च यो नरः॥
संग्रामे जयकामी च चण्डिकां परिपूजयेत्।
दुःखदारिद्र्यनाशाय नृपसंमोहनाय च॥
महापापविनाशाय शाम्भवीं च प्रपूजयेत्।
सर्वोत्कटानां शत्रूणामुग्रसाधनकर्मणि॥
दुर्गां दुर्गतिनाशाय पूजयेद्यत्नतो बुधः।
सौभाग्यधनधान्यादिवाञ्छितार्थफलाप्तये॥
सुभद्रां पूजयेन्मर्त्यो दासादीनां विवृद्धये॥" इति।

अत्रापि तु देवीपुराणे—

"तावत्संपूजयेत्कन्यां यावत्पुष्पं न दृश्यते।"

पूजाप्रकारो देवीपुराणे—ब्रह्मोवाच—

"न तथा तुष्यते शक्र होमदानजपेन तु।
कुमारीभोजनेनात्र यथा देवी प्रसीदति॥
(अत्र नवरात्रे)
प्रक्षाल्य पादौ सर्वासां कुमारीणां च वासव।

चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥'

तिथितत्त्वे वाराहीतन्त्रे—

'प्रणवं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपुरुषः ॥
आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ।
हस्तसंस्थापनादेव यस्मात्तद्विफलं भवेत् ॥

श्रुत्वाऽन्यवर्णजाद्राजन् वाचकानरकं व्रजेत् ॥"

इति भविष्यात् । एवम्—

"अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते मध्ये विरामे तु अध्यायादि पठेत् पुनः ॥"

इति द्रष्टव्यम् । काम्यपाठफलं च देवीपुराणे—

"चण्डीपाठफलं देवि शृणुष्व गदतो मम ।
एकावृत्त्यादिपाठानां यथावत्कथयामि ते ॥
संकल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत् ।
पाठात्कलिमदानाय सिद्धिमाप्नोति मानवः ॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।
ग्रहोपशान्तौ कर्तव्यं पञ्चावृत्तं वरानने ॥
महाभये समुत्पन्ने सप्तावृत्तं समुच्चरेत् ।
नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्कावृत्ते काम्यसिद्धिर्वैरिहानिश्च जायते ॥
मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वश्यतामियात् ।
सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः ॥
कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ।
राज्ञो भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्याद्विंशत्यावृत्तं तथाऽष्टादशकं प्रिये ।

स्वयं च लिखितं यच्च शूद्रेण लिखितं भवेत्।
*अब्राह्मणेन लिखितं तच्चापि विफलं भवेत्॥
ऋषिच्छन्दादिके न्यासं पठेत्स्तोत्रं विचक्षणः।
स्तोत्रे न दृश्यते यत्र प्रणवं तत्र विन्यसेत्॥
सर्वत्र पाठो विज्ञेयस्त्वन्यथा विफलं भवेत्॥'

एवं नवमीपर्यन्तं प्रत्यहं कुर्यात्। अथ विशेषो हेमाद्रौ-देवीपुराणे—

'पञ्चमे दिवसे कुर्याच्चण्डिकापूजनादिकम्।

महारण्यविमोक्षाय विजयार्थं पठेत्सुधीः॥
बन्धविमोचनेनाशु भवेद्बन्धविमोक्षणम्॥
संकटे समनुप्राप्ते दुर्भिक्षादिभये तथा॥
आधिव्याधौ कुलोच्छेद आयुषो नाश आगते।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके।
कुर्याद् यत्नाच्छतावृत्तं ततः संपद्यते शुभम्॥
श्रियो वृद्धिः शतावृत्त्या राज्यवृद्धिस्तथा परा।
मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तराच्छतात्॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा॥
भुक्त्वा मनोरथान्कामान् नरो मोक्षमवाप्नुयात्।
यथाऽश्वमेधः क्रतूनां देवानां च यथा हरिः॥
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः।
अथवा बहुनोक्तेन किमेतेन वरानने॥
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः॥" इति।

*शूद्रेणेति। 'क्षत्रिणा' इति वा पाठः। कारुणा क्षेत्रोपजीविनेति यावत्। *अब्राह्मणेनेति। तदनुपजीव्यपर्यवेक्षं भवेदिति।

द्विगुणं तद् द्वितीयेऽह्नि त्रिगुणं तत् परेऽहनि ॥
नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ॥' इति ।

एतेन नवरात्रे पूजैव प्रधानमुपवासादि त्वङ्गमिति गम्यते । तिथिह्रासे तु तिथिद्वयनिमित्तं पूजादि *महालयश्राद्धवदेकदिने *आवृत्त्या कार्यम् । वृद्धौ *तद्वदेवावृत्तिः । ततो नवरात्रोपवासादिसंकल्पं कुर्यात् । स्वयमशक्तावन्येन वा पूजादि कारयेत् ।

'स्वयं वाऽप्यन्यतो वाऽपि पूजयेत्पूजयीत वा ।'

इति तरङ्गिण्यां देवीपुराणात् । इदं च देवीपूजनं शुक्रास्तादावपि कार्यम् । तदुक्तं धर्मप्रदीपे—

'नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ ।
कार्या चैव स्वदेव्यर्चा *प्रत्यब्दं कुलधर्मतः ॥' इति ।

मलमासे तु वचनाभावान्न भवति ॥

अत्र साश्वस्याश्वपूजनमुक्तं मदनरत्ने देवीपुराणे—

'आश्वयुक्शुक्लप्रतिपत्स्वातीयोगे शुभे दिने ।
पूर्वमुच्चैःश्रवा नाम प्रथमं श्रियमावहत् ॥
तस्मात्साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया सह ।
पूजनीयाश्च तुरगा नवमी यावदेव हि ॥

"शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ।
न कार्योऽसक्तमनसा कार्ये स्तोत्रस्य वाचनम् ॥" इति ।

*महालयेति । एकस्मिन्दिने *आवृत्त्या एकेन अनुष्ठानेन, तन्त्रेणेति यावत् । यथा च महालये यथा तन्त्रं तथा देवीपूजायामपीत्यर्थः । *तद्वत् महालयवत् । *प्रत्यब्दमिति आरम्भनिषेधार्थम् ।

"अस्तंगते गुरौ शुक्रे सिंहस्थे वसुधाधिपे ।
देवीपूजनमुद्दिष्टं स्थविरे बालके तथा ॥

*शान्तिः स्वस्त्ययनं कार्यं तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्टं वचा-सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिं तेषां तु बन्धयेत् ।
*वापन्यैर्यारुणैः सौरैः शाक्तैर्मन्त्रैः सवैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने ॥'

कल्पतरौ स्वेतद्ग्रन्थेऽन्यदपि—

'ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमावहन्पूर्वं सशैलवनकाननाम् ॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥
शाकादक्षारसमारभ्य नवम्यन्तं च पूर्ववत् ॥'
अत्रापि होमादौ स्पर्धः ॥

अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये—

'केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
*पक्वतैलं द्वितीयायां केशसंयमहेतवे ॥
(पट्टडोरमिति गौडपाठः ।)
दर्पणं च तृतीयायां सिन्दूरालक्तकं तथा ।

आचारम्भे विरामः स्यात् द्वितीयादौ न चिन्तयेत् ।
मलमासे न कर्तव्यं नवदुर्गोत्सवमतम् ॥"
इति देवीपुराणात् ।

*शान्तिः=भक्तशान्तिर्गजशान्तिश्च यान्तिमपूर्वादौ प-
सिद्धा । *वापन्यैरिति । वैदिकैर्नापमन्त्रैर्वाऽष्टोत्तरशतं होमः ।
*पक्वतैलमिति । 'पट्टडोरम्' इति वा पाठः । सिन्दूरं भा-
, अलक्तकं पादयोः । द्विवेदि बोधने नवमीपूर्वाह्णःकालः द्वि-
दययोगे तु आर्द्रायोगः । उपरालोऽप्यस्यामुक्तः ।
"तस्मादियं महापुण्या नवमी पापनाशिनी ।

मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमण्डनम् ॥
पञ्चम्यामङ्गरागं च शक्त्यालंकरणानि च ।
षष्ठ्यां बिल्वतरौ बोधं सायंसंध्यासु कारयेत् ॥
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ।
उपोषणमथाष्टम्यामात्मशक्त्या च पूजनम् ॥
नवम्यामुग्रचण्डायाः पूजां कुर्याद्बलिं तथा ।
संपूज्य प्रेषणं कुर्याद्दशम्यां शाबरोत्सवैः ॥
अनेन विधिना यस्तु देवीं प्रीणयते नरः ।
स्कन्दवत्पालयेद्देवी तं पुत्रधनकीर्तिभिः ॥'

कृत्यतत्त्वार्णवे लैङ्गे—

'कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेऽपि वा ।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः ॥
शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोचनम् ।
प्रातरेव तु पञ्चम्यां स्नापयेत्सुशुभैर्जलैः ॥
षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम् ।
सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ॥
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ।
विसर्जनं दशम्यां तु क्रीडाकौतुकमङ्गलैः ॥'

०'अत्र नवम्यां बोधनासामर्थ्ये षष्ठ्यां बोधनमिति स्मार्ताः । फलभूमार्थिनः समुच्चय इत्यन्ये । नवम्यां मघा

कालिकापुराणे—

०'इषे मास्यसिते पक्षे नवम्यामार्द्रभे दिवा ।
श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहम् ॥'

उत्तीर्णा तु भवेत्तेन सततं मन्दाकिनीः ॥"
इति भविष्यात् । बोधने षष्ठीनवम्योर्विरोधादाह—०अत्रेति । ०इषे इति । पूर्वविधानद्वारेण । दानं पूजामकृत्वं श्रावितायाः

अत्र स्त्रीणां विशेषः परिभाषायां ज्ञेयः ॥

अथाशौचे विशेषो निर्णयामृते विश्वरूपनिबन्धे—

'आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ।
आशौचेऽपि समुत्पन्ने क्रिया कार्या कथं बुधैः ॥
सूतके वर्तमाने च तथोत्पन्ने सदा बुधैः ।
देवीपूजा प्रकर्तव्या पशुयज्ञविधानतः ॥
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते ॥' इति ।

कालादर्शे विष्णुरहस्येऽपि—

'पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं *दानार्चनविवर्जितम् ॥' इति ।

*गौडनिबन्धे तिथितत्त्वेऽप्युक्तम्—'आश्विनकृष्णनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि चैकं कर्म । अतश्च मध्ये आशौचपातेऽपि न दोषः, *'संकल्पो व्रतसत्रयोः' इति विष्णूक्तेः इति । *आरब्धं स्वयमेव कार्यम्, अनारब्धं त्वन्येन कारयेदिति दिवोदासः । रजस्वला त्वन्येन कारयेत् । सूतकादिवद्विशेषवचनाभा-

---

पद्यपिकृत्याह—*दानार्चनेति । नन्वस्तु प्रधानयोरप्यर्चनदानयोर्निषेध इत्यत आह—*गौडेति । *संकल्प इति । एतदाशौचेन संकल्पत्यागो मा प्रसाङ्क्षीत् इत्येतदर्थम् । आशौचं निमित्तीकृत्यापूर्वसंकल्पविधौ गौरवात् । ततश्च कर्तव्यत्वेन साङ्गप्रधानं प्राप्नुयात् । तत्र दानार्चनविवर्जितमित्यङ्गयोरेव दानार्चनयोर्निषेधो न तु प्रधानयोस्तयोः । अन्यथा व्रतान्तरेऽङ्गयोरत्र तु प्रधानयोरिति वैरूप्याद् अत्र प्रधानयोस्तयोर्निषेद्धुमशक्यत्वाच्च । एतच्च प्रसङ्गेन प्रधानभूतपूजाबलिदानादिविषयत्वापि ग्रह इति भावः । वर्तमाने तथोत्पन्ने इत्यनयोः फलमाह—*आरब्धमिति । पूर्वसंकल्पितत्वाविशेषणाच्च ।

त्। स्त्रीणां च नवरात्रे ताम्बूलादिचर्वणं भवति। तदुक्तं व्रतहेमाद्रौ गारुडे—

'गन्धालंकारताम्बूलपुष्पमालानुलेपनम्।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम्॥' इति।

एतत्सभर्तृकोपवासविषयम्। अन्यश्चात्र विशेषः परिभाषायामुक्तः।

आश्विनशुक्लपञ्चम्यामुपाङ्गललिताव्रतं महाराष्ट्रेषु प्रसिद्धम्। तत्र यद्यपि कथायां कालविशेषो नोक्तस्तथापि—

'रात्रौ जागरणं कुर्याद्गीतवादित्रनिःस्वनैः।'

इति रात्रौ जागरोक्तेः शक्तिपूजायां रात्रौ *प्राशस्त्याच्च रात्रिव्यापिनी ग्राह्येति केचित्। वस्तुतस्तु वचनं विना रात्रिपूजायां मानाभावाज्जागरस्य चा*ङ्गत्वानुगमकत्वात्

'भुक्त्याजागरणे नक्ते चन्द्रायणव्रते तथा।
ताराव्रतेषु सर्वेषु रात्रियोगो विधीयते॥'

इति कालहेमाद्रौ वचनाच्च पूर्वविद्धा ग्राह्या। रात्रिशब्दः पूर्वविद्धावचन इति हेमाद्रिः। अत्र च भुक्त्याजागरणनक्तस्यादिति साधु प्रतीमः। भुक्त्या जागरणं यत्रेत्येकं पदम्, तस्मिन्व्रते इत्यर्थः। अन्यथा भुक्त्वेत्यसंगतेः। दिवोदासीयेऽप्येवम्।

आश्विनशुक्लपक्षे मूलनक्षत्रे पुस्तकेषु सरस्वतीस्थापनम्। यथोक्तं निर्णयामृते देवीपुराणे—

'मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम्।
उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत्॥' इति।

---

*प्राशस्त्यादिति। निशि प्रवर्तनीयपूजः। *चाङ्गत्वादिति। न च—

रुद्रयामलेऽपि—
'मूलर्क्षे सुराधीश पूजनीया सरस्वती ।
पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम् ॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देव विद्याकामो द्विजोत्तमः ॥'
(१)(संग्रहे-
'आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम् ।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥')

मूलस्याद्यपादे आवाहनमिति शिष्टाः । श्रवणाद्यपादे च विसर्जयेत् ।

'आदिभागो निशायां तु श्रवणस्य यदा भवेत् ।
संप्रेषणं तदा देव्या दशम्यां च महोत्सवः ॥'

इति चिन्तामणौ ब्रह्माण्डपुराणात् ॥

अथ षष्ठी । गौडनिबन्धे देवीपुराणे—

'व्रतस्यास्य फलं प्रोक्तं जागरे मुनिसत्तम' ।

इति जागरस्य फलसम्बन्धात् प्रधानमिति वाच्यम् । करण्डविधानं मङ्गल—

'सर्वपूजनविनष्टिं परां हरिद्वाप्स्यति ।'

इति फलसम्बन्धात् पूर्वेव प्रधानं "धातुसम्बन्धे प्रत्ययाः" (पा० सू० ३-४-१) इति पाणिनिस्मरणात्, जागरस्तु स्थापनदानादिवदङ्गम् । फलवत्सन्निधावफलं तदङ्गमिति न्यायात् अस्यास्येति तु जागरविशिष्टाकेन पर्वोत्सवस्यैव जागरे सति फलसम्बन्धबोधकं न तु जागरप्राधान्यबोधकमिति भावः । वस्तुतस्तु द्वयस्याजागरणवाक्यं तत्प्रधानकर्मपरम् । अङ्गानुरोधेन निर्णयस्यायुक्तत्वात् । तस्मादिह मध्याह्नव्याप्त्यैव निर्णयः । पूजाव्रतेऽपि पूर्वेद्युः ।

(१) कोष्ठान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

दिनद्वये सत्त्वेऽसत्त्वे च युग्मवाक्यादिति । स्कान्दे—

"शुक्लपक्षस्य पञ्चम्यामिषे मासि चरेद्व्रतम् ।
वर्जितं सन्ध्ययोस्त्याज्यं दिनवृद्धौ क्षये तथा ॥
निर्वर्त्यावश्यकं कर्म शुची रागविवर्जितः ।
चत्वारिंशत्तथा चाष्टौ कल्पितानि विधानतः ॥
दन्तकाष्ठान्युपादाय तडागं वा नदीं व्रजेत् ।
दन्तधावनपूर्वाणि मज्जनानि समाचरेत् ॥
"आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते ॥
मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥"
(इति)मन्त्रः ।
ततो यथाविधि स्नात्वा धौतवासा गृहं व्रजेत् ।
शुचौ देशे मण्डपिकां कृत्वा चातिमनोहराम् ॥
सौवर्णीं प्रतिमां कृत्वा स्थापितां तत्र पूजयेत् ।
(प्रतिमा च विधानज्ञं, सौवर्णीत्युपलक्षणम् ।)
अथ दूर्वाङ्कुरान्तावांश्चत्वारिंशत्तथाष्टभिः ।
अविच्छिन्नान्स्वहस्त आदाय मन्त्रमेनं जपेद्बुधः ॥
'बहुवरोहा सततममृता हरितालिका ।
यथेऽयं छडिने मातस्तथा मे स्युर्मनोरथाः ॥'
(दूर्वापूजामन्त्रः ।)
इत्युक्त्वा पूजयेद्देवीं विधिवद्विविधैः शुभैः ।
चत्वारिंशद्विहस्तन्तु अष्टहस्तः समाचरेत् ॥"

एवं विधौ दूर्वाष्टाचत्वारिंशद्वारं समाचरेदित्यर्थः । एकैकदानं पूजनमार्गं चेद्दूर्वा हेमाद्रौ ।

"अमी साम द्वयाद्वाव शिरसा वटकादिकम्" ।
वटकोद्भवादिकमिति शा । एवमानेन वर्जन मागापीति

*'ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम्।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम्॥
पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम्।
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम्॥
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत्।'

कालिकापुराणे—

*बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च।

वेदयेत्। तत्र मन्त्रः—

"पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितम्।
द्विजवर्याय दास्यामि व्रतसंपूर्तिहेतवे॥"

अथवा—

"उपाकल्पितं देवि व्रतसंपूर्तिहेतवे।
वाणकं द्विजवर्याय सहिरण्यं ददाम्यहम्॥"
"ततः कथां समाकर्ण्य वाणकाख्यस्य संख्यया।
स्वयमद्याद्देवाग्रं बान्धवैस्सह बान्धवैः॥"

यद्देवाद्यमित्यन्नान्तरपरिसंख्या न च वेदोऽप्येवकारेणाऽन्यनिवृत्तेरुक्तत्वात्। "अत्र प्रेत्ययान्ति" इतिवत्। सप्तम्यां बिल्वशाखापूजा कार्या।

"आश्विनस्य सिते पक्षे सुमुहूर्तेन सप्तमी।
तस्यां च पत्रिकापूजा कर्तव्या नरनायकैः॥
प्रशस्तां सफलां बिल्वशाखामाहृत्य पूजयेत्॥"

इति वचनात्। तत्र बोधनकालः कृष्णनवमी तदुत्तरषष्ठी वा, तत्र षष्ठीप्रभृति पत्रिकापूजाविधानं प्रपञ्चयति—*ज्येष्ठेति। तिथिनक्षत्रयोगलाभार्थमाश्विनकृष्णनवम्यादिशुक्लनवम्यादिदर्शी [illegible] विधौ, तत्राशक्तस्य षष्ठ्यादिपक्षानेवाह—*बोधयेदिति। पूर्वकल्पयोरपि षष्ठ्यां बोधनं पूर्वमेवोक्तम्। एतत्कल्पे त्वत्र कर्मार-

सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥
प्रभूतबलिदानं तु नवम्यां विधिवच्चरेत् ।
विसर्जनं दशम्यां तु कुर्याद्वै शाबरोत्सवैः ॥
धूलिकर्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः ॥'

अत्र सर्वत्र तिथिनक्षत्रयोगावरो मुख्यः कल्पः । तदभावे तु तिथिरेव ग्राह्या ।

'तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति नक्षत्रं न तिथिं विना ॥'

इति [illegible]वचनात् ।

'तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ॥'

इति तत्रैव [illegible] ।

अत्र [illegible]

[illegible]

[illegible]

'षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम् ।' इति पूर्ववचनादिति कल्पतरुः । [illegible] सप्तम्यां न तु षष्ठ्यामित्याचार्यचूडामणिः । अत्र क्रमः—बिल्ववृक्षं गत्वा [illegible] देवीं बिल्वे च [illegible] प्रबोधयेत् । तत्र मन्त्रः—

'रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः ।
[illegible] ॥
[illegible]' इति ।

[illegible]

[illegible]

एवं देवीमधिवास्य परदिने निमन्त्रितबिल्वशाखाप्र-
प्रवेश*पूजां कुर्यात् । तदुक्तं हेमाद्रौ लैङ्गे-

*'मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत् ।
युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा ।
*तथैव प्रतिमां देव्याः*स्नात्वाभ्युक्ष्य प्रवेशयेत् ।'

अत्र चोपवासपूजादावौदयिकी सप्तमी ग्राह्या, न तु युग्मवाक्यात्पूर्वा ।

'युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥'

इति कृत्यतत्त्वार्णवोदाहृतवचनात्

*'भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः ॥'

इति तिथितत्त्वे नन्दिकेश्वरपुराणाच्च । दुर्गाभक्तितरङ्गि-
ण्यामप्येवम् । तत्रापि घटिकातो न्यूनत्वे परा कार्या

'व्रतोपवासनियमे घटिकैकापि या भवेत् ।'

इत्यादि । *पूजां कुर्यादिति । तदुत्तरकृत्यं पाद्मे पूर्वनिमन्त्रित-
बिल्वसमीपं गत्वेत्यादि वक्ष्यति ।

'सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ।'

इत्युक्तम् । मूलाभावेऽप्याह- *मूलाभावे इत्यादि । *तथैवे-
ति । केशसंस्कारद्रव्यादिदानप्रभृति षष्ठीपूजान्तं यदि: कार्यविशि-
ष्टं, तच्च पत्र्याधारम्भवशे तत्पात्रेव समुच्चयेन भवति । *स्ना-
त्वेति प्रवेशकानां स्नानादिनित्यकृत्यलाभार्थम् । पत्रिकाप्र-
वेशे देवीप्रवेशो युज्यते । *भगवत्या इति । आपन्नतराशौ प-
त्रिकादीनां सप्तम्यादिनिमित्तमुत्तरोत्तरतिथिष्वौदयिकं प्राप्नो-
ति लभ्यते । [illegible]

इतिदेवलोक्तेरिति गौडाः । *दाक्षिणात्यास्तु पूर्ववचनमदृष्ट्वा युग्मवाक्यात्पूर्वां कुर्वन्ति । पत्रिकापूजा च *पूर्वाह्ण एव कार्या न तु मूलानुरोधादपराह्णादाविति कृत्यतत्त्वार्णवे उक्तम् । पत्रिकास्तु–

'रम्भा कची हरिद्रा च जयन्ती बिल्वदाडिमौ ।
अशोको मानवृक्षश्च धान्यादिनवपत्रिकाः ॥'

इति तत्रैवोक्ताः ।

अस्यामेव सप्तम्यां देवीत्रिरात्रमुक्तं हेमाद्रौ । प्रतिपदादिनवतिथिषु उपवासकरणासामर्थ्ये सप्तम्यादिदिनत्रये वा कुर्यात् । तदाह धौम्यः–

आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥
त्रिरात्रं वाऽपि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥'

अत एव हेमाद्रौ देवीपुराणे मङ्गलाव्रते–

'आश्विने वाथवा माघे चैत्रे वा श्रावणेऽपि वा ।
कृष्णाष्टम्यादि कर्तव्यं व्रतं शुक्लावधि हरेः ॥
यावच्छुक्लाष्टमी तावत् उपोष्या तु विधानतः ।
स्नानं होमो जपः पूजा कन्या भोज्यास्तथाऽन्वहम् ॥

केचित् । *दाक्षिणात्यास्त्विपाति । अधिकः स्वर्डे । 'पूर्वाह्णे पूजयेद्देवताम्' इत्युक्तेः । *पूर्वाह्ण एवेति । तदुक्तम् —

"पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा
आरोग्यं धनदाऽकरोति विजयं चन्द्रार्कवेधे शुभा ।
मध्याह्ने जनपीडनशोककरी संग्रामघोरावहा
सायाह्ने वधबन्धनादिकलहं सर्वक्षतं सर्वदा ॥
सप्तम्यामपराह्णे यदि विधिवद् गृहे पत्रिका प्रविष्टाऽस्या
राज्ञः सप्ताहराज्यं भवसुतवधनं इति मूलानुरोधात् ।

महाभैरवरूपेण अस्थिमालाधराश्च ये।
पूजनीया विशेषेण पत्तनग्रामपुरादिषु ॥'

इति मासचतुष्टयेऽभिधाय। अन्यत्रापि-

'अथवा नवरात्रं च सप्त पञ्च त्रिकं दिवा।
एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात् ॥' इति
'पूजयेदाश्विने शक्र यावच्छुक्लाष्टमी भवेत्।
सर्वकार्याणि सिध्यन्ति शक्र नास्त्यत्र संशयः ॥'

इत्युक्तम्। द्विवेत्ये*कराश्रमुक्तम्। गोविन्दार्णवे देवी-पुराणे-

'नवरात्रव्रतेऽशक्तस्त्रिरात्रं चैकरात्रकम्।
व्रतं चरति यो भक्तस्तस्मै दास्यामि वाञ्छितम् ॥'

इति।

*तत्रापि सप्तम्याः पूजने पूर्वोक्तो निर्णयः। *अत्र तिथिपैगपद्ये तन्त्रेणोपवासः। तिथिद्वयनिमित्तं पूजादिकं तु भेदेन।

" तस्मात्सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राक्षसर्क्षं विहाय ॥"
"प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ॥"

इति वाक्यस्य पत्रीपूजापरत्वात्। प्रातः प्रपूजयेत् इति पाठान्तरम्। प्रातःशब्दश्चेह पूर्वाह्णपर इत्युक्तम्।

*एकरात्रमिति। अष्टम्यामेव नवम्यामेव वेत्यर्थः। *तत्रापीति। त्रिरात्रेऽपीत्यर्थः। 'शरत्काले महापूजा क्रियते या च वार्षिकी। सा कार्योदयगामिन्याम्'इति वचनात्। औदयिकत्वं द्विमुहूर्तमिति ग्रन्थकृतः। पूर्वाह्णव्यापित्वमिति वस्तुगतिः। माधवमते तु नक्षत्रस्यास्तदोषव्यापित्वं निर्णायकम्। *अत्र पत्रीप्रवेशे।

अथ विशेषो निर्णयामृते भविष्ये—

"सप्तम्यां नव गेहानि दारुजानि नवानि च।
एकं वा भक्तिभावेन कारयेत्सुसमाहितः॥
दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभनम्।
तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभाम्॥
तस्यां सिंहासनं क्षौमं कम्बलाजिनसंयुतम्।
तत्र श्रीदुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम्॥
भुजैश्चतुर्भी रुचिरैर्दशाभिर्वा विभूषिताम्।
तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखराम्॥
"प्रणी संपूजयेद्देवीं सप्तम्यादिदिनत्रये।
द्वाभ्यां चतुरशोभिर्वा हास्यद्धिरथाविधेः॥"

इति भविष्यात्। त्रिरात्रपक्षे तु मुख्यकल्पत्वदेव निर्णयस्य स्पष्टाकाङ्क्षा। भक्तिभावेनेति। विधासरे तु पूर्वग्रहेणैव च-स्रादिभिः कदलीस्तम्भादिभिश्च भूषणीयमिति युचितम्। श्रीदुर्गामिति। सर्वलक्षणानि मात्स्यशास्त्रोक्तानि मात्स्ये—

"जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
('तप्तकाञ्चनवर्णाभाम्' इति प्रमाणान्तरादतसीपुष्पं शणपुष्पं प्राह्यं, तच्च पीतम्।)
नवयौवनसंपन्नां सर्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत्पीनश्रोणिपयोधराम्।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम्॥
त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं क्रमादधः।
तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्ध्वजम्।

अनेककुसुमाकीर्णां कपर्देन सुशोभिताम् ।
नितम्बबिम्बसंनद्धकिङ्किणीक्वाणनादिनीम् ॥
*शूलचक्र*दण्डशक्तिवज्रचापासिधारिणीम् ।
घण्टाक्षमालाकरकपालपात्रलसत्कराम् ॥
तदग्रे छिन्नशिरसं माहिषं रुधिराप्लुतम् ।
निःसृतार्धतनुं कण्ठनाले चर्मासिधारिणम् ॥*

घण्टां वा परशुं वाऽपि वामतः संनिवेशयेत् ॥
(दशभुजेयं देवी ।)
अधस्तान्महिषं तद्वच्छिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं तिर्यग्दन्तविभूषितम् ।
रक्तरक्तीकृताङ्गं च रक्तविस्फारितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
सपाशवामहस्तेन धृतकेशं च दुर्गया ॥
वमद्रुधिरवक्त्रं च, देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितम् ॥
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ।
स्तूयमानं च तद्रूपममरैः संनिवेशयेत् ॥" इति
ध्यानदर्शनेन कर्तव्यम्—
"प्रसन्नवदनां देवीं दैत्यदानवदर्पहाम् ।
स्तूयमानां चैव सर्वकामप्रदां शुभाम् ॥
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका ॥
अष्टाभिः शक्तिभिस्ताभिः सततं परिवेष्टिताम् ।
चिन्तयेज्जगतां धात्रीं धर्मकामार्थमोक्षदाम् ॥"
इत्यन्तः । उग्रचण्डेति । अष्टशक्तयः नामतः । इयमपि दशभु-

देवीधृतकरग्रीवं शूलेनोरसि ताडितम् ।
नागपाशेन विक्षिप्तं वृषस्कन्धेनापि विप्लुतम् ॥
वमन्तु रुधिरवक्त्रेण धुन्वतोऽर्ध्वं सदान् रुषा ।
सर्वतो मातृचक्रेण सेव्यमानां सुरैस्तथा ॥" इति ।
"तत्र देवी प्रकर्तव्या हैमी वा राजती तथा ।
मृण्मयी लक्षणोपेता खड्गशूले यथापूजयेत् ॥"
दार्क्षी=दारुमयी ।

देवीमूर्तिस्थापने विशेषो दुर्गाभक्तितरङ्गिण्यां देवीपुराणे—

'प्राग्वास्या शुभदा दुर्गा पूर्वास्या जयवर्धिनी ।
पश्चिमाभिमुखी नित्यं, न स्थाप्या सौम्यदिङ्मुखी ॥'

प्रतिमाऽभावे विशेषस्तत्रैव—

"हैमराजतमृद्धातुशैलचित्रार्पितापि वा ।
खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा ॥
यद्यदस्यायुधं प्रोक्तं तस्मिंस्तत् प्रतिपूजयेत् ।
देवी भक्त्यार्चिता पुंसां राज्यायुः सुतसौख्यदा ॥"

कृत्यतत्त्वार्णवे कालिकापुराणे—

"लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ॥
चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत् ।
बिल्वपत्रैर्यजेद्देवीं तथा जातीप्रसूनकैः ॥
नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः ॥

आयुधद्वयधारणेन दशभुजा । यपूजयेदिति ।
"मृन्मयीं प्रतिमां कृत्वा बिल्वे वा यस्तु पूजयेत् ।
आत्मवित्तानुसारेण ॥ लभेन्मौक्तिकं फलम् ॥"

*भगलिङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः ॥
भगलिङ्गक्रियाभिश्च प्रीणयध्वरचण्डिकाम् ।
परैर्नाक्षिप्यते यस्तु यः परान्नाक्षिपत्यपि ॥
यस्य क्रुद्धा भगवती शापं दद्यात्सुदारुणम् ॥"

विघ्नमूत्रमपादौ स्नानाद्यसंभवे तत्रैवोक्तम्—

'अन्तिके स्थापिते खड्गे स्नापयेद्दर्पणेऽथवा ।'इति

अथ सप्तमीपूजाविधिः । *प्रतिपदुक्तविधिना फलसं... तैनान्ते नवपत्रिकापूजनमूलमयदुर्गापूजाबलिदानानि ... रिष्य इति संकल्प्य पूर्वेनिमन्त्रितबिल्वसमीपं गत्वा*स... पूज्य-'आगच्छ सर्वकल्याणि'इति पूर्वोक्तमन्त्रं पठित्वा

"बिल्ववृक्ष महाभाग सदा त्वं शङ्करप्रिय ।
गृहीत्वा तव शाखां च देवीपूजां करोम्यहम् ॥
शाखाछेदोद्भवं दुःखं न च कार्यं त्वया प्रभो ।
गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः ॥
*उत्तिष्ठ पत्रिके देवि सर्वकल्याणहेतवे ।
पूजां गृहाण सकलामस्माकं वरदा भव ॥
मेरुमन्दारकैलासहिमवच्छिखरे गिरौ ।
(१) जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः॥"

इति *संप्रार्थ्य-'ॐ छिन्धि फट् फट् ॐ हुं फट् स्वाहा'इति

इति च बोध्यम् । शबरोत्सवैरित्युक्तं, तानुत्सवानाह—*भ... गेति । शबराणामिमे शाबराः ।

*प्रतिपदिति । प्रतिपदि दुर्गाप्रतिष्ठापने तत्समीप एव पत्री- स्थापने सहैव इति संप्रदायः । *संपूज्येति । 'बिल्वं दुर्गां च'इति शेषः । *उत्तिष्ठेति पत्रिकायाः प्रार्थना पूजां कृत्वा का- र्या । *संप्रार्थ्येति । 'कृताञ्जलिः' इत्यादिः । ॐइति छेदनप-

(१) 'जातः श्रीवृक्षबिल्व त्वम्' इति पाठान्तरम् ।

ञ्चिषाऽऽसंपूज्य—'ॐ चामुण्डे चल चल' इति मन्त्रे
येण देवीं तां पत्रगृहं प्रवेश्य—

न्त्रः । उपदेशादिहीनानान्तु शाबरमन्त्रः । स च 'शाबरमन्
ति पाहि पत्योति' इत्यादिः । फल्गुपत्रनामपराजितां दिगम्
नाम्नीं चोदयेत् । संपूज्येति । नाममन्त्रेण बिल्वनाम्नीं तत्र प
तिथौ देवीं चावाहनपूर्वकं संपूज्य माषभक्तादिबलिं दत्त्वा होमना
दिना यान्तीं देवीं च गृहमानयेत् । तथाह—कात्यायनि ।
"गीतवादित्रनिर्घोषं देवता अग्रे च कारयेत् ।
पश्चाद् भवेद्यत्कृते सर्ववाद्यमयी यतः" ॥
इति मात्स्यात् । गृहाङ्गे पीठावस्थितां शुद्धोदकेन स्नापयि-
त्वा माषभक्तादिबलिं च दत्त्वा पूजागृहस्थानि भूतानि नाममन्त्रे-
ण गन्धादिभिः संपूज्य बलिं दद्यात् । तत्र मन्त्रः—
"भूताः प्रेतपिशाचाश्च ये वसन्त्यत्र भूतले ।
ते गृह्णन्तु मया दत्तं बलिमेव सदाशिवाः ॥
पूजिता गन्धपुष्पाद्यैर्बलिभिस्तर्पितास्तथा ।
देशादस्माद्विनिःसृत्य पूजां पश्यन्तु मत्कृताम् ॥"
भूतेभ्य एव माषभक्तबलिर्मम इति । ततः सर्षपान्विकिरेत्—
"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
भूतानामविरोधेन देवीपूजां करोम्यहम् ॥"
क्' इति तान्यवनायेत् । एतच्चोक्तवत् ।
"तिष्ठन्तु तव भूतेषु नैवं यान्ति तथा ।
विद्रुवन्ति महाशुभा न च पश्यन्ति देवताः ॥
तस्मात्सर्वेण कर्तव्यं भूतानामपसारणम् ॥"
कालिकापुराणात् ।
'स्नानचन्दनलिप्ताङ्गैः कुङ्कुमगुरुसंयुतः ।
किरा इति संयोगः सर्वविघ्नविनाशकः ॥

"आरोपिताऽसि दुर्गे त्वं मृन्मय्यां श्रीफलेऽपि
स्थिरा नितान्तं भूत्वा च गृहं त्वं कामदा भव
इति स्थिरीकृत्य रम्भादिपत्रिकाः पञ्चगव्येन
चामृतेन च स्नापयित्वा वस्त्रेणावेष्ट्य स्थापयेत् ।
पूर्ववत्संकल्पं कृत्वाऽक्षतानादाय देवीमावाहयेत् ।
मन्त्रः—

"आवाहयाम्यहं देवीं मृन्मय्यां श्रीफले तथा ।
कैलासशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात् ॥
आगत्य बिल्वशाखायां चण्डिके कुरु सन्निधिम्
स्थापिताऽसि मया दुर्गे पूजये त्वां प्रसीद मे ॥
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ।
दुर्गे दुर्गस्वरूपाऽसि सुरतेजोमयेऽर्चिते ॥
सदानन्दकरे देवि प्रसीद मम सिद्धये ।
एह्येहि भगवत्यम्ब शत्रुक्षयजयप्रदे ॥
भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते ।
पत्रैश्चैव फलोपेतैः पुष्पैश्च सुमनोहरैः ॥
पत्रे सांस्थितं देवि पूजये त्वां प्रसीद मे ।
दुर्गे देवि इहागच्छ सांनिध्यमिह कल्पय ॥

छिद्रान्वितैश्चित्रैश्च सह मद्भक्त्या सुराणुता ॥"

इति मन्त्रमावाहनम् । पुनः शाखायां प्रतिमायां च देवीं सं
पूज्य पूजागृहं प्रवेशयेत् । पूजागृहं पूजाप्रहम् । आवाहनं च प्रात
निशान्तरं कार्यम् । तथाधिविधिमिति । 'भगवति दुर्गे इहाग
इन्द्रयोगमाप्नुहि' शेषः ।

'स्थापिताऽसि मया देवि मृन्मये श्रीफलेऽपि वा ।'

इति प्रस्थापनम् । नमोऽस्तु ते इति । 'भगवति दुर्गे इ
स्थि इति स्थापिताऽसि' इति शेषः । 'एह्येहि' इति इ

यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सह ॥"

ततो मूलमन्त्रेण पाद्यादिगन्धान्तोपचारैः—

"अमृतोद्भवं च श्रीवृक्षं शंकरस्य सदा प्रियम् ।
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥"

इति बिल्वपत्रम् ।

"ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ॥"

इति द्रोणपुष्पं निवेद्य*धूपादिदक्षिणान्तां पूजां मूलेन
त्वा प्रार्थयेत्—

"ॐमाहिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥
कुङ्कुमेन समालब्धे चन्दनेन विलेपिते ।
बिल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः ॥
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥"

*'सर्वमङ्गलमाङ्गल्ये' इति च संप्रार्थ्य पत्रिकाः पूज-

ञ्जलिः पठेत् । मूलमन्त्रेण जयन्तीमन्त्रेण 'दुर्गायै नमः' इत्यनेन
पुष्पगन्धाक्षतकुङ्कुमदधिदूर्वाङ्कुरतिलबिल्वपत्रयुगलेनार्घ्यमाव-
पञ्चामृतं स्नानादि पुनराचमनीयम् । वस्त्रयुग्माचमनं गन्धपु-
लिप्यर्थं मधूकं । *धूपादीनि । पुष्पधूपदीपनैवेद्याचमन-
न्दक्षिणाः मूलेन जयन्तीमन्त्रेण 'दुर्गायै नमः' इत्यनेन वा
स्तुतिभिः स्तुत्वा प्रणम्य पुष्पाञ्जलिः प्रार्थयेदित्यर्थः । *सर-
दति ।
र्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
ण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥"
केन ।

येत् । कदल्यां ब्रह्माणीं, दाडिमे रक्तदन्तिकाम्, धान्ये ल
क्ष्मीं, हरिद्रायां दुर्गाम्, (१)माने चामुण्डाम्, कचौ क
लिकाम्, बिल्वे शिवाम्, अशोके शोकरहिताम्, (२)ज
यन्त्यां कार्त्तिकीं चावाह्य संपूज्य दुर्गायै बलिं दद्यात्

"भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ।
देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥"

इति श्लोकानन्तरं संप्रार्थयेदित्यर्थः । *आवाहेति । पूजा चे
त्थं कार्या—अञ्जलिं बध्वा

"एहि दुर्गे महाभागे पत्रिकारोहणं कुरु ।
तव स्थानमिदं मन्ये शरणं त्वां व्रजाम्यहम् ॥"

इत्यावाह्य तत्र पाद्यादिदशोपचारैर्गन्धादिभिः पञ्चोपचारैर्ग
न्धपुष्पाभ्यां वा संपूज्य 'कदलीस्थे ब्रह्माणि इहागच्छ' इत्यावाह्य
एष गन्धः 'ह्रीं कदलीस्थब्रह्माण्यै नमः' इत्यादि संपूज्य प्रणमेत्-

"दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ।
रम्भारूपेण सर्वत्र शान्तिं कुरु नमोऽस्तु ते ॥" इति ।

एवमग्रेऽपि 'कचिस्थकालिके इहागच्छ' इत्यावाह्य 'ह्रींकचि
स्थकालिकायै नमः' इति संपूज्य प्रणमेत्—

"महिषासुरयुद्धेषु कचिभूतासि सुव्रते ।
मनुष्याऽनुग्रहार्थाय आगतासि हरप्रिये ॥" इति ।

हरिद्रास्थदुर्गे इत्याद्यावाह्य—'ह्रीं हरिद्रास्थदुर्गायै नमः' इति
संपूज्य प्रणमेत्—

"ॐहरिद्रे वरदे देवि उमारूपासि सुव्रते ।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे ॥"

'जयन्तीस्थकार्तिकि' इत्याद्यावाह्य—'ह्रीं जयन्तीस्थकार्तिक्यै

(१)'मान' इति बङ्गदेशे मानकनाम्ना प्रसिद्धः कन्दः । 'कचि' इति तु मूलम् ।
(२) जयन्ती टाहाकळ अमरसिंहटीकायाम् ।

नमः' इत्यादि संपूज्य प्रणमेत्—

"निशुम्भशुम्भमथने मेन्द्रैर्देवगणैः सह ।
पूजिताऽसि जयन्ती त्वमस्माकं वरदा भव ॥"

'बिल्वपत्रिके' इत्यावाह्य—'ह्रीं बिल्वपत्रिकायै नमः' इ
संपूज्य प्रणमेत्—

"महादेवप्रियकरो वासुदेवः प्रियस्तथा ।
उमाप्रीतिकरो वृक्षो बिल्ववृक्ष नमोऽस्तु ते ॥"

'दाडिमस्थरक्तदन्तिके' इत्यावाह्य—'ह्रीं दाडिमस्थरक्त-
दन्तिकायै नमः' इति संपूज्य प्रणमेत्—

"दाडिम त्वं पुरा युद्धे रक्तबीजस्य सम्मुखे ।
उमाकार्यं कृतं तस्मादस्माकं वरदा भव ॥"

'अशोकस्थशोकरहिते' इत्यावाह्य—'ह्रीं अशोकस्थशोकर-
हितायै नमः' इत्यादि संपूज्य प्रणमेत्—

"हरप्रीतिकरो वृक्षो अशोकः शोकनाशनः ।
दुर्गाप्रीतिकरो यस्मान्मामशोकं सदा कुरु ॥"

'मानस्थचामुण्डे(१)' इत्यावाह्य—'ह्रीं मानस्थचामुण्डायै नमः'
इत्यादि संपूज्य प्रणमेत्—

"यस्य पत्रे वसेद्देवी मानवृक्ष शचीप्रिय ।
मम चाऽनुग्रहार्थाय पूजां गृह्ण प्रसीद मे ॥"

'धान्यस्थलक्ष्मि इहागच्छ' इत्यावाह्य 'ह्रीं धान्यस्थलक्ष्म्यै
' इत्यादि संपूज्य प्रणमेत्—

"जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा ।
उमाप्रीतिकरं धान्यं तस्मात्त्वं रक्ष मां सदा ॥" इति ।

संपूज्यापराजिताख्यलतया वा आवेष्ट्य 'अपराजितान-

चामुण्डके इति पाठान्तरम् ।

*अत्र शस्त्रादिपूजा वक्ष्यते। ततः स्तुतिं पठेत्
तदुक्तं शिवरहस्ये—

"दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्राह्मणप्रियाम्।
सर्वलोकप्रणेत्रीं च प्रणमामि सदाशिवाम् ॥
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम्।
विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ॥
सर्वदेवमयीं देवीं सर्वरोगभयापहाम्।
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमाम् ॥

पत्रिकास्थदुर्गे इहागच्छ' इत्यावाह्य एष गन्धः 'ह्रीं आ[illegible]
जितानवपत्रिकास्थदुर्गायै नमः' इत्यादि संपूज्य [प्रणमेत्]

"पत्रिके नवदुर्गे त्वं महादेवमनोरमे।
पूजां समस्तां संगृह्य रक्ष मां त्रिदशेश्वरि ॥"

ततः कृताञ्जलिः पठेत्—

"धन्योऽहं कृतकृत्योऽहं सफलं जीवितं मम।
आगताऽसि यतो दुर्गे माहेश्वरि मदाश्रमम् ॥"

ॐनवपत्रिकाभ्यो नमः इति दुर्गया सहेति। ततो वैदिक(१)
मागमकं वा दुर्गामन्त्रं जपेत्।

'दुर्गाग्रतो जपेन्मन्त्रमेकचित्तःसमाहितः।'

इति देवीपुराणात्। अथवा पूजनारम्भे मार्कण्डेयपु
राणोक्तं चण्डीपाठं कुर्यात्।

"माहात्म्यं भगवत्यास्तु पुराणादिषु कीर्तितम्।
पठेत् शृणुयाद्वापि सर्वकामसमृद्धये ॥"

इति वचनात्। *अत्र शस्त्रादीति। यदि देवीपुरा-
[illegible]दिने श्रीरामनवम्यादिकारम्भः। तत्र [illegible]
[illegible]। [illegible] तु [illegible] इत्यादयः।

(१) अ [illegible] मन्त्रः [illegible]।

विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम्।
योगिनीं योगमातां च चण्डिकां प्रणमाम्यहम्॥
ईशानमातरं देवीमीश्वरामीश्वरप्रियाम्।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम्॥
य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः।
स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह॥"

अथ महाष्टमी। सा नवमीयुता।

"शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता॥"

इति ब्रह्मवैवर्तात्। मदनरत्ने स्मृतिसंग्रहे—

"शरन्महाष्टमी पूज्या नवमीसंयुता सदा।
सप्तमीसंयुता नित्यं शोकसंतापकारिणी॥
जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः॥
तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी।
वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः॥
सप्तमीं शल्यसंयुक्तां मोहादज्ञानतोऽपि वा।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते॥
सप्तमी कलया यत्र परतश्चाष्टमी भवेत्।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम्॥"

तथा—

"पुत्रान्हन्ति पशून्हन्ति हन्ति राष्ट्रं सराजकम्।
हन्ति जातानजातांश्च सप्तमीसहिताष्टमी॥"

अनेन नात्र त्रिमुहूर्तवेधः। तदा घटिकामात्राप्यौद-

नवमीयुतेति। यद्यपि पूजाऽतिरिक्ते देवीपूजायांदिरित्यादिः। पूजाधिका तु पूर्वैव संपूर्णत्वात्। अनेन 'सप्तमी कलया' इति

यिकी ग्राह्या ।

'व्रतोपवासनियमे घटिकैकापि या भवेत् ।'

इति देवलोक्तेः । *गौडा अप्येवमाहुः । अत एव भोजराजेन—'नच सप्तमी शल्यसमोपहता' इति। भौमेऽतिप्रशस्ता ।

"अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ॥"

इति मदनरत्ने वचनात् ।

"सप्तमीशल्यसंविद्धा वर्जनीया सदाष्टमी ।
स्तोकापि सा महापुण्या यस्यां सूर्योदयो भवेत् ॥"

इति मदनरत्ने स्मृतिसमुच्चयवचनात् ।

*'अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।'

इति पाद्मवचनाच । इयमेव मूलयुक्ता चेन्महानवमीसंज्ञा ।

"आश्वयुक्शुक्लपक्षे याऽष्टमी मूलेन संयुता ।
सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा ॥"

इति हेमाद्रौ स्कान्दात् । मूलयुक्तापि सप्तमीयुता चेत्त्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे-

"मूलेनापि हि संयुक्ता सदा त्याज्याऽष्टमी बुधैः ।

फलापदोपादानेन । *गौडाइति । नव्यगौडास्तु सूर्योदये कलाकाष्ठादियुतामपीच्छन्ति । 'यस्यां सूर्योदयो भवेत्' इति सप्तेणाष्टम्यां सूर्योदयाभावे [illegible] सप्तमीविद्धा ग्राह्येति सूचयति । *अष्टमीति । एवञ्च नवम्याः पूर्वविद्धात्वाद्रात्रिपूजायामष्टम्यभावेऽपि वा तन्मेव सन्धिपूजाम्यामष्टमीनवमीपूजाभ्यां तत्रय् । यत्तु—

'उपोष्यता द्वि[illegible] [illegible] देवं [illegible]'

इति उपवासपर [illegible] [illegible] उपनवम्यामेव,

लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता ॥" इति।

महाष्टमी पूर्वेद्युः पूर्वाह्णव्यापित्वे पूर्वाऽन्यथा परैवेति निर्णयदीपमतम्। एतच्च*तुच्छत्वादुपेक्ष्यम्। रूपनारायणधृते देवीपुराणे—

"सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् ॥"

यत्तु—

"सप्तम्यामुदिते सूर्ये*परतो याऽष्टमी भवेत्।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥"

इति विद्यारूपनिबन्धवचनं तदाश्विनकृष्णाष्टमीविषयम्।

"कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमीदिने।
नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः ॥"

इति देवीपुराणे तत्रापि*पूजोक्तेरिति हेमाद्रौ निर्णयामृते चोक्तम्। यानि तु—

*"भद्रायां भद्रकाल्याश्च मध्ये स्याद्दर्शनक्रिया।
तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः ॥" इति,

यच्च मोहचूलोत्तरे ग्रन्थे च—

*"आश्विनस्य सिताष्टम्यामर्धरात्रे तु पार्वती।
भद्रकाली समुत्पन्ना पूर्वाषाढासमायुता ॥" इति,

सम्भवात्।

*तुच्छत्वादिति। क्षययोगेऽप्यनादरवचनात्। *परत इति। 'हृदौ' इति शेषः। अत एव 'न कुर्यात्' इत्यादि। एतेनेदं परदिने दण्डाभावे सप्तमीविद्धाग्राह्यत्वार्थकमिति शङ्काऽपास्ता। *पूजोक्तेरिति। नवमीप्रबोधनात्पूजायां कृष्णपक्षाष्टम्याः पूर्वविद्धात्वस्य युक्तत्वात्। *भद्रायां सप्तम्याम्। *आश्विनस्येति। निशीथो जन्मकालः। स एव कर्मकाल इति सप्तमीयोगो·

तथा-

"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥" इति,

यच्च मदनरत्ने-

"महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्यापि युता कार्या मूलेन तु विशेषतः ॥" इति,

तानि परदिनेऽष्टम्यभावविषयाणीति मदनरत्न उक्तम् । यत्तु तत्रैव परदिनेऽष्टमीसत्त्वेऽपि पूर्वाविद्धाविधापरं वचनम्—

"यदाष्टमी तु संप्राप्य खस्तं याति दिवाकरः ।
तत्र दुर्गोत्सवं कुर्यांश्च कुर्यात्परेऽहनि ॥
दुर्भिक्षं तत्र जानीयान्नवम्यां यत्र पूज्यते ॥" इति,

तत् परदिने दशम्यां नवम्यभावविषयम् ।

'यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ।
तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप ॥"

इति तत्रैव स्मृतिसंग्रहोक्तेः

"उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिप ।
पूर्वाष्टमीं तदा कुर्यादन्यथा स्यदशुभं भवेत् ॥"

इति दुर्गोत्सवोक्तेश्चेति मदनरत्ने । वस्तुतस्तु [illegible] [illegible] दुर्गोत्सवप्रयोगविधानात् । [illegible] [illegible] 'नवमी च' इति चकारादष्टमी च । [illegible] इति

[illegible]
[illegible]
[illegible]
[illegible]

पक्षुवचनादष्टमी नवमी दशम्युक्ता । अन्यथाऽपूर्वोक्तविरोधादिति दिक् ।

यत्तु—

"अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् ।
सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिता ह्यहम् ॥"

इति देवीपुराणे, तद्विशिष्टिकरणमध्ये पूजाविधानार्थम् ।

"विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं न स्यात्तेनाहमवमानिता ॥"

इति तत्रैवोक्तेरिति निर्णयामृते । तथा कालिकापुराणे—

*"सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ।
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ॥" इति ।

बहुत्वं चिन्त्यम् । अष्टमीक्षये तात्पर्यात् । *पूर्वोक्तेति । 'सप्तमीशल्यसंविद्धा' इति प्रकृत्य—'यस्यां सूर्योदयो भवेत्' इत्युक्तेरित्यर्थः । तेनाष्टमीक्षये सप्तमीप्राप्तस्य भजनात् । दिगर्थस्तु—

"महाष्टम्याश्विने मासि षष्ठी कल्याणकारिणी ।
सप्तम्याऽपि पुजा कार्या मूलेन तु विशेषतः" ॥

इत्यपि अष्टमीक्षय एव सप्तमीविद्धाप्रशंसार्थम् । किन्तु मूलवैधिष्ट्यविधौ सप्तमीयुक्तत्वमपि शब्दस्वरूपार्थवादः 'देवदेवे तु नक्षत्रे' इति निषेधे विकल्पप्राप्तौ विशब्दवादिति ।

*विष्टीति । निर्णीताष्टम्यां शिष्टभागे पूजेत्यर्थः । *सप्तम्यामिति दिवापूजाभिप्रायम् । अयं च नवरात्रपक्षः । वस्तुतस्त्वयं षष्ठ्यादिपक्षः पत्रिकापूजापरत्वात् । सप्तम्यादिदिनत्रयदेवीपूजापरोऽपि—

'मही संपूजयेद्देवीं सप्तम्यादिदिनत्रयम् ।'

इति भविष्योत्तरे प्रोक्तः । अष्टमीनवम्योरेव वा देवी पूज्या ।

*अष्टम्युपवासश्च पुत्रवता न कार्यः ।

"उपवासं महाष्टम्यां पुत्रवान्न समाचरेत ।
यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेत ॥"

इति तत्रैवोक्तेः । रूपनारायणीये ब्राह्मे—

*"अत्यर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।

"अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम्(?) शिवाम् ।
पूजयित्वाऽऽश्विने मासि विशोको जायते नरः ॥"

इति वचनात् । केवलाष्टमीपूजोक्ता ब्राह्मे—

"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोऽर्थं यजनीया सा तस्मिन्नहनि मानवैः ।
उपोषितैर्धूपदीपैर्वस्त्रैर्माल्यानुलेपनैः ॥" इति ।

*अष्टम्युपवास इति । केवलाष्टम्युपवास इत्यर्थः । अन्यथा नवरात्रोपवास इत्यनेन विरोधात् सप्तम्यादिपक्षेष्वपि पूर्वापरदिनसमानव्रतानुरोधेनाष्टम्युपवासप्राप्तेश्च । केवलनवमीपूजा च भविष्ये—

"लब्धाभिषेका वरदा शुक्ले चाश्वयुजस्य च ।
तस्मात्सा तत्र संपूज्या नवम्यां चण्डिका बुधैः ॥" इति ।

*अत्यर्थमिति । अष्टम्यां तिथिसत्त्वे तदुत्तरायां तत्त्यागे, तदसत्त्वे शुद्धायाम् । दिवसे विशेषपूजाविधायकम् । अर्द्धरात्रेऽपि विशेषेण देवीपूजनं कार्यम् ।

"पुनः पूजा तथाऽष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥"

इति कालिकापुराणाच्च । राजा तु विजयकामोऽर्द्धरात्रे विशेषपूजापूर्वकं बलिं दद्यात्—

"अर्द्धरात्रविनीतेन विजयार्थं नृपोत्तमः ।

उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः ॥
पशुभिः पानकैर्भक्ष्ये रात्रौ जागरणेन च ।
*दुर्गागृहे च शस्त्राणि पूजितव्यानि पण्डितैः ॥
पात्रभाण्डानि चिह्नानि कवचान्यायुधानि च ॥"

अत्र *विशेषो हेमाद्रौ निर्णयामृते च भविष्ये—

"आश्वयुक्शुक्लपक्षस्य अष्टमी मूलसंयुता ।
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ॥
कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता ।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता ॥
नवम्यां पूजिता देवी ददात्यभिमतं फलम् ।
सा पुण्या सा पवित्रा च सा धन्या सुखदायिनी ॥
तस्यां सदा पूजनीया चामुण्डा मुण्डमालिनी ॥

(सदेत्युक्तेर्नित्यतापि ।)

तस्यां ये प्रपयुञ्जन्ते प्राणिनो महिषादयः ।
सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते ॥
यावच्च चालगेद्वाम्रं पशुस्तावन्न हन्यते ।
न तथा बलिदानेन पुष्पधूपविलेपनैः ॥
यथा संतुष्यते मेषैर्महिषैर्विन्ध्यवासिनी ।
एवं च विन्ध्यवासिन्या नवरात्रोपवासतः ॥
एकभुक्तेन नक्तेन स्वशक्त्यायाचितेन च ।
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥

पश्चान्दं लक्षणोपेतं गन्धधूपस्रगार्चितम् ॥
विधिवत्कालिकाकालीति जप्त्वा खड्गेन घातयेत् ॥"

इति देवीपुराणात् । पश्चान्दं माहिषमजं वा । अष्टम्यां होमो वक्ष्यते । *दुर्गागृहे इति । अष्टम्यामस्त्रादिपूजा । लोहाभिसारिकापूजा त्वन्यैव तस्याः प्रतिपदेवारम्भात् । *विशेषो दिवाद्-

गृहे गृहे भक्तिपरैर्ग्रामे ग्रामे वने वने ।
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥
वैश्यैः शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च मानवैः ।
स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु ॥
*जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
(१)लौहाभिसारिकं कर्म कारयेद्यावदष्टमी ॥" इति ।

लौहाभिसारिककर्मविधानं तत्रैवोक्तम् ।

"प्रागुदक्प्रवणे देशे पताकाभिरलंकृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं परम् ॥

(षोडशहस्तमित्यर्थः ।)

आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्याऽश्वत्थदलाभया ॥
राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्यत्राधिवासयेत् ॥
ततस्तु ब्राह्मणः स्नातः शुक्लाम्बरधरः शुचिः ।
ॐकारपूर्वकैर्मन्त्रैस्तल्लिङ्गैर्जुहुयाद्घृतम् ॥
शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ।

जानन्तरबलिदानरूपः । ब्राह्मणस्यात्रैवाधिकार इति वक्ष्यते । तेन ब्राह्मणेन माषभक्तादिबलिः कूष्माण्डादिबलिर्वा कार्य इति सन्तेऽव्यम् । अष्टमीकृत्यं दर्शयित्वा नवरात्रोपवासादीन्देवीपूजां च 'एवञ्च' इत्यादि 'शृणु' इत्यन्तेन स्मारयित्वा तत्र प्रतिपदाद्यष्टमीपर्यन्तं जयार्थिना राज्ञा लौहाभिसारिकाख्यं कर्म कार्यमित्याह—*जयाभिलाषीति । प्रतिपच्चामावास्यायुता निषिद्धा ।
"कुहूकाष्ठोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिम् ।
राज्यनाशाय सा प्रोक्ता निन्दिता पार्वपूजने" ॥

(१)'लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ।' इत्यमरः ।

हुतशेषं*तुरङ्गाणां राजानमुपहारयेत् ॥
लोहाभिसारिकं कर्म तेनैव कथितं स्मृतम् ।
धृतपल्ययनानश्वान् गजांश्च समलंकृतान् ॥
भ्रामयेन्नगरे नित्यं वन्दिघोषपुरःसरम् ।
प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ॥
पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ।
लोहाभिसरणाद्राज्ञो विजयः समुदाहृतः ॥
पूजामन्त्रान्प्रवक्ष्यामि पुराणोक्तानहं तव ।
यैः पूजिताः प्रयच्छन्ति कीर्तिमायुर्यशो बलम् ॥"

अथ मन्त्रा विष्णुधर्मोत्तरोक्ताः । छत्रस्य—

"यथा ऽम्बुदश्छादयति शिवायेमां वसुन्धराम् ।
तथाऽऽच्छादय राजानं विजयारोग्यवृद्धये ॥"

चामरस्य—

"शशाङ्ककरसंकाशक्षीरडिण्डीरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामरामरदुर्लभ ॥"

आयुधानां वृद्ध्यर्थं देवन्तपूजनमहं करिष्ये ।

इति वचनात् ।

*तुरङ्गाणामिति । हुतशेषदानं च श्रेष्ठे गजेऽपि—

'हुतशेषं प्रदातव्यमौपवाह्यनिके गजे ।'

इति वाक्यात् । तत्र प्रथमतः पूजको ब्राह्मणः प्रार्थयेत्—

यथा चन्द्रश्छादयति शिवायैतां वसुन्धराम् ।
तथाऽऽच्छादय राजानं विजयारोग्यवृद्धये ॥" इति ।

पूजा च षोडशोपचारा पदार्थाऽनुसमयेन काण्डाऽनुसमयेन वा सर्वत्र कार्या । तत्र छत्रादिमन्त्रैः छत्रादिदेवता आवाह्य गन्धादिपञ्चोपचारानन्तरं फलताम्बूलदक्षिणाभ्यां विसर्जनस्थाने च पुष्पाञ्जलिः कार्या । तत्रचामरमन्त्रेण चापबाणप्रभृत्यादिषु दद्यादिति ।

"सूर्यपुत्र महाबाहो छायाहृदयनन्दन ।
शान्तिं कुरु तुरङ्गाणां रेवन्ताय नमो नमः ॥"

अनेन मन्त्रेण पूजा । अथाश्वस्य—

"गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥
प्रभावाच्च हुताशस्य वर्धय त्वं तुरङ्गमान् ।
तेजसा चैव सूर्यस्य मुनीनां तपसा तथा ॥
रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ।
स्मर त्वं राजपुत्रं त्वं कौस्तुभं च मणिं स्मर ॥
यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा ।
भ्रूणहाऽनृतवादी च क्षत्रियश्च पराङ्मुखः ॥
सूर्याचन्द्रमसौ वायुर्यावत्पश्यन्ति दुष्कृतम् ।
व्रजाश्व तां गतिं क्षिप्रं तच्च पापं भवेत्तव ॥
निष्कृतो यदि गच्छेथा युद्धाध्वनि तुरङ्गम ।
रिपून्विजित्य समरे सह भर्त्रा सुखी भव ॥" इति ।

अथ ध्वजस्य—

"शाककेभो महावीर्य श्यामवर्णाब्धपाम्पहम् ।
पक्षिराज नमस्तेऽस्तु तथा नारायणध्वज ॥
काश्यपेयारुणभ्रातर्नागारे विष्णुवाहन ।
अप्रमेय दुराधर्ष रणे देवारिसूदन ॥
गरुत्मान्मारुतगतिस्त्वयि सन्निहितो यतः ।
(१)साश्ववर्मायुधान्योधान् रक्ष त्वं च रिपून्दह ॥"

अथ पताकायाः—

"कुलभुजगसमो रुद्रा वायुः सोमो महर्षयः ।
नागकिन्नरगन्धर्वयक्षभूतगणग्रहाः ॥
[illegible]
[illegible]

शक्रः सेनापतिः स्कन्दो वरुणश्चाश्विनावपि ॥
प्रदहन्तु रिपून्सर्वान्राजा विजयमृच्छतु ।
यानि प्रयुक्तान्यरिभिरायुधानि समन्ततः ॥
पतन्तूपरि शत्रूणां हतानि तव तेजसा ।
हिरण्यकशिपोर्युद्धे युद्धे दैवासुरे तथा ॥
कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने ।
शोभितासि तथैवाद्य शोभयास्मांश्च संस्मर ॥
नीलाञ्श्वेतानिमान्दृष्ट्वा नश्यन्त्वाशु नृपारयः ।
व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ॥
पूतना रेवती नाम्ना कालरात्रिश्च या स्मृता ।
दहन्त्वाशु रिपून्सर्वान्पताके त्वं मयार्थिता ॥"

अथ गजस्य—

"कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः ।
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः ।
मन्द्रो भद्रो मृगश्चैव गजः संकीर्ण एव च ।
वने वने प्रसूतास्ते *यूथानि सुमहान्ति च ।
पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ।
भर्तारं रक्ष नागेन्द्र स्वामिवत्प्रतिपाल्यताम् ॥
अवाप्नुहि जयं युद्धे गमने स्वस्ति वो व्रज ।
श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवोऽनिलात् ॥
स्थैर्यं गिरेर्जयं रुद्राद्यशो देवात्पुरंदरात् ।
युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ॥
अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा ॥" इति ।

---

*यूथानि सुमहान्ति चेति । 'स्वस्तो ते व्रजाय' इति पा

अथ खड्गमन्त्रः—

"असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च॥
एतानि तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः॥
रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्वदा॥
नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च॥
इयं येन धृता क्षोणी हतश्च महिषासुरः।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः॥"

अथ छुरिकायाः—

"सर्वायुधानां प्रथमं निर्मितासि पिनाकिना।
शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम्॥
चण्डिकायाः प्रदत्तासि सर्वदुष्टनिबर्हिणी।
तया विस्तारिता चासि देवानां प्रतिपादिता॥
सर्वसत्त्वाङ्गभूतासि सर्वाशुभनिबर्हिणी।
छुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते॥"

अथ कट्टारिकापूजा—

'रक्षाङ्गानि गजान् रक्ष रक्ष वाजिधनानि च।
मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते॥'

कट्टारको मध्यदेशे 'कटारी' इति प्रसिद्धः।

अथ धनुःपूजा —

"सर्वायुधमहामात्र सर्वदेवारिसूदन।
चाप मां सर्वतः रक्ष साकं शरवरैरिह॥
दृढं हस्तेन दक्षिणे संहाराय रिपोश्च।

सर्वामूर्त्तिगतं देवं धनुरस्त्र नमाम्यहम् ॥"

अथ कुन्तपूजा—

"प्रास पालय शत्रुंस्त्वमनया नाकमायया ।
गृहाण जीवितं तेषां मम सैन्यं च रक्षताम् ॥"

अथ चर्मपूजा—

"दानवदत्तं समरे चर्म सैन्यं यशोऽस्य मे ।
रक्ष मां रक्षणीयोऽहं तापनेय नमोऽस्तु ते ॥"

अथ कनकदण्डमन्त्रः—

"निस्सारणाय दुष्टानां साधुसंरक्षणाय च ।
ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये ॥
यशो देहि सुखं देहि जयदो भव भूपतेः ।
ताडयस्व रिपून्सर्वान्हेमदण्ड नमोऽस्तु ते ॥"

अथ दुन्दुभिमन्त्रः—

"दुन्दुभे त्वं सपत्नानां घोरो हृदयकम्पनः ।
भव भूमिपसैन्यानां तथा विजयवर्धनः ॥
यथा जीमूतघोषेण हृष्यन्ति च बर्हिणः ।
तथास्तु तव शब्देन हर्षोऽस्माकं मुदावहः ॥
यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ।
तथात्र तव शब्देन त्रस्यन्त्वस्मद्द्विषो रणे ॥"

अथ शङ्खमन्त्रः—

"पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो नित्यमतःशान्तिप्रदो भव ॥"

अथ सिंहासनमन्त्रः—

"विजयो जयदो जेता रिपुघाती शुभङ्करः ।

पाठः । हृदयवर्धनः हृदयच्छेदनः, हृदयकम्पनइति वा पाठः । वि-जयवर्धनः विना ? । पुण्यशङ्खानां शङ्खपुण्यानामिति वा पाठः ।

दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशनः ॥
एते वै संनिधौ यस्मात्तव सिंहा महाबलाः ।
तेन सिंहासनेति त्वं देवैर्मन्त्रैश्च गीयसे ॥
त्वयि स्थितः शिवः शान्तस्त्वयि शक्रः सुरेश्वरः ।
नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः॥
त्रैलोक्यजयसर्वस्व सिंहासन नमोऽस्तु ते ।
तथैव कर्मचिह्नानि स्वानि पूज्यानि शिल्पिभिः॥
लौहाभिसारिकं कर्म कृत्वैवं *मन्त्रपूर्वकम् ।
*नित्यं कृत्वा तथाष्टम्यां पूर्वाह्णे स्नानमाचरेत्॥
कुङ्कुमचन्दनचम्पकचतुःसमैः *शैलपिष्टैश्च ।
चर्चितगात्रीं देवीं कुसुमैरभ्यर्चयेद्बहुभिः ॥

"महेन्द्रनिर्मिते दिव्ये देवराजादिसेविते ।
शिबिके पाहि मां नित्यं सदा त्वं सन्निधौ भव ॥"

इति शिबिकाम् । दोलयोर्मन्त्रः क्वचिन्न दृश्यते ।

*मन्त्रपूर्वकमिति ।

'जयं प्राप्नोति नृपतिस्सर्वान्कामान्समश्नुते ।' इति ।

उत्तरार्धेन तदन्वयः । 'अत्यर्थं यजनीया सा' इत्युक्तम् । तत्राष्टमीकृत्यं विशेषतस्त्रिकालदिवापूजाहोमबलिदानानि, रात्रिपूजा निशीथपूजा बलिदानानि सन्धिपूजा चेति । तत्र विशेषेण त्रिकालपूजा प्रोक्तप्रायैव । तत्र पूर्वाह्णपूजायां स्नानविशेषादिकमाह—*नित्यं कृत्वेति । स्नानं देव्याः । चतुःसमं गारुडे—

"कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैकः शशिनः स्याच्चतुःसमम् ॥

शशी कर्पूरः ।

कर्पूरं चन्दनं दर्पं कुङ्कुमं च समांशकम् ।
सर्वगन्धमिति प्रोक्तं समस्तसुरवल्लभम् ॥"

कुसुमैः सपत्रपुष्पैः सधूपदीपैः सनैवेद्यैः ।
मांसर्पल्युपहारैर्मङ्गलशब्दैः समुच्छलितैः ॥
विहितच्छत्रैर्यानैः स्यन्दनासितशस्त्रधारिजनलोकैः ।
तुष्टैः पञ्चरत्नादि तु निवेद्यते सर्वमेव भगवत्यै ॥
दुर्गा सा पूजनीया च तद्दिने द्रोणपुष्पकैः ।
ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धये ॥
इच्छेत विजयं राज्यं सुभिक्षं चात्मने नृपः ।
पुनः पुनः प्रणम्यार्यां संस्मरन्हृदयं शिवाम् ॥
सर्वं कृत्वेति कौरव्य*अष्टम्यां जागरं निशि ।
नटनर्तकगीतैश्च कारयेच्च महोत्सवम् ॥
एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणोदये ।
घातयेन्महिषान्मेषानमतो नतकुञ्जरान् ॥
शतमर्धशतं वापि तदर्धं वा यथेच्छया ।
सुरासवभृतैः कुम्भैस्तर्पयेत्परमेश्वरीम् ॥
कापालिकेभ्यस्तद्देयं दासीदासजने तथा ।
ततोऽपराह्णसमये नवम्यां वै रथे स्थिताम् ॥
भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा सशब्दवान् ।

दर्पः=कस्तूरी।*शैलं शैलेयम्।साऽस्मान्पेति कुत इत्यत्राह-*सुरेशान्या इति।

यतस्तस्याः सुरेशान्या अग्रेऽयं साधको रुद्र इत्यन्वयः। अत-मानेन तु तमेव नाशयेत् इति भावः। प्रसिद्धश्च श्रीमद्भागवते जडभरतबलिदानार्थं महतानां शूद्राणामेव नाशो देवीकृतः। एतद्दिवाकृत्यं सायंपूजान्तम्। निशीथकृत्यमाह-*अष्टम्यामिति।

"पुनः पूजा तथाऽष्टम्यां विशेषेण समाचरेत्।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि॥"

इति कालिकापुराणसम्वादात्। पुनः सायंपूजानन्तरं

कञ्चुकोपोपितो वीरो*विघूर्णोऽन्येन खड्गवान्
भूतेभ्यस्तु बलिं दद्यान्मन्त्रेणानेन सामिषम् ।
सरक्तं सजलं चान्नं गन्धपुष्पाक्षतैर्युतम् ॥
श्रीं त्रीन्वारान्समूलेन दिग्विदिक्षु किरेद्बलिम् ॥'

मन्त्रश्च—'बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥
असुरा यातुधानाश्च पिशाचोरगराक्षसाः ।
डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥
जृम्भकाः सिद्धगन्धर्वा (१)माला विद्याधरा नगाः
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥
जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥' इति

इति महाष्टमी ।

महानवमी तु पूर्वयुता ग्राह्या । पूर्वोक्तवचनात् । 'नवमी दुर्गानवमी श्रावणी' इति दीपिकोक्तेः ।

'श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'

इति हेमाद्रौ पाद्मोक्तेश्च । भविष्येऽपि—

*आश्वयुक्शुक्लपक्षे तु अष्टमीमूलसंयुता ।

स्वयमपि वक्ष्यति—अष्टमीयागे भवत्येवेत्यादिना । तत्र विप्रपार्थ निषेधवाक्यमुक्तः । सुरामद्यौ ब्राह्मणस्य निषिद्ध इति भावः । *विघूर्णोऽन्येनेति ।

उत्तराङ्गैः सन्नयसाधनाय महानवम्यां पूजाबलिदानं होमं चेत्येवं कृत्यम्, तत्र पूजाप्रशंसने—*आश्वयुगिति । अष्टमीमूला०वा

१—'माला विद्याधराः' इति पाठः ।

सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा ॥' इति मूलमुपलक्षणम् ।

'दुर्गापूजासु नवमी *मूलाद्यृक्षत्रयान्विता ।
महती कीर्तिता तस्यां दुर्गा महिषमर्दिनी ॥'

इति मदनरत्ने लैङ्गात् । अत्र पूजयेदित्यग्रे शेषः । यानि तु—'सा (१)कार्योदयगामिन्याम्' इत्यादि प्रागुक्तानि तानि नवमीविद्धातिथिपराणि । नवम्यां विशेषोक्तेः । वेधश्च मुहूर्तत्रयेणैव ज्ञेयः । यद्यपि हेमाद्रिमते मुहूर्तद्वयात्मकोऽपि वेधोऽस्ति, तथापि सूर्योदय एव सः । सायं तु त्रिमुहूर्त एव । तदुक्तं दीपिकायाम्—'त्रिमुहूर्तगा तु सकला सायम्' इति । माधवोऽपि—

'सायं तूत्तरया तद्वन्न्यूनया न तु विध्यते ।' इति ।

तेन त्रिमुहूर्तयोगे पूर्वा नवमी, पूर्वोक्तवचनात्

'न कुर्यान्नवमीं तात दशम्यां तु कदाचन ।'

इति स्कान्दे परानिषेधाच्च । त्रिमुहूर्तयोगाभावे तु निषिद्धाऽपि परैव कार्येति *निष्कर्षः ।

संयुता नवमीत्यर्थः । *मूलादीति । आदिना पूर्वाषाढापरिग्रहः ।

"पूर्वयाऽषाढया वाऽपि ऋक्षद्वययुताऽथ वा" ।

इति वचनात् ।

"मूलाभावे तु कर्तव्या अष्टमी नोपसंयुता ।
विश्वयुक्ताऽपि कर्तव्या अष्टमी नवमीयुता ॥"

इत्युत्तराषाढावाक्यं त्वनर्थकम् ।

"मूलेन पूजयेद्देवीं तथा सलिलदैवते ।
वैश्वदेवे तु नक्षत्रे पूजिता दुःखदा भवेत् ॥"

इति वचनात् । *निष्कर्ष इति । पूर्वविद्धायां नवम्यां

१—पक्षद्वये—'तिथावुदयगामिन्याम्' इत्यधिकः क्वचित्पाठः ।

*यत्तु—

'नवम्यां च जपं होमं समाप्य श्रवणेऽपि वा।'

इति संग्रहोक्तेः,

'व्रतं च जागरश्चैव नवम्यां विधिवद्बलिः।'

इति देवीपुराणाच्च नवम्यां होमबल्यादि विहितं, तत्र—

'आश्वयुक्शुक्लनवमी मुहूर्तं वा कला यदि।
सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजपार्थिभिः॥'

इति सौरपुराणात्,

'सूर्योदये परं रिक्ता पूर्णा स्यादपरा यदि।
बलिदानं प्रकर्तव्यं तत्र देशे शुभावहम्॥
बलिदाने कृतेऽष्टम्यां पुत्रभङ्गो भवेन्नृप॥'

इति मदनरत्ने देवीपुराणाच्च*बल्यादौ परा कार्या। उपवासादौ तु पूर्वेति मदनरत्ने उक्तम्। प्रतापमार्तण्डेऽ

पूजाहोमादि कृत्वा नवम्यां प्रभूतबलिदानं कार्यम्।

'प्रभूतबलिदानं च नवम्यां विधिवच्चरेत्।'

इति कालिकापुराणात्। यदा तु नवमी अष्टमीविद्धा भूत्वा द्वितीयदिने कियती वर्धते तदा नवमीप्रयुक्तस्य पूजादेः पूर्वदिनेऽनुष्ठानेऽपि महाबलिदानमात्रं द्वितीयदिने कार्यमित्याह—*पश्चिमस्यादिना। आद्ये समाप्येत्युक्त्या द्वितीये व्रतजागरोपरं वक्ष्यमाणश्लोक्या च सन्देहः।

*बल्यादाविति [illegible] पूर्वेद्युरेवोक्तेः, तथाऽपि [illegible] तेन ग्राह्यः।

"अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत्।
प्रभाते बलिदाने तु कियन्मात्रापि लभ्यते॥

ष्येवम् । ❁यत्तु—

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद् ध्रुवम् ।'

इति कालिकापुराणे, तत्संधिपूजापरम् ।

'अष्टमीनवमीसन्धौ❁तृतीया त्वत्तु कथ्यते ।'

इति तत्रैव तदुक्तेः । कामरूपनिबन्धे—

❁'अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च ।
तत्र या क्रियते पूजा विज्ञेया सा महाफला ॥'

अष्टमीमात्रे❁भवत्येव ।

'आश्विने पूजयित्वा तु अर्धरात्रेऽष्टमीषु च ।
घातयन्ति❁पशून्भक्त्या ते भवन्ति महाफलाः ॥'

तथा—

'कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्धे तु महाविभवविस्तरैः ॥'

तथा—

'पशुघातश्च कर्तव्यो गवयाजवधस्तथा ।'

नवम्यां तत्र सम्पूज्या दुर्गा दुर्गार्तिनाशिनी ।"

(इति) प्रातर्नवम्यां बलवर्धपूजाविधानात् परेद्युर्नवमी, द्व्यधावे तु पूर्वेद्युर्नवमीमध्य एव बल्यादि कार्यम् ।

"दशम्यां बलिदानन्तु दीयते यत्र मानवैः ।
तद्राष्ट्रं नाशमायाति पापकोपद्रवैः सदा ॥"

इति युद्धदशम्यां नवमीयुक्तबलिदानकरणे दोषोक्तेः । ❁यत्त्विति । अष्टमीयुक्तबलिदानस्य तत्रैव कर्तव्यत्वादनर्थकत्वम् । ❁तृतीयेति । सायंपूजा प्रथमा निशीथपूजा द्वितीया सन्धिपूजा तृतीयेत्यर्थः । सन्धिपूजाविधिमाह—❁अष्टम्या इति । ❁भवत्येवेति । बलिदानमित्यादि । ❁पशूनिति । यदुकुलाचाराभिप्रायं कार्यं वा । राज्ञा तु महाविभवन्दःकुलपरा-

इति रूपनारायणीये देवीपुराणात्। तत्रैव भविष्ये–

*'तस्मादियं महापुण्या नवमी पापनाशिनी।
उपोष्या *सुप्रयत्नेन सततं सर्वपार्थिवैः॥'

निर्णयदीपे तु महानवमी परदिनेऽपराह्णव्यापित्वे परा, अन्यथा पूर्वा।

'आवर्तनात्पूर्वकाले नवमी स्यात्परेऽहनि।
दुर्गार्चा तत्र पूर्वेद्युः पूर्वाह्णे त्वष्टमी यदि॥'

इति धौम्यवचनादित्युक्तम्। अस्य तु शारदानवमीविषयत्वं समूलत्वं च विमृश्यम्। यानि तु–

'नन्दायां ज्वलते *वह्निः पूर्णायां *पशुघातनम्।
*भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यति॥' इति,
'नवम्यामपराह्णे तु बलिदानं प्रशस्यते।
दशमीं वर्जयेत्तत्र नात्र कार्या विचारणा॥' इति,
'नन्दायां दर्शने *रक्षा बलिदानं दशासु च।
भद्रायां गोकुलक्रीडा देशनाशाय जायते॥'

इति ब्रह्मवैवर्तनारदादिवचनानि, तानि*शुद्धाधिकनिषेधपराणि-इति मदनरत्ने। तथा कालिकापुराणे–

'नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि।
जपं होमं च विधिवत्कुर्यात्तत्र विभूतये॥'

केचित्तु–

'पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम्।'

इति पूर्वोक्तदेवीपुराणादष्टम्यां होममाहुः। अन्ये तु शिष्टव्यवहारादष्टम्यामारभ्य नवम्यां समापनमेव कुर्यादित्याहुः।

*तस्मादिति। *सुप्रयत्नेनेति। पदभ्याद्यैर्निरतिः। *वह्निः होमः। *पशुघातनं बलिदानम्। *भद्रायाम् द्वादश्यादितीयायाम्। *रक्षा रक्षाबन्धनम्।

न्ति। *समुच्चयस्तु युक्तः। रुद्रयामले तु विकल्प उक्तः, तत्तु निर्मूलम्। दुर्गाभक्तितरङ्गिण्यादिगौडग्रन्थेष्वपि नवम्यां होम उक्तः।

*होमे च विशेष उक्तो डामरतन्त्रे—

'पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम्।
होमयेद्विधिवद्भक्त्या दशांशेन नृपोत्तम॥
*रुद्राध्याये यथा होमं मन्त्रेणैकेन साधयेत्।
तथा*स्तोत्रजपे होमं श्लोकेनैकेन साधयेत्॥

---

*तुल्याधिकेति। नन्दापूर्णाभद्रान्यतमेति शेषः। *समुच्चयस्त्विति। वस्तुतस्तु यद्यपि

'जपहोमसमायुक्तः कन्यकां भोजयेन्मुदा।'

इति वचनात् प्रत्यहं होमः प्रतीयते तथापि अष्टम्यामेव नवम्यामेव वा कार्यः। 'तत्राष्टम्यां भद्रकालि' इत्युपक्रम्य 'होमैर्ब्राह्मणतर्पणैः' इति ग्रासे अष्टमीकृत्यमध्ये पाठात् नवमीकृत्यमध्ये—'नवम्यां बलिदानं च' इति कालिकापुराणाच्च। अथ वा—

'पूर्वाषाढायुताऽष्टम्यां पूजाहोमाद्युपोषणम्'।

इत्यष्टम्याम्

'नवम्यां बलिदानं च कर्तव्यं वै यथाविधि।
जपं होमं च विधिवत्' इति नवम्यां च विधानाच्चया शिष्टाचाराच्चाष्टम्यामारभ्य नवम्यां समापनीयः। होमद्रव्यं च तिलाऽपादि।

'पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः।'

इति देवीपुराणात्। होमश्च गुरूपदिष्टमन्त्रेण सप्तशतीमन्त्रेण जयन्तीमन्त्रेण इति मन्त्रत्रयम्। तत्राद्यमभिप्रेत्याह—*होमे चेति। कात्यायनीतन्त्रोक्तमार्गेणाद्यं होम इति मान्त्रिकाः। द्वितीयमभिप्रेत्याह—*रुद्राध्याय इति। रुद्राध्याये मन्त्रविभागो बौधायनाद्युक्तः, अत्र तु कात्यायनीतन्त्रोक्तः। *स्तोत्रज-

यथा सप्तशतीं जप्य होममन्त्रो नवाक्षरः।"
*'ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इति नवाक्षर इति केचित्। *पूजोक्तो ग्राह्य इति तु युक्तम्। रुद्रयामलेऽपि
*'प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा।
किंशुकैः सर्षपैः पुगैर्लाजादूर्वाङ्कुरैरपि॥
यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा।
रक्तचन्दनखण्डैश्च गुग्गुलैश्च मनोहरैः॥
*प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात्।
*नवाक्षरेण वा हुत्वा नमो देव्या इतीति च॥' इति

पे इति। सप्तशतीस्तोत्रजपे इत्यर्थः। तृतीयं वक्ष्यति। सप्तशतीपक्षान्तरं सप्तशतीपाठे आद्यन्तजप्यो यो नवाक्षरस्तावन्मात्र एव होममन्त्र इत्यर्थः। स च—
"ऐं बीजमादीन्दुसमानदीप्ति ह्रीं सूर्यतेजोद्युतिमद्द्वितीयम्।
क्लीं मूर्तिवैश्वानरतुल्यरूपं तृतीयमानन्त्यसुखाय चिन्त्यम्॥
चा शुद्धजाम्बूनदकान्तितुर्यं मु पञ्चमं रक्ततरं प्रकल्प्यम्।
ण्डा षष्ठमुग्रार्तिहरं सुनीलं यै सप्तमं कृष्णतरं रिपुघ्नम्॥
वि पाण्डुरं स्वष्टममादिसिद्धं च्चे धूम्रवर्णं नवमं विशालम्॥"
इति डामरतन्त्रोक्त एवेति मतमाह-*ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति। *पूजोक्त इति।
'कथितं पूजनाध्याये तद्वद्धोमो भवेदसौ'।
इति वचनात्। *प्रधानेत्यादि सप्तशतीस्तोत्रहोमपरम्। *प्रतिश्लोकं प्रतिमन्त्रं च कात्यायनीतन्त्रे तन्मन्त्रविभागो नागोजीभट्टप्रकाशितो ग्राह्यः। तेन दशांशहोमः प्रत्यहमेकपाठे अन्ते एकाहुतिर्होमः प्रत्यहमेकैकपाठाहुतिवृद्धौ चोह्यम्। *नवाक्षरेण सप्तशतीस्तोत्रपूर्वोत्तरस्थानजप्तनवाक्षरेण।
"नमो देव्यै महादेव्यै शिवायै सततं नमः।

*रहस्ये तु—

'प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा।'

इत्युक्तम्। *दुर्गाभक्तितरङ्गिण्यां तु *तिलैर्जयन्तीमन्त्रेण च होम उक्तः।

'पुरश्चरणकार्ये तु बिल्वपत्रयुतैस्तिलैः।'

इति कालिकापुराणाद्बिल्वपत्रैश्चेति स्मार्ताः; तन्न। अन्यत्र मानाभावात्॥

अथ बलिदानम्। तत्राश्वमेधच्छागमाहिषनरमांसानामुत्तरोत्तरमाधिक्यं फलविशेषश्चान्यतोऽवसेय इति दिक्। बलिप्रकारस्तु देवीपुराणे—

'कन्यासंस्थे रवौ शक्र शुक्लाष्टम्यां प्रपूज्य तु।
द्रोणपुष्पैश्च बिल्वाम्रजातीपुन्नागचम्पकैः॥

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥"

*रहस्ये इत्यादि। तिलसर्पिषोरुपादानं स्वतन्त्रोक्तद्रव्यादेरुपलक्षणं तदावश्यकत्वार्थं वा। तृतीयमाह—*दुर्गाभक्तीति। *तिलैरिति। तिलाज्यादिभिरित्यर्थः।

'पूजयेत्तिलहोमैश्च हविःक्षीरपूपादिभिः।'

इति देवीपुराणात्। मन्त्रश्च जयन्तीत्यादिः।

'अनेनैव तु मन्त्रेण जपहोमादि कारयेत्।'

इति देवीपुराणात्। होमद्रव्यमानन्तु सिद्धान्तशेखरे—

'होमद्रव्यप्रमाणानि वक्ष्यन्तेऽथ यथाक्रमम्।
कर्षप्रमाणमाज्यं स्यान्मधु क्षीरं च तत्समम्॥
तण्डुलानां शुक्तिमात्रं पायसं प्रसृतेः समम्।
कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः॥
अन्नं ग्राससमं च स्याच्छाकं ग्रासार्धसम्मितम्।
मूलानान्तु त्रिभागः स्यात्कन्दानामष्टमोऽशकः॥

इक्षुः पर्वमयाणं स्यादङ्गुलद्वितयं लता ।
प्रादेशमात्राः समिधो व्रीहीणां मञ्जरीसमाः ॥
तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः ।
पत्रपुष्पफलानान्तु समानाहुतिरिष्यते ॥
चन्द्रश्रीखण्डकस्तूरीकुङ्कुमागरुकर्दमाः ।
हरिमन्थसमाः प्रोक्ता गुग्गुलुर्बदरीसमः ॥
आहूतीनामिदं मानं कथितं वेदवेदिभिः ॥" इति ।

हरिमन्थःचणकः । मृगीमुद्रालक्षणमनुपदं वक्ष्यामः । गारुडे-

"कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा । -
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ॥" इति ।

पदार्थादर्शे—

"घृतस्य कार्षिको होमः क्षीरस्य मधुनस्तथा ।
शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्य तु ॥
खण्डत्रयन्तु मूलानां फलानां स्वप्रमाणतः ।
ग्रासमात्रन्तु होतव्या इतरेषां च तण्डुलाः ॥
अक्षतास्तु यवाः प्रोक्ता अभावे व्रीहयः स्मृताः ।
तदभावे तु गोधूमा न तु खण्डिततण्डुलाः ॥
सर्वप्रमाणमाहुत्या पञ्चाङ्गुलगृहीतया ।
कर्पमात्राणि भक्ष्याणि खाद्यानां खण्डपञ्चकम् ॥
चन्द्रचन्दनकाश्मीरकस्तूरीयक्षकर्दमान् ।
फलापरिमितानेतान् गुग्गुलं बदरास्थिवत् ॥
द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः ।
स्रुवपूर्णा द्रवा प्रोक्ताः कठिना ग्रासमात्रकाः ।
व्रीहयो यवगोधूमप्रियङ्गुतिलशालयः ।
स्वरूपेणैव होतव्या इतरेषां च तण्डुलाः ।
होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च सूकरी ।
मुद्राहीनस्तु यद्धोमस्तत्सर्वं निष्फलं भवेत् ॥

शूकरी सर्वाङ्गुलयो हंसी मुक्तकनिष्ठिका ।
मृगी कनिष्ठानन्या मुद्रात्रयमुदाहृतम् ॥
आभिचारिकहोमे च शूकरी कल्पते बुधैः ।
पक्षे शान्तिककल्याणे मृगी हंसी प्रकीर्त्तिते ॥
स्यात् त्रिमुद्रा मृगी मुद्रा होमे सर्वफलप्रदा ।" इति ।

शारदायाम्—

"अथात्र होमद्रव्याणां प्रमाणमभिधीयते ।
कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥
उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः ।
तत्समं मधु दुग्धान्नमक्षमात्रमुदाहृतम् ।
दधि प्रसृतिमात्रं स्यात् लाजाः स्युर्मुष्टिसम्मिताः ।
पृथुकास्तत्प्रमाणाः स्युः सक्तवोऽपि तथोदिताः ।
गुडं पलार्द्धमानं स्यात्शर्कराऽपि तथा स्मृता ।
ग्रासार्द्धं पायसमानं स्यादिक्षुः पर्वावधिः स्मृतः ॥
एकैकं पत्रपुष्पादि तथा पूपादि कल्पयेत् ।
कदलीफलनारङ्गफलान्येकैकशो विदुः ।
मातुलुङ्गं चतुःखण्डं पनसं दशधा स्मृतम् ॥
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः ।
त्रिधा कृतं फलं बैल्वं कपित्थं खण्डितं द्विधा ।
उर्वारुकफलं होमे चोदितं खण्डितं त्रिधा ॥
फलान्यन्यान्यखण्डानि समिधः स्युर्दशाङ्गुलाः ।
दूर्वात्रयं समुद्दिष्टं गुडूची चतुरङ्गुला ॥
व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि ।
तण्डुलास्तु तदर्द्धांशाः कोद्रवा मुष्टिसम्मिताः ।
गोधूमा रक्तकलमा निर्दिष्टा मुष्टिमानतः ॥
तिलाश्चुलुकमात्राः स्युः सर्षपास्तत्प्रमाणतः ।
शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः ।

*पश्चात्तं लक्षणोपेतं गन्धपुष्पसमन्वितम् ।
विधिवत्कालि कालीति जप्त्वा खड्गेन घातयेत् ।
('ॐ कालि कालि वज्रेश्वरि लोहदण्डायै नमः' ।
मन्त्रः ।)

तदुत्थरुधिरं मांसं गृहीत्वा पूतनादिषु ।
(आदिशब्दाचरकीविदारीपापराक्षस्यः ।)
नैर्ऋतेभ्यः प्रदातव्यं महाकौशिकमन्त्रितम् ॥'
मन्त्रस्तु वक्ष्यते । तथा—

*'तस्याग्रतो नृपः स्नायात्कृत्वा शत्रुं तु पैष्टिकम्
खड्गेन घातयित्वा तु दद्यात्स्कन्दविशाखयोः ॥'
अशक्तौ *ब्राह्मणेन च कूष्माण्डादिभिर्बलिदानं कार्यम् । तदुक्तं कालिकापुराणे-

---

पुरं पदरमानं स्याद्रामठं तत्सम स्मृतम् ॥
(पुरम् गुग्गुलुः ।)
चन्दनागरुकर्पूरकस्तूरीकुङ्कुमानि च ।
तिन्तिणीबीजमानानि समुद्दिष्टानि देशिकैः ॥
वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः ।
षयानमाज्यहोमेषु नियकर्त्रं कोपवस्तुषु ॥' इति ।
"उत्तमोऽरणिजो वह्निर्मध्यमः सूर्यकान्तजः ।
उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहाद् द्विजः ॥"
इति च प्रयोगरत्ने ।

*पश्चात्तं महिषजं मेषं वा । *तस्याग्रतो नृप इति । अत्र बलिदानानन्तरं तद्रक्तं सर्वाङ्गे लेपयित्वा अशक्तौ तिलकादिकं कृत्वा स्नानं कार्यमित्येके । अन्ये तु शत्रुरेव इति भावनया स्नानमिच्छन्ति । *ब्राह्मणेन चेति । यद्यपि अग्नीषोमीयपशु- धर्म्यं तथापि तत् क्षत्रियादिविषयम् ।

'कूष्माण्डमिक्षुदण्डं चऽमांसं सारघमेव च।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा॥'

रुद्रयामलेऽपि—

'छागाभावे तु कूष्माण्डं श्रीफलं वा मनोहरम्।
वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना॥'

तथा—

'ब्राह्मणेन सदा देयं कूष्माण्डं बलिकर्मणि।
श्रीफलं वा सुराधीशा छेदं नैव तु कारयेत्।'
(छेदे विकल्पः।)
अमापाद्येन बलिर्देयो ब्राह्मणेन विजानता।'

कालिकापुराणे—

ब्राह्मणस्य तु—

'सात्त्विकी जपहोमाद्यैर्नैवेद्यैश्च निरामिषैः।'

इति वचनात् सात्त्विकपूजायामधिकारात् श्रीमद्भगवद्गीतादिषु ब्राह्मणस्य सात्त्विकस्यैवाधिकारात्। एवं सुरया स्वगात्ररुधिरेण च पूजाऽपि न ब्राह्मणस्य।

'मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते।
स्वगात्ररुधिरं दत्त्वा ब्रह्महत्यामवाप्नुयात्।''

इति कालिकापुराण एव निषेधात्। मयूखे तु—

पशुबली राज्ञैव देयः "विजयार्थं नृपोत्तम" इति वचनादित्युक्तम्। अमासं सारघमेव चेति। 'मद्यमांसरसैश्च च' इति पाठः। तत्र सारघं मधुम्। मद्यं मांसं च ब्राह्मणस्य वर्ज्यम्।

'राजसी बलिदानाद्यैर्नैवेद्यैः सामिषैस्तथा।'

इति मांसबलिदानादे राजसत्वोक्तेर्ब्राह्मणनिषेधाच्च। अमापाद्येनेति।

'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः।'

*'उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ॥
निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥
'पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तु ते ॥
*यज्ञार्थे बलयः सृष्टाः स्वयमेव स्वयंभुवा ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ॥'
ऐंह्रींश्रीमिति मन्त्रेण तं बलिं मत्स्वरूपिणम् ।
चिन्तयित्वा न्यसेत्पुष्पं मूर्ध्नि तस्य तु*भैरव ॥
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ।
ह्रींह्रींखड्गेतिमन्त्रेण ध्यात्वा खड्गं च पूजयेत् ॥
पूजयित्वा ततः खड्गं ॐ हुंफडिति मन्त्रकैः ।
गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमम् ॥
*ॐह्रींऐंह्रींकौशिकीति रुधिरेणाप्यायतामिति ।

इति कोपान्माषभक्तेनेत्यर्थः । कुल्माषभक्तो बलक्षणम् ।

'माषं कुल्माषमांसाद्यैर्देयो दिक्षु बलिर्निशि ।'

इति कालिकापुराणात् । बलिदानप्रकारमाह-*उत्तरेति *यज्ञार्थे पशव इति । *घातयामि घातयिष्यामि क्वचिदयं पाठः । *भैरवेति ।

'अभिषिच्य बलिं पश्चात्करवालं तु पूजयेत् ।'

इति बोध्यम् । आँ क्रीं फडिति वा पाठः । छेदनमन्त्रमाह-*ॐमित्यादि आप्यायतामित्यन्तम् । रुधिरं च स्थाने पात्यम् ।

'स्थाने नियोजयेद्रक्तं शिरसश्च प्रदीपकम् ।'

इति वचनात् । राजा स्वश्वपीडाशान्तये नवम्यां रेवन्तपूजां कुर्यात् । रेवन्तश्च वडवारूपायां छायायां सूर्यादुत्पन्नोऽश्वगणाधि-

बलिदाने तु दुर्गायाः सर्वथायं विधिः स्मृतः ॥'
मत्स्यसूक्ते—
*'नवम्यां *पूर्ववत्पूजा कर्तव्या भूतिमिच्छता ।
दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेत् ॥'
अथात्र प्रसङ्गाच्छतचण्डीविधानमुच्यते । रुद्रयामले—
'शतचण्डीविधानं च प्रोच्यमानं शृणुष्व तत् ।
सर्वोपद्रवनाशार्थं शतचण्डीं समारभेत् ॥

पतिः । पूजामन्त्रः शालिहोत्रे—
"नमो देवाधिदेवाय तुरङ्गबलधारिणे ।
सूर्यपुत्राय देवाय तुरङ्गसहिताय च ॥
तुरङ्गपरिपालस्य नृगजोपरि धावति ।
साऽश्वमध्याधिपं त्वय स तूर्णं त्वां प्रजाम्यहम् ॥
मन्त्रेणानेन रेवन्तं पाद्यार्घ्यैरर्चयेत्सुधीः ॥" इति ।
ततः—
'सूर्यपुत्र महाबाहो च्छायाहृदयनन्दन ।
शान्तिं कुरु तुरङ्गाणां रेवन्ताय नमो नमः ॥"
इति मन्त्रेण प्रार्थयेत् । एवं नवम्यां होमादि कृत्वाऽनन्तरं स्तु-
(कु)त्यमाह—*नवम्यामिति । *पूर्ववत्पूजेति । कुमारीपूजा
इत्यर्थः । अत्र ब्राह्मणपूर्वकं ब्राह्मणभोजनादि द्रष्टव्यम् ।
"अभोजयित्वा विप्राग्र्यानसम्पूज्य च तानपि ।
अदत्त्वा दक्षिणां तेभ्यो भूयसीं चापि पापकृत् ॥
यो मां पूजयते दुष्टः स मां द्वेष्टि नराधमः ।"
इति वचनात्
'गजाश्वशय्यावस्त्रादि दद्याद्धर्मादि वा पुनः ।'
इति वचनात् 'व्रतान्ते विप्रभोजनम्' इति वचनात्
'तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ।'

*षोडशस्तम्भसंयुक्तं मण्डपं पल्लवोज्ज्वलम् ।
वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिभागतः ॥
पक्वेष्टकचितां रम्यामुच्छ्राये हस्तसंमिताम् ।
पञ्चवर्णरजोभिश्च कुर्यान्मण्डलकं शुभम् ॥
पञ्चवर्णवितानं च किङ्किणीजालमण्डितम् ।
आचार्येण समं विप्रान्वरयेद्दश सुव्रतान् ॥
ईशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिना चरेत् ।
वारुण्यां च प्रकर्तव्यं कुण्डं लक्षणलक्षितम् ॥
मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ।
तदर्धेन तदर्धेन तदर्धेन महामते ॥
*अष्टादशभुजां देवीं कुर्याद्वाऽष्टकरामपि ।

इत्यग्रिमवचनाद्विप्रभोजनदानादेरावश्यकत्वाच्च तत आचार्याय दक्षिणादि दद्यादित्यर्थः ।

*षोडशेति । सर्वग्रन्थमतेन षोडशमहादानेषु रुद्रे तथा-
"वापीकूपतडागपूजनविधौ स्यान्मण्डपोक्तो विधि-
र्वेदाद्यादिसमस्तकुण्डसहितो देवप्रतिष्ठाविधौ ।
आरामोत्सवलक्षहोमविधिषु मोक्षश्च चण्डीद्वये "
इत्यभियुक्तसिद्धान्तात्कुण्डमण्डपौ द्वावश्यकः । तत्र च—
"पूर्वमेव विभक्तव्याः स्वस्वकुण्डेऽग्नयो बुधैः ।
तथा स्विष्टकृदाद्यन्ते समारोप्य समित्सु च ।
मुख्याग्नौ मेलनं कार्यमिति वह्निविनिर्णयः ॥ इति च ।
*अष्टादशभुजा यथा—
'आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् ।
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ।
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ।

पट्टकूलयुगच्छन्नां देवीं मध्ये निधापयेत् ॥
देवीं संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः ।
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् ॥
चण्डीं सप्तशतीं मध्ये संपुटोऽयमुदाहृतः ।
एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम् ॥
रूपाणि क्रमशस्तत्र पूजनादिकमाचरेत् ।
पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधानतः ॥
गुडूचीं पायसं दूर्वां तिलान्शुक्लान्यवानपि ।
चण्डीपाठस्य होमं तु प्रतिश्लोकं दशांशतः ॥
होमं कुर्याद्गृहादिभ्यः समिदाज्यचरून्क्रमात् ।
हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो *दक्षिणां क्रमात् ॥
कपिलां गां नीलमणिं यथेताश्वं छत्रचामरे ।
अभिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः ॥
अलङ्कृत्य नानाभिरायुधैः कमलाननाम् ।
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥" इति ।

*अष्टभुजा यथा—

"दक्षे चाष्टभुजा बाणमुसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥" इति ।

अत्र—

"खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिधृत् ।
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधत् ॥"

इति दशभुजा च नोक्ता । स्फुरद्दशनदंष्ट्राया भीमरूपत्वा-तुरा तस्या अयुक्तत्वात् । *प्रतिश्लोकमिति । श्लोको दन्त-दन्तद्विभागो नामोऽभिहोक्तः । *दक्षिणामिति ।

एवंकृतेऽमरेशान सर्वसिद्धिः प्रजायते ॥'

अथ सहस्रचण्डी। सा च तत्रैवोक्ता–

'सहस्रचण्डीं विधिवच्छृणु विष्णो महामते।
राजध्वंसे महोत्पाते जनमारे महाभये ॥
गजमारेऽश्वमारे च परचक्रभये तथा।
इत्यादिविविधे दुःखे क्षयरोगादिजे भये ॥
सहस्रचण्डिकापाठं कुर्याद्वा कारयेत्तथा।
जापकास्तु शतं प्रोक्ता विंशद्धस्तश्च मण्डपः ॥
भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणां दिशेत्।
गुरवे त्रिगुणं देयं धान्यादानं तथैव च ॥
ससधान्यं च भूदानं श्वेताश्वं च मनोहरम्।
पञ्चनिष्कमिता मूर्तिः कर्तव्या चार्थमानतः।
अष्टादशभुजा देवी सर्वायुधविभूषिता ॥
आचारितार्थं दातव्यं सहस्रं प्रत्यहं प्रभो।
यातं वा नियताहारः पयःपानेन वर्तयेत् ॥
एवं चण्डिकापाठं सहस्रं तु समाचरेत्।
तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणा ॥'

इति, एतद्द्वयं यद्यपि महानिबन्धेषु नास्ति तथापि प्रचरद्रूपत्वाल्लिखितमिति दिक्।

वाराहीतन्त्रे—

'संकटे समनुप्राप्ते दुर्भिक्षे कलहभये तथा।

"दशार्णाविमुनाज्वगी भावायांश गुर्वान्विताः।
चतुर्विशतिसत्वार्कैश्चणगणाचकैः सह ॥
एकैकं स्व विश्वो दशार्णाविमुनं तथा।
निरङ्कराजमध्यमुन्नो वध्याच्छूत्रभूषितम् ॥"
इति भट्टवृत्तिः। [illegible]

आतिशेषो कुलोच्छेदेऽप्यायुषो नाश आगते ॥
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवोपपातके ॥
कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभम् ।
श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथापरा ॥
मनसा चिन्तितं देवि सिद्धयेदष्टोत्तराच्छतात् ।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात् ।
यथाऽश्वमेधः क्रतुराट् तद्वद्देवः सुरैः स्मृतः ॥
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥'

इति शतचण्डीसहस्रचण्डीविधिः ॥

अथ नवरात्रपारणानिर्णयः। *सा च दशम्यां कार्या।
*'आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥
त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥'
इति हेमाद्रौ धौम्यवचनात् ।

*'नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।'
इति प्रागुक्तवचनैर्नवमीपर्यन्तं प्रधानभूतपूजायुक्तोपवासादिधाद्यरूपेण तत्पर्यन्तत्वादाद्विशाब्देनोपवासोक्तेः *पूर्वोक्तत्रिरात्रव्रतं नवम्या अभ्युपोष्यत्वाच्च ।

*सा चेति । विसर्जनं दशम्यां संपूज्य प्रेषणं कुर्वीत । 'दशम्यां द्वारदोःसर्गः' इत्युक्तभविष्यात् पारणस्य नियमत्यागरूपस्य विसर्जनोत्तरकालत्वात्तदपि विसर्जनोत्तरं दशम्यामेव कार्यमित्यर्थः । तत्र नियमं नवमीपर्यन्तं दर्शयति—*आश्विने इति । यावच्छब्दो न मर्यादार्थः किन्त्वभिविध्यर्थः । अत एवाह—*नवमीति । परिशब्दोऽनर्थकः, नवमीतिथ्यन्तमित्यर्थः । नन्वङ्गभूत उपवासो नवम्यां न कार्य इत्यत आह—*पूर्वोक्तेति । त्रिरा-

अत्र च पारणान्तत्वेन त्रिरात्रत्वम् । विष्णुत्रिरात्रादौ तथा प्रसक्तेः । अत्र चात्रोपवासे मानाभाव इति वाच्यम् ।

'एवं च विन्ध्यवासिन्या नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥'

इति हेमाद्रौ भविष्योक्तेः, *नवरात्रसमाप्तौ नवम्या अप्युपोष्यत्वाच्च । ननु तिथिह्रासेऽष्टावेवोपवासाः सम्पद्यन्ते कथं समाप्तिः । तेन कर्मविशेषे नवरात्रशब्दो रूढः । अत एवोक्तं देवीपुराणे—

'तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ।'

इति चेन्न । तिथिह्रासेऽपि नवतिथीनामुपोष्यत्वा[illegible]कालात्मत्वाद्वाऽऽनेः । एतेन रात्रीणां प्राधान्यात् तुर्यं [illegible]मात्राद् नवत्वमिति गूर्जरिकाः परास्ताः । अत एव देवीपुराणे—

'कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम् ।
अयाची [illegible] नक्ताशी अथवाऽम्बुभुक् ॥'

इति वचनमुपपन्नम्, नक्तादीनामितिकर्तव्यताम् ।
मत्स्ये—

[illegible]

'जयाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात् ।
लौहाभिसारिकं कर्म कारयेद्यावदष्टमी ॥'

इति भविष्येऽष्टमीपर्यन्तमेवोक्तेः । रूपनारायणेन तु नन्दादिव्रतप्रयोगं पृथगेवोक्त्वा तस्य नवम्यां पारणमुक्तम् । यदपि निर्णयदीपे—

'आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः ।
नवम्यां पारणं कुर्याद्दशमीमिश्रिता न चेत् ॥
दशमीमिश्रिता यत्र पारणं नवमी भवेत् ।
दुःखदारिद्र्यदा ज्ञेया तथा व्रतविनाशिनी ॥'

इति ब्राह्मनाम्ना लिखितं वचनम्, यच्च रुद्रयामले इति वदन्ति—

'अष्टम्यां मम कार्या स्यान्नवमी पारणादिने ।
यो मोहाद्दशमीवेधे नवम्यां पारणकं चरेत् ॥
पारणं च प्रकुर्वीत तस्य पुण्यं निरर्थकम् ।
नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति ॥
दशम्यां पारिता देवी कुलनाशं करोति वै ।
तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिप ॥'

इत्यादीनि, तानि यदि समूलानि तदा लौहाभिसारिकनन्दादिव्रतचतुष्टयविषयाणि । तस्याऽष्टमीपर्यन्तमेवोक्तेरित्युक्तं प्राक् । अन्यथा महाष्टम्यां परविद्धायां पारणाविधाने पूर्वनिषेधैर्विरोधो दुर्वारः स्यात् । यानि तु कैश्चिल्लिखितानि नवम्यां पारणाविधायकानि वचनानि तानि हेमाद्र्यादिविरुद्धत्वान्निर्मूलानि । समूलत्वेऽपि यदाऽदिनद्वये नवमी, तदाऽद्वितीयदिन उपोष्य

प्राप्नोति । अविरोध इति । अष्टमीविद्धायां नवम्यामष्टम्युपवासविधानादिति भावः । अदिनद्वये नवमीति । अष्टमीविद्धा नवमी

तिथ्यन्ते पारणा न, किन्तु*नवमीमध्ये कार्येत्येवं नेयानि शिवरात्रिपारणावत् ।

अत्र केचित्पारणादे सूतकादिप्राप्तौ तदतिक्रम्य पारणां कुर्यादित्याहुः । तन्मन्दम् ।

'काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥
इति माधवीये कौर्मोक्तेः ।

त्रिमुहूर्ता परेद्युश्च नवमीत्यर्थः । *द्वितीयेति । दशमीमिश्रिता न चेदित्यनेन उत्तरनवम्यां नवम्यन्ते प्राप्तायाः पारणाया बाधस्यैवोक्तेरिति भावः । *नवमीति । 'नवम्यां पारणं कुर्यात्' इत्येवोक्तेः । वस्तुतस्तु अष्टरात्रादिपक्षा अपि वर्तन्ते ।

"अथवा नवरात्रं च सप्तमं च त्रिकादि वा ।
एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात् ॥"

इति धौम्यवचने आदिपदेनाष्टरात्रद्विरात्रैकरात्रपक्षोपग्रहात् । तत्राष्टरात्रं भविष्ये—

"प्रथमा द्वितीया तृतीया च चतुर्थी च नराधिप ।
एतास्तु एकभक्तेन प्रवदन्ति मनीषिणः ॥
(नेया इति शेषः ।)
पञ्चमी च तथा षष्ठी सप्तमी चाष्टमीषु च ।
उपवासपरो भूत्वा पूजयेत् चण्डिकां बुधः ॥"

प्रथमादिचतुष्टये ऽप्युपवासादिविकल्पितो धौम्यवचनात् । सप्तरात्रपक्षो रुद्रयामले—

"दुर्गोत्सवे स्मृतं देव उपवासस्य सप्तकम् ।
अष्टमे दिवसे विप्रस्ततः किंचित्तु भक्षयेत् ॥" इति ।

पञ्चरात्रपक्षो भविष्ये—

"एकभक्तस्तु पञ्चम्यां षष्ठ्यां नक्तं प्रवर्तयेत् ।

'प्रतपश्चविवाहेषु श्राद्धे होमेऽर्चने जपे ।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥'

इति विष्णुवचनात्काशौचमध्येऽपि तत्कर्तव्यतावगतेः । पारणान्तस्वादुत्सवस्य । प्रारम्भस्तु तेनैवोक्तः—
'प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥' इति ।
रुद्रयामलेऽपि—
'सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ॥' इति ।
तदन्तेऽसूतकान्ते । एवं स्त्रीभिरपिऽरजोदर्शनमध्ये क-

अयाचितं तु सप्तम्यामष्टम्यां समुपोषितः ॥
नवम्यां पारणं कुर्यादित्येवं पञ्चरात्रकम् ॥"

इति द्वैतनिर्णये विस्तरः । तथा चाष्टरात्रादिपक्षाभिप्रायेण नवमीपारणविधिः सार्थकः । किं च येषां द्वितीयायुक्तप्रतिपदि घटस्थापनं तद्दिनप्रारम्भेव जपपूजाद्युपवासश्च नवमीपूर्वदिनपर्यन्तमिति कुलाचारस्तेषां नवम्यां पूजाहोमब्राह्मणभोजनादि कृत्वा पारणं भवत्येव कुलाचारादिति ।

ऽव्रतस्येति । व्रतशब्देन पारणाया अपि ग्रहणमिति भावः । ऽसूतकान्त इति । ब्राह्मणभोजनं भूयस्यादिदानं च सूतकान्ते इत्यर्थः । रामचन्द्रभट्टास्तु—'नवरात्रे होमस्य पूजारूपत्वेन प्रधानत्वात् तस्य चानन्यसाध्यत्वेनाशौचे ऽसम्भवात् 'न तु दानार्चनजपम्'इति निषेधावसरप्राप्तिं विना च नियमरूपोपवाससमाप्त्यसम्भवादाशौचान्ते होमादि कृत्वा पारणं कुर्यात् । यैस्तु होमो न क्रियते तेषां सूतकादिमध्ये पारणं भवत्येवेत्याहुः । ऽरज इति । पूजा त्वन्येन कार्या ।

तैव्यमेव पारणम् ।

'संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम् ।'

इति माधवीये ऋष्यशृङ्गवचनात् । द्वादशीव्रतमित्युपलक्षणम् ।

*'प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ॥'

इति तत्रैव सत्यव्रतवचनात् । किंच एकादश्यादौ (१)पञ्चपाशौचपाते मासान्ते पारणापत्तिः, मासोपवासान्ते पञ्चपौशाचपाते जीवनासंभवश्च । यत्तु-

'नियमस्था यदा नारी प्रपश्येदन्तरा रजः ।
उपोष्यैव तु ता रात्रीः स्नात्वा शेषं चरेद् व्रतम् ॥'

इत्यङ्गिरोवचनम्, यच्च हारीतवचनम्-

'नियमस्थव्रतस्था स्त्री रजः पश्येत्कथंचन ।
त्रिरात्रं तु क्षिपेदूर्ध्वं व्रतशेषं समापयेत् ॥'

तद्विषयोपवासविषयम् । तासां तत्र भोजननिषेधादिति केचित् । वयं तु प्रागुक्तसत्यव्रतवचने दीर्घतपसामिति विशेषणोपादानात् द्वादशीव्यतिरिक्तसकलकाद्युपवासविषयोऽप निषेधः । त्रिरात्रनवरात्रादिदीर्घव्रतेषु तु रजोमध्ये पारणेति ब्रूमः। आशौचमध्ये तु सर्वापि पारणा भवति प्रागुक्तकौर्मवचनादिति सिद्धम् । अर्धयोपवासपारणानिर्णयः सर्वव्रतेषु बोद्धव्य इत्यलं भूयसा ॥

दशम्यां देवीं विसर्जयेत् । तदुक्तं दुर्गाभक्तितरङ्गिण्यां देवीपुराणे-

'अन्तरा तु रजोयोगे पूजामन्येन कारयेत् ।'

इत्युक्तमात्रस्यात् । अत्रारब्धेति । यद्यपीदं दीर्घत्वा-

(१) पञ्चशावं पङ्वारं वाऽशौचपातो इत्यर्थः ।

'ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् ।
संप्रेषणं तु कर्तव्यं गीतवादित्रनिःस्वनैः ॥
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥
इति *संप्रार्थ्य देवीं तु तत उत्थापयेद्बुधः ।
उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च ॥
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ॥
व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह ॥'

इति उत्थाप्य जलं नीत्वा—

'दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
संवत्सरे व्यतीते तु पुनरागमनाय वै ॥
इमां पूजां मया देवि यथाशक्त्योपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्थानमनुत्तमम् ॥'

१अथाविमासोपवासायेकपक्षोऽनियमं तथाऽपि यथादिव्यपेक्षम-
ध्यासेन फलसाधनेष्वपि भारत्येषु योजयितुं शक्यमिति
भावः । रजःपदमाशौचोपलक्षणम् । केचिदित्यरुचिः । निषेधस्य
रागप्राप्तगोचरत्वेन वैधपारणगोचरत्वाभावात् । विवक्षाया श्रोतव-
निषेधादर्शनाच्चेति । तत इत्युपलक्षणम् ।

'ततः संप्रेषणं कुर्याद्दशम्यां शाबरोत्सवैः ।'

इत्यपि द्रष्टव्यम् । शाबरोत्सवाः मागुकाः । एवं पूजां विधाय प्रणम्य 'दुर्गां शिवां शान्तिकरीम्' इति पूर्वोक्तं स्तोत्रं पठेत् ।

*संप्रार्थ्येति ।

'विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।

इति जले*प्रवाहयेत् ।

इयमेव विजयादशमी । सा च द्वितीयदिने श्रवणाभावे पूर्वा ग्राह्या । तदुक्तं हेमाद्रौ स्कान्दे—

'दशम्यां तु नरैः सम्यक् पूजनीयाऽपराजिता ।
ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः ॥
या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ॥
नवमीशेषयुक्तायां दशम्यामपराजिता ।
ददाति विजयं देवी पूजिता जयवर्धिनी ॥'

तथा—

'आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः ।
एकादश्यां न कुर्वीत पूजनं चाऽऽपराजितम् ॥' इति ।

यदा तु पूर्वदिने श्रवणयोगाभावः, परदिने चाल्पाऽपि तद्योगिनी, तदा परैव । तथा च हेमाद्रौ व्रतकाण्डे कश्यपः—

'उदये दशमी किंचि*त्संपूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ॥
श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः ॥' इति ।

काले अपराह्णे । परदिनेऽपराह्णे श्रवणाभावे तु सर्वप-

पूर्णं भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरि ॥"

इति निगमय्य क्षमस्वेत्युक्त्वा एकं पुष्पमीशान्याम् 'ॐ दुर्गायै नमः' इति निक्षिपेच्च । *प्रवाहयेदिति । ततो गृहमागत्य ब्राह्मणैः शान्तिकलशोदकेनाभिषिक्तो यजमानो दुर्गापूजाप्रतिष्ठासिद्ध्यर्थं ब्राह्मणेभ्यो दक्षिणां दत्त्वा ब्राह्मणान् भोजयित्वा बन्धुभिः सह भुञ्जीतेति प्रयोगशेषो बोध्यः ।

*सम्पूर्णैकादशी यदीति कर्मकाले दशम्यनादरार्थम् ।

क्षेपु पूर्वैव । मदनरत्नेऽप्येवम् । ज्योतिर्निबन्धे रत्नकोशे च नारदः—

*'ईषत्संध्यामतिक्रान्तः किंचिदुन्निद्रतारकः ।
विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः ॥
इषस्य दशमीं शुक्लां पूर्वविद्धां न कारयेत् ।
श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने ॥
सूर्योदये यदा राजन्दृश्यते दशमी तिथिः ।
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः ॥'

*अत्रायं निर्गलितोऽर्थः-अपराह्णो मुख्यःकर्मकालः, तत्रैव पूजाद्युक्तेः । प्रदोषो गौणः । तत्र दिनद्वयेऽपराह्णव्याप्तित्वे पूर्वा । प्रदोषव्याप्तेराधिक्यात् । दिनद्वये प्रदोषव्याप्तित्वे परा । अपराह्णव्याप्तेराधिक्यात् । श्रवणस्तु (१)रोहिणीवद्यप्रयोजकः । दिनद्वयेऽपराह्णास्पर्शे तु पूर्वा । तत्रापि परदिनेऽपराह्णे श्रवणसत्त्वे परैवेति दिक् ।

इदानीं मतान्तरमवतारयितुं प्रदीपरूपं कालान्तरमाह—*ईषदिति । *अत्रायमिति । इदं पुनरिह विचारणीयम्-दशमी शमीपूजायां रात्रौ नक्षत्रोदयव्यापिनी, 'ईषत्संध्यामतिक्रान्तः' इति वचनात्

"आश्विनस्य सिते पक्षे दशम्यां तारकोदये ।
स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धये ॥"

इति चिन्तामणावुक्तेश्च । दिनद्वये तद्व्याप्तौ पूर्वैव । 'या पूर्णा नवमीयुक्ता' इति वचनात्

"दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नरः ।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ॥"

---

(१) रोहिणीवदिति यथा जन्माष्टमीनिर्णये रोहिणी अप्रयोजिकातद्वदित्यर्थः ।

अत्र विशेषो भार्गवार्चनदीपिकायां भविष्ये
'शमीयुक्तं जगन्नाथं भक्तानामभयंकरम् ।
अर्चयित्वा शमीवृक्षमर्चयेच्च ततः पुनः ॥'
शमीमन्त्रस्तु हेमाद्रौ गोपथब्राह्मणे—
'अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥'
तथा भविष्ये—
'शमी शमयते पापं शमी लोहितकण्टका ।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणयात्रायां यथाकालं सुखं मया ।
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति ॥
ततो भूषणवस्त्रादि धारयेत्स्वजनैः सह ॥' इति ।

इति एकादश्यां यात्रानिषेधाच्च । दिनद्वये तारकोदयकालाभावे एकादशे मुहूर्ते परदिने यात्रा कार्या ।
"आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु ।
सायंकाले शुभा यात्रा दिवा विजयलक्षणः ॥
एकादशो यो मुहूर्तो विजयः परिकीर्तितः ।
तस्मिन्सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः ॥"
इति भृगूक्तेः । परदिने एकादशमुहूर्तेऽप्राप्यमाणेऽपि श्रवणयोग मनरैव यात्रा कार्या । 'श्रवणर्क्षे तु पूर्णायाम्' इति वाक्यादिति । तस्माद्ग्रन्थो मतान्तरपर इति दिक् ।
* अर्चयेदिति । शमी ऐशानीगता ।
"शमीं सकृष्णपीतां वा शुक्लां वा नीलपिङ्गलाम् ।
संप्राप्य तां च संपूज्य स्त्रीणां सुभगो भवेत् ॥"

इति भविष्यात् । शमीरहितदेशे तु अश्मन्तकं पूजयेत् समाचारात् ।

"अश्मन्तक महावृक्ष महादोषनिवारण ।
इष्टानां दर्शनं देहि शत्रूणां च विनाशन ॥"

इति प्रार्थयेत् । राजा तु विजयकामो विजयमुहूर्ते प्रस्थानं कृत्वा अपराजितापूजां कुर्यात् । प्रस्थानं तु प्रास्थानिकविधिं कृत्वा कार्यम् । प्रास्थानिकविधिश्च गोपथब्राह्मणे विवाहवृद्धिप्रयोक्तः । स यथा—जन्येषु गमिष्यत्सु पार्थिवा वानस्पत्यदुन्दुभयः स्युः, वीणाद्युपवादयेरन्, हृष्टाश्वालंकृताश्चारुरदनाः केशश्मश्रुलोमनखानि वापयित्वा सम्भारानुपकल्प्य मैत्रं मुहूर्तमुपसमाधाय शान्तिमतिसरं कारयित्वा वासो गन्धान् स्रजश्चाबध्य पुरःस्थातारं स्थापयित्वा कर्ताऽन्वारभ्य जुहोति—अभयैः, अपराजितैः, आयुष्यैः, स्वस्त्ययनैः, शर्मवर्मभिः, जनवेदनैश्च हुत्वा 'पार्थिवस्य' इति 'माद्गाय' इति च हुत्वा 'आगच्छतागस्य' इतीन्द्रं स्थालीपाकेनेष्ट्वा 'आतिष्ठ जिष्णुः' 'अनृक्षरा ऋजवः सन्तु पन्था' इति पन्थानमास्थाय जपेत् । इषौ पादौ "यत इन्द्र" "प्रातरमिन्द्र" "यावित्समभयं" "सोमो बृहस्पतिर्नः परिपातु पश्चात्" इति त्रीन् विष्णुक्रमान् क्रान्त्वेति प्रस्थानम् । यथा—

"अलंकृतो भूषितभृत्यवर्गः परिष्कृतो-तुङ्गतुरङ्गनागः ।
वादित्रनादप्रतिनादिताशः सुमङ्गलाचारपरम्पराशीः ॥
राजा निर्गत्य भवनात्पुरोहितपुरोगमः ।
प्रास्थानिकविधिं कृत्वा प्रतिष्ठेत्पूर्वतो दिशि ॥
गत्वा नगरसीमान्तं वास्तुपूजां समारभेत् ।
संपूज्य चाष्ट दिक्पालान् पूजयेत्पथि देवताः ॥
मन्त्रैर्वैदिकपौराणैः पूजयेच्च शमीतरुम् ।
अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ॥
दुःस्वप्नशमनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ।
ततः कृताशीः पूर्वस्यां दिशि विष्णुक्रमान् क्रमेत् ॥

रिपोः प्रतिकृतिं कृत्वा ध्यात्वा च मनसा च नृप ।
शरेण स्वर्णपुङ्खेन विध्येद् हृदयमर्मणि ॥
दशाविजयमन्त्राश्च पाठितव्याः पुरोधसा ।
एवमेव विधिं कुर्याद्दक्षिणादिदिशास्वपि ॥
पूज्यान् द्विजांश्च सम्पूज्य सांवत्सरपुरोहितौ ।
गजवाजिपदातीनां मेषाकौतुकमाचरेत् ॥
जयमङ्गलशब्देन ततः स्वभवनं विशेत् ।
नीराज्यमानः पुण्याभिर्गणिकाभिः सुमङ्गलम् ॥
य एवं कुरुते राजा वर्षे वर्षे सुमङ्गलम् ।
आयुरारोग्यमैश्वर्यं विजयं च स गच्छति ॥
नाधयो व्याधयस्तस्य भवन्ति न पराजयः ।
श्रियं पुण्यमवाप्नोति विजयं च सदा भुवि ॥" इति ।

ततोऽपराजितां पूजयेत् । सा यथा—आश्विनशुक्लदशम्यां क्षेमसिद्ध्यर्थं यात्रायां विजयसिद्ध्यर्थं चाऽपराजितापूजामहं करिष्ये इति सङ्कल्प्य चन्दनादिना लिखिताऽष्टदलमध्ये 'अपराजितायै नमः' इत्यपराजितां तद्दक्षिणतः 'ॐक्रियाशक्त्यै नमः' इति जयां तद्वामतः 'ॐउमायै नमः' इति विजयां प्रतिष्ठाप्य ॐअपराजितायै ॐजयायै ॐविजयायै इत्यावाहनाद्युपचारैः सम्पूज्य प्रणम्य—

"चारुणा मुखपद्मेन विचित्रकनकोज्ज्वला ।
जयादेवी शिवे भक्त्या सर्वान्कामान्ददातु मे ॥
काञ्चनेन विचित्रेण केयूरेण विभूषिता ।
जयप्रदा महाभागा शिवभावितचेतसा ॥
विजया च महाभागा ददातु विजयं मम ।
हारेण सुविचित्रेण भास्वत्कनकमेखला ॥
अपराजिता रुद्ररता करोतु विजयं मम ॥"

इति प्रार्थ्य हरिद्रारक्तवस्त्रे दूर्वायुक्तसिद्धार्थान् प्रदक्षिणं वलयाकारेणाऽऽबध्य—

अत्रैव पार्थिवनीराजनमुक्तं कृत्यरत्ने। तत्र मन्त्रः—
'चतुरङ्गबलं मह्यं निरारिष्टं व्रजाश्विह्।
सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरि॥' इति।
गौडनिबन्धे ज्योतिषे—
'कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम्।
शोभनं खञ्जनं पश्येज्जलगोगोष्ठसंनिधौ॥'

"महाऽपराजिते यस्मात्त्वं लताभूषणा स्मृता।
सर्वकामार्थसिद्ध्यर्थं तस्मात्त्वां धारयाम्यहम्॥
भवापराजिता देवी मम सर्वसमृद्धये।
पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम्॥"
इति तद्वलयमभिमन्त्र्य—
"जयदे वरदे देवि दशम्यामपराजिते।
धारयामि भुजे दक्षे जयलाभाभिवृद्धये॥
चक्रपाणेरिह मयि च मम शत्रौ पराजयम्।
त्वद्धारणाज्जयेयुर्मे धनधान्यसमृद्धयः॥"
इति मन्त्रेण दक्षिणबाहौ धृत्वा—
"इमां पूजां मया देवि यथाशक्त्या निवेदिताम्।
रक्षार्थन्तु समादाय व्रज स्वस्थानमुत्तमम्॥"
इति विसर्जयेत्। सर्वे च जनास्तस्यामपराह्णे ग्रामसीमामुल्लङ्घ्य अपराजितां पूजयेयुः। तदुक्तं ग्रन्थ एव 'दशम्यां च जनैः सम्यक्' इत्यादि। खञ्जनमिति। तत्र मन्त्रश्चिन्तितवचे—
"नीलग्रीव शुभग्रीव सर्वकामफलप्रद।
पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते॥"
वसन्तराजे—
त्वं योगयुक्तो मुनिपुत्रकस्त्वं संदृश्यवामेपि शिखोद्गमेन।
संदृश्यसे प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्य नमो नमस्ते॥"

*अस्य फलानि शुभाशुभदेशाश्च तत्रैव ज्ञेयाः ।
आश्विनपौर्णमासी*परा ग्राह्या ।

'सावित्रीव्रतमन्तरेण भवतोऽमापौर्णमास्यौ परे' ।

इति दीपिकोक्तेः । अत्र विशेषस्तिथितत्त्वे लैङ्गे—

'आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्या लोकैर्विभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सद्वेष*अक्षैर्जागरणं चरेत् ॥'

*अस्येति । तद्दर्शनफलं तिथितत्त्वे—

"अब्जेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः, कुशलदः शुचिशाद्वलेषु ।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति यदुपः खलु खञ्जरीटः ॥"

किं च—

"चित्तं ब्रह्मणि, कार्यसिद्धिरतुला शक्रे, हुताशे भयं,
याम्यामग्निभयं सुरद्विषि कलहोऽभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं, दिव्याङ्गना चोत्तरे
पैशाच्यां मरणं ध्रुवं निगदितं द्विग्लक्षणं खञ्जने ॥"

*परेति । कोजागरव्रते पूर्णिमा प्रदोषनिशीथोभयव्यापिनी । यदा पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिस्तदा परेद्युः कार्या पूजाऽङ्गप्रधानकालव्याप्तिसत्त्वात् । यदा पूर्वेद्युर्निशीथव्याप्तिः परेद्युश्च न प्रदोषव्याप्तिस्तदा पूर्वा ।

सफलार्थमिति शेषः। न चेदं पठनीयम्। अनाम्नातेष्वमन्त्रत्वमिति वाक्यात्। कूष्माण्डस्तु स्त्रिया न च्छेद्यः।

"दीपप्रशमनं पुंसः कूष्माण्डच्छेदनं स्त्रियः।
अचिरेणैव कालेन तस्य वंशक्षयो भवेत्॥"

इति दोषश्रवणात्। विष्णुत्रिरात्रमिति पाठः। तुलस्यपि सौवर्णी इति केचित्।

*नरैरिति। सर्वेषामधिकारः।

"ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः।
प्राप्नोति वैष्णवं स्थानं तत्कृत्वा भीष्मपञ्चकम्॥
ब्रह्मघ्नो मद्यपःस्तेयी गुरुतल्पी सदाऽनृती।
मुच्यते पातकान्मर्त्यः कृत्वेदं भीष्मपञ्चकम्॥"

कार्तिकस्यामले पक्षे*स्नात्वा सम्यग् यतव्रतः ॥
एकादश्यां तु गृह्णीयाद्व्रतं पञ्चदिनात्मकम् ॥' इति । तद्विधिस्तु गोमयेन स्नात्वा मौनी पञ्चामृतैः पञ्चगव्यैर्विष्णुं संस्नाप्य*संपूज्य पायसं निवेद्य द्वादशाक्षरमष्टोत्तरशतं जप्त्वा-'ॐ नमो विष्णवे' इति षडक्षरेण घृताक्तान्यवान्व्रीहींश्चाष्टोत्तरशतं हुत्वा भूमौ स्वपेत् । ए-

---

इत्युक्तेः । *स्नात्वेति प्रातःस्नानादिनित्यकृत्योपलक्षणम् । अत्र-
'व्रती स्नात्वा विधानेन मध्याह्ने च तथा पुनः ।'
इति वचनाद्व्रताङ्गं प्रातर्मध्याह्ने च मृद्गोमयाभ्यां स्नानमावश्यकम् । नद्यां गोमयेन स्नात्वेति ग्रन्थोप्येतत्परः । गोमयपदं मृदोप्युपलक्षणम् । ततो देवर्षिपितृतर्पणं कार्यम् ।
'यवव्रीहितिलैः सम्यक् पितॄंसन्तर्पयेत्क्रमात् ।'
इति वाक्याद् यवाद्युक्त्या देवर्षिलाभः । *संपूज्येति । पूजा चोक्ता नारदीये—

"स्नापयेत्परया भक्त्या गन्धचन्दनवारिणा ।
चन्दनेन सुगन्धेन कुंकुमेनाथ केशवम् ॥
कर्पूरोशीरमिश्रेण लेपयेद्गरुडध्वजम् ।
अर्चयेदुचितैः पुष्पैर्गन्धधूपसमन्वितैः ॥
गुग्गुलं घृतसंयुक्तं दद्देदक्षयमक्तिमान् ।
दीपकन्तु दिवा रात्रौ दद्यात्पञ्चदिनानि तु ॥
नैवेद्यं देवदेवस्य परमान्नं निवेदयेत् ।
(परमान्नं हविष्यान्नं पायसं वा ।)
एवमभ्यर्च्य देवेशं स्तुत्वा चैव प्रणम्य च ॥
द्वादशाक्षरमन्त्रं च जपेदष्टोत्तरं शतम् ।
('ॐनमो भगवते वासुदेवाय इति द्वादशाक्षरमन्त्रः ।)
जुहुयात्तु घृताभ्यक्तं तिलव्रीहियवं व्रती ॥

चं पञ्चदिनेषु कुर्यात् । विशेषस्त्वाऽग्नेयेऽह्नि हरेः पादौ कमलैः सम्पूज्य प्रिशोमयं प्राशयम्, द्वितीयेऽह्नि बिल्वपत्रैर्जानुनी संपूज्य गोमूत्रम्, त्रयोदश्यां भृङ्गराजेन नाभिं संपूज्य क्षीरम्, चतुर्दश्यां करवीरैः स्कन्धं संपूज्य दधि, पौर्णमास्यां होमान्ते सौवर्णीं पापप्रतिमां लङ्गखड्गकां कृष्णवस्त्रेण वेष्टितां प्रस्थतिलोपरिस्थां कृत्वा धर्मराजनामभिः करवीरैः संपूज्य—

'यदन्यजन्मनि कृतमिह जन्मनि वा पुनः ।
तत्सर्वं प्रशमं यातु मत्पापं तव पूजनात् ॥'

इति पुष्पाञ्जलिं क्षिप्त्वा कृष्णप्रतिमां च संपूज्य विप्राय दत्त्वा विप्रान्संभोज्य दक्षिणां दत्त्वा पञ्चगव्यं प्राश्य पौर्णमास्यां नक्तं भुञ्जीतेति लघुनारदीये । पञ्चग-

---

षडक्षरेण होमस्तु स्वाहाकारान्वितेन च ।"
'ॐ नमो विष्णवे' इति षडक्षरः । ग्रन्थे च तिलहोमोऽपि बोध्यः ।
*आग्नेयेऽह्नीति ।

"प्रथमेऽह्नि हरेः पादौ पूजयेत्कमलैर्द्विजः ।
द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत् ॥
पूजयेच्च तृतीयेऽह्नि नाभिं भृङ्गारकेण तु ।
(भृङ्गारकं भृङ्गराजः इति मयूखः ।)
बाणबिल्वजपाभिस्तु ततः स्कन्धौ समर्चयेत् ॥
अर्चयित्वा हृषीकेशमेकादश्यां विशेषतः ।
त्रिः प्राश्य गोमयं सम्यक् गोमूत्रमपरेऽहनि ॥
क्षीरं चैव त्रयोदश्यां चतुर्दश्यां तथा दधि ।
संप्राश्य कायशुद्ध्यर्थं लङ्घनीयं च तद्दिनम् ॥
पञ्चमे तु दिने स्नात्वा विधिवत्पूज्य केशवम् ।
पापस्य प्रतिमा कार्या रौद्रवक्त्रातिभीषणा ॥

कार्तिकस्यामले पक्षे*स्नात्वा सम्यग् यतव्रतः ॥
एकादश्यां तु गृह्णीयाद्व्रतं पञ्चदिनात्मकम् ॥' इति ।
तद्विधिस्तु गोमयेन स्नात्वा मौनी पञ्चामृतैः पञ्चगव्यैर्विष्णुं संस्नाप्य*संपूज्य पायसं निवेद्य द्वादशाक्षरमष्टोत्तरशतं जप्त्वा-'ॐ नमो विष्णवे' इति षडक्षरेण घृताक्तान्यचान्व्रीहींश्चाष्टोत्तरशतं हुत्वा भूमौ स्वपेत् । ए-

---

इत्युक्तेश्च । *स्नात्वेति प्रातःस्नानादिनित्यकृत्योपलक्षणम् । अत्र—
'व्रती स्नात्वा विधानेन मध्याह्ने च तथा पुनः ।'
इति वचनाद्व्रताङ्गं प्रातर्मध्याह्ने च मृद्गोमयाभ्यां स्नानमावश्यकम् । नद्यां गोमयेन स्नात्वेति ग्रन्थोऽप्येतत्परः । गोमयपदं मृदोऽप्युपलक्षणम् । ततो देवर्षिपितृतर्पणं कार्यम् ।
'यवव्रीहितिलैः सम्यक् पितॄन्सन्तर्पयेत्क्रमात् ।'
इति वाक्याद् यथायुक्त्या देवर्षिलाभः । *संपूज्येति । पूजा चोक्ता नारदीये—
"स्नापयेत्परया भक्त्या गन्धचन्दनवारिणा ।
चन्दनेन सुगन्धेन कुङ्कुमेनाथ केशवम् ॥
कर्पूरोशीरमिश्रेण लेपयेद्गरुडध्वजम् ।
अर्चयेद्दुचितैः पुष्पैर्गन्धधूपसमन्वितैः ॥
गुग्गुलं घृतसंयुक्तं दद्देदक्षयभक्तिमान् ।
दीपकन्तु दिवा रात्रौ दद्यात्पञ्चदिनानि तु ॥
नैवेद्यं देवदेवस्य परमान्नं निवेदयेत् ।
(परमान्नं हविष्यान्नं पायसं वा ।)
एवमभ्यर्च्य देवेशं स्तुत्वा चैव प्रणम्य च ॥
द्वादशाक्षरमन्त्रं च जपेदष्टोत्तरं शतम् ।
('ॐ नमो भगवते वासुदेवाय इति द्वादशाक्षरमन्त्रः ।)
जुहुयात्तु घृताभ्यक्तं तिलव्रीहियवं व्रती ॥

यं पञ्चदिनेषु कुर्यात् । विशेषस्त्वाऽऽश्वेऽह्नि हरेः पादौ कम-
लैः संपूज्य द्वितीयं प्राशयम्, द्वितीयेऽह्नि बिल्वपत्रैर्जा-
नुनी संपूज्य गोमूत्रम्, त्रयोदश्यां भृङ्गराजेन नाभिं
संपूज्य क्षीरम्, चतुर्दश्यां करवीरैः स्कन्धं संपूज्य द-
धि, पौर्णमास्यां होमान्ते लौहीं पापप्रतिमां खड्गचक्रहस्तां
कृष्णवस्त्रेण वेष्टितां यस्थतिलोपरिस्थां कृत्वा धर्म-
राजनामभिः करवीरैः संपूज्य—

'यदन्यजन्मनि कृतमिह जन्मनि वा पुनः ।
तत्सर्वं प्रशमं यातु मत्पापं तव पूजनात् ॥'

इति पुष्पाञ्जलिं क्षिप्त्वा कृष्णप्रतिमां च संपूज्य
विप्राय दत्त्वा विप्रान्संभोज्य दक्षिणां दत्त्वा पञ्चगव्यं
प्राश्य पौर्णमास्यां नक्तं भुञ्जीतेति 'लघुनारदीये । पञ्चग-

षडक्षरेण होमस्तु स्वाहाकारान्वितेन च ।"
'ॐ नमो विष्णवे' इति षडक्षरः । ग्रन्थे च विशेषोऽपि बोध्यः ।
आद्येऽह्नीति ।

"प्रथमेऽह्नि हरेः पादौ पूजयेत्कमलैर्द्विजः ।
द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत् ॥
पूजयेच्च तृतीयेऽह्नि नाभिं भृङ्गारकेण तु ।
(भृङ्गारकं भृङ्गराजः इति मयूखः ।)
बाणबिल्वजपाभिस्तु ततः स्कन्धौ समर्चयेत् ॥
अर्चयित्वा हृषीकेशमेकादश्यां विशेषतः ।
ः प्राश्य गोमयं सम्यक् गोमूत्रमपरेऽहनि ॥
रं चैव त्रयोदश्यां चतुर्दश्यां तथा दधि ।
ाऽय कायशुद्ध्यर्थं लङ्घनीयं च तद्दिनम् ॥
मे तु दिने स्नात्वा विधिवत्पूज्य केशवम् ।
स्य प्रतिमा कार्या रौद्रकायविभीषणा ॥

दग्धप्राशने पञ्चचरणेति हेमाद्रिः। हेमाद्रौ भविष्ये तु*शा-
कैर्मुन्यन्नैर्वा*पञ्चाहं वर्तनमुक्तम् । अन्तेऽप्युक्तम्-
'गङ्गोदमपञ्चकमिति प्रथितं पृथिव्या-
मेकादशीप्रभृतिपञ्चदशीनिरुद्धम् ।
मुन्यन्नभोजनपरस्य नरस्य तस्मि-
न्निष्टं फलं दिशति पाण्डव शार्ङ्गधन्वा ॥' इति ।
तथा पाद्मे-
'पञ्चाहं पञ्चगव्याशी भीष्माद्यर्घ्यं च पञ्चसु ।
अहःस्वपि तथा दद्यान्मन्त्रेणानेन सुव्रत ॥'

इत्यादि । कृष्णप्रतिमादानानन्तरम् ।
दद्याद्धिरण्यं गां चैव कृष्णो मे प्रीयतामिति ।
भोजयेद्ब्राह्मणान्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥
व्रतोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः ।
ततो नक्तं समश्नीयात्पञ्चगव्यपुरःसरम् ॥
एवं सम्यक् समाप्यं स्याद्यथोक्तं व्रतमुत्तमम् ॥"
इति लघुनारदीयोक्तं पाञ्चाह्निकम् । *शाकैरिति । इदं
चाशक्तस्य ।
"एकादशीं समारभ्य विहितं भीष्मपञ्चकम् ।
दुष्करं सत्त्वहीनानामशक्यं बालचेतसाम् ॥
शाकाहारेण मुन्यन्नैः कृष्णार्चनपरैर्नरैः ।
पत्याज्ञया सधवया विधवाभिः पराज्ञया ॥
नित्यं स्नानेन दानेन कार्तिकी यावदेव तु ।
वैश्वदेवस्तु कर्तव्यो विष्णुध्यानपरायणैः ॥"
वैश्वदेवः सर्वदेवस्य व्याहृतिहोमः।अत्रापि पापप्रतिमा श्रीकृष्ण-
प्रतिमा चावश्यं पूज्या देया च। अनयोः पक्षयोः भीष्मार्घ्यदानमि-
च्छन्ति । *पञ्चाहमिति । एतच्च पञ्चहसाध्यम्। आद्ये पद्मैः पादौ,

'सत्यव्रताय शुचये गाङ्गेयाय महात्मने ।
भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे ॥'
('वैयाघ्रपद्यगोत्राय' इति च ।)
सव्येनानेन मन्त्रेण तर्पणं सार्ववर्णिकम् ।' इति

*कार्तिकशुक्लद्वादश्यां रेवतीनक्षत्रयोगरहित
पारणं कार्यम् । तदुक्तम्—

आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
संगमे नहि भोक्तव्यं द्वादशी द्वादशीं हरेत् ॥' इ

यदा तु रेवतीयोगरहिता द्वादशी सर्वथा न लभ
तदा रेवत्याश्चतुर्थपादं वर्जयेत् । वचनं तु प्रागुक्तम् ।

द्वितीये बिल्वैर्जानुनी, तृतीये नाभिनयनानि तुलसीपत्रैः, च
जात्यादिपुष्पैः स्कन्धौ, पञ्चमे मालतीपुष्पैः शिरः संपूज्य
र्घ्यं दत्वा गोमयगोमूत्रपयोदधिघृतानि क्रमेण पञ्चसु दिने
पिबेत् । रात्रौ च सन्ध्यामुपास्य मूलमन्त्रजपः । एवं पञ्चदिना
उपोष्य षष्ठदिने विधिवत्स्नात्वा पक्वान्नेन पञ्च ब्राह्मणान्संभोज
बन्धुभिः सह रात्रौ भुञ्जीत । अत्र एकादश्यां सुवर्णं, द्वादश्यां व
त्रयोदश्यां गौः, चतुर्दश्यां घृतपायसं, पूर्णिमायां श्वेतकृष्णतिल
वस्त्रं च देयम् । मैथुनानृतमधुमांसताम्बूलाभ्यङ्गादि वर्जयेत्
पाद्यं पाद्यादिमविधा नोक्ता ।

"वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ॥
अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे ।
वसूनामवताराय शन्तनोरात्मजाय च ॥
अर्घ्यं ददामि भीष्माय सोमवंशोद्भवाय च ॥" इति ।

*कार्तिकशुक्लद्वादश्यामिति । द्वादशीकृत्यमेकादशी-
कृत्यानन्तरं द्रष्टव्यम् । अग्रे च न लिखति 'आ

पुनर्नारदीये—

'कार्तिके शुक्लपक्षस्य कृत्वा चैकादशीं नरः ।
प्रातर्दत्त्वा शुभान्कुम्भान्प्रयाति हरिमन्दिरम् ॥'

मदनरत्ने वाराहे—

'एकादशी सोमयुक्ता कार्तिके मासि भामिनि ।
उत्त(१)राभाद्रसंयोगे अनन्ता सा प्रकीर्तिता ॥
तस्यां यत्क्रियते भद्रे सर्वमानन्त्यमश्नुते ॥'

अस्यामेव*रात्रौ देवोत्थापनमुक्तं हेमाद्रौ ब्राह्मे—

'एकादश्यां च शुक्लायां कार्तिके मासि केशवम् ।
प्रसुप्तं*बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥' इति ॥

मदनरत्ने भविष्ये—

'कार्तिके शुक्लपक्षे तु एकादश्यां पृथासुत ।
मन्त्रेणानेन राजेन्द्र देवमुत्थापयेद्द्विजः ॥'

रामार्चनचन्द्रिकादौ तु द्वादश्यामुक्तम् ।

न निवर्तन्ते' इति न्यायात् । *रात्राविति प्रमादात् रात्रौ प्रसुप्त-मित्यन्वयात् । अन्यथा

'निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।'

इत्यनेन विरोधात् । अन्ये तु यथाश्रुतानुरोधेन रात्रावेव बोधनमाहुः । *बोधयेदिति । बोधनप्रकारश्च ब्राह्मे—

"नृत्यगीतैस्तथा वाद्यैर्ऋग्यजुःसामपङ्क्तिभिः ।
वीणापणववाद्यैश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः ॥"

इति तत्रैव । इत्युत्थापनविधिः । द्वादश्यां प्रबोधे रेवत्यन्त्यपादो ग्राह्यः ।

"आभाकाशितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः ॥"

---

(१) उत्तराषाढ इति क्वचित्पुस्तके पाठः ।

'पारणाहे पूर्वरात्रे घण्टादीन्वादयेन्मुहुः।' इति।
अत्र देशाचारतो व्यवस्था।
'तत्रैव देवदेवस्य स्नानं पूर्वं महद्भवेत्।

इति वचनात्। मात्स्ये—
'निशिस्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम्।'
निशादौ नक्षत्रपादयोगाभावे नक्षत्रमात्रयोगो ग्राह्यः।
"पादयोगो यदा न स्यादृक्षेणापि तदा भवेत्॥"
इति वाराहात्।
"विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम्॥"
इति विष्णुधर्माच्च। द्वादश्यामेकदेशेनापि ऋक्षयोगाभावे एकादश्यां त्रयोदश्यां वा तत्तदृक्षयोग एव निशादिवेलानादरेण मस्वापादि कार्यम्।
"अभावे द्वादशीऋक्षे वत्थानशयने हरेः।
पादयोगेन कर्तव्ये नाहोरात्रं विचिन्तयेत्॥"
इति जीमूतवाहनोक्तवचनात्। एवञ्च द्वादश्यां निशादिवेलादरेऽन्यतिथौ च नक्षत्रपादयोगादरे नियमे सति यदा द्वादशीषु निशादरेऽन्यत्र तत्तदृक्षमात्रयोगः अन्यतिथौ च तदितरनक्षत्रस्य योगः तदा द्वादशीषु सन्ध्यायां प्रस्वापादिः।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे।
आभाकासितपक्षेषु शयनावर्तनादिकम्॥"
इति वाराहात्। सन्धिसमयः सायंसन्ध्यैव शयनादौ द्रष्टव्यः। प्रबोधोऽपि तत्रैव कार्यः।
"रेवत्यन्तो यदा रात्रौ द्वादश्यां च समागतः।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम्॥"
इति जीमूतधृतवाक्यात्। अत्र 'मैत्राद्यपादे' इत्यादिवहुष प-

पुनारदीये—

'कार्तिके शुक्लपक्षस्य कृत्वा चैकादशीं नरः ।
प्रातर्दत्त्वा शुभान्कुम्भान्प्रयाति हरिमन्दिरम् ॥'

मदनरत्ने वाराहे—

'एकादशी सोमयुक्ता कार्तिके मासि भामिनि ।
उत्त(१)राभाद्रसंयोगे अनन्ता सा प्रकीर्तिता ॥
तस्यां यत्क्रियते भद्रे सर्वमानन्त्यमश्नुते ॥'

अस्यामेव रात्रौ देवोत्थापनमुक्तं हेमाद्रौ ब्राह्मे—

'एकादश्यां तु शुक्लायां कार्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥' इति ॥

मदनरत्ने भविष्ये—

'कार्तिके शुक्लपक्षे तु एकादश्यां पृथासुत ।
मन्त्रेणानेन राजेन्द्र देवमुत्थापयेद्द्विजः ॥'

[illegible] तु द्वादश्यामुक्तम् ।

न निवर्तेत' इति न्यायात् । [illegible] पारो बहु-
[illegible]त्वात् । अन्यथा

'निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।'

इत्यनेन विरोधात् । भाद्रे तु यथाश्रुतानुरोधेन [illegible]
[illegible] । अर्थान्तरमिति । [illegible] ब्राह्मे—

"[illegible] ।
[illegible] ॥
[illegible] ॥"

[illegible]

"[illegible] ।
[illegible] ॥"

(१) [illegible]

न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥' इति ।
अथ पाराशरोक्तो बोधनीविधिः । एकादश्यां रात्रौ कुम्भे पूर्णपात्रोपरि हैमं माषमितं मत्स्यं पञ्चामृतेन संस्नाप्य कुङ्कुमचन्दनवस्त्रयुग्मगन्धाद्यैः संपूज्य मत्स्यादिदशावतारान्संपूज्य जागरं कृत्वा प्रातर्देवमापाद्य [illegible] वस्त्राद्यैः संपूज्य—

'जगदादिर्जगद्रूपो जगदादिरनादिमान् ।
जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दनः ॥'

इति नत्वा दक्षिणां दत्त्वा ब्राह्मणान्भोजयेदिति । तथा प्रार्थ्य—

'महाभूतिरवे रात्रौ भ्रामयेत्स्यन्दने स्थितम् ।
उत्थितं देवदेवेशं नगरे पार्थिवः स्वयम् ॥
चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतम् ।
कथयित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या*सदक्षिणम् ॥'

इति मन्त्रेण प्रबोधानन्तरं पुष्पाञ्जलिर्देयो मन्त्रलिङ्गात् । अत्र पूर्वदिने रात्रौ दशावतारान्सम्पूज्य जागरणं कृत्वा प्रातर्देवमाचार्यं च वस्त्राद्यैः सम्पूज्य—

"जगदादिर्जगद्रूपो जगदादिरनादिमान् ।
जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दनः ॥"

इति तान् नत्वा दक्षिणां दत्त्वा ब्राह्मणान्सम्भोज्य स्वयं भुञ्जीतेति विधिमप्याहुः । चतुर्दशी एकादशीद्वादशीपौर्णमासीसङ्क्रान्त्यन्यतमपक्षेण । एवं "चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि" इत्येतन्नियमपक्षेऽपि उत्थापनावधीत्यभिधानात् ।

*सदक्षिणमिति ।
'दत्त्वा विसर्जयेद्विप्रं ततो भुञ्जीत च स्वयम् ।'
इत्युत्तरार्द्धम् । 'निद्रां त्यजति कार्त्तिक्याम्' इति पूर्णिमा-

न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥'इति ।
अथ वाराहोक्तो बोधनीविधिः । एकादश्यां रात्रौ कु-
...घृतपात्रोपरि हैमं माषमितं मत्स्यं पञ्चामृतेन संस्ना-
...कुङ्कुमशीतवस्त्रयुगगन्धाद्यैः संपूज्य मत्स्यादिदशाव-
...तारान्संपूज्य जागरं कृत्वा प्रातर्देवमाचार्यं च वस्त्राद्यैः
...ज्य—

'जगदादिर्जगद्रूपो जगदादिरनादिमान् ।
जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दनः ॥'

...नत्वा दक्षिणां दत्त्वा ब्राह्मणान्भोजयेदिति । स-
...मे—

...हान्पूर्वरात्रौ भ्रामयेत्स्यन्दने स्थितम् ।
...स्थितं देवदेवेशं नगरे पार्थिवः स्वयम् ॥
...तुरो वार्षिकान्मासान्नियमं यस्य यत्कृतम् ।
...यित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या च दक्षिणाम् ॥'

...ण मन्त्रेणानन्तरं पुष्पाञ्जलिर्देयो मन्त्रलिङ्गात् । अत्र
...त्रौ दशावतारान्सम्पूज्य जागरणं कृत्वा प्रातर्देवमाचा-
...र्यं सम्पूज्य—

...गदादिर्जगद्रूपो जगदादिरनादिमान् ।
...द्यो जगद्योनिः प्रीयतां मे जनार्दनः ॥"

...त्वा दक्षिणां दत्त्वा ब्राह्मणान्सम्भोज्य स्वयं भुञ्जीत
...ाहुः । चतुर्दश्येकादश्यां द्वादशीपौर्णमास्योर्वा सङ्कल्प-
...एवं "चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि" (-
...ति उत्थापनावधीत्यभिधानात् ।
...पामिति ।

...र्जयेद्विप्रं ततो भुञ्जीत च स्वयम् ।"
...त् । 'निद्रां त्यजति कार्तिक्याम्' इति पूर्वेद्यु-

त्पूर्वदिने चोपवासः कार्यः।
ततः प्रभाते विमले कृत्वा पूजां महाद्भुताम्।
पञ्चपाणेऽह्याशाम्नि मनेऽस्मिन्कृतपारणः॥'
र्मधर्मोक्तेः। शिवरहस्येऽपि पूजाजागराद्युक्त्वोक्तम्—
ततोऽरुणोदये जाते स्नात्वा स्नात्वा च भस्मना।
वर्यां समाप्य विश्वेशं मामभ्यर्च्य यथाविधि॥
ुक्तान्भोजयामासुर्मीयो बुभुजुस्ततः॥' इति।
कार्त्तिकव्रतोद्यापनं पाद्मे कार्त्तिकमाहात्म्ये उक्तम्—
मयोर्जव्रतिनः सम्यगुद्यापनविधिं शृणु।
र्जेशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥
ुलस्या उपरिष्टात्तु कुर्यान्मण्डपिकां शुभाम्।
ति पूर्वार्द्धम्। देव्या सह अत्र प्रकृतित्वरूपेणार्थवादेन क-
ोऽरुणोदये मणिकर्ण्यां स्नात्वा विश्वेश्वरं पूजयेत्। तस्य
रमतिथुदिनत्वादित्यर्थः। अत्पूर्वदिने चेति। मा-
रारणाविधेश्च पूर्वदिने उपवासः चतुर्दशीयुक्तारुणोदय-
ावे कार्य इत्यर्थः। पूजादावरुणोदयव्यापिनी ग्राह्या, 'क-
स्य यः कालः' इति वचनात्। अत्र चतुर्दश्यामरुणोदये
ौरुणाया स्नात्वा विश्वेश्वरपूजां कृत्वोपवासं सङ्कल्पयेत्। त-
पूजाजागरणानन्तरं द्वितीयेऽह्नि अरुणोदयस्नानं महापूजां
ारणं कुर्यादित्यर्थं अनेनास्मानं विशेषवचनाभिज्ञानात् न तु
रभ्यान्येः कश्चनेति उज्झितः। तत्फलं तु काशीखण्डे—
ार्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत्।
ात्वा चोत्तरवाहिन्यां न तस्य पुनरावृत्तिः॥' इति।
ं च व्रतसम्पूर्णत्वाद्यर्थम्।
सम्पूर्णतार्थाय विष्णुप्रीत्यर्थमेव च।'
ात्।

तुलसीमूलदेशे च ससर्वतोभद्रमेव च ॥
तस्योपरिष्टात्कलशं पञ्चरत्नसमन्वितम् ।
पूजयेत्तत्र देवेशं सौवर्णं गुर्वनुज्ञया ॥
रात्रौ जागरणं कुर्याद्गीतवाद्यादिमङ्गलैः ।
ततस्तु पौर्णमास्यां वै तपःशीलान्द्विजोत्तमान् ॥
त्रिंशन्मितानथैकं वा स्वशक्त्या वा [illegible] ।
[illegible] इति ब्राह्मे [illegible] ॥

[illegible]

[illegible]

ततो गां कपिलां दद्यात्पूजयेद्विधिवद्*गुरुम् ॥
देवदेवं समभ्यर्च्य देवीं च तुलसीं तथा ॥"
*गुरुमिति । वस्त्रालङ्कारादिभिरिति शेषः ।
"सपत्नीकं समभ्यर्च्य तांश्च विप्रान्समर्चयेत् ।
युष्मत्प्रसादादेवेश प्रसन्नो भव सर्वदा ॥
व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ।
तत्सर्वं नाशमायातु स्थिरा मे चास्तु सन्ततिः ॥
इति सम्प्रार्थ्य तान् विप्रान्क्षमाप्य च विसर्जयेत् ।
तामर्चां गुरवे दद्याद्वस्त्रयुक्तां तदा व्रती ॥
ततः सुहृद्गुरुयुतः स्वयं भुञ्जीत भक्तिमान् ॥" इति ।
कृत्यरत्नार्णवे—
"पौर्णमास्यां तु सम्पूज्यो भक्त्या दामोदरः सदा ।
तस्मिन्नहनि यत्नेन कर्त्तव्यं नक्तभोजनम् ॥"
अथ तुलसीविवाहविधिर्विष्णुयामले—
"आरोप्यैवाथ तुलसीं वने वा स्वगृहेऽपि वा ।
मासत्रयेण संवर्द्धा ततो यजनमारभेत् ॥
सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा ।
अथवा कार्त्तिके मासि भीष्मपञ्चदिनेऽथवा ॥
वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः ।
मण्डपं कारयेत्तत्र कुण्डं वेदीं विवाहवत् ॥
ब्राह्मणान्वैदिकांश्चैव चतुरश्च तथा द्विजः ।
स्वपत्नीं पुरः कृत्वा मातृणां यजनन्ततः ॥
कृत्वा नान्दीमुखश्राद्धं सौवर्णं स्थापयेद्धरिम् ।
कृत्वा च रौप्यतुलसीं लग्ने स्वस्तिवाचने रवौ ॥
(गोधूलिलग्ने इत्यर्थः ।)
सम्पूज्यालङ्कृतां तां च महत्याद्विधिना हरेः ।

वासश्रुतेन मन्त्रेण कङ्कणं पाणिपल्लवे ॥
विवाहकर्मवत्सर्वं कर्तव्यं देशिकोत्तमैः ।
को अदादिति मन्त्रेण करग्राहो विधीयते ॥
कर्तव्यश्च ततो होमो विशेषाद्विधिपूर्वकम् ।
आचार्यो वेदिका कुण्डे जुहुयाच्च नवाहुतीः ॥"

स्विष्टकृतोऽनन्तराः । ॐनमो भगवते केशवाय स्वाहा, ॐनारायणाय, माधवाय, गोविन्दाय, विष्णवे, मधुसूदनाय, त्रिविक्रमाय, वामनाय, श्रीधराय, हृषीकेशाय, पद्मनाभाय, दामोदराय, उपेन्द्राय, वासुदेवाय, अनिरुद्धाय, अच्युताय, अनन्ताय, गदिने, चक्रिणे, विश्वक्सेनाय, वैकुण्ठाय, जनार्दनाय, मुकुन्दाय, अधोक्षजाय ।

"यजमानः सपत्नीकः सहामात्यैश्च गोत्रजैः ।
प्रदक्षिणाः प्रकुर्वीत पतत्सां विष्णुना सह ॥"

तुलस्या इति शेषः ।

"तुलसीपाणिग्रहणे वेदिकायां विभावसौ ।
घृतकुम्भं जपेत्सूक्तं पावमानीर्विशेषतः ॥
जीवसूक्तं पुनर्जप्त्वा नवसूक्तं तथैव च ।
पठेयुः शान्तिकाध्यायान् तथा वैष्णवसंहितान् ॥
गायन्ति मङ्गलं नार्यो भेरितूर्यादिनिःस्वनैः ।
शङ्खझल्लरिनिर्घोषैर्मङ्गल्यं विधिमाचरेत् ॥
दद्यात्पूर्णाहुतिं पश्चादभिषेकविधिं ततः ।
ब्रह्मणे वृषभं दद्यादाचार्यं परिधाप्य च ॥
गोपदं च तथा शय्यामाचार्याय प्रदापयेत् ।
आजन्मोपार्जितं पापं दर्शनेन प्रणश्यति ॥
वापयेत्तुलसीं यस्तु सेवयेच्च प्रयत्नतः ।
प्रतिष्ठाप्य यथोक्तेन विष्णुना सह माधवः ॥

कार्तिके पौर्णमासीनिरूपणम् ।

कार्तिकी पौर्णमासी परा ग्राह्या । 'अमापौर्णा...
परे' इति दीपिकोक्तेः । अत्र विशेषो हेमाद्रौ ब्राह्मे...
'पुण्या महाकार्तिकी स्याज्जीवेन्दोः कृत्तिकासु च...
तथा—

'आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् ।
महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ॥
यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित् ।
तिथिः सापि महापुण्या मुनिभिः परिकीर्तिता ॥
प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप ।
सा महाकार्तिकी प्रोक्ता देवानामपि दुर्लभा ॥' इति...

पाद्मे—

'विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः ।
स योगः पद्मको नाम पुष्करेष्वतिदुर्लभः ॥
पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति ।
स हित्वा सर्वपापानि वैष्णवं लभते पदम् ॥'

यमः—

'कार्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ।
माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः ॥'
अस्यामेव सायंकाले मत्स्यावतारो जात इत्युक्तं पा-
द्मे कार्तिकमाहात्म्ये—

'वरान्दत्त्वा यतो विष्णुर्मत्स्यरूप्यभवत्ततः ।
तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतम् ॥' इति ।

स मोक्षं लभते जन्तुर्विष्णुलोकं तथाऽक्षयम् ।
प्राप्नोति विपुलान्भोगान् विष्णुना सह मोदते ॥
प्रतिष्ठा श्रीतुलस्यास्तु इत्युक्ता विष्णुयामले ॥"

इति कार्तिकमासः ।

शिवरहस्ये*मध्याह्ने भैरवोत्पत्तेः श्रवणात् । तथा च
त्रैव —

'नित्यपात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ ।'

इत्युपक्रम्य ब्रह्मणा क्रतेऽवज्ञाते उक्तम्—

'तद्रोषरूपादनघान्मत्तः श्रीकालभैरवः ।

आविरासीत्तदा लोकान्भीषयन्नखिलानपि ॥' इति

अत्रो*पवास एव प्रधानमित्युक्तं तत्रैव—

'उपोषणस्याङ्गभूतमर्घ्यदानमिह स्मृतम् ।

तथा जागरणं रात्रौ पूजा यामचतुष्टये ॥'

संध्यायामपि पूजैवोक्ता । (तेन(१)मध्याह्नव्यापिन
युक्ता ।) दिनद्वयेऽशतः संपूर्णायां वा*तत्रासौ पूर्वैव । पू
र्वोक्तवचनात् । पारणा तु मातरेव ।

ति । *मध्याह्ने इति । नत्वेतावता जन्मकालव्यापित्वान्मध्याह्न
व्यापिनीति भ्रमः कार्यः । शिवरहस्ये मध्याह्नानन्तरम्—

'कृत्तिवासेश्वरं प्रापुर्देवा बिल्वादिसाधनाः ।'

इति बहुकल्पकलापमुक्त्वा भैरवाविर्भावमुक्त्वा 'सूर्योऽस्तमुपागम
त्'इत्यभिधानेन मध्याह्ने तदाऽऽविर्भावानिश्चयात् । अस्तु वा मध्या
तदाविर्भावः । तथापि तत्कालीनतिथिग्राह्यत्वपत्र न किञ्चिन्मा
नमस्ति । जन्माष्टम्यादौ तु पूजारूपकर्मकालत्वेनैव निशीथव्याप्ति
र्गृह्यते न तु जन्मकालत्वेनेति । अत एव यामचतुष्टयपूजासन्ध्या
पूजेत्यादिकर्मकालत्वेन रात्रिव्यापिनीमङ्गीकृत्य „मध्याह्नव्यापिनी
परित्यक्ष्यति न चैवादिना । *उपवास एवेति । उपवासजागर
प्रधानमिति अपरं मतम् । पूजोपवासजागरणानि प्रधानानीत्येकम्
*तत्रासौ रात्रिव्याप्तौ । अत्रोपवासादेः प्राधान्याद्दिवारात्रिव्रतमि
दम् । ततश्चाहोरात्रव्याप्तिरेव ग्राह्या ।

(१) कंसान्तर्गतं क पुस्तके नास्ति ।

अत्र त्रिपुरोत्सव उक्तो भार्गवार्चनदीपिकायाम्—

'पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रिपुरोत्सवः ।
दद्यादनेन मन्त्रेण प्रदीपांश्च सुरालये ॥
कीटाः पतङ्गा मशकाश्च वृक्षा
जले स्थले ये विचरन्ति जीवाः ।
दृष्ट्वा प्रदीपं न च जन्मभागिनो
भवन्ति नित्यं श्वपचा हि विप्राः ॥'

अत्र वृषोत्सर्गोऽतिप्रशस्तः । तदुक्तं मात्स्ये—

'कार्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ।
शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतम् ॥' इति ।

अत्र कार्तिकेयदर्शनमुक्तं काशीखण्डे—

'कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् ।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥'

इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ द्वितीयपरिच्छेदे कार्तिकमासः ॥

वृश्चिके पूर्वाः षोडश घटिकाः पुण्याः (१)(शेषं प्राग्वत्) । मार्गशीर्षकृष्णाष्टमी कालाष्टमी । सा च रात्रिव्यापिनी ग्राह्या ।

'मार्गशीर्षसिताष्टम्यां कालभैरवसंनिधौ ।
उपोष्य जागरं कुर्वन्सर्वपापैः प्रमुच्यते ॥'

इति काशीखण्डाद्रात्रिव्रतत्वाच्च ।

'रात्रिव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः ।'

इति वचनाच्च । ☉दिनद्वयेऽशतो रात्रिव्याप्तावुत्तरैव । भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित् । तन्न,

अथ कालाष्टमीनिर्णयः । केषांचिन्मतमाह-☉दिनद्वये इ॰

(१) ङ्कसांतर्गतं क पुस्तके नास्ति ।

शिवरहस्ये*मध्याह्ने भैरवोत्पत्तेः श्रवणात् । तथ
त्रैव—

'नित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ
इत्युपक्रम्य ब्रह्मणा रुद्रेऽवज्ञाते उक्तम्—

'तदोग्ररूपादनघान्मत्तः श्रीकालभैरवः ।
आविरासीत्तदा लोकान्भीषयन्निखिलानपि ॥' इ

अत्रोपवास एव प्रधानमित्युक्तं तत्रैव—

'उपोषणस्याङ्गभूतमर्घ्यदानमिह स्मृतम् ।
तथा जागरणं रात्रौ पूजा यामचतुष्टये ॥'

संध्यानामपि पूजैवोक्ता । (तेन(१)मध्याह्नव्यापि
युक्ता ।) दिनद्वयेऽप्यतः संपूर्णायां वा तत्त्व्याप्तौ पूर्वैव ।
कल्पनात् । पारणा तु परेव ।

ति । *मध्याह्ने इति । ननु तावता जन्मकालव्यापित्वान्मध्याह्न
व्यापिनीति ग्रहः कार्यः । शिवरहस्ये मध्याह्नानन्तरम्—

'कृत्तिवाससेश्वरं प्राप्तुर्देवा विस्मयादिसाधनाः ।'

इति बहुकल्पकलापमुक्त्वा भैरवाविर्भावमुक्त्वा 'पूर्वोऽयमनुवादप-
र'हंसपिधानेन मध्याह्ने तदाऽऽविर्भावानिश्चयात् । अस्तु वा मध्याह्ने
राविर्भावः । तथापि तत्कालीनतिथिग्राह्यत्वं न । किञ्चित्
पाति । जन्माष्टम्यादौ तु पूजारूपकर्मकालत्वेनैव निशीथव्यापि-
रते न तु जन्मकालत्वेनेति । अत एव यामचतुष्टयपूजाभिधानात्प्रा-
दिपदत्वादिकर्मकालत्वेन रात्रिव्यापिनीग्रहीतव्या *मध्याह्नव्यापिनी
यन्ते न चेत्याहिता । *उपवास एवेति । उपवासजागरणे
प्रधानमिति अपरं मतम् । पूजोपवासजागरणानि प्रधानानीत्येकम् ।
तत्त्व्याप्तौ रात्रिव्याप्तौ । अत्रोपवासादेः प्राधान्यादित्याशयः ।
दम् । ततश्चाहोरात्रव्याप्तिरेव ग्राह्या ।

---

(१) कंसान्तर्गतं क पुस्तके नास्ति ।

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता।
तस्यां तु तुषिता नागा (१)इतरा सचतुर्थिका॥'
इति मदनरत्ने वचनात्॥

मार्गशीर्षशुक्लषष्ठी चम्पाषष्ठीति महाराष्ट्रेषु प्रसिद्धा। सोत्तरयुता ग्राह्या। 'षण्मुन्योः' इति युग्मवाक्यात्। 'पूर्वाह्णे दैविके कुर्यात्' इति वचनादस्य च दैवकर्मत्वात्। इयमेव योगविशेषेण चम्पेत्युच्यते। तदुक्तं ब्रह्माण्डपुराणे मल्लारिमाहात्म्ये—

'मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता।
रविवारेण संयुक्ता सा चम्पेतीह कीर्तिता॥' इति।
'विशाखाभौमयोगेन सा चम्पेतीह (२)कीर्तिता'
इति मदनरत्ने पाठः।

'मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंऽशुमालिनः।
शततारागते चन्द्रे लिङ्गं स्याद् दर्शनोपरम्॥' इति।

इयं च योगवशेन पूर्वा परा वा कार्या। 'चम्पाषष्ठी सप्तमीयुता' इति दिवोदासः। इयमेव *स्कन्दषष्ठी। सा पूर्वयुता।

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत्॥'
इति भृगूक्तेः। परेऽह्नि रात्रावाऽथयामद्वये पारणासं-

*उत्तरयुतेति। वक्ष्यमाणयोगविशेषेण मल्लारिपूजायां पूर्वा परा वा ग्राह्या, तदभावे तूत्तरविद्धेत्यर्थः।

*स्कन्दषष्ठीति।
"येयं मार्गशिरे मासि षष्ठी भवति सत्तम।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया॥"

(१) क पुस्तके 'इतरे' इति पाठः।
(२) 'विधुता' इति क पुस्तके पाठः।

'यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा।'
इति वचनात्। अत्र च कालभैरवपूजोक्ता त्रिस्थली-
सेतौ—

'कृत्वा च विविधां पूजां महासंभारविस्तरैः।
नरो मार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत्॥'

तथा—

'तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमत्वरः।
विलोक्य कालराजानं निरयादुद्धरेत्पितॄन्॥' इति।

इयं च कार्तिकानन्तरा गौणचान्द्राभिप्रायेण।

मार्गशीर्षशुक्लपञ्चम्यां नागपूजोक्ता हेमाद्रौ स्कान्दे—

'शुक्ला मार्गशिरे पुण्या श्रावणे या च पञ्चमी।
स्नानदानैर्बहुफला नागलोकप्रदायिनी॥' इति।

इयं नागपूजायां षष्ठीयुतैव ग्राह्या।

"दिवारात्रिव्रतं यच्च एकमेव तिथौ गतम्।
तस्यामुभययोगिन्यामारभेत्तद्व्रतं व्रती॥"

इति वाक्यात्। यदा पूर्वदिने सायाह्ने उत्तरेद्युश्च प्रदोषे तदा पूर्वैव 'रुद्रव्रतेषु' इति वचनात्। पूजा तु काशीवासनिर्विघ्नतासिद्धयर्थतया कार्यैव इति मयूखः। मार्गशीर्षशुक्लतृतीया रम्भातृतीया, तस्यामुपवासः कार्यः।

"मार्गशुक्लतृतीयायां दन्तधावनपूर्वकम्।
उपवासस्य नियमं गृह्णीयात्पतिदैवतम्॥
सौभाग्यार्थं पुरा चीर्णं रम्भया राजसत्तम।
तेन रम्भा तृतीयेऽयं परसौभाग्यदायिनी॥"

इति वचनात्। दन्तधावनं च काष्ठं विना कार्यम्। इयं पूर्वविद्धा ग्राह्या। 'बृहत्तपा तथा रम्भा' इति वचनात्। श्रा[illegible] [illegible]तृतीया बृहत्तपा।

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा (१)इतरा सचतुर्थिका ॥'

इति मदनरत्ने वचनात् ॥

मार्गशीर्षशुक्लषष्ठी चम्पाषष्ठीति महाराष्ट्रेषु प्र
द्धा । सोऽत्तरयुता ग्राह्या । 'षण्मुन्योः' इति युग्मवाक्
त । 'पूर्वाह्णे दैविकं कुर्यात्' इति वचनादस्य च दैवक
स्यात् । इयमेव योगविशेषेण चम्पेत्युच्यते । तदुक्तं
ब्राण्डपुराणे मल्लारिमाहात्म्ये—

'मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह-कीर्तिता ॥' इति
'विशाखाभौमयोगेन सा चम्पेतीह (२)कीर्तिता'

इति मदनरत्ने पाठः ।

'मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंऽशुमालिनः ।
शततारागते चन्द्रे लिङ्गं स्याद् दृष्टिगोचरम् ॥' इति ।

इयं च योगवशेन पूर्वा परा वा कार्या । 'चम्पाष
ष्ठी सप्तमीयुता' इति दिवोदासः । इयमेव *स्कन्दषष्ठी ।
सा पूर्वयुता ।

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥'

इति भृगूक्तेः । परेऽपि रायारावपरामरवे पारवास-

*उपरयुतेति । वक्ष्यमाणयोगविशेषेण मल्लारिपूजायां पूर्वा परा
वा ग्राह्या, तदभावे तूत्तराविद्धैवेत्यर्थः ।

*स्कन्दषष्ठीति ।

"एवं मार्गशिरे मासि षष्ठी भवति सत्तम ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ॥"

(१) क पुस्तके 'इतरे' इति पाठः ।
(२) 'विश्रुता' इति क पुस्तके पाठः ।

भवे इदम्, अन्यथोत्तरैवेति दिवोदासः । *अन्यपर्व
षष्ठीषु—

'सेनाविदारक स्कन्द महासेन महाबल ।
रुद्रोमाग्निज षड्वक्त्र गङ्गागर्भ नमोऽस्तु ते ॥'

इति राजभं स्कन्दं संपूज्य विप्राय दद्यादिति दिवोदा

मार्गशीर्षशुक्लचतुर्दश्यां पिशाचविमोचनीतीर्थ श्र
द्धं त्रिस्थलीसेतौ भट्टचरणैरुक्तम् । तस्य मासपैशाच
पिशाचोद्देश्यकत्वे पार्वणत्वाद् *पराह्णव्यापिनी ग्राह्य
अज्ञातनामपिशाचोद्देश्यकत्वे त्वेकोद्दिष्टत्वान्मध्या
व्यापिनीति । कुलधर्मव्रतादौ तू*त्तरैव । 'चैत्रनभोग
तरसिता स्यादूर्ध्वम्' इति दीपिकोक्तेः ॥

मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः । तदुक्तं स्का
न्दे सह्याद्रिखण्डे—

'मार्गशीर्षे तथा मासि दशमेऽह्नि सुनिर्मले ।
मृगशीर्षयुते पौर्णमास्यां शुक्रे च वासरे ॥
जनयामास देदीप्यमानं पुत्रं सती शुभम् ।
तं विष्णुमागतं ज्ञात्वा अत्रिर्नामाकरोत्स्वयम् ॥
दत्तवान्स्वस्य पुत्रत्वात्तस्मात्तेन [illegible] ॥' इति ।

*इयं प्रदोषव्यापिनी ग्राह्येति वृद्धाः ।

[illegible]

*अपराह्णेति । [illegible] दिवोदासः ।
*उत्तरैवेति । 'शुक्लाख्ये चतुर्दशी' इत्युक्तेः ।
"[illegible] श्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या [illegible] ॥"
"[illegible]' इति वचनाच्च ॥

मार्गशीर्षपौर्णिमानन्तराष्टमी अष्टका । एवं पौषादिमासत्रयेऽपि । 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा' इत्याश्वलायनोक्तेः । 'एकस्यामष्टम्यां पैका कार्या' इति हरदत्तः । कश्चित्पञ्चम्यप्युक्ता ।

'प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति ।'

इति पाद्मवचनात् । तत्पूर्वसप्तमीषु पूर्वेद्युः तत्परनवमीष्वन्वष्टकाश्राद्धमुक्तं कालादर्शे—

*'मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने ।
कृष्णपक्षे च पूर्वेद्युरन्वष्टक्यं तथाष्टका॥'इति ।

*इयमिति । पूर्वविदेत्यन्ये । मार्गशीर्षचतुर्दश्यां पौर्णमास्यां वा मत्स्यवराहणं कार्यम् ।

*मार्गेति अयान्वयानेन । मार्गशीर्षादिचतुष्टयं भाद्रकृष्णाष्टमी च कालः । एतेन माघ्या वर्षमिति सूत्रात् अष्टकाशब्दः परं तत्र ? नास्ति । माघ्यावर्षशब्देन व्यवहारात् भाद्रपदकृष्णाष्टमीनाम्ना । अष्टकात्वमिति पदं च तादृक्कर्मत्वार्थम् । गौणमुख्याभिप्रायेण पञ्चाष्टका इति व्यवहारः । न स्वेतावता माघ्यावर्षं पद्यम् इति भ्रमः कार्यः, नापि संकल्पाद्यावष्टकापदमयोगः । अथवा पुराणमते पञ्चम्यष्टकैव ।

"प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति ।
आयुरारोग्यमैश्वर्यं सर्वकामफलप्रदा ॥"

इति पाद्मे बहुनाम्नः पितुः शापोत्तराऽनुग्रहोक्तेः । हेमन्तशिशिरौ मासामानेन मार्गशीर्षादिमासद्वयात्मकतया मासचतुष्टयरूपौ, चतुर्णामित्यभिधानात् । अष्टकापदं यद्यपि कर्मपरम् 'अष्टका पितृदेवसे' इति पाणिनिस्मृतेः । तथापि लक्षणया कालपरमपीति समुचितकालानुरोधेन कर्मण आश्वचाव्यैश्वर्यम् आग्रेयवत् । तथाश्वलायनानां होमश्राद्धोभयरूपं कात्यायनादीनां तु होममात्रम् ।

यत्तु विष्णुः—

'अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाः' इति,

यच्च कौर्मे—

'अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु' इ[illegible]

तच्चतुर्थ्या अनावश्यकत्वार्थम्।

'या माघस्य चतुर्थी स्यात्तां च कुर्वीत यत्नतः'

इति वायुब्रह्माण्डपुराणात्।

'माघ्यां [illegible] नरकं प्रतिपद्यते।'

इति [illegible]

[illegible] वायुब्रह्माण्डयोः—

'[illegible]

[illegible]

[illegible]

पौषादिक्रमः । अन्वष्टका तु प्रागेव निर्णीता । तत्राष्टम्यपराह्णव्यापिनी ग्राह्या।

'अपराह्णादनन्तरं श्राद्धं पार्वणवद्बुधैः ।'

इत्यादिवचनादन्वष्टकायामपराह्णकालत्वाच्च पार्वणवत् । पूर्वेद्युरष्टकायास्तु मध्याह्नव्यापित्वेन निर्णयः । अत एव सूत्रम्—'पूर्वेद्युः पितृभ्यो दद्यात् अपरेद्युरन्वष्टक्यम्' इति च । अत्र कामकाम्यं विशेषतो 'हृष्टिश्राद्धं मन्वन्तराष्टम्यां कामकालौ' इति माधवीये सांख्यायनोक्तेः । अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं स्मृतिसारे—

'पञ्चमीमष्टमीमध्ये श्राद्धाकरे तु सप्तमे ।

इति श्लोकानन्तरं 'आद्यापूर्वे' इति श्लोकः । तदनन्तरं च 'तत्रापरस्याः'इत्यर्द्धम् । एवं ब्राह्मे—

"हेमन्तान्तु यथामासान्तु शाकैः सन्तर्पयेत्पितॄन् ।

मासान्तरे द्वितीयायां मांसैः पुष्टैश्च तर्पयेत् ॥

(पुष्टैः अतिशयपुष्टैः । द्विजः विनायकः ।)

हेमन्तस्य तृतीयायां अपूपैश्च यथाक्रमम् ।

वर्षासु पायसाद्यैश्च चतुर्थ्यामिव सर्वदा ॥"

अष्टोमपक्षापि मासो नोक्तश्च इत्यत आह—पौषेति ।

'पौषे कृष्णाष्टकायान्तु शाकैः सन्तर्पयेत्पितॄन् ।'

इति ब्राह्म एव शाकाष्टकात्वेन पौषमासीयत्वोक्तेः ।

'शाकं तु फाल्गुनाष्टम्यां स्वयं पत्न्यपि वा पचेत् ।

वास्तुशाकादि होमश्च कार्यः पूपाष्टकावता ॥'

इति छन्दोगपरिशिष्टे । वायुपुराणे-शाकाष्टकात्वेनोक्तायास्तृतीयाया एव फाल्गुनमासीयत्वेनोक्तेश्च ।

"ऐन्द्रावारुणाष्टकास्तिस्रः पौषमासादिषु त्रिषु ।

तिस्रश्चान्वष्टकाः पुण्या माघी पञ्चदशी तथा ॥"

*आन्वष्टक्यं यदा न्यूनं संपूर्णं याति सर्वथा ॥' इति । अशक्तौ त्वाश्वलायनः—'अथ यवोभुनेष्टकाः पशुना स्थालीपाकेन वाप्यनडुहो *यवसमाहरेदग्निना वा *कक्षमु*पोषेदेषा मेऽष्टकेति नत्वेवानष्टकः स्यात्' इति । मार्गशीर्षादिषु मलमासे सति तत्राष्टका न कार्या । चतुर्णामिति ग्रहणादित्युक्तं नारायणवृत्तौ । तथा काठकगृह्येऽपि-

'महालयाष्टकाश्राद्धोपाकर्मादि यत्कर्म यत् ।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ॥' इति ।

मार्गादिरविवारेषु काम्यं व्रतमुक्तं हेमाद्रौ । तत्र भक्षणाण्युक्तानि संग्रहे (सौरधर्मे)(१)—

'पत्रत्रितयं तुलस्यास्त्रिपलमथ घृतं
मार्गशीर्षादिभक्ष्यं

इति कौर्मेऽपि । एतेन मोक्षपुराणेषु छन्दोगपरिशिष्टे च 'पौषादित्रयमासान्तमानेन' इति मार्गशीर्षाष्टका हेया । अथवा-

'आग्रहायण्यामतीतायां कृष्णास्तिस्रोऽष्टकास्तथा ।'

इति विष्णुधर्मात्फाल्गुनाष्टकात्यागपक्षः । स च 'पौषमासादिषु त्रिषु' इति मार्गशीर्षाष्टकात्यागपक्षेण विकल्प्यते इति परास्तम् । उक्तसकलवचनानां कृष्णादिमासपरत्वेनैकपक्षप्रतिपादकत्वसम्भवे नानापक्षपरत्वे मूलश्रुतिनानात्वकल्पनागौरवात् । शाकादिद्रव्यव्यवस्था च प्राधान्याभिप्रायाऽऽतीर्थश्राद्धे घृतवत् । 'शुन्यर्थं ब्राह्मणस्योक्तम्' इत्यादिवत् च । शाकादीनां केवलानां भोज्यत्वासिद्धेः शाकादिद्रव्यभेद इन्द्रादिदेवतानां भेदश्चाऽऽश्वलायनानामपि विषयः । आश्वलायनानां तु पक्षत्वेऽपि द्रव्यदेवतयोर्भेद एव । *आन्वष्टक्यमिति । अष्टकोत्तरक्षणम् । *यवसम्-आर्द्रतृणम् । *कक्ष गुल्मतृणम् । *उपोषेत् दहेत् । इति मार्गशीर्षः ।

(१) धनुश्चिह्नान्तर्गतं क पुस्तके नास्ति ।

ढीनां त्रिस्तिलानां त्रिपलदधि तथा
धकं गोमयं च ।
स्वं तोयाञ्जलीनां त्रिमरिचकमथो
ःपलाः सक्तवः स्युः
मूत्रं शर्करा सद्भिरिति विधिना
नुवारं क्रमेण ॥' इति ॥
कमलाकरभट्टकृते निर्णयसिन्धौ द्वितीयप॰
ौषमासः समाप्तः ॥
। पराः षोडश घटिकाः पुण्याः । अन्यत्सर्वं॰
त्सर्जननिर्णयो यजुर्वेदिनोऽप्युपाकर्मसङ्कटप्रा॰
पमरौ भविष्ये—
ते यदा देवि शुक्लाष्टम्यां बुधो भवेत् ।
नं जपो होमस्तर्पणं विप्रभोजनम् ॥
फलं देवि शतसाहस्रिकं भवेत् ॥'
ण्यार्द्रायोगे पुण्यतमत्वं तत्रैव ज्ञेयम् ।
शी मन्वादिः । सा चोक्ता प्राक् । पौषपौ॰
सर्वसम्पत्प्रदीपदयोऽष्टकाद्याः प्रागुक्ताः ।
ाहृयापामर्धोदयो योगविशेषः । तदुक्तं म
ारते—
ातश्रवणैर्युक्ता चेत्पौषमाघयोः ।
स विज्ञेयः कोटिसूर्यग्रहैः समः ॥'
ाघयोर्मध्यवर्तिनी॰पौषीपौर्णमास्युत्तरामा
ति भट्टाः । मदनरत्ने पौषस्य च माघस्य
। तत्र । हेमाद्रिविरोधात् । तत्र हि माघ च
—

ौर्णमास्युत्तरेति । 'माघामायां व्यतीपाते' इत्य॰

'दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन।' इ

इदमर्धमन्यनिबन्धेष्वभावान्निर्णयामृतमात्रोक्ते

मूलमेव। तेन*हेमाद्र्यादिमते रात्रावर्धोदयो भव

घ। कचित्तु—'किंचिदूनो महोदयः' इत्याहुस्त*न्निर्मू

म्। हेमाद्रौ मदनरत्ने च स्कान्दे—

'माघामायां व्यतीपाते आदित्ये विष्णुदैवते।

अर्धोदयं तद्विदुत्याहुः सहस्रार्कग्रहैः समम्॥'

तत्रैव—

'माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने।

वैष्णवेन तु ऋक्षेण व्यतीपाते सुदुर्लभे॥'

व्रतं कुर्यादित्यग्रेऽन्वयः। तत्रैव—

'ब्रह्मविष्णुमहेशानां सौवर्णाः पलसङ्ख्यया।

प्रतिमास्तु प्रकर्तव्यास्तदर्धेन द्विजोत्तम॥

(१)*साग्रं शतत्रयं शम्भोर्द्रोणानां तिलपर्वतः।

ग्निमवाक्याद। अत एव हेमाद्र्यादिविरोधादित्यपि। *हेम

द्र्यादिमते इति। वस्तुतस्तु—

"दिवैव योगः शस्तोऽयमुषःकालेऽपि वा यदि।

न तु रात्रौ स विज्ञेयो नरैर्धर्मपरायणैः॥"

इति नागरखण्डाद्रात्रौ योगो निर्मूल एवेति नव्याः। *तन्नि

र्मूलमिति।

"पातस्यान्ते पूर्वभागे स्वमायाः क्षोणामध्ये भास्करस्योदये च।

मानोर्वारे यद्धमित्याहुरार्याश्चन्द्रोर्वारे तन्महत्पूर्वमाहुः॥"

इति धर्मरत्नचित्रादावविरोधात्। अत्र पूर्णिमान्तमानेन माघाऽमा

ग्राह्या। 'माघे भानौ पुष्य अर्धोदयः स्यात्' इति तृतीयपादपाठे माघः

पूर्णिमान्तः। *साग्रं शतत्रयमिति। अत्र द्रोणानामिति श्रो॰

---

(१)'सार्धम्' इति ग पुस्तके।

कर्तव्यो पर्यतो विष्णुरुद्रयोः पूर्वसंख्यया ॥'
-त्युरत्र ग्रथा ।
'शय्याश्रयं ततः कुर्यादुपस्करसमन्वितम् ।'
-लिहोमं कृत्वा प्रतिमां दद्यादित्युक्तं स्कान्दे—
'अर्धोदये तु सम्प्राप्ते सर्वं गङ्गासमं जलम् ।
*शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसम्मिताः ॥
-यत्किञ्चिद्दीयते दानं तद्दानं मेरुसन्निभम् ।' इति ।
-त्र दानविशेषो निर्णयामृते स्कान्दे—
'चतुःषष्टिपलं मुख्यमधमं तत्र कारयेत् ।
चत्वारिंशत्पलं वाथ पञ्चविंशतिरेव वा ॥'
-त्रं पात्रम् । तच *कांस्यमयमित्युक्तं तत्रैव ।

-विष्ये—
'पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ।
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥
आढकैश्च चतुर्भिश्च द्रोणस्तु कथितो बुधैः ॥
कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणैस्तु षोडश ॥'
-ः शूर्पैस्त्रयैः । पक्षान्तरे—
'पलं च कुडवं प्रस्थ आढको द्रोण एव च ।
धान्यमाने तु विज्ञेयाः क्रमशो ऽमी चतुर्गुणाः ॥
द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते ।
कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिता ॥'
-र्विंशत्येत्यन्वयः । द्रोणाढकयोः परिमाणान्तरमाह
-कारः—
प्रस्थद्वाविंशतिर्द्रोणः स्मृतो दिक्प्रस्थ आढकः ।' इति ।
। च पलानां शतादिना कल्पस्या । मात्र इति पाठः ।
*शुद्धात्मान इति । पात्रापात्रपरीक्षानियमा-। *कांस्य-

'दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन।' इति।
इदमर्धमन्यनिबन्धेष्वभावान्निर्णयामृतमात्रोक्तेर्निर्मूलमेव। तेन*हेमाद्र्यादिमते रात्रावर्धोदयो भवत्येव। कश्चित्तु—'किंचिदूनो महोदयः' इत्याहुस्तन्निर्मूलम्। हेमाद्रौ मदनरत्ने च स्कान्दे—

'माघामायां व्यतीपाते आदित्ये विष्णुदैवते।
अर्धोदयं तादित्याहुः सहस्रार्कग्रहैः समम्॥'

तत्रैव—

'माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने।
वैष्णवेन तु ऋक्षेण व्यतीपाते सुदुर्लभे॥'

व्रतं कुर्यादित्यग्रेऽन्वयः। तत्रैव—

'ब्रह्मविष्णुमहेशानां सौवर्णीः पलसङ्ख्यया।
प्रतिमास्तु प्रकर्तव्यास्तदर्धेन द्विजोत्तम॥
(१)*सार्धं शतत्रयं शम्भोर्द्रोणानां तिलपर्वतः।

निर्मूलवाक्यात्। अत एव हेमाद्र्यादिविरोधादित्यपि। *हेमाद्र्यादिमते इति। वस्तुतस्तु—

"दिवैव योगः शस्तोऽयमुषःकालेऽपि वा यदि।
न तु रात्रौ स विज्ञेयो नरैर्धर्मपरायणैः॥"

इति नागरखण्डाद्रात्रौ योगो निर्मूल एवेति नव्याः। *तन्निर्मूलमिति।

"पातस्यान्ते पूर्वभागे स्वमायाः श्रोणामध्ये भास्करस्योदये च।
मानोर्वारे चार्द्धमित्याहुरार्याश्चन्द्रोर्वारे तन्महत्पूर्वमाहुः॥"

इति धर्मशास्त्रिवाक्यविरोधात्। अत्र पूर्णिमान्तमानेन माघोऽमा ग्राह्या। 'माघे भानौ पुष्य अर्द्धोदयः स्यात्' इति तृतीयपादपाठे माघः पूर्णिमान्तः। *सार्धं शतत्रयमिति। अत्र द्रोणानामिति द्रो-

(१)'सार्धम्' इति न पुस्तके।

माघे माघस्नाननिरूपणम् ।

पाद्मेऽपि—

'पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् ॥
त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद्विप्रवरोत्तम ॥' इति

त्रिकालस्नानं मासोपवासविषयम् । निराहार
पुरुषः । पूर्णिमान्तोदये त्वन्यथोक्तम् । विष्णुः—

*'दर्शं वा पौर्णमासीं वा आरभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ॥' इति ।

अत्र दर्शमिति शुक्लादिमुख्यचान्द्राभिप्रायेण । अन्यं
तु पक्षं नेदानीं प्रचरति । अत्राधिकारिणो भविष्ये—

'ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
बालवृद्धयुवानश्च नरनारीनपुंसकाः ॥
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्त्यीप्सितं फलम् ॥'

पाद्मे—

'सर्वेऽधिकारिणो(१)ह्यत्र विष्णुभक्तौ यथा नृप ।'

माघे—

'उष्णोदकेन वा स्नानमशक्तश्च करोति कुर्वते ।
एतेषु सर्वमासेषु उष्णोदं न विशिष्यते ॥'

वैष्णवामृते श्रीहरिभक्ते च स्कान्दे—

'पौष्यां तु समतीतायां यावत्स्यात्पूर्णिमा ।
माघमासस्य तावद्धि पूजा विष्णोर्विधीयते ॥
पितॄणां देवतानां च मूलकं नैव दापयेत् ।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम् ॥
अन्यथा याति नरकं क्षयविट् प्राय एव च ।

(१)'ह्यत्र' इति पुस्तके ।

'एवं सुघटितं कार्यं कांस्यभाजनमुत्तमम्।' इति।
तथा—

'निधाय पायसं तत्र पद्ममष्टदलं लिखेत्।
पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकम्॥
तदभावे तदर्धं वा तदर्धं वापि कारयेत्।
भूमौ तु तण्डुलैः शुद्धैः कृत्वाष्टदलमुत्तमम्॥
अमत्रे स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकम्।
तेषां पूजा ततः कार्या श्वेतमाल्यैस्तु शोभनैः।
वस्त्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत्॥'

मन्त्रस्तु—

'सुवर्णपायसामत्र यस्मादेतत्त्रयीमयम्।
आ(१)पत्तेस्तारकं यस्मात्तद् गृहाण द्विजोत्तम॥
ससुमेरुधरां पृथ्वीं सम्प्रदातुश्च यत्फलम्।
तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तमम्॥' इति।

इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ द्वितीयपरिच्छेदे पौषमासः।

अथ माघस्नानम्। तत्र विष्णुः—

'तुलामकरमेषेषु प्रातः स्नायी सदा भवेत्।
हविष्यं ब्रह्मचर्यं च माघस्नाने महाफलम्॥'

इति सौरमास उक्तः। चान्द्रे तु माधवः, उक्तः—

'एकादश्यां शुक्लपक्षे पौषमासे समारभेत्।
द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनम्॥' इति

दर्शमिति। अथवा, [illegible] एकादश्यादिपक्षमिति।

इति पौषमासः।

[illegible] एकादश्यादिमिति। द्वादश्यादि

(१) [illegible]

पाद्मेऽपि—

'पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् ॥
त्रिकालमर्चयन्विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद्विप्रावरोत्तम ॥' इति

त्रिकालस्नानं मासोपवासविषयम् । निराहारस्त्वुक्तेः । पृथ्वीचन्द्रोदये त्वन्यथोक्तम् । विष्णुः—

*'दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ॥' इति

अत्र दर्शमिति शुक्लादिमुख्यचान्द्राभिप्रायेण । उ
तु पक्षौ नेदानीं प्रचरतः । अथाधिकारिणो भविष्ये—

'ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
बालवृद्धयुवानश्च नरनारीनपुंसकाः ॥
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलम्

पाद्मे—

'सर्वेऽधिकारिणो(१)ह्यत्र विष्णुभक्तौ यथा नृप ।'

ब्राह्मे—

'उष्णोदकेन वा स्नानमशक्ये सति कुर्वते ।
हृदेषु सर्वगात्रेषु उष्णोदं न विशिष्यते ॥'

वैष्णवामृते गौडनिबन्धे च स्कान्दे—

'पौष्यां तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य तावद्धि पूजा विष्णोर्विधीयते ॥
पितॄणां देवतानां च मूलकं नैव दापयेत् ।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम् ॥
अन्यथा याति नरकं क्षत्रविट् शूद्र एव च ।

---

(१)'एतत्' इति क-पुस्तके ।

वर्जनीयं प्रयत्नेन मूलकं मदिरोपमम् ॥'

यदा तु माघो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वये स्नानं तन्नियमाश्च कार्याः। मासोपवासचान्द्रायणादि तु मलमास एव समापयेत्। तदुक्तं दीपिकायाम्—'नियतत्रिंशद्दिनत्वाच्छुभे मास्यारभ्य समापयेत मलिने *मासोपवासव्रतम्' इति। मासोपवासपदं चान्द्रायणादेरुपलक्षणम्। स्नानारम्भे च मन्त्रो विष्णुनोक्तः—

'तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकम्।
माघमासमिमं पूर्णं स्नास्येऽहं देव माधव॥
तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि॥' इति।

प्रत्यहं मन्त्रश्च पाद्मे—

'दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च।
प्रातःस्नानं करोम्यद्य माघे पापविनाशनम्॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव।
स्नानेनानेन मे देव यथोक्तफलदो भव॥
इमं मन्त्रं समुच्चार्य स्नायान्मौनसमन्वितः॥' इति।

प्रत्यहं सूर्यायार्घ्यम्। मन्त्रस्तु पृथ्वीचन्द्रोदये पाद्मे—

'सवित्र प्रसवित्रे च परं धाम जले मम।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा॥' इति।

स्नानकालश्च*सूर्योदयः। त्रिस्थलीसेतौ—

ति। 'माघे' इति शेषः। *दर्शे वेत्यादि पक्षान्तरम्।

"तुलामकरमेषेषु प्रातः स्नायी सदा भवेत्।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम्।"

इति च पक्ष उक्तः। *मासोपवासेति। चान्द्रायणादेरुपलक्षणम्।

'संप्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति सर्ववारीणि समुद्गच्छति भास्करे ॥
पुनीमः सर्वपापानि त्रिविधानि न संशयः ॥'

इति नारदीयोक्तेः ।

'यो माघमासमुषसि सूर्यकराभिमृष्टे
स्नाने समाचरति चारुनदीप्रवाहे ।
उद्धृत्य सप्तपुरुषान्पितृमातृपक्षान्
स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ ॥'

इति भविष्योत्तरवचनाच्च । प्रायः स्नानमरुणोदय उक्तः ॥

'अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः ।
माघमासि प्रयुगं ध्यायन्वा स्नाति सुरपूजितः ॥' इति

तथा—

'अरुणोदयमारभ्य प्रातःकालावधि प्रभो ।
माघस्नानपरो पुण्यं क्रमात्सप्रावधारणात् ॥
उत्तमं तु सनक्षत्रं मध्यमं लुप्ततारकम् ।
सवितर्युदिते भूप ततो हीनं प्रकीर्तितम् ॥' इति ।

तेनात्र शक्त्यपेक्षया व्यवस्था । इदं च स्नानं प्रयागेऽतिप्रशस्तम् ।

'कार्तिके शतगुणं प्रोक्तं माघमासुमवाङ्गये ।
सहस्रगुणितात्तापि भवेत्पौष्यवाहिनी ॥

अरुणोदय इति । अवयवाक्षपदः । अरुणस्य स्वार्-अरु-णोदय इति । तत्कालप्रभेदेन व्यवस्थापयतस्यात्-अरुणोद इति ।

"संप्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति सर्ववारीणि समुद्गच्छति भास्करे ॥
पुनीमस्तस्य पापानि त्रिविधानि न संशयः ॥"

पश्चिमाभिमुखी गङ्गा कालिन्द्या सह संगता।
हन्ति कल्पकृतं पापं सा माघे नृप दुर्लभा॥'

इत्यादि*पाद्मादिवचोभ्यः। विस्तरस्तु मत्पितामहकृतप्रयागसेतौ ज्ञेयः। ब्राह्मे—

'यत्र कुत्रापि यो माघे प्रयागस्मरणान्वितः।
करोति मज्जनं तीर्थे स लभेद्गाङ्गमज्जनम्॥'

तथा समुद्रेऽप्यतिप्रशस्तम्। तदुक्तं पृथ्वीचन्द्रोदये प्रभासखण्डे—

'माघे मासि च यः स्नायान्नैरन्तर्येण भावतः।
पौण्डरीकफलं तस्य दिवसे दिवसे भवेत्॥'

माघस्नानं काम्यमेवेति भट्टाः। विष्ण्वादिवाक्ये सदावश्यशब्दाभ्यां नित्यत्वावगतेर्नित्यकाम्यमिति तु युक्तम्। मासपर्यन्तं स्नानासंभवे तु त्र्यहमेकाहं वा स्नायात्।

'महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम्।'

इति लिङ्गात्।

'अस्मिन्योगे त्वशक्तोऽपि स्नायादपि दिनत्रयम्।
प्रयागे माघमासे तु त्र्यहं स्नातस्य यत्फलम्॥
नाश्वमेधसहस्रेण तत्फलं लभते भुवि॥'

इति पाद्मादिवचनात्। अत्र मकरसंक्रमो रथसप्तमी माघीति त्र्यहमित्येके। माघशुक्लदशम्यादीत्यन्ये। मकराद्यत्र्यह इत्यपरे। माघमासाद्यत्र्यह इति केचित्। त्रयोदश्यादीति बहवः।

'महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम्।'

इति पाद्मोक्तेः। एतस्यार्थवादत्वात्किंचिद्दिनत्रय-

इति तु नारदीयं स्नानाभिप्रायमेव। *पाद्मादीति। आदिना 'महामाघीं पुरस्कृत्येत्यादि' ग्रहः। तयोरस्या अनुकल्पतया माघीलाभात्।

मिति भट्टाः । तच्चं तु 'संदिग्धेषु वाक्यशेषात्' इति न्यायात्प्रयोगदृष्ट्यपेक्षेति । अरुणोदयं विनापि पाद्मे—

'अस्मिन्योगे स्वशक्तोऽपि स्नायादपि दिनत्रयम् ।' इति ।

माघस्नाने नियमास्तु नारदीये—

'न वह्निं सेवयेत्स्नातो ह्यस्नातोऽपि वरानने ।
होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन ॥
अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः ॥
अनभ्यङ्गी वरारोहे सर्वमासं नयेद् व्रती ॥'

तथा—

'अप्रावृतशरीरस्तु यः कुर्यात्स्नानमाचरेत् ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥'

तथा—

*'शङ्खचक्रधरं देवं माधवं नाम पूजयेत् ।
यदि कुर्या विधानेन ततस्त्वेकाशनो भवेत् ॥
भूशय्यां ब्रह्मचर्येण शक्तः स्नानं समाचरेत् ।

---

*अरुणोदयं विनापीति ।

"तडागेषु तु वा स्नायात्कूपे भाण्डादिके तथा ।
माघमासे वरारोहे यस्तं वै निम्नगाजलम् ॥
(भाण्डाश्रिते त्वयं विशेषः) ।
सरित्तोयं महावेगं नवकुम्भास्थितं तथा ।
वायुना ताडितं रात्रौ गङ्गातोयसमं स्मृतम् ॥"

विष्णुः—

"ततः स्नात्वा शुभे तीर्थे दत्त्वा शिरसि वै मृदम् ।
वेदोक्तविधिना राजन् सूर्यायार्घ्यं निवेदयेत् ॥
पितॄणां तर्पणं कृत्वा ह्युत्तीर्य ततो जलात् ॥"

*अशक्तौ ब्रह्मचर्यादौ स्वेच्छा सर्वत्र कथ्यते ॥

तथा—

(१)'तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ।
तिलभुक् *तिलदाता च षट्तिलाः पापनाशनाः ॥'
इति ।

तथा प्रयागासंभवे काश्यां दशाश्वमेधोत्तरस्थप्रयागतीर्थे स्नानमुक्तं काशीखण्डे—

'काश्युद्भवे प्रयागे ये तपसि स्नान्ति मानवाः ।
दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवम् ॥' इति ।

स्नानोत्तरं मदनपारिजाते विष्णुः—

'कार्ष्णमौनात्समस्कृत्य पूजयेत्पुरुषोत्तमम् ।
अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः ॥'

भविष्ये—

'तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ।
ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनाम् ॥
एवं स्नानावसाने तु भोज्यं देयमथारितम् ।
भोजयेद् द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः ॥
कम्बलाजिनरत्नानि वासांसि विविधानि च ।
चोलकानि च देयानि प्रच्छादनपटास्तथा ॥
उपानहौ तथा गुल्फमोचकौ पापमोचकौ ।
अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥'

पाद्मे—

एतदनन्तरं माधवपूजामाह—*काष्र्णेत्यादि । *अशक्तौ ब्रह्मचर्यादाविति । 'अवश्यमेव कर्तव्यम्' इति पठित्वा धनाद्यस्य बहुदानं कुर्वन् इत्यर्थं इति रामचन्द्रः । *तिलदातेति ।

(१) तिलस्नायीत्यनेन तिलयुक्तोदकेन स्नानं विहितम् ।

'भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम् ।'

तथा—

'अन्नं चैव यथाशक्त्या देयं माघे नराधिप ।
सुवर्णरक्तिकामात्रं दद्याद्वेदविदे तथा ॥'

माघान्ते तु विशेषो नारदीये—

'माघावसाने सुभगे षड्रसं भोजनं [1]स्तुतम् ।
सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः ।'
दुग्धपायसयोर्मध्ये सप्तधान्यसमन्विते ।
त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः ॥ इति ।

अत्र—

'एकादशीविधानेन व्रतस्योपोषणं तथा ।'

इति पाद्मवचनात् पूर्वेऽह्नि उपवासपूजनादि कृत्वा 'परेऽह्नि तिलयवाज्यैरष्टोत्तरशतं होमं कृत्वा-सविधं प्र-सविधं'-इति पूर्वोक्तं मन्त्रमुक्त्वा—

'दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेह माघस्नानमुपागते ॥'

इति समापयेदिति संक्षेपः ।

मकरसंक्रान्तौ हेमाद्रिमते परतश्चत्वारिंशद्घटिकाः पुण्याः ।

'त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः ।'

इति ब्रह्मवैवर्तात् । माधवमते तु विंशतिः ।

'त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः पराः ।'

---

[1]"अन्यत्रापि द्वादश्यां त्रितयाः शर्करयान्विताः ।
त्रिभागस्तु विज्ञानां हि चतुर्थः शर्करायुताः ॥"
स्तुतमिति ।
'सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः' ।

*अशक्तौ ब्रह्मचर्यादौ स्वेच्छा सर्वत्र कथ्यते ॥

तथा—

(१)'तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ।
तिलभुक् *तिलदाता च षट्तिलाः पापनाशनाः ॥'
इति ।

तथा प्रयागसंभवे काश्यां दशाश्वमेधोत्तरस्थप्रयागे तीर्थे स्नानमुक्तं काशीखण्डे—

'काश्युद्भवे प्रयागे ये तपसि स्नान्ति मानवाः ।
दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवम् ॥' इति ।

स्नानोत्तरं मदनपारिजाते विष्णुः—

'काष्ठमौनाग्नमस्कृत्य पूजयेत्पुरुषोत्तमम् ।
अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः ॥'

भविष्ये—

'तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ।
ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनाम् ॥
एवं स्नानावसाने तु भोज्यं देयमवारितम् ।
भोजयेद् द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः ॥
कम्बलाजिनरत्नानि वासांसि विविधानि च ।
चोलकानि च देयानि प्रच्छादनपटास्तथा ॥
उपानहौ तथा गुल्फमोचकौ पापमोचकौ ।
अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥'

पाद्मे—

एतदनन्तरं माधवपूजामाह—*शङ्केत्यादि । *अशक्तौ ब्रह्मचर्यादाविति । 'अशक्तस्य धनाढ्यस्य' इति पठित्वा धनाढ्यस्य बहुदानं कुर्वत इत्यर्थ इति रामचन्द्रः । *तिलदातेति ।

(१) तिलस्नायीत्यनेन तिलयुक्तोदकेन स्नानं विहितम् ।

'भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम् ।'

तथा—

'अन्नं चैव यथाशक्त्या देयं माघे नराधिप ।
सुवर्णरक्तिकामात्रं दद्यात्षेदद्विजे तथा ॥'

माघान्ते तु विशेषो नारदीये—

'माघावसाने सुभगे षड्रसं भोजनं स्मृतम् ।
सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः ।'
दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ।
त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः ॥ इति ।

अथ—

'एकादशीविधानेन व्रतस्योद्यापनं तथा ।'

इतिः पाद्मवचनात् पूर्वेऽह्नि उपवासपूजनादि कृत्वा 'परेऽह्नि तिलखण्डाज्यैरष्टोत्तरशतं होमं कृत्वा–सवित्रे प्रसवित्रे'-इति पूर्वोक्ते मन्त्रमुक्त्वा–

'दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेह माघस्नानमुपःपते ॥'

इति समापयेदिति संक्षेपः ।

मकरसंक्रान्तौ हेमाद्रिमते परतश्चत्वारिंशद्घटिकाः पुण्याः ।

'त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः ।'

इति ब्रह्मवैवर्तात् । माधवमते तु विंशतिः ।

'त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः पराः ।'

"अह्न्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
त्रिभागस्तु तिलानां हि चतुर्थः शर्करांशकः ॥"

षड्रसं भोजनं स्मृतमिति ।

'सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः' ।

इति वृद्धवसिष्ठोक्तेः। यदा तु सूर्यास्तात्पूर्वं संक्रान्तिर्भवति तदोभयमते पूर्वमेव पुण्यकालः। रात्रौ तु प्रदोषे निशीथे वा मकरसंक्रमे माधवमते द्वितीयदिन एव पुण्यम्।

'ययस्तमयवेलायां मकरं याति भास्करः।
प्रदोषे वार्धरात्रे वा स्नानं दानं *परेऽहनि।'

इति वृद्धगार्ग्यवचनात्। अस्तमयं प्रदोषः। प्रदोषे पूर्वरात्रे।

'कार्मुकं तु परित्यज्य झषं संक्रमते रविः।
प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि।'

इति भविष्योक्तेश्च। 'तदा भोगः परेऽहनि' इति हेमाद्रौ पाठः। कालादर्शनिर्णयामृतमदनपारिजातादयोऽप्येवमूचुः। दाक्षिणात्याश्चैनदेवाद्रियन्ते। यत्तु हेमाद्रिणाऽऽद्यो वाशब्दो यथार्थे द्वितीयस्तथार्थे। यथा प्रदोषे पूर्वेद्युस्तथार्धरात्रे परेऽह्नीत्युक्तं तस्मै नमोऽस्तु। तेन परेऽह्नि पुण्यं वक्तुं प्रदोषे इति। दिनद्वये पुण्यनिरासार्थमर्धरात्रग्रहणम्। हेमाद्रिस्मृत्यर्थसारानन्तभट्टादिमते तु निशीथात्पूर्वं पश्चाच्च संक्रान्तौ पूर्वदिने परदिने वा पुण्यम्।

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा।
*पूर्वापरविभागेन रात्रौ संक्रमणं यदा॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि॥'

इत्युत्तरार्द्धम्। *परेऽहनीति।
'आसन्नसंक्रमं पुण्यं दिवार्द्धं स्नानदानयोः।'
इति बोध्यम्। *पूर्वापरविभागेनेति। पुण्यत्वमभिप्रायः।

इति स्कान्दवचनात् । पूर्वापरविभागेनेति मकरकर्कभिन्नविषयम्, पूर्वोक्तवचोविरोधादिति मदनरत्ने उक्तम् ।

'षडशीतिमुखेऽतीते अतीते चोत्तरायणे ।'

इत्यादिविरोधाच्च । तेन पूर्वोक्तवाक्यानामयमर्थः— रात्रौ पूर्वभागे मकरसंक्रमे परेऽह्नि उदये पञ्च नाड्यः पुण्याः, रात्रावपरभागे कर्कसंक्रमे पूर्वदिनान्ते पञ्च नाड्य इति । एवं सर्वेषामविरोधः । मकरे सामान्येन परदिने पुण्यस्येति पुण्यातिशयार्थमिदम् । यत्तु देवलगर्गाभ्यां—

'आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः ।
रात्रौ संक्रमणे भानोर्विषुवत्ययने दिवा ॥' इति ।

अत्र माधवः । अयने दिवा जाते तद्दिनं पुण्यम् । कर्के पूर्वं मकरेऽन्त्यम् । एतन्मदनरत्नादावपरास्तमिति । हेमाद्रिस्तु रात्रौ विषुवत्संक्रमे दिनार्धं पुण्यम् । अयने स्वासन्नदिने पुण्यम् । दिने इति पाठे उभयत्र दिनार्धं पुण्यमित्याह । एतदेवोक्तं दीपिकायाम्—'अयनयमयोः पश्चाद्भिसीधात्प्रवियत्यासन्नमहस्तदर्धमथवा पुण्यम्' इति । तन्न । आसन्नसंक्रममित्यस्य विषुवद्विषयत्वात् । अयने रात्रौ सति दिने पुण्यम् । कारिकाविवेकाद्यौ कर्के पूर्वेऽह्नि मकरे परेऽह्नि इति बाधकान्तरवचनाद्ये श्रूयमाणे न कोऽपि विरोधः । यत्त्वनन्तभट्टः—

'अथ संक्रमणं भानोर्निशीथात्प्राग्यदा भवेत् ।
अयने विषुवे तत्र प्राग्दिनान्त्यमनाडिकाः ॥
पञ्च पुण्यतमाः पश्चान्निशीथादूर्ध्वतस्तथा ।
आद्याः परदिनस्यापि तद्वदित्येव निर्णयः ॥' इति ।

अपरार्केऽप्येवम्—

'अस्तं गते यदा सूर्ये मृगं याति दिवाकरः ।

प्रदोषे वार्धरात्रे वा तदा पुण्यं दिनत्रयम् ॥'

इति बौधायनवचनाद्दिनत्रयं वा पुण्यकालः। 'तदा पुण्यं दिनान्तरम्' इति मदनरत्ने पाठः। गुर्जरप्राच्योदीच्यास्त्विदमेवाद्रियन्ते। अत्रापि पूर्ववद्व्याख्येयम्। तिथितत्त्वादयो गौडग्रन्थास्तु प्रदोषार्धरात्रमध्ये रात्रेः पूर्वभागे पूर्वदिने परभागे च परदिने पुण्यमन्यसंक्रान्तिवत्, विशिष्य (१)तयोर्निर्देशात्। प्रदोषश्च—

'प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते।'

इति वत्सोक्त इत्याहुः। तन्न। 'अस्तं गते' इति त्रिमुहूर्तस्यैवोक्तत्वात्। अतः प्रदोषपदेन तावत्येव रात्रिरुच्यते। अत एव-'यामशेषेऽस्तगते रवौ' इति वृद्धगार्ग्यादिनिर्दिष्टापवादे पूर्वरात्रौ संक्रमे पूर्वदिनमुक्तम्। वत्सोक्तिस्त्वन्यवचनादिपरा। इह तु त्रिमुहूर्त एव प्रदोषः।

मकरे दानविशेषाः कुमारीखण्डे—

'धेनुं तिलमयीं राजन्दद्याद्यश्चोत्तरायणे।
सर्वान्कामानवाप्नोति विन्दते परमं सुखम्॥'

विष्णुधर्मे—

'उत्तरे त्वयने विप्र वस्त्रदानं महाफलम्।
तिलपूर्णमनड्वाहं दत्त्वा रोगैः प्रमुच्यते॥' इति।

शिवरहस्येऽपि—

'मकरे कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं शुभैः।
तिला देयाश्च विप्रेभ्यः सर्वदैवोत्तरायणे॥
तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः॥'

इत्यन्तौ काशिकापुराणे—

'होमं तिलैः प्रकुर्वीत सर्वदैवोत्तरायणे।

(१) क. ख. तयोर्विशेषनिर्देशात्।

*तान्यो*देवाय विप्रेभ्यो हाटकेन समं ददेत् ॥
उत्तरायणमासाद्य नरः कस्मात्स शोचति ॥'
तथा मकरे रात्रावपि श्राद्धादि भवतीत्युक्तं प्राक् ।
माघामायां योगविशेषोऽर्धोदयः प्रागेवोक्तः । माघ-
कृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेन—
'अनर्काभ्युदिते काले माघकृष्णचतुर्दशीम् ।
स्नातः संतर्प्य तु यमं सर्वपापैः प्रमुच्यते ॥' इति ।
*माघशुक्लचतुर्थी तिलचतुर्थी । सा*प्रदोषव्यापिनी ।
माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः ।
ये त्वां दुण्ढेऽर्चयिष्यन्ति तेऽर्च्याः स्युरसुरद्रुहाम् ॥'
इति काशीखण्डात् ।
'माघमासे चतुर्थ्यां तु*तस्मिन्काल उपोषिता ।
अर्चयित्वा तु यो देवि जागरं तत्र कारयेत् ॥'
इति चिन्तामणौ(?) लैङ्गाच्च । इयमेव कुन्दचतुर्थी ।

---

*मकरकर्कभिन्नेति । तथा मकरे परेद्युरेव पुण्यं कर्के तु पू-
र्वेद्युरेव तुलामेषयोश्च पूर्वेद्युः परेद्युश्चेत्यर्थः ।
*तान्य इति । तान् तिलान् हुत्वा तिलहोमं कुर्यादित्यर्थः ।
*देवायेति । देवं विष्णुं चोद्दिश्य हवनदानं च कुर्यादित्यर्थः ।
वैष्णवामृते—
"पौष्यां तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य तावद्धि पूजा विष्णोर्विधीयते ॥
पितॄणां देवतानां च मूलकं नैव दापयेत् ।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ॥
अन्यथा याति नरकं सप्तविंशद्द एव च ।
वर्जनीयं प्रयत्नेन मूलकं मदिरोपमम् ॥" इति ।
*प्रदोषेति । नक्तव्रतत्वात् । *तस्मिन्काले प्रदोषकाले ।

प्रदोषे वार्धरात्रे वा तदा पुण्यं दिनद्वयम् ॥'

इति बौधायनवचनाद्दिनद्वयं वा पुण्यकालः। 'तदा पुण्यं दिनान्तरम्' इति मदनरत्ने पाठः। गुर्जरप्राच्योदीच्यास्त्विदमेवाद्रियन्ते। अत्रापि पूर्ववद्व्याख्येयम्। तिथितत्त्वादयो गौडग्रन्थास्तु प्रदोषार्धरात्राभिन्ने रात्रेः पूर्वभागे पूर्वदिने परभागे च परदिने पुण्यमन्यसंक्रान्तिवत्, विशिष्य (१)तयोर्निर्देशात्। प्रदोषश्च—

'प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते।'

इति वत्सोक्त इत्याहुः। तन्न। 'अस्तं गते' इति त्रितयवैयर्थ्यापत्तेः। अतः प्रदोषपदेन लक्षणैव रात्रिरुच्यते। अत एव-'यावन्नोदयते रविः' इति वृद्धगार्ग्यादिभिर्दक्षिणायने पूर्वरात्रौ संक्रमे पूर्वदिनमुक्तम्। वत्सोक्तिरप्यध्ययनादिपरा। इह तु त्रिमुहूर्त एव प्रदोषः।

मकरे दानविशेषो हेमाद्रौ स्कान्दे—

'धेनुं तिलमयीं राजन्दद्याद्यश्चोत्तरायणे।
सर्वान्कामानवाप्नोति विन्दते परमं सुखम्॥'

विष्णुधर्मे—

'उत्तरे त्वयने विप्रा वस्त्रदानं महाफलम्।
तिलपूर्णमनड्वाहं दत्त्वा रोगैः प्रमुच्यते॥' इति।

शिवरहस्येऽपि—

'तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं शुभैः।
तिला देयाश्च विप्रेभ्यः सर्वदैवोत्तरायणे॥
तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः॥'

कल्पतरौ कालिकापुराणे—

'होमं तिलैः प्रकुर्वीत सर्वदैवोत्तरायणे।

(१) वचः प्रदोषार्धपदयोः।

*तान्वा*देवाय विप्रेभ्यो द्वादकेन समं ददेत् ॥
उत्तरायणमासाद्य नरः कस्मात्स शोचति ॥'
तथा मकरे रात्रावपि श्राद्धादि भवतीत्युक्तं प्राक्।
माघामायां योगविशेषोऽर्धोदयः प्रागेवोक्तः। माघ-
कृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेन—
'अनर्काभ्युदिते काले माघकृष्णचतुर्दशीम्।
स्नातः संतर्प्य तु यमं सर्वपापैः प्रमुच्यते॥' इति।
*माघशुक्लचतुर्थी तिलचतुर्थी। सा*प्रदोषव्यापिनी।
माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः।
ते स्वर्गं तुण्डेऽर्चयिष्यन्ति तेऽर्च्याः स्युरसुरद्रुहाम् ॥'
इति काशीखण्डात्।
'माघमासे चतुर्थ्यां तु*तस्मिन्काले उपोषितः।
अर्चयित्वा तु यो देवि जागरं तत्र कारयेत् ॥'
इति शिवरहस्ये च। इयमेव कुन्दचतुर्थी।

---

*मकरकर्कभिन्नेति। तथा मकरे परेद्युरेव पुण्यं कर्के तु पू-
र्वेद्युरेव तुलामेषयोश्च पूर्वेद्युः परेद्युश्चेत्यर्थः।
*तान्व इति। तान् तिलान् दद्यात् तिलहोमं कुर्यादित्यर्थः।
*देवायेति। देवं विप्रं चोद्दिश्य स्वर्णदानं च कुर्यादित्यर्थः।
विष्णवामृते—
"पौष्यां तु समतीतायां यावद्भवति पूर्णिमा।
माघमासस्य वासरे पूजा विष्णोर्विधीयते ॥
पितॄणां देवतानां च मूलकं नैव दापयेत्।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ॥
अन्यथा याति नरकं सप्तविंशद्युगं एव च।
वर्जनीयं प्रयत्नेन मूलकं मदिरोपमम् ॥" इति।
*प्रदोषेति। नक्तव्रतत्वात्। *तस्मिन्काले प्रदोषकाले।

सा*प्रदोषव्यापिनी ग्राह्या ।

'माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदाशिवम् ।
संपूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नरः ॥'

इति कालादर्शे कौर्मोक्तेः ।

माघशुक्लपञ्चमी०श्रीपञ्चमी । तदुक्तं हेमाद्रौ वाराहे-

'माघशुक्लचतुर्थ्यां तु*वरमाराध्य च श्रियः ।
पञ्चम्यां कुन्दकुसुमैः पूजां कुर्यात्समृद्धये ॥'

इयं माधवमते पूर्वा, हेमाद्रिमते परा । चैत्रशुक्ले श्रीपञ्चमीति दिवोदासः ॥

माघशुक्लसप्तमी रथसप्तमी । सा अरुणोदयव्यापिनी ग्राह्या ।

'सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥'

इति चन्द्रिकायां विष्णुवचनात् ।

अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।

विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम् ।
एलान्पक्वतिलान् बध्वा माउनीयाल्लड्डुकान्वती ॥
तां यात्रां नात्र यः कुर्यान्नैवेद्यं तिललड्डुकैः ।
उपसर्गसहस्रैस्तु स हन्तव्यो ममाज्ञया ॥"

इत्यादि काशीखण्डे विस्तरः । *प्रदोषव्यापिनीति । नक्ताशीत्युक्तेः । वस्तुतस्तु मध्याह्नव्यापिनीति बहुपुस्तकपाठो युक्तः पूजाप्रधानत्वात्, नक्तस्त्वनिर्णायकम् । अङ्गत्वात् । ०श्रीपञ्चमीति । तत्र श्रीपूजा कार्या ।

"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यं मङ्गलं कुर्यात्पञ्चम्यां श्रीरपि श्रियम् ॥"

इति भविष्ये ऽभिधानात् । *वरमाराध्येति ।

प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा ॥'
इति वचनाच्च । यत्तु दिवोदासीये–
*'अचलासप्तमी दुर्गा शिवरात्रिर्महाभरः ।
द्वादशी वत्सपूजायां सुखदा प्राग्युता सदा ॥'
इति षष्ठीयुतत्वमुक्तम्, तद्यदा पूर्वेद्युः घटिकाद्वयं षष्ठी

श्रियो वरं सलक्ष्मीकं विष्णुम् । माहात्म्यमिदं मतम् । एवं-
यद्यपथम्यां रतिकामपूजादिवसन्तोत्सवः कार्यः ।

"माघमासे सुरश्रेष्ठ शुक्लायां पञ्चमीतिथौ ।
रतिकामौ तु सम्पूज्य कर्तव्यः सुमहोत्सवः ॥
दानानि च प्रदेयानि येन तुष्यति माधवः ॥"

इति पुराणसमुच्चयात् । मध्याह्नः कर्मकालः पूजाप्रकरणात् । श्रीकृष्णभक्तैस्तत्र सलक्ष्मीको भगवान् श्रीकृष्णः पूज्यः । 'वरमारभ्य च श्रियः' इत्युक्तेः । तत्र श्रेयःप्राप्तिपातेन पूर्वाह्णो ग्राह्यः ।

"श्रेयाविभक्तदिवसे प्रातःकाले सुरार्चनम् ।
मध्याह्ने तीर्थकार्यं च सायं रक्षाकरी क्रिया ॥"

इति दिनकरोद्योतवचनात् । दिनद्वये तदेकदेशव्याप्तौ सम्पूर्णत्वे च परा ।

'शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।'

इति वचनात् । पूर्वयुक्तानामपि पुष्पवाक्यं तु नेह मतम्-
वे तदुपोपवासे तावत्कालत्वात् । दिनक्षये तु पूर्वा ।

"तिथ्यादौ च भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ॥"

इति वचनात् । तत्र रतिकामपूजा मुख्यम् । महोत्सवादिकं तु कृष्णप्रीतये एव । 'येन तुष्यति माधवः' इत्युपसंहारादिति ।

*अचलासप्तमी रथसप्तमी । अचलाव्रतस्य तत्र सत्त्वात् ।

सप्तमी च परेद्युः [illegible] समाप्ता तदा [illegible] ज्ञेयम्। तत्र षष्ठ्यां [illegible] स्नानं कार्यम्। [illegible] भविष्योत्तरे–

'माघे मासि सिते पक्षे सप्तमी कोटिभास्करा।
कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः॥'

अत्र विधि[illegible]–

(१)'[illegible]
[illegible]॥'

[illegible]–

[illegible]

[illegible]

किरणसर्वात्मकान् संपूज्य गृहं गच्छेदिति । स्नानमन्त्रश्च कार्डास्तण्डे–

'यद्यज्जन्मकृतं पापं मया जन्मसु सप्तसु ।
तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी ॥
एतज्जन्मकृतं पापं यच्च जन्मान्तरार्जितम् ।
मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः ॥
इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके ।
सप्तव्याधिसमायुक्तं हर माकरि सप्तमि ॥
एतन्मन्त्रत्रयं जप्त्वा स्नात्वा पादोदके नरः ।
केशवादित्यमालोक्य क्षणान्निष्कलुषो भवेत् ॥'

दिवोदासीये मदनरत्ने च इक्षुदण्डेन जलं चालयित्वा*सप्तार्कपत्राणि बदरीपत्राणि च शिरसि निधाय पूर्वोक्तैर्मन्त्रैः*स्नात्वा तिलपिष्टयवापूपैर्हेमं सूर्यं संपूज्य विप्राय दद्यात् । *अर्घ्यमन्त्रो मदनरत्ने–

'सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ॥'

"याम्ये दले रविः पूज्यो भानुर्वैश्वानले तथा ।
याम्ये विवस्वान्नैर्ऋत्ये भास्करं पूजयेद्बुधः ॥
पश्चिमे सविता पूज्यः पूज्योऽर्कश्चानिले दले ।
सौम्ये सहस्रकिरणः शैवे सर्वात्मकस्तथा ॥
पूज्याः प्रणवपूर्वास्तु नमस्कारान्तयोजिताः ।
पुष्पैश्च गन्धधूपाद्यैः पृथक्त्वेन युधिष्ठिर ॥
विसृज्य वस्त्रसंवीतः स्वस्थानं गम्यतामिति ॥"

इति वचनात् ।

*सप्तार्केति । अत्र प्रमाणं मदनरत्न एव बोध्यम् । इदानीन्तनाश्चाचरन्ति । *स्नात्वेति । स्नानानन्तरमर्घ्यं दद्यात् ।

सप्तमी च परेद्युः क्षयवशादरुणोदयात्पूर्वं समाप्यते तदपरे ज्ञेयम्। तत्र षष्ठ्यां सप्तमीक्षयं प्रवेश्यारुणोदये स्नानं कार्यम्। मदनरत्ने भविष्योत्तरे-

'माघे मासि सिते पक्षे सप्तमी कोटिभास्करा।
कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः॥'

अत्र विधिर्भविष्ये-

(१)'स्नात्वा षष्ठ्यामेकभक्तं सप्तम्यां नियतं जपम्।
[illegible] दत्त्वा दिवाकरम्॥'

तथा जले प्रकारम्-

[illegible]

[illegible]

सोऽमङ्गलफलगतिरेव मही भुनक्ति ॥'

इयं मन्वादिरपि । इयं च शुक्लपक्षस्थत्वात्पौर्वाह्णिकी ग्राह्या । यदा माघो मलमासो भवति तदा मासद्वये मन्वादिश्राद्धं कुर्यात्

'मन्वादिकं तैथिकं च कुर्यान्मासद्वयेऽपि च ।'

इति स्मृतिचन्द्रिकोक्तेः ॥

माघशुक्लाष्टमी भीष्माष्टमी । तदुक्तं हेमाद्रौ पाद्मे—

'माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम् ।
श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिनः ॥' इति

भारतेऽपि—

'शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥'

इति चयलनिबन्धे स्मृतिः ।

'अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकम् ।

मन्त्रो दिवाकराद् दृष्टः कण्वेन मुनिना पुरा ॥
पुत्रस्य रोगनाशार्थं रूपातो लोकहिताय च ।"

इत्यादिः । तत्र पादशो द्वादशमन्त्राः, अर्धर्चशः षट्, ऋक्शः त्रय ऋक्त्रयश इति चतुर्विंशतिमन्त्राः प्रणवादयः । मित्रः रविः सूर्यः भानुः खगः पूषा हिरण्यगर्भः मरीचिः आदित्यः सविता अर्कः भास्कर एतानि द्वादशनामानि पादान्ते योजयेत् । 'ॐउद्यन्नद्यमित्र-महः ॐमित्राय नमः इत्यादि १२, ततः अर्धर्चान्ते ॐमित्रर-विभ्यानमः इत्यादि षट्, तत ऋगन्ते ॐमित्ररविसूर्यभानुभ्यो नम इत्यादि त्रयः । ततः ऋक्त्रयान्ते ॐमित्ररविसूर्यभानुख-गपूषहिरण्यगर्भमरीचिआदित्यसवित्रर्कभास्करेभ्यो नम इति त्रय इति चतुर्विंशतिरावर्तनं भवति । एवमर्घ्यादि । तदुक्तम्—

"चतुर्विंशत्यर्धर्चैरेकमावर्तनं स्मृतम् ।

ततः–

'जननी सर्वलोकानां सप्तमी सप्तसप्तिके ।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ॥'

इति प्रार्थयेत् । सौरागमे–

'अर्कपत्रैः सबदरैर्दूर्वाक्षतसचन्दनैः ।
*अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥'

अत्र दानविशेषो मदनरत्ने भविष्ये–

'ताम्रपात्रे यथाशक्त्या मृन्मये वाथ भक्तिमान् ।
स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा ॥
काञ्चनं तालकं कृत्वा अशक्तस्तिलपिष्टजम् ।
संछाद्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत् ॥'

दानमन्त्रस्तु—

'आदित्यस्य प्रसादेन प्रातःस्नानफलेन च ।
दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकम् ॥'

तालकं कर्णाभरणमिति तत्रैवोक्तम् । दीपपात्रमिति हेमाद्रौ । तत्रैव भविष्योत्तरे—

एवंविधं रथवरं रथवाजियुक्तं
हैमं च हैमशतदीधितिना समेतम् ।
दद्याच्च माघसितसप्तमिवासरे यः

तत्र मन्त्रमाह–*अर्घ्यमन्त्र इत्यादिना । *अष्टाङ्गविधिनेति ।

"आपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा ।
यवाः सिद्धार्थकाश्चेति अर्घ्योऽष्टाङ्गः प्रकीर्तितः ॥"

अर्कपत्रपदमर्कपुष्पोपलक्षणम् । अक्षताः–यवाः । घृणिः सूर्य आदित्याय नम इति मन्त्रः । केचित्तु ऋग्विधानोक्तप्रकारेण अर्घ्यदानमारभ्यमपि कुर्वन्ति । ऋग्विधाने —

"उदघ्नघेति मन्त्रोऽयं सौरः पापप्रणाशनः ।

'जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।'
इति पाद्मोक्तेरिति जीवत्पि(१)तृकनिर्णये पितृचरणैरुक्तम् । एतच्चापसव्येन कार्यमिति दिवोदासीये । अत्र श्राद्धं काम्यं, तर्पणं च नित्यम् ।
'ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम ॥'
इति मदनरत्ने वचनात् ।

आद्यविरेकाः पदषष्टिसंपैः परिकीर्तिता ।
चतुर्विंशतिसंख्याभिस्ताभिरंशाः प्रकीर्तिताः ॥
ऋत्विन्दुधून्यचयुग्रहिमितैर्लघुस्ते-
र्वेदाष्टवह्निपवनेन्दुनवान्वितैस्तैः ।
अर्घ्यो भवेदपि महान् रसचन्द्रनेत्र-
पातालनाथरसदिःकरिचन्द्रनेत्रैः ॥'इति ।
एवं साष्टाङ्गनमस्कारा अपि कार्याः । साष्टाङ्गलक्षणं च-
"उरसा मनसा दृष्ट्या शिरसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥" इति ।
अत्र केचित् आगमानुसारेण ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति बीजान्यपि त्रिभागादिना लावयन्ति । तद्विस्तारः पद्धतौ बोध्यः । आद्यविः २४ । अंश ५७६ । लघु १३८२४ । अर्घ्य ३३१७७६ । महार्घ्य ७९६२६२४ । अथवा आद्यवि ६१ । अंश १५८४ । लघु १८०१६ । अर्घ्य ९१२३८४ । महार्घ्य । २१८९७२१६ ।
ब्राह्मणाद्या इति । केचित्तु 'वर्मत्वं क्षात्रिये मोक्तम्' इति वचनात्तर्पणादिके वर्मशब्दसत्त्वाद्भीष्मस्य क्षत्रियत्वेन तदुद्देशक-श्राद्धतर्पणे ब्राह्मणेन न कार्यं ।
"ब्राह्मणो हीनवर्णस्य यः करोत्यौर्ध्वदैहिकम् ।

(१) 'अत्र जीवत्पितृकस्य नाधिकारः'इति कौस्तुभे ।

अर्घं च विधिवद्दद्युः सर्वे वर्णा द्विजातयः ॥'

सर्ववर्णोक्तेर्द्विजातय इति संबोधनम् । तर्पणमन्त्रस्तत्रैव ।

'भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोति पुत्रपौत्रोचितां क्रियाम् ॥
वैयाघ्रपद्गोत्राय सांकृत्यप्रवराय च ।
अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥
वसूनामवताराय शन्तनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे ॥' इति ।

एतज्जीवत्पितृकस्यापि भवति ।

आवर्तनं चतुर्विंशत्यर्घिणीति प्रकीर्तिता ॥
चतुर्विंशत्यर्घिणीभिर्लघ्वर्घश्च प्रजायते ।
लघ्वर्घैश्च चतुर्विंशत्यर्घैश्चैकः प्रजायते ॥
चतुर्विंशतिरर्घैश्च महार्घः सम्प्रकीर्तितः ।
महदर्घैश्चतुर्विंशैरत्यर्घः परिकीर्तितः ॥"

अथवा—

"आद्वचिरेका मेसपाश्चतुर्विंशतिरीरिताः ।
तावतीभिरिडैकाभिस्तावद्भिस्तैर्लघुर्भवेत् ॥
तावद्भिरेव लघुभिरेकोऽर्घः स्यादसंशयम् ।
तावद्भिरर्घैरेकोऽत्र महार्घः परिकीर्तितः ॥
षट्सप्ताधिकैः पञ्चावर्तनः प्रकीर्तितः ।
एकोनाशीतिलक्षैर्द्विःषष्टिभिश्च सहस्रकैः ॥
महार्घैश्च चतुर्विंशत्यधिकैः षट्शतैर्भवेत् ।"

अथवा—

रसर्तुसप्तमितसंख्यैरावृत्तिः परिकीर्तिता ।
युगाष्टबाणचन्द्रैस्तैरंशोऽप्यत्र प्रकीर्तितः ॥

'जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।'
इति शास्त्रोक्तेरिति जीवत्पि(१)तृकनिर्णये पितृचर
रुक्तम् । एतच्चापसव्येन कार्यमिति दिवोदासीये । अ
श्राद्धं काम्यं, तर्पणं च नित्यम् ।

*ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम ॥'
इति मदनरत्ने वचनात् ।

आहुतिरेका षट्षष्टिमितैः परिकीर्तिता ।
चतुर्विंशतिसंख्याभिस्ताभिरंशः प्रकीर्तितः ॥
वारिचन्द्रशून्यचक्षुर्वह्निमितैर्लघुस्तैः-
र्वेदाष्टवह्निनयनेन्दुनवाग्निरंकैः ।
अर्घो भवेदपि महान् रसचन्द्रनेत्र-
पातालनागरसदिक्करिचन्द्रनेत्रैः ॥" इति ।

एवं साष्टाङ्गनमस्कारा अपि कार्याः । साष्टाङ्गलक्षणं च—
"उरसा मनसा दृष्ट्या शिरसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥" इति ।

अत्र केचित् आगमानुसारेण ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति बीजान्यपि विभागादिना ज्ञापयन्ति । तद्विस्तारः पद्मनी बोध्यः । आहुतिः २४ । अंश ५७६ । लघु १३८२४ । अर्घ ३३१७७६ । महार्घ ७९६२६२४ । अथवा आहुति ६६ । अंश १५८४ । लघु ३८०१६ । अर्घ ९१२३८४ । महार्घ २१८९७२१६ ।

*ब्राह्मणाद्या इति । केचित्तु 'वर्णानां क्षत्रियादीनाम्' इति वचनाद्वर्णशब्दस्य वर्णान्तरपरत्वात् भीष्मस्य क्षत्रियत्वेन शूद्रवत्-श्राद्धतर्पणे ब्राह्मणेन न कार्यम् ।

"ब्राह्मणो हीनवर्णस्य यः करोत्यौर्ध्वदेहिकम् ।

(१) 'अत्र जीवत्पितृकस्य नाधिकारः' इति कौस्तुभे ।

*माघशुक्लद्वादशी भीष्मद्वादशी ।
'त्वया कृतमिदं वीर तव नाम्ना भविष्यति ।
सा भीष्मद्वादशीत्येषा सर्वपापहरा शुभा ॥'

इति हेमाद्रौ पाद्मवचनात् । इयं पूर्वयुता युग्मवाक्यात् । माघी पूर्णिमा परेद्युरुक्तं प्राक् । तथा हेमाद्रौ ब्राह्मे—

'मघास्थयोश्च जीवेन्द्वोर्महामाघीति कथ्यते ॥'

तत्रैव ज्योतिषे—

स तां गतिमवाप्नोति इहलोके परत्र च ॥"

इति मरीचिवचनात् । एतच्च ब्राह्मणाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा तत्र क्षत्रियादेरेवाधिकार इत्याहुः । नव्यास्तु म[illegible]वचनानुरोधेन वर्मशब्दयुक्तमन्त्रं विहाय 'वसूनामवताराय' इत्यादिनैव मन्त्रेण तर्पणं कार्यम् । अत एव ब्राह्मणाद्या इति तद्गुणसंविज्ञानबहुव्रीहिरित्याहुः । [illegible] । भीष्मस्य वसुत्वेन देवत्वात् मरीचिवाक्यस्य मनुष्यपरत्वात् हीन[वर्णो]त्तरस्य वर्णान्तरस्य मनुष्यत्वाभावात् ।

"अपुत्रो न पिता यस्य भीष्माय तु तिलोदकम् ।
अत्र न विचिकित्सा स्यात् सर्वे वर्णा द्विजातयः ॥"

इति [illegible] वचनात् । द्विजातय इति [illegible] । [illegible] भीष्मतर्पणादिकं कार्यम् । परन्तु ब्राह्मणैः [illegible] । [illegible] वदन्ति ।

*माघशुक्लद्वादशीति । [illegible] ।

"[illegible] न [illegible] ।
[illegible] ॥"

इति [illegible] । [illegible]

*'मेषपृष्ठे तथा *सौरिः सिंहे च गुरुचन्द्रमाः ।
भास्करः श्रवणर्क्षे च *महामाघीति सा स्मृता ॥

तथा भविष्ये—

'वैशाखी कार्त्तिकी माघी तिथयोऽतीव पूजिताः
स्नानदानादिहीनास्ता न नेयाः पाण्डुनन्दन ॥'

तथा—

*'तिलपात्राणि देयानि कञ्चुकाः कम्बलास्तथा।'इ

माघपौर्णमानन्तराऽष्टमी माघी अष्टका, तन्निर्णयः श्चैद्युरन्वष्टकानिर्णयश्च पूर्वमुक्तः । मलमासे चैता न पत्तीस्येतत्सर्वं मार्गशीर्षप्रकरणेऽभिहितम् । तथा च सुन्वष्टकास्वप्यक्तापेषा आवश्यकी । 'हेमन्तशिशिरय ऋतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा' इत्याह लायनोक्तेः । तथा माघाष्टकां प्रक्रम्य—'तामेकाष्टकेत्य

दशी युक्ता' इति वाक्यात् इति नव्याः । *मेषपृष्ठे मेषराशौ *सौरिः शनिः । *महामाघीति । इयं च प्रयागेऽतिप्रशस्ता

"महामाघी प्रयागे तु नैमिषे फाल्गुनी तथा ।
शालग्रामे महाचैत्री कृताः पुंसां महाफलाः ॥"

इति गार्ग्योक्तेः । *तिलपात्राणीति । तिलपात्रदानमन्त्र

"देवदेव जगन्नाथ वाञ्छितार्थफलप्रद ।
तिलपात्रं प्रदास्यामि तवाग्रे संस्थितोऽहम् ॥
तिलाः काश्यपसम्भूतास्तिलाः पापहराः स्मृताः ।
तिलपात्रप्रदानेन मम पापं व्यपोहतु ॥"

तिलदानमन्त्रः—

"तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः ।
विष्णुप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ॥"

चक्षते' इत्यापस्तम्बवचनाच्चेत्यादि प्रयोगपारिजाते
म् । इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ द्विती
रिच्छेदे माघमासः समाप्तः ।

कुम्भे षोडश घटिकाः पुण्याः । शेषं प्राग्वत् ।
ल्गुनकृष्णाष्टम्यां विशेषः कल्पतरौ—

'फाल्गुनस्य च मासस्य कृष्णाष्टम्यां महीपते ।'

इत्युपक्रम्य—

'जाता दाशरथेः पत्नी तस्मिन्नहनि जानकी ।
उपोषितो रघुपतिः समुद्रस्य तटे तदा ॥
रामपत्नी च संपूज्या सीता जनकनन्दिनी ॥

फाल्गुनकृष्णचतुर्दशी*शिवरात्रिः । सा च के

गोदानमन्त्रः—

"गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥"

अथ कलशमन्त्रः—

"ओं पद्मनुमेयं स्वर्णबीजं तव प्रभो ।
दत्तं गृहाण देवेश पापं संहर सत्वरम् ॥"

इति माघः ।

*शिवरात्रिरिति । शिवरात्रिशब्दो योगरूढः । शिवरात्रि-
रिति योगः । तद्विशेषे च रूढिः । 'निर्मन्थ्येनेष्टकाः पचन्ति'
इत्यादौ निर्मन्थ्यशब्दस्य अचिरनिर्मथिताग्निपरत्वात् । अन्य-
था योगमात्रेण चिरनिर्मथितेनापि पचनप्रसक्तेः । एवं शिवरा-
त्रिरिति [illegible] शिवरात्रिः योगात् । '[illegible]'
इत्यादौ [illegible] योगेन [illegible]
[illegible] । किं च—

फाल्गुने शिवरात्रिनिरूपणम् ।

निबन्धनेषु प्रदोषव्यापिनी ग्राह्येत्युक्तं, केचित्तु निशी-
व्यापिनी । तत्राद्या माधवीये—

'त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु ।
भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् ॥'

स्मृत्यन्तरेऽपि—

'प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ॥'

अत्र प्रदोषो रात्रिः । उत्तरार्धे तस्या हेतुत्वोक्तेः । का-
मिकेऽपि—

"माघस्य कृष्णपक्षे या तिथिः सैव चतुर्दशी ।
शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनी ॥"

इति वाक्यं रूढिव्युत्पादकम् । अन्यथा माघादिपदानामुपलक्षण-
त्वापत्तेः ।

'तस्माच्छिवस्य या रात्रिः समाख्याता शिवप्रिया ।
तस्यां सर्वेषु लिङ्गेषु सदा संक्रमते हरः ॥'

इति तु योगस्यैवेति । अत एव रूढैव शिवरात्रिः । 'रथियोगमपहरति'
इति न्यायात् । अत एव 'विश एव साद्यस्कोपसदो द्वादशाहीनस्य'
इत्यादौ 'न हीनोऽङ्गप्रधानाभ्याम्' इति योगेनाहीनशब्दात्प्रवृत्तेः
लाभात् तत्र विकल्पेन द्वादशोपसत्त्वं स्यादहीनशब्दस्य
"अहः खः क्रतौ" इति व्याकरणसूत्रेण व्युत्पादनेन रूढ्यादेरनुप
इत्यथा द्विरात्रादावेव द्वादशोपसद उत्कृष्यन्ते, योगरूढ्योरर्थ
गोवन्द्रादिवत् रूढ्यवधारणस्याहीनशब्दस्य
क्रतौ रूढिः, किन्तु योगमात्रमिति देवाद्यर्थं पाराद्वन
यद्वनवैयर्थ्यापातात् । मते तु शिवरात्रिशब्दे लाक्षणिक एव,
यथादिशब्दवत् । अत्र निशीथव्याप्तिरेव निर्णायिका । पूर्वेद्युरेव

'आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी ।
तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमा ॥' इ
द्वितीयापि तत्रैव नारदसंहितायाम्—
'अर्धरात्रियुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥'
स्मृत्यन्तरेऽपि—
'भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥' इति ।
ईशानसंहितायाम्—
'माघकृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ॥' इति ।
'अर्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।
तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती ॥
नार्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।
नैव तत्र व्रतं कुर्यादायुरैश्वर्यहानितः ॥'
अर्धरात्रश्च द्वितीययामान्त्यतृतीययामाद्यघटीद्वयरूप
इति माधवः । वचनं तूक्तं प्राक् । एवं सति पूर्वेद्युरे-
वोभयव्याप्तौ पूर्वेव ।
'त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः ।
जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी ॥'
इति स्कान्दोक्तेः । दिनभुक्तिरस्तमयः ।

निशीथव्याप्तिः [illegible] दिवि चत्वारः पक्षाः ।
निशीथमदो [illegible] परन्तु

'जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।'

इति स्कान्दाच । दिनद्वये(१)निशीथव्याप्तौ हेमाद्रिमते पूर्वा ।

'अर्धरात्रात्पुरस्तात्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ॥'

इति माधववचनात् । मदनरत्नेऽप्येवम् । गौडा अप्येवमाहुः ।

निर्णयामृते तु सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव । अर्धरात्रव्यापित्वानि(२)कैमुतिकन्यायेन प्रदोषस्तावकामीत्युक्तम् । तत्र, अर्धरात्रस्य पूर्वं कर्मकालत्वोक्तेः । *परदिने प्रदोषनिशीथोभयव्याप्तिसत्त्वात्परैवेति तु माधवः । इदमेव च युक्तं प्रतीमः । परेद्युः प्रागुक्तार्धरात्रस्यैकदेशव्याप्तौ पूर्वेद्युः संपूर्णतद्व्याप्तौ च सत्यपि परेद्युः प्रदोषनिशीथोभययोगे पूर्वेद्युः संपूर्णव्याप्तेः पूर्वैव ।

'व्याप्यार्धरात्रं यस्यां तु लभ्यते या चतुर्दशी ।
तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ॥

पूर्ववत्तत्र विशेषः । हेमाद्रिमते इत्यरुचिः । सा च 'अर्द्धरात्रात्पुरस्ताच्चेत्' इति वाक्यस्य परेद्युर्निशीथव्याप्त्यभावेऽप्युपपत्तेः । तस्माद्यत्र पूर्वेद्युर्निशीथे परेद्युश्च प्रदोषे तत्र पूर्वेद्युरेव । 'अर्द्धरात्रात्पुरस्ताच्चेत्' इत्युक्तवाक्यात् ।

दिनद्वये निशीथव्याप्तौ त्वाह—*परदिने इति । परेद्युरित्यादिपाठोऽपि समञ्जसः । स्फुटश्च पूर्वेद्युरेव । निशीथव्याप्तौ त्वाह—

(१) रात्रेरष्टमो मुहूर्तो निशीथः ।

(२) कैमुतिकन्यायस्तु—यदि अर्धरात्रव्यापिन्या अपि ग्रहणं तदा किमु प्रदोषव्यापिन्याः शङ्का इति ।

तदूर्ध्वाधोन्विता मता सा कार्या व्रतिभिः सदा ॥'

इति माधवधृतेशानसंहितोक्तेः *पूर्वेद्युर्निशीथस्य परेद्युः प्रदोषस्येत्येकैकव्याप्तौ तु पूर्वैव । जयायोगस्य प्राशस्त्यात् । तदोक्तं नागरखण्डे—

'माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ।
अनङ्गेन समायुक्ता कर्तव्या सा सदा तिथिः ॥' इति ।

पाद्मे—

'अर्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ॥' इति ।

स्कान्देऽपि—

'भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥' इति ।
'महतामपि पापानां दृष्टा वै निष्कृतिः परा ।
न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवाम् ॥'

इति स्कान्दे दर्शयोगस्य निन्दितत्वाच्च । *यदा चतुर्दशी पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्ता परेद्युश्च निशीथादर्वागेव तदा परेद्युरेकव्याप्तिसत्त्वात् परैव ।

'माघासिते भूतदिनं हि राज-
न्नुपैति योगं यदि पञ्चदश्याः ।
जयाप्रयुक्तां न तु जातु कुर्या-
च्छिवस्य रात्रिं प्रियकृच्छिवस्य ॥'

इति वचनात् । एवं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्याप्तिसत्त्वात्पूर्वैव । *अनेन दिनद्वयेऽनिशीथव्या-

---

*पूर्वेद्युरित्यादि । दिनद्वये निशीथव्याप्त्यभावेऽपि-अपरेति

प्तौ*प्रदोषव्याप्त्या निर्णयः। दिनद्वये प्रदोषव्याप्तौ*निशीथेन निर्णयः। एकैकव्याप्तौ तु निशीथेन निर्णय इति। इयं च*रविभौमसोमवारेषु शिवयोगे चातिप्रशस्ता। हेमाद्रौ तीर्थखण्डे लैङ्गे—

'फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहिताः।
कालिकाभेश्वरं लिङ्गमर्चयन्ति शिवं शुभे॥
ते यान्ति परमं स्थानं सदाशिवमनामयम्॥'

[अथ]शिवरात्रिपारणानिर्णयः। शिवरात्रिपारणे तु विरुद्धवाक्यानि दृश्यन्ते। स्कान्दे—

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी।

तदेतदुपसंहरति-*अनेनेति। *निशीथव्याप्ताविति। निशीथव्याप्तौ चेति शेषः। *प्रदोषव्याप्त्येति। परेद्युरेवेत्यर्थः। *निशीथेनेति। पूर्वेद्युरेवेत्यर्थः। इदमेवोपसंहारफलं च माघमास-शिवरात्रौ एतन्निर्णयस्याचारार्थमित्यत्र स्पष्टीकरिष्यते। नन्वास्तु शिवरात्रिव्रते रात्रिः प्रधानम्।

"उदये अन्विता प्राह्याः काश्चिदस्तमयेऽन्विताः।
प्रतिभिन्नतिथयो यस्माद्धर्मविद्भिरिदं मतम्॥"

इति वचनाद्रात्रियोग एव प्रधानमित्याहुः। *रवीति।

"माघकृष्णचतुर्दश्यां रविवारो यदा भवेत्।
भौमो वाऽथ भवेद्देवि कर्तव्यं व्रतमुत्तमम्॥
शिवयोगस्य योगे तु तद्भवेदुत्तमोत्तमम्॥"

इति स्कान्दात्। त्रिस्पृशाऽपि प्रशस्ता।

"त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी।
अन्ते चैव सिनीवाली त्रिस्पृशामर्चयेद्धरम्॥"

इति वचनात्। माधवे एवमुपयोगः।

एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥
जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम् ॥' इति

तिथिमध्येऽपि पारणं स्कान्दे उक्तम्—

'उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा ॥
ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
संस्नातानि भवन्तीह भूतायां पारणे कृते ।
तिथीनामेव सर्वासामुपवासव्रतादिषु ॥
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ॥' इति

अत्र यामत्रयादर्वाक् चतुर्दशीसमाप्तौ तदन्ते तदूर्ध्वगामिन्यां तु प्रातस्ति*थिमध्य एवेति हेमाद्रिमाधवादयो व्यवस्थामाहुः । तन्न ।

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ॥'

इत्यादिसामान्यवचनैरेव व्यवस्थासिद्धेरुभयविधवाक्यवैयर्थ्यापत्तेः । वयं तु 'तिथ्यन्ते पारणं भवेत्'इति कृष्णाष्टम्यादिविषयमेव, न तु शिवरात्रिविषयम् । तदुपादानं तु पूर्वयुतत्वमात्रकथनार्थम् । कथमन्यथा स्कान्दे एव शून्यहृदयवाक्यवत्तिथिमध्ये पारणविधानं घटते । तस्मात् 'विना शिवचतुर्दशीम्' इति पर्युदस्तत्वाच्छिव-

---

*तिथिमध्ये एवेति । ननु तिथिमध्ये यदि कदाचित्पारणा न जाता तदा व्रतहानिप्रसङ्ग इति चेच्छृणु ।

"कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥"

रात्रः सर्वव्रतेषु तिथिमध्य एव पारणेति भूतः । शि-ष्टाचारोऽप्येवमेव । *दीपिकायां तु रात्रावपि तिथ्यन्त एवोक्तम्—'प्रातर्निषेधेऽन्ते निशीथेऽपि चाश्नीयात्' इति । मदनरत्नकालादर्शयोस्तु—

'या यामत्रयपर्यन्तं व्यापिनी चेत्परेऽहनि ।
दिवैव पारणं कुर्यात्पारणे नैव दोषभाक् ॥'

इत्युक्तम् । *तन्न । तिथिमध्ये पारणविधानाभिप्राये फलायोगाच्च तिथ्यन्तानपेक्षणा*दोषाप्रसक्त्या चतुर्थ-पादासंगतेः । तेनेदं शिवरात्रिभिन्नव्रतपरं ज्ञेयम् ।

इदं च व्रतं(१)संयोगपृथक्त्वन्यायेन नित्यं काम्यं च । तथा च माधवीये स्कान्दे—

इत्यादिवचनैर्गौणकालो विधीयते न तु शिवरात्रिविषयं तदुपादानं तु पूर्वग्रन्थस्याप्रकृतनार्थमिति । कालादर्शे तु ग्रन्थ-कृतो निर्भरः । केचित्तु यदि निःपक्षरात्रपूर्वकपारणसमाप्ता चतुर्दशी नास्ति यदि वा पारणदिने श्राद्धादिप्राप्तिः तदा तिथ्यन्ते पारणविधिः सार्थकः । अन्यथा 'संकटे विषमे प्राप्ते' इत्यादि वा-क्यात्तत्वपारणापत्तेरित्याहुः । *दीपिकायां त्विति । तुना-ऽरुचिः सूचिता । मदनरत्नं दूषयति—*तन्नेति । अत्र 'तन्न । तिथि-मध्ये पारणविधानाभिप्राये फलायोगाच्च । तिथ्यन्तानपेक्षणात् दोषाप्रसक्तौ चतुर्थपादासङ्गतेः । तेनेदं शिवरात्रिभिन्नव्रतपरं ज्ञेयम्' इति पाठः, तस्यायमर्थः—तिथिमध्ये इति । 'चतुर्दश्यां तु पारणम्' 'भूतायां पारणं कुर्यात्'इति वचनात् । निषिद्धे इति । 'विना शिवच-तुर्दशीम्'इति पर्युदासस्य निषेधे पर्यवसानात् । दूषणान्तरमाह—*दोषाप्रसक्त्यापीति ।

---

(१)—एकस्योभयार्थत्वे संयोगपृथक्त्वन्यायः ।

'परात्परतरं नास्ति शिवरात्रिव्रतात्परम्।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम्॥
जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः॥'

इत्यकरणे प्रत्यवायश्रवणात्

'वर्षे वर्षे महादेवि नरो नारी पतिव्रता।
शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत्॥'

इति वीप्साश्रुतेः

'अर्णवो यदि वा शुष्येत्क्षीयते हिमवानपि।
चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम्॥'

इति वचनाच्च नित्यता।

'मम भक्तस्तु यो देवि शिवरात्रिमुपोषकः।
गणत्वमक्षयं दिव्यमक्षयं शिवशासनम्॥
सर्वान्भुक्त्वा महाभोगांस्ततो मोक्षमवाप्नुयात्॥'

इति स्कान्दात्।

'द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकं तु वा।'

इति तत्रैवेशानसंहितावचनात् [च] काम्यता। तत्रैव—

'शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम्।
*आचण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम्॥'

अथ जागरोपवासपूजाः समुदिता व्रतं, न तु प्रत्येकम्। समुदितानां*फलसम्बन्धात्। यत्तु—

---

*आचण्डालेति। शिवरात्रिव्रते चण्डालादीनामप्यधिकार इति भावः। *फलसम्बन्धादिति।

"उपवासमात्रेण [illegible] न जागरात्।

'अथ वा शिवरात्रिं च पूजाजागरणैर्नयेत् ।'

तथा—

'अखण्डितव्रतो यो हि शिवरात्रिमुपोषयेत् ।
सर्वान्कामानवाप्नोति शिवेन सह मोदते ॥
कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान् ।
जागरं कुरुते तत्र स रुद्रसमतां व्रजेत् ॥'

इत्यादि स्कान्दं, तदू अनुकल्पत्वादशक्तपरम् ।

*माघेतरप्रतिमासशिवरात्रिस्तु–शिवरात्रिशब्दस्य माघकृष्णचतुर्दश्यामेव रूढत्वात्,

---

शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया ॥
अक्षयाल्लभते लोकान् शिवसायुज्यमाप्नुयात् ।"

इति नागरखण्डात्

"इत्थं च लिङ्गमभ्यर्च्य सोपवासः सजागरः ।
अजानन्नपि निष्पापो निषादो गणतां गतः ॥"

इति प्रकृतिविकृतिरूपार्थवादाच्च । अथ परस्परमहद्वीपारे प्रा- नाधान्येन आवेदनादिषड्भागवत्समप्राधान्यम् । कश्चिद्देवघोर-वासादिश्रवणं स्वरूपार्थानुवादः । वैश्वानरविद्युल्लयापात् । यथ विद्युल्लोकादिवाच्याकाशोदकपृथिवीरूपावयवषट्कयुक्तो विराड् वैश्वानरः । तत्र प्रत्येकं प्राचीनादिषड्भिर्विद्युदाद्युपास-नमभिधाय अन्ते 'वैश्वानरमुपासीत' इति समुदायोपासनाम्नानाद्वि-फलो मा प्रसाङ्क्षीदिति विद्युदुपासनादिवाक्यानां सम्भूया-नुवादकत्वाङ्गीकारात् ।

प्रतिमासशिवरात्रिविधिवाक्यं तु–माघेतरेति । नैवं नित्यभवं, द्वादशपाठात् । एवञ्च मतं चतुर्दश्यां कार्यमित्यनुवदन-

'माघमासस्य शेषे या प्रथमा फाल्गुनस्य च ।
कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तिता ॥'

इति हेमाद्रौ वचनाच्च नायं निर्णयस्तत्रेति रात्रौ यामचतुष्टये पूजाविधानाद्यस्मिन्दिने अधिका रात्रिव्याप्तिः सा ग्राह्या, साम्ये तु पूर्वेति हेमाद्रिरुचिवान् । वस्तुतस्तु प्रतिमासकृष्णचतुर्दश्यामपि—

'सर्वकामप्रदं कृष्णचतुर्दश्यां शिवव्रतम् ।'

इत्युपक्रम्य—

'चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभम् ।'

इति हेमाद्रौ कालोत्तरे शिवरात्रिशब्दप्रयोगात् कौण्डपायिनामयनाग्निहोत्रे नैत्यकाग्निहोत्रधर्मा इव तद्धर्मप्राप्तिः स्यादेव । अतः प्रदोषनिशीथोभयव्याप्त्यैव निर्णय इति वयं प्रतीमः । अस्यारम्भो हेमाद्रौ स्कान्दे—

'आदौ मार्गशिरे मासि दीपोत्सवदिनेऽपि वा ।
गृह्णीयान्माघमासे वा द्वादशैवमुपोषयेत् ॥'

तथा—

'दीपोत्सवे तथा माघे कृष्णा या तु चतुर्दशी ।
द्वादशस्वपि मासेषु प्रकुर्यादिह जागरम् ॥'
"*एवं द्वादशवर्षेषु द्वादशैव तपोधनान् ॥

वरयेदिति शेषः । चतुर्दश वा विप्रान् आचार्यं च वृत्वा—

---

* स्पष्टम् ।'द्वादशवर्षमित्यनुकल्पः । पूजामाह-अएवामिति । एतच प्रतिमासशिवरात्रिपूजनमुक्तम् । अथ वर्षशिवरात्रिव्रतप्रयोगः—

'कुम्भोपरि न्यसेद्देवमुमया सहितं शिवम् ।
सौवर्णेऽप्यथ वा रौप्ये वृषभे संस्थितं शुभे ॥''

इत्युक्तम्। हैमीं मूर्तिं संपूज्य स्थिरं चरं वा लिङ्गं घृतसहस्रस्नानपञ्चामृतदर्भान्वयमकुम्भैः संस्नाप्य सं जागरं कृत्वा परेद्युस्तिलान्सहस्रं शतं वा हुत्वा विप्रे वस्त्राणि द्वादश गाश्च दत्त्वा आचार्याय धेनुं शय्यां दत्त्वा विप्रान्भोजयेदिति मदनरत्ने उक्तम् ।

'विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम् ।'

इति लैङ्गात् त्रिपुण्ड्रं रुद्राक्षमालां च धृत्वा 'पूर्णतोयो ममपाप सम्पे भूतान्पहः सपा ।' इति मूर्वादिभ्यो मत्वं निवेपादकमुर्वा रिपूर्णं ताम्रपात्रं गृहीत्वा विश्वामुद्दिश्य विप्रमीरयेत्—

'शिवरात्रिव्रतं ह्येतत्करिष्येऽहं महाफलम् ।
निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते ॥
चतुर्दश्यां निराहारो भूत्वा शम्भो परेऽहनि ।
भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं भव शंकर ॥'

इति जलमुत्सृजेत् । ततो निशाकृतं विधाय शम्भो प्रथमप्रहरे' पूजां करिष्ये' इति संकल्प्य, प्रतिष्ठिते लिङ्गे अप्रतिष्ठिते तु तदेव कृतप्राणप्रतिष्ठे, शिवपञ्चाक्षरेण मन्त्रेण वैदिकैर्वा पौराणिकैर्वा मन्त्रैर्नाममन्त्रेण वा प्रणवादिचतुर्थ्यन्तेन आवाहनादिषोडशोपचारैः पूजयेत् । 'ॐ ह्रीं ईशानाय नमः' इति प्रथमप्रहरे क्षीरेण स्नपनम् ।

'शिवरात्रिव्रतं देव पूजाजपपरायणः ।
करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ॥'

इत्यर्घ्यं च दापयेत् । ततस्तन्मन्त्रजपेन हरकथाश्रवणादिना वा जागरणं कुर्यात् ।

'तज्जप्यजपनध्यानतत्कथाश्रवणादिकम् ।
उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः ॥'

इति वचनात् । एवं द्वितीयप्रहरे 'ॐ ह्रीं अघोराय नमः' इ
दध्ना स्नपनम् ।

'नमः शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह ॥'

इत्यर्घ्यदानं कार्यं, पूर्वोत्तरपूजादि पूर्ववत् । एवं तृतीयप्रहरे
'ॐ ह्रीं वामदेवाय नमः' इति घृतेन स्नपनम् ।

'दुःखदारिद्र्यशोकेन दग्धोऽहं पार्वतीपते ।
शिवरात्रौ ददाम्यर्घ्यमुमाकान्त गृहाण मे ॥'

इत्यर्घ्यं च दद्यात् । शेषं प्राग्वत् । एवं चतुर्थप्रहरे 'ॐ ह्रीं सद्यो-
जाताय नमः' इति मधुस्नपनम् ।

'मया कृतान्यनेकानि पापानि हर शङ्कर ।
शिवरात्रौ ददाम्यर्घ्यमुमाकान्त गृहाण मे ॥'

इत्यर्घ्यं च दद्यात् शेषं प्राग्वत् । ततः प्रभाते–

'अविघ्नेन व्रतं देव त्वत्प्रसादात्समापितम् ।
क्षमस्व जगतां नाथ त्रैलोक्याधिपते हर ॥
यन्मयाऽद्य कृतं पुण्यं तद्रुद्रस्य निवेदितम् ।
त्वत्प्रसादान्महादेव व्रतमद्य समापितम् ॥
प्रसन्नो भव मे श्रीमन्सद्गतिः प्रतिपाद्यताम् ।
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः ॥'

व्रतं समर्पयेत् । परदिने यथाशक्ति ब्राह्मणान्भोजयेत्

'संसारक्लेशदग्धस्य व्रतेनानेन शङ्कर ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥'

संनाध्य बन्धुभिः सह पारणं कुर्यादिति ।

*माघामावास्या युगादिः । तदुक्तम्—'माघमासे त्वमावास्या' इति । अन्यत्प्रागुक्तम् । तथान्योऽपि विशेषो विष्णुपुराणे—

'माघासिते पञ्चदशी कदाचित्
उपैति योगं यदि वारुणेन ।
ऋक्षेण, कालः स परः पितॄणां
न ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ ॥' इति ।

*वारुणं शतभिषक् । इदं च कुम्भादित्ये ज्ञेयमिति हेमाद्रिः । भारते—

'काले धनिष्ठा यदि नाम तस्मिन्
भवेत्तु भूपाल तदा पितृभ्यः ।
दत्तं तिलान्नं प्रददाति तृप्तिं
वर्षायुतं तत्कुलजैर्मनुष्यैः ॥' इति ।

---

*मार्येति । अथान्वयानेन ।
*वारुणमिति । पूर्वभाद्रपदोपलक्षणम् ।
'तत्रैव चेद्भाद्रपदास्तु पूर्वाः काले तदा यान्ति पितॄभ्यः ।
श्राद्धं परां तृप्तिमवाप्नुवन्ति युगान्तरस्ते पितरश्च तेन ॥'
इति वह्निपुराणे । अत्रैव वारुण्यादिवर्गे माघमध्ये मनसेदम् । ब्राह्मे—
'फाल्गुनस्यापरे पक्षे कुम्भस्थे दिवसाधिपे ।
जीवे धनुषि योगे च श्रोणे रविवासरे ॥
पुष्यर्क्षे यदि सम्पूर्णा गोविन्दद्वादशी तदा ।'
तिथितत्त्वे—
'फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥

प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा ।
तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे ॥'

इति नारदवचनात्प्रदोषव्यापिनीत्युक्तम् । हेमाद्रौ मदनरत्ने च भविष्ये—

'तस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे ।
गोमयेनोपलिप्ते च सचतुष्के गृहाङ्गणे ॥'

इत्यादिना तत्रैव सन्निधानाच्च । तेनेयं*पूर्वविद्धा-

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'

इति बृहद्यमब्रह्मवैवर्तोक्तेश्च । *दिनद्वये प्रदोषव्याप्तौ परैव । पूर्वदिने भद्रासत्त्वात्तत्र च होलिकानिषेधात् । तदुक्तं निर्णयामृते मदनरत्ने च पुराणसमुच्चये—

'भद्रायां दीपिता होली राष्ट्रभङ्गं करोति वै ।
नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत् ॥'

तथा—

'भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥'

तथा—

*'दिनार्धात्परतोपि स्यात्फाल्गुनी पूर्णिमा यदि ।

---

*दिवेति । 'सायाह्ने होलिकां कुर्यात्' इत्यत्र सायाह्ने अतीते इत्यर्थात्तद्विरोधः । इयमेव निर्णयामृतोपर्यरुचिः । *पूर्वविद्धेति । पूर्वेद्युरेव प्रदोषव्याप्तौ इति शेषः । दिनद्वये इत्याद्यग्रे उक्तेः । *प्रदोषव्याप्तौ । साकल्येनैकदेशेन वेत्यादि । अव्याप्तौ त्वाह— *दिनार्धादिति । अत्र—

मुखं स्पष्टत्वेस्पर्धः ।

'प्रदोषव्यापिनी चेत्स्यात्पदा पूर्वदिने तदा ।
भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम् ॥'

इति नारदवचनात्

'निशागमे प्रपूजयेत होलिका सर्वदा बुधैः ।
न दिवा पूजयेत् दुण्ढां पूजिता दुःखदा भवेत् ॥'

इति दिवोदासीये वचनात्

'सामप्रदोषयुक्ता चेत्प्रतिपत्तु सर्वतिथिः ।
भद्रामुखं परित्यज्य कार्या होला मनीषिभिः ॥'

इति विद्याविनोदेऽभिधानाच्च भद्रामुखं विहाय पूर्व-
दिन एव कार्यस्याशक्ता । (१) भद्रामुखं तु—'भाव्यन्तु पञ्च

न्ये स्थिति । कआसुरिति अहावि: । सा च भद्रामुखवाक्य-
रित्यागो न प्रामाणिक इति । अत्र पूर्वदृपविष्टिपुच्छे कार्या ।

'पृथिव्यां यानि कार्याणि शुभानि ह्यशुभानि तु ।
तानि सर्वाणि सिध्यन्ति विष्टिपुच्छे न संशयः ॥'

इति लल्लवचनात् । विष्टिपुच्छं तु ज्योतिषे—

'मेषार्कनखनाडीभ्यो भद्रापुच्छं घटीद्वयम् ।
क्रमेण पक्षे पक्षे च शुक्लकृष्णे निशेनरे ॥'

म २७,इष ५,अर्क १५,नाग ३० । पूर्वदले ३३३ मुखमदेशा-

(१) भद्रामुखपुच्छलक्षणं [illegible]-पूर्णिमायां [illegible]
पादान्ते घटीत्रयं पुच्छं, चतुर्थपादाद्यघटीपञ्चकं मुखम् । [illegible]
प्रमाणेन चतुर्दशीमितायां पूर्णिमायां पूर्णिमाद्यपुच्छे [illegible]
तिथ्यादिकान्तं घटीत्रयं पुच्छं [illegible]
यम् । [illegible]
पुच्छे [illegible] मुखम् । [illegible]

(यत्तु(१)वार्तिककारैर्होलिका आषाढमासेऽप्युक्तम् । तच्च देशाचारानुरोधेन आविष्कृतवचनानि अप्रसिद्धानि कृत्वा चिन्त्यं ज्ञेयम् । आर्षविरोधात् ।) इयमिदानीं मलमासे न भवति । इयं मन्वादिरपि । सा तु पौर्वाह्णिकी ग्राह्या । मलमासे सति मन्वादिश्राद्धं मासद्वये कार्यमित्युक्तं प्राक् । कृत्यचिन्तामणौ प्रोक्तं—

'नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥'

'तमग्निं त्रिः परिक्रम्य गायन्तु च हसन्तु च ।
जल्पन्तु स्वेच्छया लोका निःशङ्का यस्य यन्मतम् ॥'

ज्योतिर्निबन्धे—

'पञ्चमीप्रमुखास्तासु तिथयोऽनन्तपुण्यदाः ।
दश स्युः शोभनास्तासु काष्ठस्तेयं विधीयते ॥
चाण्डालसूतिकागेहाच्छिशुहारितवह्निना ।
प्राप्तायां पूर्णिमायां तु कुर्यात्तत्काष्ठदीपनम् ॥
ग्रामाद्बहिश्च मध्ये वा तूर्यनादसमन्वितः ।
स्नात्वा राजा शुचिर्भूत्वा स्वस्तिवाचनतत्परः ॥
दत्त्वा दानानि भूरीणि दीपयेद्धोलिकाचितिम् ।
ततोऽभ्युक्ष्य चितिं सर्वां साज्येन पयसा सुधीः ॥
नारिकेलानि देयानि बीजपूरफलानि च ।
गीतवाद्यैस्तथा नृत्यै रात्रिः सा नीयते जनैः ॥
तमग्निं त्रिः परिक्रम्य शब्दैर्लिङ्गभगाङ्कितैः ।
तेन शब्देन सा पापा राक्षसी तृप्तिमाप्नुयात् ॥' इति ।

होलिकादिने, करिसंज्ञकं तदुत्तरदिनं च शुभे वर्ज्यम् ।

'होलिकाप्रदहनभागुकायनं प्रेतदाहदिवसोऽत्र पञ्चमः ।
तत्परं च करिसंज्ञकं दिनं वर्जितं सकलकर्मसुभयम् ॥'

इति वचनादित्यपि विशेषस्तत्रैव ।

(१) अत्रायं धनुश्चिह्नान्तर्वर्ती भागः प्राचीनपुस्तकेष्वनुपलम्भात्प्रक्षिप्त इति गम्यते ।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः । सा औदयिकी ग्राह्या ।

'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ।'

इति भविष्योक्तेः । दिनद्वये तथात्वे पूर्वा ।

'वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥'

इति वृद्धवसिष्ठवचनात् । अत्र विशेषो हेमाद्रौ भविष्ये—

'चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने ।
यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः ॥
न तस्य दुरितं किंचिन्नाधयो व्याधयो नृप ॥' इति ।

तथा—

'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ।
कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः ॥
वन्दयेद्धोलिकाभूतिं सर्वदुःखोपशान्तये ॥'

मन्त्रश्च—

'वन्दितासि सुरेन्द्रेण ब्रह्मणा शंकरेण च ।
अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव ॥' इति ।

अत्र चूतकुसुमप्राशनमुक्तं तथैव पुराणसमुच्चये-

'वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्वसन्तसमये समुपस्थिते च ।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः । अत्र [illegible] ।
अत्र चन्दनं चूतपुष्पं प्राशयेत् ।
'ये पिबन्ति वसन्तादौ चूतपुष्पं सचन्दनम् ।
[illegible] ॥'
इति वचनात् ।

संप्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थ पुरुषोऽथ समाः सुखी स्यात् ॥'
मन्त्रस्तु—
'चूतमग्र्यं वसन्तस्य माकन्दं कुसुमं तव ।
सचन्दनं पिबाम्यद्य सर्वकामार्थसिद्धये ॥' इति ।
चैत्रामावास्या मन्वादिः । सा चापराह्णव्यापिनी ग्रा-
ह्या कृष्णपक्षस्थत्वात् ॥ इति फाल्गुनमासः समाप्तः ॥
एवं निरूपितमिदं गहनं तु काल-
तत्त्वं विचार्य यवनैश्च नयैश्च सम्यक् ।
तद्दोषदाद्दिमवहाय विवेचनीयं
विप्रैरितीयचिरतं प्रणतोऽस्मि तेषु ॥ १ ॥
मया सद्गाऽसद्गा यदिह गदितं मन्दमतिना
किमेतच्छक्यं वाऽध्वयसितुमपि स्वल्पमतिना ।
तथेदं वाक्रिविद्विदितमिह विख्यातमहिमा
प्रतापोऽयं सर्वो विकसति तु विश्वेश्वरगवोः ॥ २ ॥
यो भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।
योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनाऽस्तु सुकृती युपरामकृष्णः ॥ ३ ॥
इति श्रीमन्नारायणभट्टसूरिसुतरामकृष्णभट्टसुतदिन-
करभट्टानुजभट्टकमलाकरकृते निर्णयसिन्धौ
संवत्सरकृत्यनिरूपणं नाम द्वितीयः
परिच्छेदः समाप्तः ॥

एवं चैत्रकृष्णद्वितीयायां राजकृत्यमन्यदोऽवगन्तव्यम् ।
इति द्वितीयः परिच्छेदः समाप्तः ॥
—:o:—

